NOT TO BE ISSUED
OUT OF THE LIBRARY.

THE
ASIATIC SOCIETY OF BOMBAY
TOWN HALL, BOMBAY-1.

Digitized with financial assistance from
Hemendra Kothari
on 06 November, 2019

TRIVANDRUM SANSKRIT SERIES

No. LX.

THE LAGHUSTUTI

OF

SRÎ LAGHUBHATTÂRAKA

WITH THE COMMENTARY OF

SRI RAGHAVANANDA

EDITED BY

T. GANAPATI SASTRI

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

ROYAL ASIATIC SOCIETY

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1917.

[redacted]ts Reserved.)

OPL
SOSO.55 /
Log / Log
121658

00141658

PREFACE.

LAGHUSTUTI is a hymn on Bhârati, the 'Goddess of learning.' It is evident from the commentary published in this volume that the work contains within the small compass of 20 verses many essentials of the Sâkta doctrine. The work has also another large commentary in verse containing some 2000 slokas known as *Laghubrihmani* by Paramesvarâchârya, a manuscript of which has lately been obtained by me. From the commentator's words. 'श्रीमल्लघुभट्टारकः' we learn that the author was known by the name of Laghubhattâraka. The author of the commentary is Râghavânandamuni, a disciple of Krishnânanda. As the commentator of Paramârthasâra (Trivandrum Sanskrit Series No. XII) is also Râghavânandamuni and a disciple of Krishnânanda, it is very probable that both the commentaries were written by one and the same individual.

The edition of the work is based on the following three palm-leaf manuscripts in malayalam characters:—

1. क. Belonging to Mr. Panthalam Raja. It contains commentary alone.
2. ख. Belonging to Mr. Narayanan Moottatu of Ettumanur, containing text and commentary.
3. ग. Belonging to Kilimanur Palace, containing text and commentary.

The colophon at the end of the second manuscript shows that it was copied in the Kollam year 861, (1685 A. D.) while the other two manuscripts appear older than the second.

Trivandrum,
25th August 1917.

T. GANAPATI SÂSTRÎ.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६०.

141658

लघुस्तुतिः

श्रीलघुभट्टारकप्रणीता

श्रीराघवानन्दप्रणीतया वृत्त्या समेता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधिता ।

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY.

ला च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशिता ।

कोलम्बाब्दाः १०९३, क्रैस्ताब्दाः १९१७.

निवेदना

लघुस्तुतिर्नामेयं काचिद् भारतीस्तुतिः । विंशत्यैव श्लोकैः परिमितयाप्येतया शाक्ततन्त्रसिद्धा बहवोऽर्था यथा क्रोडीकृताः, तथा व्याख्याने सम्यक् प्रतिपादितम्। अस्या अतिविपुला उपद्विसहस्रश्लोकात्मिका काचिदन्या व्याख्या परमेश्वराचार्यप्रणीता लघुबृंहणीनामधेयास्माभिरुपलब्धास्ति।

अस्याः कवेर्नामधेयं लघुभट्टारक इत्येवमवगतं 'श्रीमल्लघुभट्टारकः' इति व्याख्यातृवाक्यात् ।

व्याख्याकारस्तु कृष्णानन्दशिष्यो राघवानन्दमुनिः । एषोऽस्मत्संस्कृतग्रन्थावलिप्रकाशितपरमार्थसारव्याख्याकाराद् राघवानन्दान्न भिद्यत इति कृष्णानन्दशिष्यत्वसाम्यादनुमीयते ।

एतत्संशोधनाधारभूतास्तालपत्रात्मकाः केरलीयलिपय आदर्शास्तावदेते—

१. पन्तळराजसम्बन्धी व्याख्यामात्ररूपः क.संज्ञः ।

२. एत्तुमानूर श्रीनारायणभूत्ततुसकाशादानीतो व्याख्यासहितः ख.संज्ञः ।

३. किळिमानूरराजगृहसम्बन्धी व्याख्यासहितो ग.संज्ञः ।

एषु मध्यमस्य प्रतिरूपणकालो ग्रन्थान्ते निर्दिष्टः ८६१तमः कोलम्बाब्द इति । अन्यौ त्वादर्शौ ततोऽपि वृद्धदर्शनौ ।

अनन्तशयनम्
२५-८-१९१७

त. गणपतिशास्त्री.

॥ श्रीः ॥

श्रीलघुभट्टारकप्रणीता

लघुस्तुतिः

श्रीराघवानन्दप्रणीतया वृत्त्या समेता ।

विश्वातीतचिदेकविग्रहवती विश्वात्मिकापीह या
भाति ध्वस्तभिदाभ्रमैः सुकृतिभिर्या शश्वदासेव्यते ।
विश्वासेन हृदाहमित्यवतु सा संसारदुःखार्दिता-
नन्यत्राशरणान् गृहीतचरणानस्मान्महेशप्रिया ॥

श्रीमल्लघुभट्टारकः[1] स्वयं निर्व्याजसमाराधितगुरुवरकरुणाकटाक्षलब्धपरशक्तिपातापरनामधेयपरसंविदात्मैक्यबोधसिद्धपरसंविदाभावः, प्रक्षीणाशेषदोषपाशपटलः प्रादुर्भूतपरमनिर्वृतिः परेषामप्यनया परदेवतातत्त्वविभूतिविभवविशेषप्रकाशिन्या स्तुत्या परसंविद्भावो भूयादिति तदज्ञानाज्जन्मादिमरणान्तदुःखसागरे निमग्नाज्जनानात्मदृष्टान्तेनावलोक्यानुकम्पाकुलहृदयस्तेषामाशिषमाशासानः स्तुतिं प्रस्तौति —

ऐन्द्रस्येव शरासनस्य दधती मध्येललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहस्थिता
छिन्द्याद् वः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥

---

१. 'लघुभट्टाचार्यः स्व' ख. पाठः. २. 'क्षवीक्षणल' क. ख. पाठः. ३. 'यः', ४. 'व्यः' क. पाठः.

G. P. T. 3132. 500 20-12-1092. B

ऐन्द्रस्येवेति ।

"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्"

इति प्रथमपठित आशीर्वाद इहादावौचित्यसरणिमनुसरति । वस्तु निर्देशस्तच्छेषतयैव क्रियते । तेन चास्य स्तोत्ररत्नस्य मन्त्रदेवतारूपो विषयश्च प्रकाश्यते । आशीर्वादेन प्रयोजनं च सद्योमुक्तिलक्षणं प्रकाश्यते । इह मायापाशबद्धास्तापत्रयतप्ततनवः सर्वे पशवः । तेष्वपि विधिमधिकृत्य स्वेच्छामात्रेण वा ये पशून् घ्नन्ति मनुष्यास्ते सर्वेऽप्यत्र गुरुदेवताभक्तिभाजोऽधिकारिण इत्यविशेषनिर्देशाद् गम्यते । यथोक्तं—

"सर्वोपायपरिभ्रष्टः कुलमार्गमुपाश्रयेद्"

इति । सर्वाधिकारित्वेन चास्य स्तोत्रतन्त्रस्यात्यन्तशुद्धत्वं भूरिफलत्वं च भागीरथीभारत्यादिप्रवाहादिवदाविष्कृतं भवति । वः युष्माकम् [illegible] छिन्द्याद् इत्युक्तिभङ्ग्या स्वयं परिसमाप्तसकलकामत्वात् परानुग्रहैकप्रयोजन एवेति स्वात्मेश्वरभावश्चाविष्कृतः, येनास्य स्तोत्रतन्त्रस्य सर्वैः स्वतःप्रमाणत्वेन ग्रहणं स्यात् । नोखल्वविमुक्तपाशपटलस्य नाविर्भूतभगवद्भावस्यानाप्तकामस्य वसिष्ठकुलोद्भवस्य चत्वारिंशत्संस्कारसंस्कृतस्य द्विजवरस्यापि वाक्प्रवाहवैतरणीं कृतपुण्यः कोऽपि नरो बुद्धिपूर्वमवतरति, यस्तु नात्महन्ता भवति । एतच्च पूर्वसूरिभिः सङ्ग्रहविस्ताराभ्यां भूरिशो विवृतमपि स्वशुद्धिपद्धतिमध्यासीनेन राघवानन्दनाम्ना मुनिमुख्येन प्राचीनलोकनिषेवितमपि भागीरथीभारत्याद्यम्भ इदानीन्तनैर्यथा स्वशुद्धये निषेव्यते, तथा सङ्ग्रहविस्ताराभ्यां यथाशक्ति विमृश्यते । इह द्विविधं वृत्तं मात्रावृत्तं वर्णवृत्तं चेति । तत्र चतसृभिश्चतसृभिर्मात्राभिः पञ्च गणा यत्र कल्प्यन्ते, तैश्च श्लोका ग्रथ्यन्ते, तन्मात्रावृत्तं, यथा पथ्यार्यादि । यत्र पुनस्त्रिभिस्त्रिभिर्वर्णैर्गणाष्टकं कल्पयित्वा तदवलम्बनेन ग्रन्थविरचनं तद् वर्ण-

---

१. 'त एव । आ', २. 'त एव । इ' ग. पाठः ३. 'तीशमा' क. ख. पाठः. ४. 'नास्य' ग. पाठः. ५. 'स्य चात्य' क. पाठः. ६ 'नजीवन ए' क. ख. पाठः. ७. 'त्मैश्वर्यभा' ग. पाठः. ८. 'तिसृ' क. पाठः ९. 'म्बेन', १०. 'विस्तरर' ग. पाठः.

वृत्तम् । तस्मिंश्चैकैकाक्षरादिक्रममितपादचतुष्काणामुक्तात्युक्तादिच्छन्दसामेकैकार्णाधिकाङ्घ्रीणामुत्कृत्यन्तानां षड्विंशत्यर्णमितपादान्तानामवतारः । ततः परं चण्डवृष्टिप्रयाहादिदण्डका भवन्ति । तेष्वेकोनविंशत्यर्णमितपादेऽतिधृतिसंज्ञे छन्दसि शार्दूलविक्रीडिताख्यवृत्तवानयं श्लोकनिचयः स्तुतिरूपो भवति । अत्रायमादिश्लोकस्त्रिपुरामन्त्रतद्देवतास्वरूपोपक्षेपकः । ततो द्वौ तत्प्रथमबीजदेवतालक्षणस्य तत्त्वस्य नादविन्दुप्राधान्येन बीजप्राधान्येन च सेवाफलप्रकाशकौ । चतुर्थस्तद्द्वितीयबीजदेवतासेवाफलार्थः । पञ्चमस्तृतीयबीजदेवतासेवाफलानग[1] । षष्ठस्तन्मन्त्रजपक्रमफलाख्यापकः । सप्तमस्तन्मन्त्रबीजत्रयसाधारणदेवताध्यानफलोद्दीपकः । ततस्त्रयः श्लोका एकैकबीजदेवताध्यानफलविषयाः । एकादशो द्वितीयबीजस्थनिष्कलाक्षरध्यानफलप्रतिपादकः । द्वादश एतत्सेवनस्य सार्वभौमसाम्राज्यादिदृष्टफलत्वं गमयति । त्रयोदश एतत्सेवनेन विनानन्तैरपि साधनान्तरैर्भोगमोक्षयोरिहैवानुभूतिर्दुर्लभा भविनामिति भाषते । चतुर्दश एतत्सेवाधिकारिसाधनफलविशेषप्रत्यायकः । पञ्चदशो देव्याः प्रपञ्चातीतरूपोपदेष्टा । षोडशः शब्दार्थात्मकप्रपञ्चमयरूपनिर्णयकर्णधारः । सप्तदशः कार्यविशेषकामुकैर्ध्येयं परमेश्वर्या विभूतिविशेषं तन्नाम चोपदिशति । अष्टादशस्तन्मन्त्रपारायणविषयः । एकोनविंशस्तन्नामपारायणविषयः । विंशः स्तोत्रस्यास्य त्रिपुरासंविद्विषयत्वेन स्वयं मन्त्रमयत्वेन च सद्भिरभ्यसनीयत्वख्यापकः । एकविंशो गुरुदेवताप्रसादबलेनैवाल्पश्रुतादप्यस्मत्तो बुद्धिपूर्वं झटिति निर्बाधमाविर्भूतत्वादेतदागमवत् स्वतःप्रमाणत्वेन ग्राह्यं महात्मभिरि(ती)मर्थं समर्थयते । एष स्तोत्रार्थसारसर्वस्वसंक्षेपः । अथ क्रमेणैकैकश्लोकार्थोऽपि तत्रोदीर्यते । एषा प्रमातृप्रमाणप्रमेयात्मकद्वैतप्रपञ्चरूपेणाखिलजनैरनुभूयमाना, न पुनर्देशकालादिव्यवहिता । असौ एतदाविर्भावतिरोभावस्थानत्वात् प्रमात्रादिप्रभेदविहीना अखण्डसंविदात्मकप्रपञ्चोत्तीर्णरूपा च । अत एव स्वभक्तिशून्यैः कैश्चिदप्यदृष्टतत्त्वा । त्रिभिः पदैः पुरैरुपलक्षिता ।

---

१. 'त्र त्रयः' ख. पा.. २. 'र्थसं' ख. ग. पाठः. ३. भावाव', ४. 'दृद' ख. ग. पाठः.

अत एव त्रीणि पुराण्यस्या इति त्रिपुरेति प्रसिद्धा देवी वः स्वोपासकानां युष्माकम् । अघम् आत्मतत्त्वाज्ञानमात्रपरमार्थम् आणवमायीयकार्मभेदेन त्रिविधं मलम् । सहसा अचिरेण कालेन । सदा पुनरुत्थानशून्यतया । छिन्द्यात् स्वेनात्मना प्रत्यक्षीभूय संहरेदित्यन्वयः । तथाचागमः —

"स्वरूपज्योतिरेवान्तः परा वागनपायिनी ।
यस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥"

इति । अन्तर्दृष्टस्वरूपायामिति योज्यम् । भगवद्गीता च —

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ।
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥"

इति । किं तस्याः स्वरूपमित्यत उक्तं ज्योतिर्मयी वाङ्मयीति । प्रकाशैकवपुषः सर्वभूतात्मनः परमेश्वरस्य स्वभावभूतो योऽनवच्छिन्नोऽहंविमर्शः, स ज्योतिःपदेन निगद्यते । यथोक्तं रहस्यागमे—'स्वसंवित् त्रिपुरा देवी'ति । तद्विमर्शाभिलापलक्षणोऽकारादिहकारान्ताशेषवर्णप्रत्याहाररूपोऽखिलाम्नायसारभूतः

"अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च"

इति श्रीभगवद्गीतोक्तनीत्या 'प्रकृतिरथ हसंज्ञा भवेद् व्याप्य विश्वमि'त्याचार्योक्तनीत्या च द्वन्द्वसमासत्वं नपुंसकत्वमेकत्वं च प्राप्ताकारहकारविग्रहोऽहंशब्दोऽनपायी परेति महामन्त्र इति च प्रसिद्धो वाक्शब्देन गृह्यते, 'तदात्मानमेवावेदहं ब्रह्मास्मी'ति श्रुतेः,

"पूर्णाहन्तात्मभावेन कृत्रिमाहन्तया विना ।
आत्मानमात्मना साक्षाद् यः पश्यति स पश्यति ॥"

इति च श्रीमदनुत्तरनिर्णयात् । एवञ्च एषासौ ज्योतिर्मयी वाङ्मयी चेत्यंशेन

"विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः ।
परादिशक्तिरूपेण स्फुरन्तीं संविदं नुमः ॥"

इति रहस्याम्नायार्थः प्रकाशितः । एषासावितीहोपात्ते देव्याः परापररूपे नागमेष्वेव प्रसिद्धे, किन्तूपनिषत्स्वपि—

"विश्वतः परमं नित्यं विश्वं नारायणं हरिम्"

इति, भगवद्गीतायां च सप्तमेऽध्याये—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो! ययेदं धार्यते जगत् ॥"

इत्यादि, त्रयोदशाध्याये च—

"इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते ।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥"

इत्याद्युपदिष्टे, आचार्यैश्च प्रपञ्चसारे—'प्रकृतिः पुरुषश्चैव नित्यावि'त्यादिनानुगृहीते । केन कर्मणा पुनर्देव्यघच्छेदनाभिमुखी भवेदित्यपेक्षायां तदुपायोपासनास्थानविषयसाधनान्याविष्कर्तुं ज्योतिर्मयं वाङ्मयं च देव्याः पदत्रयमाह—ऐन्द्रस्येत्यादिना । मध्येललाटं ललाटस्य मध्ये, आज्ञास्थाने । ऐन्द्रस्य शरासनस्येव प्रभां दधती । हृदयपद्मस्था भ्रूमध्यपद्मपर्यन्तदीप्तशुक्लरक्तकृष्णतेजोमात्रमूर्तिस्त्र्यवयवेन कामबीजेनोपास्येति यावत् । शिरसि द्वादशान्तपद्मे अनुष्णगोश्चन्द्रस्येव शौक्लीं कान्तिं सर्वत आतन्वती । आज्ञापद्मस्था तावद्व्याप्त शशिप्रभासदृशप्रभारूपा शक्तिबीजेनोपास्येति यावत् । हृदि हृदयपुण्डरीके । अहःस्थिता उदिता उष्णांशोः रवेः द्युतिः प्रभेव स्थिता मूलाधारपद्मस्था हृत्पद्मपर्यन्तप्रभा चोद्यदर्कसदृशज्योतीरूपा वाग्भवेनोपास्येति यावत् । यथोक्तं श्रीसौभाग्यहृदये—[1]

"योनौ कनकपुञ्जाभं हृदि विद्युच्छटोज्ज्वलम् ।
आज्ञायां चन्द्रसङ्काशं महस्तव महेश्वरि ! ॥"

---

१. 'च भूतिस' ख. पाठः.

इति । सोऽयं स्तुतिप्रकारः । मन्त्रोद्धारप्रकारस्तु — "यत्राद्यवृत्ते स्फुटम् । एकद्वित्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरैर्मन्त्रोद्धारविधिरि"त्यन्ते वक्ष्यमाणत्वाद्, अस्मिन् श्लोके आद्यद्वितीयतृतीयपादेषु क्रमेण आद्यद्वितीयतृतीयार्णतया श्रीबालाबीजान्युद्धृतानि । सर्वत इत्यत्र विसर्गश्च सौकारात् प्रागेव सकारस्य तदुत्थत्वादुद्धृतः । सर्वत इति तपरकरणेनानुत्तरमप्युद्धृतम् । तयोः पृथक्करणेन शुद्धादिभेदश्च सूचितः । "विशेषसहितो मन्त्रोद्धारविधिः कथित" इत्युक्तत्वाद् इहैव तद्विशेषाश्चोद्धृताः । कथम् । ऐ, ई, औ । ऐं, ई, औं । पैं, ईं, औं । ऐं, ईं, औः । इति शुद्धाभेदास्तावदत्रैवान्तर्भवन्तीति सहोद्धृताः । एवं सदा अहस्थिता अकारहकारयोः स्थिता । शिरस्यनुष्णगोर्बिन्दोर्हेतोः सर्वतः कान्तिं महाप्रकाशक्ष्मिर्शसमुल्लेखशक्तिशोभां दधतीति च सर्वमन्त्रबीजभूतो महामन्त्र उद्धृतः । ह्रैं क्लीं ह्सौः सर्वतः सर्वेषु बीजेषु हस्थिता इकारे स्थिता इति त्रिपुरावासिनीमन्त्र उद्धृतः । ह्रैं, ह्रीं, ह्सौ सर्वतः सहसा हकारसकाराभ्यां सह वर्तमानेति मध्यमचतुष्कूटत्रिपुराश्रीमन्त्रः । ह्सैं, ह्स्क्लीं, ह्सौः । सहसा सदाहस्थिता सदाहो दाहगुणवान् वह्निस्तस्मिन् रेफे स्थितेति मध्यमपञ्चकूटत्रिपुरादेवीमन्त्रः । ह्स्रैं, ह्स्क्लीं, ह्स्रौः । सर्वतः सहसा सदाहस्थिता क्लीं कान्तिं ककारलकाररूपिणीं कान्तिं शोभाहेतुमातन्वती चेति सर्वपञ्चकूटत्रिपुरासिद्धामन्त्रः । ह्स्क्लैं, ह्स्क्लीं, ह्स्क्लौः । तत्रैवानुष्णगोष्ठकारस्य शिरसि ऊर्ध्वस्थितडकारे निमित्ते च सर्वतः कान्तिं प्रभामातन्वतीति श्रीमद्द्वादशार्धकूटात्मा त्रिपुराविकामन्त्रः । ह्स्क्लैं, ह्स्क्लीं, ह्स्क्लौः । एते चत्वारः सादयश्च भवन्ति । सैं, स्ह्क्लीं, सौः । इत्यादि । तथा बालादयः षण्मन्त्रा विसर्गान्ता विन्द्वन्ता विन्दुविसर्गान्ता उभयाविकलाश्च स्युः । इत्यादि यथाश्रुतमूह्यम् । बालाप्रथमबीजान्त्यबीजाभ्यां विन्दुविसर्गान्ताभ्यां सर्वे स्वरा आविष्कृताः । कथम् । इवर्णावर्णयोर्गुणयोगादेकारो भवति । पुनरेकारस्य अवर्णेन वृद्धियोगादैकारः । तथाच

---

१. 'सिं', २. 'तः । स' क पाठः. ३. 'सहसाबी' ख. ग. पाठः. ४. 'ह्रैं क्लीं ह्सौः । स' ख. पाठः.

अ, आ, इ, ई, ए, ऐ इति षट् स्वराः, पञ्चदशो बिन्दुरूपः स्वरश्च प्रथमबीजेऽन्तर्भवन्ति । तथा उवर्णावर्णयोः गुणयोगादोकारो भवति । तस्य पुनरवर्णेन वृद्धियोगादौकारः । तथाचावशिष्टाः स्वरा उ, ऊ, ओ, औ इति चत्वारः षोडशस्वरात्मा विसर्गश्चान्त्यबीजेऽन्तर्भवन्ति । ऋ, ॠ इति स्वरौ रेफस्यैव रूपभेदौ ऌ, ॡ इति लकारस्य । प्रतिलोमाचरितो विसर्गो हकारः मध्यमबीजे ककारश्च । अत आद्यन्तार्णग्रहणे सन्दंशन्यायात् सर्वे हलो गृहीताः । सकारककाराभ्यां क्षकारश्चोपात्तः । एवं पञ्चाशद्वर्णमयी मातृका चात्रोद्धृता । मातृकोद्धरणे च सर्वमन्त्रयन्त्रतन्त्रवेदशास्त्रेतिहासपुराणकाव्यनाटकभाषाभेदगीतभेदस्तुतिभेदाः सूचिताः स्युः । सर्वस्यास्य तन्मयत्वात् । अत एवोक्तं— 'न मातृकापरो मन्त्रः' इति । एवं तृतीयबीजे सु, औ, जस्, इति प्रथमाविभक्तिरूपं लभ्यते । सा च प्रातिपदिकार्थमात्रनिष्ठेति द्वितीयाद्याः षड् विभक्तयोऽस्यामेवान्तर्भवन्ति । तत्तदवस्थाविशेषवतः प्रातिपदिकार्थस्यैव कर्मादिकारकतयावस्थितत्वात् । एवं सप्तविभक्तयोऽप्यस्यां त्रिपुरायामन्त्यबीजेनोद्धृताः । किञ्च पृथिव्यादिमायान्तानि यान्येकत्रिंशत्तत्त्वानि, तानीह सत्सदिति प्रतीतेः सर्वानुगतेन सकारेण गृहीतानि । औकारेण च शुद्धविद्यादिशिवान्तानि पञ्च तत्त्वानि गृहीतानि । तस्यानुत्तरानन्दोन्मेषोनताशक्तिसम्भवत्वात् स्वयं तदवयवित्वेन शक्तिविशेषत्वाच्च पञ्चशक्तिरूपत्वम् । ताश्चान्ततश्चिदानन्देच्छाज्ञानक्रियाशक्तय एव, याः शिवादिशुद्धविद्यान्तपञ्चतत्त्वात्मिका भवन्तीति । षट्त्रिंशत्तत्त्वानि चान्त्यबीजे विराजन्ते । यथोक्तं—

"यथा न्यग्रोधबीजस्थशक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं जगदेतच्चराचरम् ॥"

इति । ऊर्ध्वाधो बिन्दुरूपेण विसर्गेण सर्वतत्त्वाविर्भावतिरोभावस्थानभूतं परमशिवपराभट्टारिकाख्यं प्रधानतत्त्वं च सङ्गृहीतमित्येषा दिक् । एवं त्रिभिः स्थानै रूपैर्बीजैश्च पुरापरपर्यायैः पदैर्युक्तत्वात् त्रिपुरेति निरुक्तं भवति । एतच्च निर्वचनान्तरोपलक्षणम् । कथं, त्रिभ्यस्तेजोबन्धेभ्यः पुरा भावात् त्रिपुरा । 'सदेव सोम्येदमग्र आसीद्',

'एकमेवाद्वितीयं', 'तदैक्षत', 'तत्तेजोऽसृजत', 'तदपोऽसृजत', 'ता अन्नमसृजन्ते'ति श्रुतेः । तेजआदित्रिरूपत्वाद्वा कारणव्यतिरेकेण कार्याभावाद् 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' 'एवं सोम्य ! स आदेशः' इति श्रुतेश्च । तथा त्रिभ्यो लोकेभ्यः पुरा भावात् तद्रूपत्वाद्वा, एवं त्रिभ्यो वेदेभ्यः पुरा भावात् तत्त्रिरूपत्वाद्वा, त्रिभ्यो देवेभ्यः पुरा भावात् तद्रूपत्वाद्वा, त्रिभ्यः सूर्याग्नीन्दुभ्यः पुरा भावात् तद्रूपत्वाद्वा त्रिभ्यः प्रमात्रादिभ्यः पुरा भावात् तद्रूपत्वाद्वा तिसृभ्यः शक्तिभ्यः पुरा भावात् तद्रूपत्वाद्वा इत्यादि। इह महामन्त्रः पुरा अस्या एव त्रिपुराख्या यतस्त्रीणि बीजानि पश्यन्तीमध्यमावैखरीरूपाणि। इह सर्वान्तरात्मनः परमेश्वरस्यानवच्छिन्नाहन्तापरामर्शमय्यनपायिनी चाद्या । द्वितीया देहादिपरिच्छिन्नाहन्तापरामर्शमयी । तृतीया देहादिमायाप्रमातृभ्योऽन्यत्र नीलसुखादौ स्वात्मन्येवेदन्तापरामर्शमयी । चतुर्थी तद्विस्तारमयीति भेदः । पुरैस्त्रिभिरित्यनुक्तिः पदैस्त्रिभिरित्युक्तिश्च श्रुतिप्रत्यभिज्ञापनार्था । 'चत्वारि वाक् परिमिता पदानी'त्यादिका श्रुतिरत्रानुसन्धेया । अत्र स्तुतौ त्रिपुराशब्दो देवतावाची । इतरत्र मन्त्रवाचीति द्रष्टव्यम् ॥ १ ॥

एवं त्रिपुरामन्त्रदेवतातदुपासनास्थानफलानि सामान्येनोपदिश्याथ तद्विशेषोपादिदिक्षुः प्रथमं नादबिन्दुबीजभेदेन त्रिधा स्थितस्य प्रथमबीजस्य निष्कलसकलनिष्कलसकलभेदेन त्रिधावस्थितदैवतस्य माहात्म्यं द्वाभ्यां श्लोकाभ्यां कथयति —

या मात्रा त्रपुसीलतातनुलसत्तन्तूत्थितिस्पर्धिनी
वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयम् ।
शक्तिः कुण्डलिनीति विश्वजननव्यापारबद्धोद्यमां
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥ २ ॥

या मात्रेति । अनयोराद्येन सनादस्य विन्दोः सदैवतस्योपासनाफलमघच्छेद एवेति वर्णयति । यद्यप्यघच्छेदः पूर्वश्लोके त्रिपुरा-

१. 'ला' ग. पाठः.

मन्त्रसामान्यस्य फलत्वेनोपदिष्टः, तथापीह तद्विशेषस्य फलचिन्तार्थमयमारम्भ इति सनादबिन्दूपासनस्य मोक्ष एव फलमित्युपदिश्यते। देवीति संबोधनमुत्तरश्लोकादिहापि ग्राह्यम्। विश्वसर्गस्थापनसंहरणतिरोभावानुग्रहलक्षणैः पञ्चकृत्यैः स्वात्मन्येव विहरतीति वा स्वप्रकाशसंविद्रूपेति वा देवी, तस्याः संबोधनं तथा। यद्वा देवस्य स्वप्रकाशैकतनोर्महादेवस्य सर्वान्तरात्मनः स्वभावभूतानवच्छिन्नाहंविमर्शमयी देवी। शून्यबुद्धिप्राणदेहलक्षणमायाप्रमातृतदन्तर्गतसुखदुःखनीलपीताद्यर्थतज्ज्ञानानां स्वाभासावेशवशेनाहम्ममेत्यादिरूपेण प्रकाशयित्री वा देवी। तव संबन्धिनि त्वद्विषये प्रथमे वाग्बीजे वाग्भवाख्ये बीजे मूलाधारचतुर्दले पद्मकर्णिकागतनवयोनिमध्ययोन्यात्मनि त्रिकोणाकारे। स्थिता तन्मध्यस्था सनादबिन्दुरूपा। या मात्रा कला। त्रपुसीलतातनुलसत्तन्तूत्थितिस्पर्धिनी। त्रपुसीलता उर्वारुवल्ली, तस्यास्तनोर्लसन्ती या तन्तूत्थितिस्तन्तोरुदयः उत्थितो वृत्ताग्रसूक्ष्मो गुणः, तया स्पर्धिनी सदृशी समानसंस्थानज्योतीरूपा कुण्डलिनी शक्तिरिति शास्त्रेषु प्रसिद्धा। तां विश्वजननव्यापारबद्धोद्यमां परापश्यन्त्यादिरूपिणीं पञ्चाशद्वर्णक्रमेण शब्दार्थप्रपञ्चजनयित्रीम्। सदा सवनत्रयेऽपि। ज्ञात्वा स्वात्मतयोपास्य। नरा जननीगर्भे स्थितं यदभैकत्वं, तन्न पुनः स्पृशन्ति न प्राप्नुवन्ति, स्वयं विश्वजनकजननीभावं गतत्वात्। इत्थं मन्महे निश्चिनुमः। ते भवद्भक्ता वयम्॥ २॥

एवं सनादबिन्दूपासनस्य मोक्षफलत्वमुक्त्वा बीजोपासनस्य तत्साधनज्ञानसाधकैतमवाक्सिद्धिरूपं फलं कैमुतिकन्यायेन कथयति—

दृष्ट्वा सम्भ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं
येनाकूतवशादपीह वरदे! बिन्दुं विनाप्यक्षरम्।

---

१. 'प', २. 'स्वप्रभा', ३. 'सीना न' ख. पाठः, ४. 'कत्वत' ग, 'कम' क. पाठः,

तस्यापि ध्रुवमेव देवि! तरसा जाते तवानुग्रहे
वाचः सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्रोदरात् ॥

दृष्ट्वा संभ्रममिति । वरं साधकाभिमतार्थसर्वस्वं ददातीति वरदा, तत्र संबोधनं वरदे! इति । इह लोके । येन पुंसा सहसा अकस्मात् । संभ्रमकारि सर्पादिकं वस्तु दृष्ट्वा । आकूतवशाद् अभिप्रायान्तरवशाद् भयादिहेतोरपि । ऐ ऐ इति बिन्दुं विनाप्यक्षरम् आद्यं व्याहृतं, तस्यापि तवानुग्रहे जाते

"अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः"

इति न्यायात् त्वत्कटाक्षपाते जाते सति । तरसा झटिति । सूक्तिसुधारसद्रवमुचः सूक्तयः सलक्षणाः सुमधुरा उक्तयः, ता एव सुधारसद्रवः, तं मुञ्चन्तीति तथा । एवंभूता एव वाचो वक्त्रोदरान्निर्यान्ति स्त्रयमेव प्रादुर्भवन्ति । ध्रुवं निश्चितमेतत् । तदेककामनया यथाविधि क्रमं बीजमभ्यस्यतः किं पुनरित्यप्यर्थः ॥ ३ ॥

एवं द्वितीयबीजेऽप्येकदेशस्यापि सारस्वतत्वं, किं पुनः समस्तस्येत्याशयेनाह —

यन्नित्ये! तव कामराजमपरं मन्त्राक्षरं निष्कलं
तत् सारस्वतमित्यवैति विरलः कश्चिद् बुधश्चेद् भुवि ।
आख्यानं प्रतिपर्व सत्यतपसो यत् कीर्तयन्तो द्विजाः
प्रारम्भे प्रणवास्पदं प्रणयिनीं नीत्वोच्चरन्ति स्फुटम् ॥

यन्नित्ये इति । हे नित्ये! कालत्रयानवच्छिन्नचिद्रूपे! यत् कामराजं कामराजसंज्ञम् । अपरं द्वितीयमन्त्राक्षरम् । निष्कलं ककारलकाराभ्यां रहितमपि । सारस्वतं सरस्वतीप्रसादकरमिति चेद् भुवि कश्चिदवैति, स विरलोऽल्पः बालकोऽपि बुधो भवति । कुतः, प्रतिपर्व प्रत्यमावासि । सत्यतपसः ऋषेः । आख्यानं कीर्तयन्तो द्विजाः यद्

---

१. 'सबी', २. 'त्यर्थः' ग. पाठः.

अक्षरम् । प्रणवास्पदप्रणयिनि प्रणव एव यदास्पदमधिष्ठानं तस्मिन् प्रणयिनि सापेक्षे प्रारम्भे । ईं नीत्वा ईं इत्येतावन्मात्राकारं कृत्वा स्फुटमुच्चैरुच्चरन्ति । प्रणवेन सहैकार्थत्वादेकप्रयोज्यत्वाच्चास्य त्रिपुरासरस्वतीतत्त्वबोधफलत्वं निश्चीयत इत्यभिहितं भवति । तथाच श्रुतिः— 'यस्तित्याज सचिविदं सखायं, न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं शृणाति, नहि प्रवेद सुकृतस्य पन्थाम्" इति । अयमर्थः— वाचि मन्त्रबीजविशेषेऽपि । सचिविदं समवेतं नित्यसम्बन्धिनम् । सखायं समानं ख्याति अर्थविशेषं प्रकथयति सखा, तम् ऐक्येन पठितमेकार्थनिष्ठं च वर्णम् । यस्तित्याज त्यजति । तस्य भागः तज्जप्तॄणां यत् फलं तद् नास्ति नैव भवति । तदेवोदाहृत्य दर्शयति — यदीमिति । ईं इत्येतद्वर्णरूपं यः शृणोति आचार्यसकाशाद् गृह्णाति, स यद् यदि । अलर्कं ककारलकाराभ्यां रहितम् । शृणोति ईं इत्येव मन्त्रत्वेन गृह्णाति । तर्हि सुकृतस्य कामबीजजपसंभूतस्य पुण्यस्य पन्थां पन्थानं मार्गं फलं त्रैलोक्यवशीकरणलक्षणम् । नहि प्रवेद नानुभवति । किन्तु सर्वद्वैतप्रपञ्चदर्शनलक्षणबन्धविमुक्त एव भवेत् । अस्य प्रणवेन सहैकार्थत्वादेकफलत्वमवश्यम्भावि । तदेकार्थत्वं च सत्यतपसः आख्यानारम्भे तारस्थाने तस्यैव सर्वैर्ब्राह्मणैरभिषिक्तत्वादवधार्यते । प्रणवश्चोपनिषदा मोक्षैकफल आत्मतत्त्वैकविषयश्चोपदिष्टः — 'ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुञ्चथ, अमृतस्यैष सेतुरि'ति । यद्वा ईं शृणोति स यद्यलकं शृणोति, तर्हि सुकृतस्य सर्वस्य पुण्यस्य । पन्थानं ब्रह्मेन्द्ररुद्रादिपदमपि । नहि प्रवेद प्रकृष्टं बहु वेद न बहुमन्यते । स्वयं ब्रह्मानन्दमिहैवानुभवतीत्यर्थः । अथवा स सुकृतस्य पन्थानमपि नहि प्रवेद, किं पुनर्दुष्कृतस्य पन्थानम् । उभाभ्यां सफलाभ्यां विहीनो मुक्तो भवतीत्यर्थः ।

"अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ॥"

इति । अथवा यदीमित्येतदलकं शृणोति, तर्हि सुकृतस्य शोभनानि कृतानि यज्ञदानतपांसि यस्य तस्य । सफलीभूतसर्वसत्कर्मणस्तस्य

पन्थानं वर्त्म सञ्चारमार्गं देहं वृत्तं वा। नहीह प्रवेद कश्चिद् अपूर्व-दर्शन एष स्यादित्यर्थः। 'सर्वं तदभिसमेति, यत् किञ्च प्रजाः साधु कुर्वन्ति, यस्तद् वेद, यत् स वेद' इति श्रुतेः। सर्वकर्मणां ब्रह्मविद्याफलत्वम्। सा चैतदभ्यासिन इहैव वेदान्तश्रवणादीनां दृष्टफलत्वात् समुपजायत इत्याशयः। स्मृतिश्च —

"मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥"

इति॥ ४॥

अथ तृतीयबीजोपासनफलमाह —

यत् सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधै-
स्तार्तीयं तदहं नमामि मनसा त्वद्बीजमिन्दुप्रभम्।
अस्त्वौर्वोऽपि सरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गौश्शब्दो गिरि वर्तते स नियतं यो गं विना सिद्धिदः॥५॥

यदिति। नित्ये! इति सम्बुद्धिरत्रापि ग्राह्या। यत् सद्यः अचिरेण कालेन। वचसां प्रवृत्तिकरणे कवित्वकरणे। बुधैः दृष्टप्रभावं दृष्टसामर्थ्यम्। यच्चेन्दुप्रभं, तत्प्रभासदृशतेजोमूर्तेर्वाचकम्। तार्तीयं तृतीयं त्वद्बीजम्। सदैव तन्नमामि। किमर्थमित्यत उक्तम् — अस्त्वित्यादि। अस्तु औः वः अपि सरस्वतीम् अनुगतः जाड्याम्बुविच्छित्तये गौश्शब्दः गिरि वर्तते सः नियतं यः गं विना सिद्धिदः इति पदच्छेदः। यो गौरिति शब्दो भूत्वा गिरि सरस्वत्यां नियतं वर्तते नियमेन वाचको भवति, यश्च गं गकारं विना सिद्धिदः सरस्वतीप्रसादकरो मन्त्रविशेषो भवति,

"सन्ध्यक्षराः स्युश्चत्वारो मन्त्राः सर्वार्थसाधकाः"

इत्याचार्यवचनात्। व इति युष्मच्छब्देन देवी गृह्यते। वो युष्माकं सम्बन्धिनीं सरस्वतीम् अनुगतः भवत्यास्तृतीयबीजगतः स औः

---

१. 'र्थः। तथाच श्रुतिः—स', २. 'ति। स' ग. पाठः.

औरिति शब्दोऽपि नो जाड्याम्बुविच्छित्तये मोहप्रवाहसंहाराय अस्तु। लिङर्थे लोट्। नियोगे च लिङ्। अवश्यं भवत्येवेति मनसा निश्चयेन। सकारयुक्तस्तु किं पुनरित्यप्यर्थः। एवं या मात्रेति चतुर्भिः श्लोकैः शुद्धा च पृथगुपदिष्टा ऐं ईं औः इति। नाहं कवितामात्रफलं तृतीयं बीजमुपगच्छामि, तस्या एतन्नान्तरीयफलत्वात्। किन्तु अशेषानर्थबीजभूताविद्यानिवृत्तिफलमुपगच्छामीत्यभिप्रायः॥ ५॥

कथं पुनरेतानि बीजानि जप्तव्यानि, किंकामैः कैर्वा जप्तव्यानीत्यत्राह —

एकैकं तव देवि! बीजमनघं सव्यञ्जनाव्यञ्जनं
कूटस्थं यदि वा पृथक् क्रमगतं यद्वा स्थितं व्युत्क्रमात्।
यं यं काममवेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम्॥ ६।

एकैकमिति। हे देवि! तव संबन्धि बीजम् एकैकं सव्यञ्जनाव्यञ्जनं सव्यञ्जनमव्यञ्जनं च वा। सव्यञ्जनत्वेऽपि कूटस्थं ह्यादिक्रमेण षड्व्यञ्जनयुक्तं वा। तत्रापि पृथक् पृथग्वा। अपृथक्त्वेऽपि क्रमगतं वा। यद्वा व्युत्क्रमात् स्थितम्। यं यं कामं धर्मादिकम् अवेक्ष्य येन केनापि वा विधिना विधानेन अङ्गन्यासादिन्यासक्रमेण वा श्रीगुरुपादुकामात्रस्मरणक्रमेण वा किमप्यकृत्वैव वा। स्वेन रूपेण जप्तं, स्ववाच्यदेवतारूपेण चिन्तितं, निष्कलतया सकलनिष्कलतया सकलतया ध्यातं वा। नृणां सर्वेषां मनुष्याणां स्त्रीशूद्रादीनामपि, न ब्राह्मणपरिव्राजकादीनामेव। तं तं कामं कामितमर्थम्। समस्तमशेषम्। तरसा अस्मिन्नेव जन्मनि, सफलीकरोति जप्तं चिन्तितं वेति मन्त्रदेवतैक्याभिप्रायेणोक्तम्। यथागमः —

"देवतागुरुमन्त्राणां भावयन्नैक्यमात्मना"

इति। सर्वाधिकारित्वे हेतुरनघमिति। स्वतः शुद्धत्वाद् भागीरथीतोयवत् सर्वसेव्यत्वमुचितमिति भावः। इह शुद्धाभेदाश्चत्वारः पुरोक्ताः। कलसुन्दर्यादयः षट् चाविष्कृताः। तेषु च शुद्धबिन्दुन्तादिभे-

१. 'क्रमम्' ख. पाठः.

देन चातुर्विध्यमिति चतुर्विंशतिभेदाः । तत्रापि द्यादिकूटचतुष्के सादिहादिभेदेन द्वैविध्यमिति तेषामष्टधा भेदाः । तेषु च प्रत्येकं चतुर्धा भेद इति चत्वारिंशत् । शुद्धाभेदाश्च[1] चत्वारः । तेन चतुश्चत्वारिंशन्मन्त्राः । तेषु त्रयाणां बीजानां पृथक् पृथग् जपे न क्रमाक्रमचिन्ता । बालादिबीजानां शुद्धादिभेदेन प्रत्येकं चातुर्विध्यम् । द्यादिकूटेषु प्रत्येकं हादित्वं सादित्वं च तत्रापि ग्राह्यम् । यदा समुदायजपस्तदा सृष्टौ क्रमाज्जपः । संहारे स्थितौ चाक्रमतः । तत्रान्त्याद्यबीजान्तत्वे संहारो द्वितीयबीजान्तत्वे स्थितिः । तदेतदभिप्रेत्याहुः पुराविदः—

"आदिमादिमनादिं च मध्यं मध्यममध्यमम् ।
अन्त्यमन्त्यमनन्त्यं च त्रिपुरा शीघ्रसिद्धिदा ॥"

इति ।

आदिनाथ ऋषिस्त्वेषां लैपेयं छन्द उच्यते ।
देवता त्रिपुरा देवी द्विरुक्तैः स्वैः षडङ्गकम् ॥
धर्मवाक्सिद्धिकामानां जपे सृष्टिक्रमो भवेत् ।
अर्थकामार्थिनां गीतो जपे सन्धिः स्थितिक्रमः ॥
मुमुक्षूणां तु सर्वेषां संहारक्रम ईरितः ।
मन्त्राक्षरन्यासविधावपि न्यायमिमं विदुः ॥

ऐं अण्डजे अञ्जजानन्ददेवि ! नु हि क रि आज्ञां पूजयामि । ऐं[3] परायै श्रीगुरुपादुकापङ्क्तयै नमः । क्रीं अपरायै, सौः परापरायै, ऐं अनन्तानन्दनाथदेव! अनन्तानन्दनाथदेवि! श्रीगुरुपादु० नमः । क्रीं अवतारनाथदेव! अवतारनाथदेवि ! श्रीगुरुपादु० नमः । सौः श्रीसिद्धनाथदेव! श्रीसिद्धनाथदेवि! श्री (गुरु)पादु० नमः । पुनः परमगुरुपादुकानाथदेवीपदयुक्ता । पुनः स्वगुरुपादुकेति नव श्रीगुरुपादुका इह ज्ञेयाः । ऐं रक्तचरणाभ्यां नमः । सौः शुक्लचरणाभ्यां नमः । क्रीं रक्तशुक्लचरणाभ्यां नमः । ऐं क्रीं सौः रक्तशुक्लमिश्रचरणाभ्यां नमः । इति रहस्यचरण-

---

१. 'श्चत्वा' ख. ग. पाठः. २. 'रं' ग. पाठः. ३. 'ऐं श्रीप', ४. 'नन्तना', ख. पाठः.

चतुष्टयं च मूर्धनि श्रीगुरुपादुकान्ते वामदक्षिणमध्यसर्वोर्ध्वप्रदेशेषु द्वादशान्तस्थसहस्रदलपद्मकर्णिकायां स्मृत्वा विन्यस्याधारे गणेशं, हृदि सपरिवारां देवीं च मूलेन नत्वास्त्रमन्त्रेण करतलशुद्धितालत्रयदिग्बन्धनाग्निप्राकारान् विधाय नाभिहृद्भ्रूमध्येषु बालाबीजानि विन्यस्य हृदयं स्पृष्ट्वा तां चतुर्वारमावर्त्यान्ते श्रीत्रिपुरेश्वरि! आत्मानं रक्ष इत्यात्मरक्षां कृत्वा, रेचकादिक्रमेण त्रिषड्द्वादशाभ्यस्तं मूलबीजैः प्राणायामत्रयं कृत्वा समस्तव्यस्तमूलबीजैश्चतुर्वारं व्याप्य शक्त्यण्डमायाण्डप्रकृत्यण्डपृथ्व्यण्डमात्रपरमार्थं सामान्यकारणसूक्ष्मस्थूलशरीरचतुष्कमुत्पाद्यानुलोमविलोममूलपुटिकां मातृकां विन्यस्य

"नाभेरथाचरणमा हृदयाच्च नाभि
मूर्ध्नस्तथाहृदयमित्यमुना क्रमेण ।
बीजैस्त्रिभिर्न्यसतु हस्ततले च सव्य-
दक्षाहये द्वितयमित्युभयोस्तृतीयम् ॥
मूर्धनि गुह्ये हृदये नेत्रत्रितयेऽपि कर्णयोरास्ये ।
अंसद्वये च पृष्ठे कोर्परयोर्नाभिमण्डले न्यस्येत् ॥"

इत्याचार्योपदिष्टक्रमेण मन्त्राक्षराणि तनौ न्यस्याङ्गषट्कमृष्यादिन्यासं च न्यस्य ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, श्रीत्रिपुरादेवीप्रसादसिद्ध्यर्थे विनियोग इति स्मृत्वा आं ह्रीं क्रों य- र- ल- व- श- ष- स- हौं- सं- हं- सः श्रीत्रिपुरादेव्याः प्राणा इह प्राणाः । एवं श्रीत्रिपुरादेव्या जीव इह स्थितः । एवं श्रीत्रिपुरादेव्याः सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा इंसः सं लं इति प्राणप्रतिष्ठां कृत्वा अक्षस्रक्पुस्तकाभयवरमुद्रा अक्षस्रजे नमः पुस्तकाय अभयाय वरदाय इति विरचय्य । ऐं इति योनिमुद्रां च बद्ध्वा ध्यात्वा यथाविधि षोडशभिः पञ्चभिर्वा मानसोपहारैरभ्यर्च्य ब्रह्मार्पणमनुना ब्रह्मार्पणम् आत्मार्पणमनुना आत्मार्पणं च कृत्वा मूलेनैक्यमुपगम्य स्वयं देवतामूर्तिर्भूत्वा गुरोर्गृहीतां सुगन्धालिप्तां सुधूपितां चाक्षमालामादाय मन्त्रजपं कुर्यात् । स च जपस्त्रिविधः, वाचिकोपांशुमानसभेदात् । यथोक्तं —

---

१. 'ण इ', २. 'सं हं सः इ' क. पाठः. ३. 'ति हृदि प्रा' ग. पाठः. ४. 'मः विद्यापु', क. ख. पाठः.

"यदुच्चनीचस्वरितैः स्पष्टैः शब्दपदाक्षरैः ।
मन्त्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ॥
शनैरुच्चारयेन्मन्त्रं किञ्चिदोष्ठौ प्रचालयेत् ।
ईषच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः ॥
ध्यानं यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥"

इति । जपान्ते पुनर्देवीं पृथक् स्वपुरत इव सञ्चिन्त्य

"गुह्यातिगुह्यगोप्त्रि! त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि! त्वत्प्रसादाद्दृदि स्थिते! ॥"

इति मन्त्रेण देव्याश्चरणमूले जपं समर्प्य प्राणायामत्रयं व्यापकत्रयम् अङ्गन्यासादिन्यासं च विदध्यादिति त्रिपुरामन्त्रजपसामान्यसंक्षेपः । विस्तरस्त्वन्यतो द्रष्टव्य इति शिवम् ॥ ६ ॥

चिन्तितं जप्तं वेत्यत्र कथं चिन्ता कार्येत्यपेक्षायां निष्कलरूपस्य ज्योतिर्मयी वाङ्मयीत्युपदिष्टत्वादैन्द्रस्येवेति सकलनिष्कलरूपस्य चोपदिष्टत्वादवशिष्टं देव्याः सकलं रूपमाह वाम इति पञ्चभिः श्लोकैः ।

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तिनयनस्निग्धप्रभालोकिनीं
ये त्वामम्ब! न शीलयन्ति मनसा तेषां कवित्वं कुतः ॥

वाम इति । हे अम्ब! जगन्मातः! ये त्वां मनसा न शीलयन्ति न ध्यायन्ति । वाचा त्वन्मन्त्रं न जपन्ति च । तेषां कुतः कवित्वं क्रान्तदर्शित्वं सार्वज्ञ्यं, न कुतश्चित् । ये तु पुनः शीलयन्ति, तेषां कवित्वाभावो वा कुतः । कीदृशीं त्वां, चतुर्षु करेषु वामे ऊर्ध्वाधःक्रमेण पुस्तकधारिणीम् अभयदाम् अभयमुद्राधारिणीं च । दक्षिणे साक्षस्रजं भक्तेभ्यो वरदानपेशलकरां स्फाटिकाक्षमालाधारिणीं वरदमुद्राधारिणीं च । कर्पूरकुन्दोज्ज्वलां कर्पूरवत् कुन्दवच्चोज्ज्वलां शोभमानाम् । उज्जृम्भाम्बुजपत्रकान्तिनयनस्निग्धप्रभालोकिनीम् उज्जृम्भा उज्जृम्भणं

विकासः, तया युक्तं यदम्बुजं तस्य पत्रम् अन्तर्दलं, तस्य कान्तिरिव कान्तिर्येषां नयनानां, तेषां स्निग्धः कृपारसार्द्रः प्रभायुक्तश्च य आलोक आलोकनम् ईक्षणं, तद्वतीम् । सुसिताम्बरानुलेपमाल्यालङ्कृतां कर्पदभारविधृतचन्द्रखण्डां चेति द्रष्टव्यम् ॥ ७ ॥

एवं बीजत्रयसाधारणं ध्येयं रूपं सार्वज्यलक्षणं तत्सेवाफलं चोक्त्वा इदानीं शक्तिकामराजवाग्भवक्रमेण द्वादशान्तमूलाधारहृत्पद्मेषु ध्येयसाधारणं रूपं फलं चाह—

ये त्वां पाण्डरपुण्डरीकपटलस्पष्टाभिरामप्रभां
सिञ्चन्तीममृतद्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ।
अश्रान्तं विकचस्फुटाक्षरपदा निर्याति वक्त्रोदरात्
तेषां भारति ! भारती सुरसरित्कल्लोललोलोर्मिवत् ॥

ये त्वां पाण्डरेति। हे भारति! ये त्वां मूर्ध्नि स्थितां ध्यायन्ति, तेषां वक्त्रोदराद् अश्रान्तम् अक्लेशेन भारती निर्याति। सुरसरित्कल्लोललोलोर्मिवत् सुरसरिद् गङ्गा तस्याः कल्लोलैः बृहत्तरङ्गैः लोलाश्चञ्चला या ऊर्मयः प्रवाहाः तद्वत्। कीदृशी भारती, विकचस्फुटाक्षरपदा विकचान्यसंकुचितानि स्फुटाक्षराणि (पदानि यस्यां?) तत्तदर्थाभिधाने समर्थानि सुप्रसन्नाक्षराणि च पदानि यस्यां सा तथोक्ता। किंवर्णां ध्यायन्ति, पाण्डरपुण्डरीकपटलस्पष्टाभिरामप्रभां पाण्डरपुण्डरीकपटलवत् सितपद्मपुञ्जवत् स्पष्टा धवला अभिरामा हृद्या च प्रभा यस्यास्ताम्। किंव्यापाराम्, अमृतद्रवैः स्वाङ्गगलितैः साधकस्य शिरः सिञ्चन्तीमिव। इवशब्दो वाक्यालङ्कारे।

"मूर्ध्नि पुस्ताक्षमालादिवरदोज्ज्वलविग्रहाम्।
शिवशक्त्यात्मिकां ध्यायेत् कुन्देन्दुधवलप्रभाम्" ॥ ८ ॥

---

१. 'पफलमाह' क. पाठः. २. 'भाम् ॥ श्रीभारति! ये त्वां मूर्ध्नि स्थितां ध्यायन्ति, तेषां वक्त्रोदरादश्रान्तमक्लेशेन भारती निर्याति सुरसरित्कल्लोललोलोर्मिवदिति पुरस्तादेव द्रष्टव्यम् ॥ एवं' ग. पाठः.

एवं वाग्रुद्भवादिधर्मार्थिभिः सेव्यं रूपं समुपदिश्य कामार्थिभिर्ध्येयं रूपं समुपदिदिक्षुर्द्वितीयबीजस्यासाधारणं ध्यानं फलं चाह—

ये सिन्दूरपरागपुञ्जपिहितां त्वत्तेजसा द्यामिमा-
मुर्वीं चापि विलीनयावकरसप्रस्तारमग्नामिव ।
पश्यन्ति क्षणमप्यनन्यमनसस्तेषामनङ्गज्वर-
क्लान्तास्त्रस्तकुरङ्गशावकदृशो वश्या भवन्ति ध्रुवम् ॥

ये सिन्दूरेति । भारतीति संबोधनमनुषज्ज्यते ।

"गुह्यस्थितं वा मदनस्य बीजं
जपारुणं रक्तसुधां स्रवन्तम् ।
विचिन्त्य तस्मिन् विनिवेश्य साध्यां
वशीकरोत्येव बिदग्धलोकः ॥"

इत्याचार्यैरनुगृहीतत्वादिहोत्तरश्लोके 'ये त्वां चेतसी'ति वक्ष्यमाणत्वादिह स्थानविशेषानुक्तेश्चाधारपद्मस्थरूपध्यानमेतदिति गम्यते । न च पूर्वापरविरोधः । उपासनाविशेषवदाधारविशेषस्यापि कार्यविशेषेऽभिमतत्वात् । पूर्वं सार्वज्ञ्यार्थमुपासनं सर्वेषामुक्तम्, इदानीमेकैकस्य बीजस्य धर्मादिफलत्वमुच्यत इति सिद्धो विशेषः । कामगिरिपीठत्वं कामेश्वरीस्थानत्वं चाधारपद्मस्य । श्रीसौभाग्यमार्गेऽप्यमुमर्थमुपोद्बलयति । हे भारति! इमां द्याम् अन्तरिक्षं सिन्दूरपरागपुञ्जपिहितामिव, उर्वीमपि च यावकरसप्रस्तारमग्नाम् अलक्तकद्रवप्रवाहप्लुतामिव ये क्षणमपि पश्यन्ति । केन, त्वत्तेजसा अत्यन्तरक्तवर्णाया भवत्याः सर्वतःप्रसृतश्रीमूर्तिप्रभाप्रतानेन । किं कृत्वा, अनन्यमनस एकाग्रचेतसो भूत्वा। स्वासने विधिवदुपविश्य प्राणायामैर्दोषान् संहृत्य स्वविषयेभ्य इन्द्रियाणि मनसा सह प्रत्याहृत्येत्यर्थः । यद्वा, अनन्यमनसः स्वात्मानमेव तादृशीं त्वां गुरुतः शास्त्रतोऽनुभवतश्च निश्चिन्वानाः,

---

१. 'र्यां' क. ख. पाठः. २. 'हि' ग. पाठः.

'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति, न स वेद, यथा पशुरेवं स देवानामि'ति भेददर्शिनः श्रुत्या निन्दितत्वात् । उपपत्तेश्च । कथमात्मनोऽन्यस्या भवत्यास्तनुप्रभाब्धिमग्नं स्त्रीपुरुषात्मकं जगत् तथा ध्यातुः पुंसो वशवर्ति भवेत्, स्वयं वा कुतस्तस्य हृदि प्रत्यक्षतामुपगच्छेत् । न खल्वात्मनोऽन्यः कश्चिद् देहान्तः समस्तीति हि सर्वसम्मतमित्युपपत्तिः सिद्धा । किं पुनस्तेषामित्यत्राह — तेषामिति । अनङ्गज्वरक्रान्ताः एतस्मिन् श्रुते दृष्टे वा संभूतेनानङ्गेन अन्तर्गूढेन यो ज्वरो महांस्तापस्तेन क्रान्ता विवशीभूततनवः । त्रस्तकुरङ्गशावकदृशः त्रस्तस्य भीतस्य कुरङ्गशावकस्य मृगबालकस्य दृग् दृष्टिरिव दृग् यासां तास्तथा । सर्वाङ्गसुभगाः स्त्रियोऽपि तेषां वश्या भवन्ति, याः स्ववशीभूताखिलभूमण्डलानां भूपतीनामपि न सर्वथा वशगाः स्युः । ध्रुवं निश्चितमेतत् । त्वद्भक्तजनानां स्वानुभव एवात्र मानमिति भावः ।

"आधाराब्जे धनुर्बाणवरदाभयलक्षिताम् ।
ध्यायेद् बन्धूकपुष्पाभां कामराजस्वरूपिणीम्" ॥ ९ ॥

एवं विशिष्टविषयपरिग्रहेण सर्वकामावाप्तिद्वितीयबीजोपासनफलमुपदिश्यार्थिनामुपासनमुपदिदिक्षुराद्यबीजस्यासाधारणं ध्यानं फलं चाह —

चञ्चत्काञ्चनकुण्डलाङ्गदधरामाबद्धकाञ्चीस्रजं
ये त्वां चेतसि तद्गते! क्षणमपि ध्यायन्ति कृत्वा स्थिराम् ।
तेषां वेश्मसु विभ्रमादहरहः स्फारीभवन्त्यश्चिरं
माद्यत्कुञ्जरकर्णतालतरलाः स्थैर्यं भजन्ते श्रियः ॥

चञ्चदिति । अत्रापि भारतीत्यनुषज्ज्यते । ये त्वां चेतसि हृत्पद्मे स्थिरां कृत्वा निश्चित्य । क्षणमपि ध्यायन्ति स्वात्मतयोपासते ।

---

१. 'पि व' क. पाठः.

कथंभूतां, चञ्चत्काञ्चनकुण्डलाङ्गदधरां[1] चञ्चद्भ्यां कम्पमानाभ्यां काञ्चनकुण्डलाभ्यां सहाङ्गदानि धारयतीति तथा, ताम् । आबद्धकाञ्चीस्रजम् आबद्धा काञ्ची काञ्चनकमलस्रक् च यया ताम् । आबद्धकाञ्चीसूत्रां वा । चेतसि स्थिरीकरणं कुत इत्यत उक्तं—तद्गते! सर्वभूतान्तरात्मत्वेन[2] तत्रैव सदा वर्तमाने[3]! इति संबोधनविशेषणमेतत् । तेषां वेश्मसु श्रियः सम्पदः चिरं स्थैर्यं भजन्ते । कथंभूताः, माद्यत्कुञ्जरकर्णतालतरलाः माद्यतः मदोन्मुखस्य कुञ्जरस्य कर्णतालवत् तरला अस्थिराः, अस्थिरस्वभावा अपीत्यर्थः । किं कुर्वन्त्यः, अहरहः स्फारीभवन्त्यः वृद्धिमुपगच्छन्त्यः । कुतो हेतोः, विभ्रमाद् विलासात् । भूहिरण्यपशुव्रीहियववाहनरत्नवसनाद्यनेकरूपप्रकाशनात् । यद्वा माद्यत्कुञ्जरकर्णतालतरलाः माद्यतां कुञ्जराणां कर्णतालेन तरलाश्चञ्चला अपि स्थैर्यं भजन्त इति गजाश्वादिसिद्धिरुद्घाटिता ।

"हृत्पद्मे काञ्चनप्रख्यां पाशाङ्कुशसमुज्ज्वलाम् ।
वरदाभयहस्तां च ध्यायेद् वाग्भवरूपिणीम्" ॥ १० ॥

अथ मोक्षार्थिभिर्ध्येयं रूपमुपदेष्टुकामः पूर्वोक्तनिष्कलाक्षरस्य द्वितीयबीजगतस्य, 'तत्सारस्वतमि'ति सरस्वतीतत्त्वज्ञानान्तरङ्गसाधनत्वेन स्वोपदिष्टस्यासाधारणं ध्यानं फलं चाह—

आर्भट्या शशिखण्डमण्डितजटाजूटां नृमुण्डस्रजं
बन्धूकप्रसवारुणाम्बरधरां प्रेतासनाध्यासिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्गस्तनीं
मध्ये निम्नवलित्रयाङ्किततनुं त्वद्रूपसंवित्तये ॥११॥

आर्भट्येति । अत्रापि भारतीत्यनुषज्ज्यते । आर्भट्या आर्भटिकासिकया ।

"ऊरुद्वयं निधायोर्वोः स्थितिरार्भटिकासनम् ।"

---

१. 'त्वा', २. 'ति त' ख., 'न्ती' ग. पाठः. ३. 'रत्वे' क. पाठः. ४. 'नो सं' ख. पाठः.

तेन । प्रेतासनाध्यासिनीं, प्रकर्षेण इतः सङ्गतः स्वमेलनं प्राप्तः परमशिवः प्रेतः, स एव वासुकिशय्यायां सुखं शयानः प्रेतासनं, तदधिष्ठितः तस्मिन्नासितुं शीलं यस्यास्ताम् । शिववामाङ्कभुवि निषण्णामित्येतत् । एवम्भूतां त्वाम् । त्वद्रूपसंवित्तये तव स्वरूपसाक्षाद्बोधसिद्धये ध्यायन्ति । किंविशिष्टां, शशिखण्डमण्डितजटाजूटां, शशिखण्डेन शशिकलया मण्डितो जटाजूटो यस्यास्ताम् । नृमुण्डस्रजं मल्लिकामालावतीं, नृमुण्डवत् स्थूलवृत्तधवलमुक्ताफलस्रजं वा, चम्पकस्रग्विणीं वा । बन्धूकप्रसवारुणाम्बरधरां बन्धूकप्रसववद् अरुणम् अम्बरं वासो धारयतीति तथा, ताम् । चतुर्भुजां चत्वारो भुजा यस्यास्ताम् । त्रिनयनां त्रीणि नयनानि यस्यास्ताम् । आपीनतुङ्गस्तनीम् आपीनौ तुङ्गौ च स्तनावस्या इति तथा, ताम् । मध्ये निम्नवलित्रयाङ्किततनुं मध्ये मध्यप्रदेशे निम्ना अवनता वलित्रयाङ्किता च तनुर्यस्यास्तां, सर्वाङ्गसुभगामिति यावत् ।

"इक्षुचापप्रसूनेषुपाशाङ्कुशलसद्भुजाम् ।
इहान्ताब्जेऽरुणां ध्यायेद् देवीं कामकलामयीम् ॥
अथवा वाग्भवेनैव मूलाधारे स्मरेच्छिवाम् ।
हृदये कामबीजेन भ्रूमध्ये चान्तिमेन वै ॥
द्वादशान्ते स्मरेद् देवीं ततः कामकलाकृतिम् ।
हृदये वा स्मरेदेनां प्राचीनैरुक्तमार्गतः ॥
अक्षस्रक्पुस्तकाभीतिवराढ्यामरुणाकृतिम् ।"

ऐन्द्रस्येवेतीहोपदिष्टं सकलनिष्कलध्यानमाचार्यैर्विवृतं—

"वह्नेर्बिम्बे दलपरिवृताधारसंस्थं समुद्य-
द्बालार्काभं स्वरगणसमावेष्टितं वाग्भवाख्यम् ।
वाण्या स्वीयाद् वदनकुहरात् सन्ततं निःसरन्त्या
ध्यायेन्मन्त्री प्रततकिरणप्रावृतं दुःखशान्त्यै ॥

---

१. 'का' ख. ग. पाठः.

हृत्पद्मस्थितभानुबिम्बविलसद्योन्यन्तरालोदितं
मध्याह्नार्कसमप्रभं परिवृतं वर्णैः कफाद्यन्तकैः ।
ध्यायेन्मन्मथराजबीजमखिलब्रह्माण्डविक्षोभकं
राज्यैश्वर्यविवर्धिनीमपि रमां दत्त्वा जगद् रञ्जयेत् ॥
मूर्ध्नोऽथ द्वादशान्तोदितशशधरबिम्बस्थयोनौ स्फुरन्तं
संवीतं व्यापकार्णैर्धवलरुचिमकारस्थितं बीजमन्त्यम् ।
ध्यात्वा सारस्वताच्छामृतजललुलितं दिव्यकाव्यादिकर्ता
नित्यं क्ष्वेलापमृत्युग्रहदुरितविकारान् निहन्त्याशु मन्त्री ॥"

इति । एकैकबीजजपक्रमश्चाचार्यैरनुगृहीतः —

"अच्छाभः स्वच्छभूषो धरणिमयगृहे वाग्भवं लक्षमेकं
यो जप्यात् तद्दशांशं विहितहुतविधिर्मन्त्रजप्ताम्बुनाभिः ।
काव्यैर्नानार्थवृत्तैर्भुवनमखिलमापूरयेच्च स्वकीयै-
र्मारार्त्या विह्वलाभिः पुनरयमनिशं सेव्यते सुन्दरीभिः ॥
रक्ताकल्पोऽरुणतरदुकूलार्तवालेपढ्यो
मौनी भूसद्मनि सुखनिविष्टो जपेल्लक्षमेकम् ।
बीजं मन्त्री रतिपतिमयं प्रोक्तहोमावसानं
योऽसौ लोके स सुरमनुजैः सेव्यते पूज्यते च ॥
धरापवरके तथा जपतु लक्षमन्त्यं मनुं
सुशुक्लकुसुमांशुकाभरणलेपनाद्यो वशी ।
अमुष्य वदनादनारततयोच्चरेद् भारती
विचित्रपदपद्धतिर्भवति चास्य लोको वशे ॥"

एवं पञ्चश्लोक्या देव्याः सकलध्यानप्रकारः प्रकटीकृत इति शिवम् ॥ ११ ॥

'ये त्वामम्ब ! न शीलयन्ति मनसा तेषां कवित्वं कुतः' इत्यत्र त्वत्सेवाहीनानां सार्वज्ञ्यमुपलक्षणन्यायेन सर्वैश्वर्यं च दुर्लभमित्युक्तम् । इदानीं त्वत्सेवकानां तदुभयमिहैवात्यल्पानामपि सुलभमित्याह —

---

१. 'द्राक्षिही' ख. पाठः.

जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले
निश्शेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद् विद्याधरबृन्दवन्दितपदः श्रीवत्सराजोऽभवद्
देवि! त्वच्चरणाम्बुजप्रणतिजः सोऽयं प्रसादोदयः ॥

जात इति । हे देवि ! सोऽयं त्वच्चरणाम्बुजप्रणतिजः तव चरणाम्बुजयोः प्रणतेर्जातः । प्रसादोदयः भवत्याः प्रसादोऽनुग्रहाभिमुख्यं, तस्योदय उद्भव एव । त्वत्सेवाफलमेव भवतीति बुद्धा आचक्षत इति शेषः । कोऽसावित्यत उक्तं —जात इत्यादि । श्रीवत्सराजो नाम राजा क्षितिभुजां सामान्यमात्रे, न मूर्धाभिषिक्तानां क्षत्रियाणां कुले, किन्तु माण्डलिकानाम् । तत्रापि न भूरिधनधान्यपशुपरिषत्क्षेत्रादिमति, किन्तु अल्पपरिच्छदे कुले जातोऽपि प्रतापोन्नतः प्रतापो नामारीणां दूरादेव भयजनकत्वं, तेनोन्नतः उन्नतिमतिशयं प्राप्तः सन् । निःशेषावनिचक्रवर्तिपदवीं, निःशेषायाश्चतुःसागरपर्यन्तायाः अवनेः चक्रवर्ती आज्ञाधरः सार्वभौमो राजा निःशेषावनिचक्रवर्ती तस्य पदवीम् । लब्ध्वा अक्लेशतः प्राप्य । विद्याधरबृन्दवन्दितपदः, विद्याः

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात् ।
अर्थशास्त्रं परं तस्माद् विद्यास्त्वष्टादश स्मृताः ॥"

इति श्रीवायवीय उपदिष्टाः, ताः ये धारयन्ति पठन्ति शृण्वन्ति परेभ्योऽनुवृत्तन्ति यथाधिकारं स्वयं तदर्थमनुतिष्ठन्ति च, ते विद्याधराः, तेषां बृन्देन सङ्घेन वन्दितपदः वन्दितौ पादौ यस्य स तथा । स्वयं तासु तासु विद्यासु परिपक्वपक्षपतितेषु प्रधानस्तत्तद्विद्याधराणां द्विजादीनां पालकः पूजकश्चेति यावत् । एवं सम्राट् सर्वज्ञश्चाभवदिति

---

१. 'शेषतः' क. पाठः. २. 'प' क. ख. पाठः.

यत्, सोऽयमिति संबन्धः। नृत्तगीतवाद्यादिचतुष्षष्टिकलाविद्यावन्तो विद्याधरा इति न व्याख्येयं, राज्ञः किञ्चिज्ज्ञतासूचकत्वात्। नापि त्रिपुराविद्याभेदाभिज्ञा विद्याधराः, राज्ञः सर्वदेवताविग्रहवत्त्वं परदेवतायां भक्तिराहित्यव्यञ्जकत्वात्। नापि विद्याधरा देवयोनिष्वर्वाचीनपदस्थाः केचन वैमानिकाः तेषां वृन्देनेति व्याख्येयं, दिव्ये विद्याधरपदे दीव्यतां तेषां सम्राजो ह्यस्य सेवकत्वासंभवात्। अत एवोक्तं श्रुत्या — 'तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते हि ये शतं मानुषा आनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः' इत्यादि ॥ १२ ॥

अथ 'ये त्वामम्ब! न शीलयन्ति मनसा तेषां कवित्वं कुतः' इत्युक्तमर्थं विवृण्वन् विपर्यये दोषमाह —

चण्डि! त्वच्चरणाम्बुजार्चनकृते बिल्वीदलोल्लुण्टन-
त्रुट्यत्कण्टककोटिभिः परिचयं येषां न जग्मुः कराः।
ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्समत्स्याङ्कितै-
र्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥

चण्डीति। हे चण्डि! स्वसेवाविमुखलोकविप्रियकरणनिपुणे! इह येषां देहिनां कराः त्वच्चरणाम्बुजार्चनकृते तव चरणाम्बुजार्चनार्थम्। बिल्वीदलोल्लुण्टनत्रुट्यत्कण्टककोटिभिः बिल्वीदलानि बिल्वपत्राणि तेषाम् उद् ऊर्ध्वैः अनुवासरं भूरिशो लुण्टने छेदने त्रुट्यतां छिद्यमानानां कण्टकानां कोटिभिरग्रैः। परिचयं मेलनं विलेखनरूपं न जग्मुः।

"पत्रेषु बिल्वपत्रं स्यान्नान्यत् पत्रं विशिष्यते।
हयमारसरोजानामीषद्विकसितं भवेत् ॥"

इत्यागमेषु पुष्पविधानाद् बिल्वीदलेत्युक्तम्। ते कथमिव पृथिवीभुजो जायन्ते। किंलक्षणाः, दण्डाद्यङ्कितैः अम्भोजप्रभैश्च पाणिभिरुपल-

---

१. 'रे सरोजादावीष' ख. पाठः.

क्षिताः । कथं वा कवयो जायन्ते इति शेषः । 'वामे पुस्तके'त्यत्र सार्वज्ञ्येन साम्राज्यमुपलक्षितम्, इह साम्राज्येन सार्वज्ञ्यमिति भेदः ॥ १३ ॥

'त्वच्चरणाम्बुजार्चनकृते' इत्यत्र केषां ते चरणार्चनाधिकारः, कैर्वा साधनैः, किंलक्षणा वा भवत्यर्चनीया, किं वा तवार्चकानां फलं, कियता कालेन वा तद् भवेदित्यपेक्षायामाह —

विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवै-
स्त्वां देवि! त्रिपुरे! परावरमयीं सन्तर्प्य पूजाविधौ ।
यां यां प्रार्थयते मनः स्थिरतया तेषां त एते ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥१४॥

विप्राः क्षोणिभुज इत्यादि । हे त्रिपुरे! देवि! विप्राः क्षोणिभुजो विशस्तदितरे स्त्रीशूद्रादयो विलोमजाश्च ये, त एते सर्वे पूजाविधौ पूजाया विधानं करणं विधिस्तस्मिन् । क्षीरादिभिः परावरमयीं सकलनिष्कलाकारां त्वां सन्तर्प्य गन्धाक्षतकुसुमं बिन्दुमेकमपि दत्त्वा तोषयित्वा यां याम् ऐहिकीमामुष्मिकीं वा अल्पामनल्पां वा सिद्धिं फलं तेषां मनः स्थिरतया नित्यं प्रार्थयते, तां तां विघ्नैः प्राप्तैरप्यविघ्नीकृता एव तरसा अस्मिन्नेव जन्मनि अव्यवहितजन्मान्तरे वा अवाप्नुवन्ति । ध्रुवं निश्चितमेतत् । त्वद्भक्तानां स्वानुभव एवात्र मानमिति भावः । यथाहुः —

"यत्रास्ति भोगो न च तत्र मोक्षो यत्रास्ति मोक्षो न च तत्र भोगः ।
श्रीशङ्करीतर्पणतत्पराणां भोगश्च मोक्षश्च करस्थ एव ॥"

इति । श्रीभगवताप्यनुगृहीतं —

"नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥"

इति,

"पार्थ! नैवेह नामुत्र विनाशस्तस्य विद्यते।
नहि कल्याणकृत् कश्चिद् दुर्गतिं तात! गच्छति॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते॥"

इत्यादि। किं क्षीरादि विप्रादिभिः प्रत्येकं सर्वं संबध्यते, किं वा क्रमेणैकैकमेकैकेन विप्रादिनेति विशये ब्राह्मणैराज्यस्य क्षत्रियैर्वैश्यैश्च क्षीरस्य चार्चनायामवश्यमङ्गीकरणीयत्वान्न द्वितीयपक्षो युज्यते। 'ब्राह्मणो न सुरां पिबेत्' इति वाक्यमदीक्षितविषयं, न ब्राह्मणमात्रविषयम्। अतः सौत्रामण्यामिव ब्राह्मणस्यापि पैष्टया मदिरया परदेवतातर्पणं न दुष्यतीति प्रथमपक्षो ग्राह्यः। तत्रापि यथासम्भवं यथाशक्ति यथामति यथारुचि च सर्वेषां सर्वद्रव्याणि ग्राह्याणि। अत एव श्रुतिः—'ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारमि'ति। एवञ्चेद्, 'इष्टशिष्टमश्नीयादि'ति विधानाद् ब्राह्मणस्यासवपानकर्तव्यता प्राप्नोति चेत्। न। सौत्रामण्यामिव घ्राणभक्षणेनापीष्टशिष्टाशनसिद्धेः।

"लोके निकृष्टमुत्कृष्टं लोकोत्कृष्टं निकृष्टकम्"

इति कौलमार्गस्थानामङ्गीकाराच्च। यथोक्तमुत्पलदेवेन श्रीमत्स्तोत्रावल्यां—

"वेदागमविरुद्धाय वेदागमविधायिने।
वेदागमसतत्त्वाय गुह्याय स्वामिने नमः॥"

इति। पराक्रान्तं चात्र पूर्वसूरिभिरिति किमास्माकीनेन प्रयासेन। तथाहि तद्वचनं—

"सर्वागमविरोधित्वान्नेदं प्रामाण्यमर्हति।
अपि प्रत्यक्षसिद्धत्वात् प्रमाणं तु शिवोदितम्॥

अयं तु निर्णयोऽत्र स्याद् ये यत्रानधिकारिणः।
तेषां तदप्रमाणं स्यात् प्रमाणं चाधिकारिणाम्॥

नाधिकारी न कोऽप्यत्र न प्रामाण्यं प्रयोजकम् ।
प्रायः प्रत्यक्षसिद्धत्वं शिवोक्तत्वं च नो मतम् ॥"

इत्यादि । तदेवं सर्वेषां सर्वद्रव्याणि यथासम्भवं यथाशक्ति यथारुचि च ग्राह्याणीति रमणीयम् ।

अयमिह पूजाक्रमः — सौवर्णे राजते ताम्रमये वा पट्टे भूपद्मद्वितयवृत्तान्वितमष्टदलं पद्मं तत्कर्णिकायां,

"वह्नेः पुरद्वितयवासवयोनिमध्य-
सम्बद्धवह्निवरुणेशसमाश्रिताश्रि ।
देव्यर्चनाय विहितं मुनिभिः पुरैव
लोके सुदुर्लभमिदं नवयोनिचक्रम् ॥"

इत्युक्तलक्षणं नवयोनिचक्रं च विलिख्य विचित्रे संक्षालिते सुगन्धालिप्ते सुधूपिते च दारुमये पीठे यथाविध्यभिषेकादिभिः संस्कृत्य निधाय पूर्वोक्तक्रमेण जपं कृत्वा न्यासावसाने वाग्रतो वामभागे शङ्खे सामान्यार्घ्यं हैमादिपात्रे तदक्षिणतो विशेषार्घ्यं च संपाद्य स्वमूर्धनि श्रीनाथपङ्क्तिं रहस्यचरणचतुष्कं चाधारे[1] गणेश्वरं[2] हृदि मूलविद्यया सपरिवारां देवीं च गन्धाक्षतकुसुमैरमृतबिन्दुभिस्तर्पयित्वा स्वयं तत्त्वत्रयप्रकाशनं विधाय श्रीत्रिपुरादेवीवपुर्भूत्वा बाह्यपूजामारभेत । अत्र विशेषार्घ्यगतोऽयं क्षीरादिद्रव्यविकल्पः । अयमिहोपदेशाध्वा — ब्रह्मणः क्षीरमेव सुगृतं सम्पाद्य तेनामृतीकृतेन विशेषार्घ्यं पूरयित्वार्चयेत् । तदलाभे त्वाज्येन, तदलाभे मधुना, तस्याप्यलाभे आसवेन, तस्याप्यलाभे गन्धोदकेन । क्षत्रियस्त्वाज्येन, तदलाभे क्षीरेण, तदलाभे मधुना, तस्याप्यलाभे आसवेन, तस्याप्यलाभे सुगन्धोदकेन । वैश्यस्तु मधुना, तदलाभे घृतेन, तदलाभे क्षीरेण, तस्याप्यलाभे आसवेन, सर्वालाभे गन्धोदकेन । शूद्रस्त्वासवेन, तदलाभे मधुना, तदलाभे त्वाज्येन, तदलाभे क्षीरेणेति । सर्वालाभे सुगन्धोदकेनार्घ्या-

---

१. 'नम्' क. पाठः, २. 'र', ३. 'शं हृं', ४. 'प्राश' ग. पाठः,

पादनमस्यापि समानमिति । इयानेवात्र दक्षिणवामाध्वगयोर्द्विजयोर्भेदः । कोऽसौ । यदासवेन सन्तर्पयति परदेवतां, तदान्ते घ्राणभक्षणमात्रं दक्षाध्वगेन कार्यम् । तत्त्वत्रयप्रकाशनं तु गन्धोदकेनैव शङ्खगतेन । अपरेण तु तत्त्वत्रयप्रकाशनादिकमासवेनैव कार्यमिति । यद्यप्यवाच्योऽयमर्थः, तथापि तत्त्वचिन्तायां सुगोप्यमपि वक्तव्यमित्यस्माभिः प्रोक्त इति । अथ बाह्यार्चनविधिः — पीठवामदक्षगौ गुरुगणेशौ, ततः कालाग्निरुद्राधारशक्त्यनन्तपृथिवीविद्याब्धिपोताम्बुजासनचक्रासनसर्वमन्त्रासनसाध्यसिद्धासनरत्नपर्यङ्कशक्तिपीठासनानि मध्येऽर्चयेत् । कालाग्निरुद्रादयश्चतुर्थ्यन्तैर्नमोन्वितैः स्वनामभिः पूज्याः, विद्याब्ध्यादयः शुद्धाबालात्रिपुरवासिनीत्रिपुराश्रीत्रिपुरादेवीत्रिपुरासिद्धामन्त्रैः । धर्मादीन् पीठपादचतुष्कत्वेनाग्न्यादिकोणेष्वधर्मादींस्तद्वात्रत्वेन प्रागादिचतुर्षु दिक्षु श्रीमद्द्वादशार्धविद्यया तदुपरि पुष्पतूलिकमभ्यर्च्य तदुपरि मायाविद्ये पद्मं चेष्ट्वा तद्दलेषु कर्णिकायां च नव शक्तीर्यजेत् ।

इच्छा ज्ञाना क्रिया कामी कामदायिन्यनन्तरम् ।
रतिनी रतिपूर्वा च प्रिया नन्दा मनोन्मनी ॥

ततो नवयोनिं मध्ययोनौ शक्तिद्वादशकं पीठचतुष्कं च ।

वामा ज्येष्ठा च रौद्री च साम्बिकेच्छा तथैव च ।
ज्ञाना क्रिया कुब्जिका च रविह्वी(च?)सविषाग्निका ॥
दूतरी चैव सर्वाद्या नन्दाख्या चेति शक्तयः ।
रेखावक्रान्तरालेषु मध्यान्तं पूजयेदिमाः ॥

ऐं कामगिरिपीठाय नमः । ह्रीं जालन्धरपीठाय नमः । सौः पूर्णगिरिपीठाय नमः । ऐं ह्रीं सौः ओड्याणपीठाय नमः इति तदन्तःपीठचतुष्कं, मध्यकोणत्रयमध्येषु ह्रौः सदाशिवप्रेतपद्मासनाय नमः इति पीठं सगन्धाक्षतकुसुमामृतबिन्दुभिरभ्यर्च्य धूपदीपौ दत्त्वा ऐं ह्रीं सौः श्रीत्रिपुरादेवीमूर्तये नम इति मूर्तिं स्पृष्ट्वा तस्यां स्वहृदयाज्ज्यो-

१. 'क्षवा', २. 'तर्प' ३. 'आश' ख. ग. पाठः.

तीरूपिणीं देवीं प्रवहनाड्यानन्दविद्ययावाह्य त्रिवालया व्याप्य लिपि-न्यासमन्त्रन्यासाङ्गन्यासान्ते ऋष्यादिन्यासं प्राणप्रतिष्ठामुद्राप्रदर्शनं च प्राग्वत् कृत्वा नत्वा बालाद्यबीजेन

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
मधुपर्कं पुनः स्नानं वासोयुग्मं च भूषणम् ॥"

इत्युपचारान् दत्त्वा द्वितीयबीजेन त्रिशो दलादिभिरभ्यर्च्य तृतीयबी-जेन सप्तवारं सप्तविंशतिवारं त्रिवारं वामृतविन्दुं दत्त्वा परिवारार्चनं सानुज्ञो विदधीत । अक्षस्रजे नमः । विद्यापुस्तकाय अभयाय वर-दाय इत्यायुधानि देवीकरपद्मेषु पुनरादिमां गुरुपादुकां देवीश्रीपाद-पद्मे अवशिष्टं देव्याः पृष्ठतः प्राङ्मध्ययोन्योरन्तराले परायै अपरायै परापरायै इति सामान्यतस्तत्रैवानन्तनाथादित्रिकं विशेषतः स्वगुरुद्वयं तत्पुरतः प्राक्प्रत्यक्तयेति पूजयेत् ।

पार्श्वयोश्च रतिं प्रीतिमग्रतश्च मनोभवम् ।
वह्नीशरक्षोवार्यग्रचतुर्दिक्षु यथाक्रमम् ॥
मध्ययोन्यन्तराले चाप्यङ्गषट्कं प्रपूजयेत् ।
अभितो मध्ययोनेश्च द्वौ द्वौ पञ्चममग्रतः ॥
बाणान् सम्पूजयेत् पञ्च द्रांद्रींक्लींब्लूंसआदिकाः ।
शोषणमोहनसन्दीपनतापनमादनाः ॥
बाणाश्चतुर्थीनत्यन्ता ज्ञेयाः स्वस्वाङ्गमूर्तयः ।
सुभगा च भगा चैव तदन्ते भगसर्पिणी ॥
भगाद्या मालिनी चैव पूज्या दिग्योनिषु क्रमात् ।
अनङ्गानङ्गकुसुमा तथैवानङ्गमेखला ॥
अनङ्गमदना चैव पूज्याः स्युः कोणयोनिषु ।
ब्रह्माणीमसिताङ्गेन माहेशीं रुरुणा सह ॥
कौमारीं चण्डसंज्ञेन क्रोधेन सह वैष्णवीम् ।
उन्मत्तेन च वाराहीमिन्द्राणीं च कपालिना ॥

भीषणेनापि चामुण्डीं संहारेणापि चण्डिकाम् ।
दलेषु हि यजेदेताश्चतुर्थ्यन्तैः स्वनामभिः ॥

आं ब्रह्माण्यै अं असिताङ्गभैरवाय इत्यादि ।

पुनरिन्द्रादिकान् दिक्षु बहिर्वज्रादिकांस्ततः ।

एवं परिवारान् सगन्धाक्षतकुसुमामृतबिन्दुभिरभ्यर्च्य देवीमूर्तौ चतुश्चत्वारिंशन्मन्त्रैः पुष्पाञ्जलिं कृत्वा धूपदीपौ दत्त्वा आरात्रिकं विधाय सघृतकदलीनालिकेरोपदंशं सशर्करं च सुभृतं शाल्योदनं निवेद्यं समर्प्याग्निकार्यं कृत्वा ओं ह्रीं सर्वविघ्नक्रुद्भ्यः सर्वभूतेभ्यो हुं स्वाहेति बलिं विकीर्य नत्वा पानीयामृतं दत्त्वा निवेद्यं विसृज्य ऐं उच्छिष्ट चण्डालि! मातङ्गि! सर्ववशङ्करणि! स्वाहेति तस्यै दत्त्वा गण्डूषादि दत्त्वा प्रसन्नपूजां विधाय ब्रह्मार्पणमात्मार्पणं च कृत्वा तीर्थं स्वीकृत्य स्तुत्वा नत्वा स्वयं तन्मयो भूत्वा लयाङ्गं विधायात्मन्युद्वास्य प्राणप्रतिष्ठां कृत्वा स्वात्मनि देवीमूर्तौ चैकैकवारं पुष्पाञ्जलिं कृत्वा शङ्खमभ्यर्च्य निधायार्घ्यादिपूर्वकं यथाकालं यथारुचि च मन्त्रं जप्त्वा योगान् कृत्वा देवतामयो भूयादिति शिवम् ॥ १४ ॥

'परावरमयीमि'त्यत्र किं तत् परं रूपं देव्या अवरं रूपं वा किमित्याकाङ्क्षायां परं रूपं तावदाह —

शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति ध्रुवम् ।
लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदचिन्त्यरूपमहिमा शक्तिः परा गीयसे॥१५॥

शब्दानां जननी त्वमत्रेति । हे वाग्वादिनि! वाचं वागिन्द्रियं वादयितुं शीलमस्या इति वाग्वादिनी, तत्र सम्बोधनं तथा, हे सरस्वति! अत्र शब्दार्थात्मके भुवने । त्वं शब्दानां जननीति सद्भिरुच्यसे, परापश्यन्त्यादिक्रमेण पञ्चाशद्वर्णात्मना परिणतत्वात् सर्वेषां वेदादि-

---

१. 'र्वक्' ग. पाठः. २. 'च' ख. पाठः.

लक्षणानां शब्दानां तन्मयत्वाच्च। नैवं वयं ब्रूमः। किन्तु केशवन्यास-वप्रभृतयः केशवप्रभृतयो वासवप्रभृतयश्च प्रधानार्था अपि। त्वत्तः कल्पादावाविर्भवन्ति। किं पुनरितरेऽर्थाः। ध्रुवं निश्चितमेतद्, अर्थस्य शब्दनिबन्धनत्वात्। तथाहुः—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥"

इति। अथवा 'तद्धेदं तर्ह्यव्याकृतमासीत्। तन्नामरूपाभ्यां व्याक्रियत' इति नामरूपप्रपञ्चस्यैकस्मात् तत्त्वादेवाविर्भावश्रवणाच्छब्दस्य च त्वत्संभूतत्वसम्प्रतिपत्तेरर्थोऽपि त्वत्त एवाविर्भवतीति गम्यत इत्यर्थः। केशवप्रभृतय इति ब्रह्मविष्णुरुद्रेश्वरसदाशिवा विश्वसर्गादिपञ्चकृत्य-कारिणो गृहीताः। वासवप्रभृतय इति सृज्यदेवमनुष्यादयः पशुपक्षि-सरीसृपस्थावराश्च। नन्वमरत्वेन नाशहीनानां केशवादीनां वासवादी-नां वा कथं जन्मेत्यत उक्तम्—अमी ब्रह्मादयः ते वासवादयोऽपि यत्र यस्यां खलु कल्पविरमे लीयन्ते च आकल्पजीवित्वेनैव तेषामम-रत्वं, न नित्यतया। जगज्जन्मादिक्रियाभावे तत्कर्तृणां सत्त्वासम्भवात् सर्वेषां त्वत्स्वरूपत्वेन स्वरूपनाशाभावेऽप्युपाधिनाशेन नाशोपपत्तेश्चे-त्याशयः। उत्पत्तौ केशवाद् ब्रह्मेति* (केशवाद्ध्वनति सहितं?) संहारे ब्रह्मा केशवे इति विपरीत पाठः। उक्तं च सकलजननीस्तवे—

"मयूखाः पूष्णीव ज्वलन इव तद्दीप्तिकणिकाः
पयोधौ कल्लोलप्रतिभयमहिम्नीव पृषताः।
उदेत्योदेत्याम्ब! त्वयि सह निजैस्तात्त्विककुलै-
र्भजन्ते तत्त्वौघाः प्रलयमनुकल्पं परवशाः॥"

इति,

"विरिञ्चाख्या मातः! सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रुद्राख्या हरसि विदधासीश्वरदशाम्।
भवन्ती सादाख्या शिवयसि च पाशौघदलनै-
स्त्वमेवैकानेका भवसि कृतिभेदैर्गिरिसुते! ॥"

---

१ किं' ख., 'तिं' क. पाठः.

---

* 'केशवपदेन ध्वनितम्' इति स्यात्।

इति च। यैवं शब्दार्थप्रपञ्चजननी, सा त्वम्। उभाभ्यां शब्दार्थाभ्यामुत्तीर्णत्वाद् अचिन्त्यरूपगहना अचिन्त्येन रूपेणाखण्डानन्दसंविदात्मकेन गहना दुर्विज्ञेया। काचित्, परा सर्वोत्कृष्टा। माहेश्वरी शक्तिर्गीयते,—

"न तस्य कार्यं करणं च विद्यते न तत्समश्चाप्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते"

इति। हन्त तर्हि शक्तिमान् शिवः प्रलयेऽपि पृथगस्तीति नाद्वितीयत्वमस्या इति चेद्, न। शक्तिशक्तिमतोर्भेदाभावात्। नो खलु तिलादेस्तच्छक्तेर्वा भेदं कश्चिदवैति। अत एवोक्तं पूर्वसूरिभिः—

"शिवः शक्तिरिति ह्येकं तत्त्वमाहुर्मनीषिणः"

इति।

"न शिवेन विना देवी देव्या च न विना शिवः।
नानयोरन्तरं किञ्चिच्चन्द्रचन्द्रिकयोरिव॥"

इत्यादि। अत्रैकस्मिन्नपि शिवशक्त्यात्मके चिदानन्दमात्रपरमार्थे प्रकाशविमर्शरूपे वा तत्त्वे संविदद्वैतवादे शक्तिप्राधान्येन व्यवहारः, ईश्वराद्वैतवादे शक्तिमत्प्राधान्येनेति भेदो ज्ञेयः। वाग्वादिनीति संबोधनेन श्रीवागीश्वरीमन्त्रः प्रतीकग्रहणेनोद्धृतो वेदितव्यः—वेदवद वाग्वादिनी स्वाहा।

"अस्याः कण्वविराड्वागीश्वर्यो मुन्यादिकाः क्रमात्।
ह्रस्वदीर्घस्वरान्तस्थैर्हल्भिरङ्गादि षट् चरेत्॥"

अयमस्य श्लोकस्य तात्पर्यार्थः—शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकालकलाविद्यारागनियतिपुरुषप्रकृत्यहङ्कारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निवारिवसुन्धराः षट्त्रिंशत् तत्त्वानि। तन्मय एवायं शब्दार्थात्मकः प्रपञ्चः। तानि च शिवशक्त्याख्यं सच्चिदानन्दघन तत्त्वं (तत्व?)द-

१. 'हरणे', २. 'पदं वाग्वादिनीङं अ' क. पाठः.

र्पणनगरन्यायेनाविर्भवन्ति तिरोभवन्ति च। तदेव च तत्त्वं सर्वभूतानामन्तरहमस्मीति सदा भासते। अथापि स्वेन चिदानन्दघनरूपेण न भासते, किन्तु शून्यबुद्धिप्राणदेहतयैव। अज्ञोऽहमिति शून्यतया, सुख्यहं दुःख्यहमिति बुद्धितया, बुभुक्षुः पिपासुरहमिति प्राणतया, स्थूलोऽहं कृशोऽहमिति देहतया। तत्त्वशून्यतया भाने हेतुर्माया, स्वेनात्मना भाने हेतुः शुद्धविद्या। ताभ्यामस्य बन्धमोक्षौ, मायया बन्धो विद्यया मोक्षः। तत्र स्वरूपानन्दानुभवतृप्तोऽपि परमेश्वरो यदा स्वात्मानमेव शब्दार्थात्मकप्रपञ्चात्मना विवर्तयितुमिच्छति तदा शिवः, तदीया सा इच्छा शक्तिः, अप्रतिहतेच्छत्वात्। तदैव स्वात्मनि पूर्वमेव सदिव सहसा भासमानं विश्वमहमिदमिति शुद्धविद्यया स्वात्मतयैव पश्यन् सदाशिवः, स एवेदमहमिति कूपोदकमध्ये स्वदेहच्छायामिव शुद्धविद्ययैव स्वात्मनः पृथगिव पश्यन् ईश्वरः, तेनानयोः पदयोः मोक्षसुखानुभूतिरेव। मायया[1]त्मनः पृथगेव यदासौ विश्वं विश्वेश्वरं च पश्यति, तदा पुरुषः। तस्यैव नित्यस्याप्यनित्यताभानहेतुत्वेन तस्मिन्नेव भासमानः कालः। सर्वकर्तुरपि किञ्चित्कर्तृत्वे हेतुः कला। सर्वज्ञस्यापि किञ्चिज्ज्ञत्वकारणमविद्या। निरञ्जनस्यापि विषयाभिषङ्गहेतू रागः। सर्वगतस्यापि ममेदं न ममेदं[2]मिति नियमहेतुर्नियतिः। मायया सहितमेतत्कालादि नियत्यन्तं कञ्चुकषट्कमिति भाष्यते सङ्कोचकत्वात् पुरुषस्य। अयं च सङ्कोचक्रमः — यदा पुनरीश्वरः स्वस्मात् पृथगिव भासमानं विश्वं स्वमायया[3]व प्रकृतिसंज्ञया रजोगुणमवलम्ब्य महदादिक्रमेण पृथगेव करोति, तदा स्रष्टा हिरण्यगर्भो भवति। तत्रैवान्तर्यामित्वेन प्रकृतेः सत्त्वगुणमवलम्ब्याऽनुप्रविश्य यदा नियमयति, तदा विष्णुः। स एव प्रकृतेस्तमोगुणमवलम्ब्य यदा संहरति, तदा रुद्रः। एवं गुणत्रयात्मिका प्रकृतिः। सैवेशशक्त्या पराख्यया क्षुभितगुणा कालकर्मानुगुण्ये महान्तं सृजति। ततोऽहन्तत्त्वम्। ततः शब्दादिपञ्चकमाकाशादिपञ्चकमिन्द्रियदशकमन्तःकरणं चाहङ्कारो भूत्वा सृजति। तत्र प्रथममिच्छाज्ञानक्रियाशक्त्यात्मकं मनोबुद्ध्यहङ्काराख्यमन्तःकरणं, ततो ज्ञानक्रियासाधनानि करणानि, ततो ज्ञेयं कार्यं च

१, २. 'भावेन हे' ख. पाठः. ३. 'दमपि नि' क. पाठः.

शब्दादिपञ्चकं, ततस्तदाश्रयभूतमाकाशादिपञ्चकं च सृजति । एवं सृष्टानि महदादीनीश्वरेच्छया कालक्रमेणान्योन्यं मिलित्वा हैमं ब्रह्माण्डमुत्पादयन्ति । तस्मिंश्च कारणोदकशायिनि तदनुप्रवेशात् परिपक्के विभिन्ने च सहस्रशीर्षादिमान् पुरुषो भवति । तस्य नाभिपद्माद्धिरण्यगर्भः । स चतुर्दश भुवनानि तद्गतानि जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधानि भूतानि च सृष्ट्वा तेष्वनुप्रविष्टः स्वमायया कालादिसङ्कोचं प्राप्तः पशुर्भवति । यः सुरोऽसुरो नरो नारकी इति चोच्यते । स च देहादिसङ्कोचमितस्तत्कृतपुण्यापुण्याभ्यामूर्ध्वं चाध इहलोके च भ्रमति । तस्य देहोद्भवहेतवो महदादय एव । अतो यदासौ संसारादुद्विग्नस्तत्त्वज्ञं गुरुवरमुपगम्य तस्मान्मन्त्रदीक्षां प्राप्य स्वात्मानमेव परमेश्वरमुपास्ते, तदा तत्प्रसादात् पिण्डमण्डेऽण्डं भूमौ भूमिम् अप्सु अम्भांसि तेजसि तद् वायौ तमाकाशे तमहङ्कारे तं महति तं प्रकृतौ प्रकृतिं मायायां तां च सकार्यां विद्यायां तामीश्वरे तं सदाशिवे तमपि शिवशक्त्यात्मके तत्त्वे संहृत्याहं विश्वस्रष्टा ब्रह्मा पालको विष्णुः संहर्ता रुद्रः तिरोधायक ईश्वरः सर्वानुग्राहकः सदाशिवः सृज्यादिपदस्थाः सर्वे देवासुरादयश्चाहमेव न कालत्रयेऽपि मत्तोऽन्यत् तत्त्वान्तरमस्ति । अहं च सदानन्दचिद्घनापघनः परशक्तिपरिरम्भितः परमशिव एव, न पुनर्मनुष्याभास इति साक्षादीक्षते, तदा परा शक्तिः रूपान्तरमपहाय परमशिवसामरस्यं गता तत्रैव रमते । पुमांश्च मुक्तो भवति । सेयं बन्धावस्था मोक्षावस्था चात्र प्रकाशितेति शिवम् ॥ १५ ॥

एवं शब्दार्थमयप्रपञ्चोत्तीर्णं देव्याः परं रूपं तत्त्वज्ञानार्थमुपदिश्य इदानीमुपासनार्थमपरं रूपमुपदिशति —

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथो त्रिब्रह्म वर्णास्त्रयः ।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत् सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥ १६ ॥

---

१. 'चि' क. पाठः ।

देवानां त्रितयं त्रयीति । हे भगवति!

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥"

एतदैश्वर्यादिषट्कं यस्यां सदा सामस्त्येन वर्तते, सा भगवती, तस्याः सम्बोधनं तथा । यत्किञ्चिज्जगति त्रिधा नियमितं कल्पितं त्रिवर्गात्मकं स्वतस्त्रिरूपं वा वस्तु तत्सर्वं ते त्रिपुरेति नाम, तत्त्वतः तस्य भावस्तत्त्वं तस्मात् तद्रूपत्वाद् भवत्या अन्वेति अनुगच्छति वक्तीति यावत् । तदेवाह — देवानामित्यादिना । देवानां वसुरुद्रादित्यानाम्, अग्निवायुसूर्याणां, ब्रह्मविष्णुरुद्राणां वा त्रितयम् । हुतभुजां, गार्हपत्यान्वाहार्याहवनीयाग्नीनां भौमजाठरवडवामुखाग्नीनां वा त्रितयं । त्रयी त्रयो वेदाः । शक्तित्रयम् इच्छाज्ञानक्रियात्मकम् । त्रिस्वराः उदात्तानुदात्तस्वरिताः । त्रैलोक्यं भूर्भुवःस्वर्लोकाः । त्रिपदी गायत्री । त्रिपुष्करं त्रयाणां देवर्षिपितॄणां पुषं पुष्टिं तृप्तिं करोतीत्युपवीतम् । त्रिब्रह्म त्रिरूपं ब्रह्म प्रणवः, आत्मान्तरात्मपरमात्मानो वा । 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति भगवद्वचनात् । सत्त्वादिगुणभेदेन त्रिधा स्थिता वा प्रकृतिस्त्रिब्रह्म । त्रयो वर्णास्तारगता एतन्मन्त्रगता वा । अ-इ-उ-वर्णा वा लिपिगताः स्वरव्यञ्जनव्यापकार्णा वा श्वेतरक्तकृष्णा वा ब्राह्मणक्षत्रियवैश्या वा । किं बहुना, यत्किञ्चिद् जगति त्रिधा नियमितं त्रिवर्गात्मकं वा तत्सर्वं ते त्रिपुरेति नाम तत्त्वतोऽन्वेतीति योज्यम् । यत्किञ्चिच्छब्देन धर्मादित्रिकं जाग्रदादित्रिकं प्रातरादित्रिकं सुषुम्नादित्रिकं व्याहृतित्रिकं कालत्रिकं पुरुषत्रिकं लिङ्गत्रिकं वचनत्रिकं कारणत्रिकं तेजआदित्रिकमित्यादि गृह्यते । तदेवं शब्दार्थात्मकं तत्कारणत्वादुभयोत्तीर्णं स्वप्रकाशखण्डानन्दसंविद्रूपं च देव्याः परापररूपमिह द्वाभ्यां श्लोकाभ्यां प्रकाशितमिति शिवम् । एवं त्रिपुराशब्दार्थमन्त्रदेवतातत्त्वमिह सङ्ग्रहविस्ताराभ्यामादित आरभ्य गतग्रन्थेन कथितम् । तच्च चतुर्विधपुरुषार्थार्थिनां स्त्रीपुरुषाभेदेन सर्वेषां वर्णानां बोध्यम् एकैकबीजस्यापि महाफलत्वात्

---

१. 'वानाम् ऋषीणां पि', २. 'सेव्यम्' ख. पाठः.

पृथङ्मन्त्रत्वाच्च सुसेव्यमिति चोक्तम्। विहितद्रव्यालाभेन पूजा न केनापि त्याज्येति द्रव्याणि च बहून्युपदिष्टानि। तेषु क्षीराज्येति पाठेन क्षीरस्य मुख्यत्वं, विप्राः क्षोणिभुज इति ब्राह्मणस्यार्चकेषु मुख्यत्वं चाभ्यर्हितं पूर्वं निपततीति न्यायात् प्रकाशितम्। भक्ष्यभोज्यलेह्यपेयेषु शिवाया अर्चने पेयद्रव्यस्य प्राधान्यमन्यस्य तच्छेषत्वमिति च द्रवद्रव्याणामेव ग्रहणात् तर्पणशब्दाच्च व्यञ्जितम्।

"कुङ्कुमागरुकर्पूररोचनाकपिचन्दनम्।
कचोरसान्वितं शक्तेर्ग्राह्यं गन्धाष्टकं बुधैः॥"

एतच्च बिल्वीदलेति पुष्पग्रहणेन सर्वत्र सहपाठादुपसंगृहीतमार्यैः॥१६॥

अथ परापरेति शिवशक्त्यात्मकस्य सविभूतिकस्य ब्रह्मणः परशब्देन नाममन्त्रप्रवाहात्मनोऽपरस्य ब्रह्मणश्च परशब्देन ग्रहणान्मन्त्रेषु त्रिपुराशब्दार्थभूतमन्त्राणामेव प्रकाशितत्वाद्, नामसु चास्य त्रिपुरानाम्न एव प्राधान्येनोक्तत्वात् सगुणपक्षे देव्या विभूतिभेदानामनुक्तत्वाच्च नानाकार्यार्थिभिः सेव्यानि देव्या नामानुरूपाणि चाविष्कुर्वन्त्रिपुरानाम्न एवासाधारणं फलं तावदाह —

लक्ष्मीं राजकुले जयां रणमुखे क्षेमङ्करीमध्वनि
क्रव्यादद्विपसर्पभाजि शबरीं कान्तारदुर्गे गिरौ।
भूतप्रेतपिशाचजम्भकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे॥१७॥

लक्ष्मीं राजकुल इत्यादि। भगवतीत्यनुषज्यते। त्वां राजकुले वर्तमानास्तदुचितोपकरणपरिजनभवनादिविहीनाः सर्वस्यैतस्य सत्त्वेऽपि प्रबलतरैः प्रतिराजन्यैः पीड्यमाना वा लक्ष्मीं महालक्ष्मीं त्वां तन्नाम्ना स्मृत्वा विपदो दुःखानि तरन्ति त्यजन्ति। रणमुखे वर्तमानाः प्रतियोद्भिर्बाध्यमानाः जयां जयादेवीं त्वां तन्नाम्ना स्मृत्वा विपदस्तरन्तीत्यन्वयः। क्रव्यादद्विपसर्पभाजि क्रव्यादाः वृकव्याघ्रादयः द्विपा

१. 'क्ष्मीरूपां त्वां' ख. पाठः.

गजाः सर्पाश्च तैर्युक्तेऽध्वनि क्षेमङ्करीं देवीं त्वां तन्नाम्नानुस्मृत्य । कान्तारदुर्गे गिरौ दुर्गमं वर्त्म कान्तारं तेन दुर्गे दुरारोहे गिरौ । शबरीं शबरीरूपिणीं त्वां तन्नाम्ना स्मृत्वा । भूतप्रेतपिशाचजम्भकभये भूता रुद्रपार्षदाः, प्रेताः पिशाचाः, जम्भका राक्षसाश्च तेभ्यो भये जाते महाभैरवीं त्वां तन्नाम्ना स्मृत्वा । व्यामोहे बुद्धिभ्रमे जाते त्रिपुरां त्वां तन्नाम्ना स्मृत्वा । तोयप्लवे तोये प्लवं प्लवनं मज्जनं तस्मिन् प्राप्ते तोयराशिमध्यस्थे प्लवे नौकायां वर्तमाना वा तारां त्वां तन्नाम्ना स्मृत्वा विपदस्तरन्ति । एतेषां सप्तनाम्नां जपप्रकारमुत्तरत्र स्पष्टीकरिष्यामः ॥ १७ ॥

अथ देव्या मन्त्रपारायणात्मकमपरं रूपमाह —

माया कुण्डलिनी क्रिया मधुमती काली कला मालिनी
मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी ।
शक्तिः शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रीङ्कारी त्रिपुरा परापरमयी माता कुमारीत्यसि ॥ १८ ॥

मायाकुण्डलिनीति । भगवतीत्यत्राप्यनुषज्यते । मायादिकुमारीत्येतदन्तं यच्छन्दरूपं, तत्सर्वं त्वमसीत्यन्वयः । ह्रीङ्कारो माया, ऐङ्कारः कुण्डलिनी, क्लींकारः क्रिया, मधुमती मातृका शुद्धा सबिन्दुका सविसर्गा च । काली कला मालिनी मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी इति दश नामानि । शक्तिः श्रीबालातृतीयबीजम् । शङ्करवल्लभा रुद्रशक्तिः । हकारसकाराभ्यां सहिता सदाहस्थिता च त्रिपुराविद्या यदा द्वितीयबीजे निष्कला भवति । (भोजे ?) तदा हंसी इति साप्युद्भूता स्यात् । त्रिनयना कामबीजं मणिजम् अङ्गेषु नेत्रस्थानेऽस्य भावात् । वाग्वादिनी वागीश्वरी सा तूद्भूतैव 'शब्दानां जननी त्वमि'त्यत्र भैरवी पञ्चकूटकं, तच्चोद्भूतमेव । ह्रीङ्कारी भुवनाधिपतिबीजं स्वरूपेणैवोद्भूतम् । त्रिपुरा श्रीसौभाग्यविद्या । परापरमयी शिवशक्तिमन्त्रः, मध्यमचतुष्कूटत्रिपुराश्रीमन्त्रतृतीयबीजत्वात् सोऽप्यु-

---

१. 'खेतदन्त्व' क. ग. पाठः. २. 'ह्रीं इ' क. पाठः.

ङ्कृतः । माता श्रीमद्द्वादशार्धविद्या, साप्यादावुङ्कृता । कुमारी बाला, सा प्रत्यक्षत एवोङ्कृता । यद्यपि प्राक् सौभाग्यविद्या नोङ्कृता, तथाप्यस्मिञ्च्छलोक एव सा प्रकाशिता । कथम् । माया ह्रीङ्कारीति द्विरुक्त्या भुवनाधिपतिबीजस्य, क्रिया त्रिनयनेति कामबीजस्य च द्विरुक्तिरावृत्तिं द्योतयति । परापरमयीति हसौ च गृहीतौ । त्रिरुक्तौ हसाभ्यां सहितौ च माया कामार्णौ च केवलं सौभाग्यविद्या । कुण्डलिनीति शब्दादेकारोऽपि गृहीतः, ऐकारे तस्यान्तर्भावात्, एकारस्यावर्णेन वृद्धियोगादैकारोत्पत्तिरिति । अथवा आद्यश्लोक एव साप्युङ्कृता । कथं, षट्कूटस्योङ्कृतत्वाद् विद्यामन्त्राक्षराणां सर्वेषां तत्रान्तर्भावाच्च प्रायेण सर्वे मन्त्रा अस्यामेवाविर्भवन्तीत्याशयेन च मातृशब्दोऽस्यां प्रयुक्तः[1]। एतद्देवतायास्त्रिपुराम्बिकाभिधानत्वाच्च[2] । एवं दश मन्त्राश्चोक्ताः । एतेषां परस्परयोगान्मन्त्रपारायणं भवति । तद्यथा — ह्रीं अ काली सौः अयमादिमो मन्त्रः । अस्मिन्त्रिषु बीजेषु आद्यं बीजं चतुर्विधमातृका शुद्धाद्याक्षरं दशसु नामस्वाद्यं नाम दशसु मन्त्रेष्वाद्यो मन्त्रश्च भवति । एवं ह्रीं आ काली सौः इत्यादि शुद्धायां मातृकायां पञ्चाशन्मन्त्राः ह्रीं क्ष काली सौः इत्येवमन्ताः । तथा ह्रीं अं काली सौः इत्यादिसविन्दुकायां च पञ्चाशत् । ह्रीं अः काली सौः इत्यादिसविसर्गायां पञ्चाशत् । ह्रीं अः काली सौः इत्यादिसविन्दुगर्भायां च पञ्चाशत् । ह्रीं अः काली सौः इत्यादिविन्दुविसर्गान्वितायां च पञ्चाशत् । इत्थं द्विशतं मन्त्राः । मायाबीजस्थाने वाग्भवबीजं योजयित्वान्यत् सर्वं पूर्ववदेव कृत्वा च द्विशतम् । पुनस्तृतीयं कामबीजमादौ कृत्वान्यत् सर्वं प्राग्वदेव कृत्वा च द्विशतमिति षट्छतं मन्त्राः । पुनः कालीनामस्थाने[3] कलानाम कृत्वान्यत्सर्वं प्राग्वदेव[4] कृत्वा च षट्छतम् । एवं प्रतिनामेति षट्सहस्रभेदाः । पुनराद्यस्य शक्त्याख्यस्य मन्त्रस्य स्थाने शङ्करवल्लभां योजयित्वान्यत्सर्वं प्राग्वदेव कृत्वा च

---

१. 'द्या' क. पाठः. २. 'वृत्तः । ए' ख. पाठः. ३. 'देविका' क. पाठः. ४, ५. 'वत् कृ' ख. पाठः.

षट्सहस्रं ह्रीं अ काली ह्स्त्री इत्यादि । एवं प्रतिमन्त्रमिति षष्टिसहस्रं मन्त्रा भवन्तीति । अथापरः प्रकारः बीजत्रयचतुर्विंधमातृकायोजनया कालीनाम्नि षट्शतमन्त्रेषु सम्भूतेषु तस्मिन्नाम्नि स्थित एव मन्त्रेषु द्वितीयस्य योजनायामपि षट्शतं मन्त्राः । एवं तृतीयादिमन्त्रयोजनायामपि प्रत्येकं षट्शतमिति सर्वमन्त्राणां कालीनाम्ना योजने षट्सहस्रवाचकाः । एवं कलादिनामभिर्योजनेऽपीत्यत्रापि षष्टिसहस्रं मन्त्राः स्युः । पूर्वश्लोकोक्तलक्ष्म्यादिनाम्नामप्यनया नीत्या जपः कार्यः, ह्रीं अ लक्ष्मी सौः इत्यादि । तत्रापि प्रतिनाम दशानां मन्त्राणां योजने द्विचत्वारिंशत्सहस्रं मनवो भवन्ति । तथाच लक्षादुपरिद्विषष्टिसहस्रं मन्त्रपारायणं भवतीति शिवम् ॥ १८ ॥

अथ नामपारायणमाह —

आईपल्लवितैः परस्परयुतैर्द्विर्द्विक्रमादक्षरैः
काद्यैः क्षान्तगतैः स्वरादिभिरथ क्षान्तैश्च तैः सस्वरैः ।
नामानि त्रिपुरे ! भवन्ति खलु यान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्नि ! विंशतिसहस्रेभ्यः परेभ्यो नमः ॥ १९ ॥

आईपल्लवितैरिति । हे भैरवपत्नि ! सर्वद्वैतप्रपञ्चवस्मरज्योतीरूपो महेश्वरो भैरवस्तस्य स्वभावभूता तदेकाश्रया तस्मिन्नेव रममाणा च पराशक्तिसंज्ञा स्फुरत्ता भैरवपत्नी, तस्याः सम्बोधनं तथा । आईपल्लवितैः आ ई इति शब्दशिरस्कैः काद्यैः क्षान्तगतैः कादिक्षान्तगैः पञ्चत्रिंशदक्षरैर्यानि तेऽत्यन्तगुह्यानि नामानि भवन्ति, विंशतिसहस्रेभ्यः परेभ्यो विंशतिसहस्रादुपरि षष्टिशतसंख्येभ्यः तेभ्यो नमः । त्वन्नाम्नामपि तावन्नमस्कार्यत्वं, ध्यानेन विनापि जप्तुः फलप्रदत्वात् । किं पुनर्नामर्थनाया भवत्या इत्यर्थः । कथम्भूतैः अक्षरैः स्वरादिभिः क्षान्तगतैः षोडशधा भिन्नं स्वरमादिं कृत्वा क्षकारपर्यन्तं गतैः द्विर्द्विक्रमाद् द्विर्द्विवर्णक्रमात्परस्परयुक्तैश्च, अ का ई इत्यादि अः का ई इत्यन्तम्, एवं अ खा ई अ गा ई अ घा ई इत्यादि, अः क्षा ई इत्य-

१. 'री' ख. पाठः २. 'तघ' क. पाठः ३. 'पि न', ४. 'ध्या' ख. पाठः

न्तं जपेत् । षट्षष्ट्युत्तरं पञ्चशतं मन्त्राः स्युः । अथ सस्वरैश्च तैः क. का. कि. की. इत्यादिरूपैः तेषामेव पञ्चत्रिंशद्वर्णानां योजने प्रत्येकं षष्ट्युत्तरं पञ्चशतं मन्त्रा भवन्ति । ककाई काकाई इत्यादि कखाई काखाई इत्यादि कक्षाई काक्षाई इत्यादि कःक्षाई इत्यन्तम् । एवं खकाई इत्यादि खः क्षाई इत्यन्तम् । तथा गकाई इत्यादि गः क्षाई इत्यन्तम् । अवसाने क्षकाई क्षःकाई इत्यन्तम् । एवं नामपारायणात्मकमपि देव्या अपरं रूपमाविष्कृतमिति शिवम् ॥ १९ ॥

एवं स्तुतिमुपसंहृत्यास्याः सद्भिरभ्यसनीयत्वमाह —

बोद्धव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्यास्त्रिपुरेत्यनन्यमनसो यत्राद्यवृत्ते स्फुटम् ।
एकद्वित्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरै-
र्मन्त्रोद्धारविधिर्विशेषसहितः सत्सम्प्रदायान्वितः ॥२०॥

बोद्धव्या निपुणमिति । अत्रापि भैरवपत्नीत्येतदनुषज्यते । देवतायाः गुणप्रवाहवर्णनेनाहो अहम् अहो अहमित्यात्मन्याश्चर्यबुद्धिजननी वाणी स्तुतिः। त्रिपुरेति प्रसिद्धाया भारत्यास्तवेयं स्तुतिः बुधैर्विवेकिभिः तद्गतं तस्यां भारत्यां त्वयि गतं मनः कृत्वा निपुणं बोद्धव्या सम्यग्धारयितव्या । तत्र त्रिपुराभारतीविषयत्वं तावदेको हेतुः । हेत्वन्तरं चाह — यत्र यस्यां स्तुतावनन्यमनसः नान्यत्र मनो यस्य किन्त्वस्यामेव, तस्य पुंसस्तं प्रति आद्यवृत्ते प्रथमश्लोके तत्पादसंख्याक्षरैः तस्य पादसंख्यया समानसंख्यैरक्षरैः । इत्थम्भावे तृतीया । समानसंख्याक्षरत्वेन एकद्वित्रिपदक्रमेण प्रथमद्वितीयतृतीयपादक्रमेण मन्त्रोद्धारविधिः कथितः कृतः । प्रथमपादे प्रथमाक्षरत्वेन द्वितीयपादे द्वितीयाक्षरत्वेन तृतीयपादे तृतीयाक्षरत्वेन च यत्र श्रीबालामन्त्र उद्धृत इत्यर्थः । कथम्भूतः विशेषसहितः त्रिपुरामन्त्रविशेषैः सहितः, विशेषाश्च तस्मिन् कथञ्चिदुद्धृता इत्यर्थः । स्फुटमिति प्रत्यक्षतं उद्धृत इत्यर्थः ।

---

१. 'न्तम् । एवं' क. पाठः. २. 'न यं', ३. 'रमुद्धृ' ख. पाठः.

सत्सम्प्रदायान्वित इति सन् निर्दोषश्चासौ सम्प्रदाय उपदेशपरम्परा च सत्सम्प्रदायः, तेनान्वितो युक्तः। गुरुवरोपदेशपरम्परया मया प्राप्तो नाधुना क्लृप्तः, येन पौरुषेयतयाप्रामाण्यशङ्का स्यात्। सम्प्रदायप्राप्ता एव मन्त्रा अत्रास्माभिरुद्धृता इत्यर्थः। अवहितचित्तेनैव हि सर्वं ज्ञातुं पार्यत इत्यनन्यमनसः कथित इत्युक्तम्। अथवा न भारत्या अन्यः कश्चिदहं, किन्तु सैवेति मनो यस्य सोऽनन्यमनाः, तस्य मम सम्बन्धिनीं, तथाभूतेन मया कृतामित्यर्थः। तेन कर्तृतो विषयतः स्वरूपतश्च शुद्धत्वमस्या इत्यवश्यमादरणीयत्वं विद्वद्भिरित्युक्तं भवतीति शिवम्॥ २०॥

ननु निर्दोषत्वेऽपि शब्दालङ्कारभूयिष्ठत्वाभावाच्छृङ्गारादिरससुधापात्रत्वाभावाच्च न रसिकैरभ्यसनीयत्वमस्या इति चेद्, मा भवतु तैरादरणीयम्। तथापि परदेवताभक्तिप्रधानत्वात् तद्भक्तैनैव मत्तः सम्भूतत्वाच्च देवताभक्ता अवश्यमिमामङ्गीकुर्युः। अतः सफलैवेयं स्तुतिरित्याह—

सावद्यं निरवद्यमस्तु यदिवा किं वानया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि।
सञ्चिन्त्यापि लघुत्वमात्मनि दृढं सञ्जायमानं हठात्
त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम्॥

सावद्यं निरवद्यमित्यादिना। भैरवपत्नि! त्रिपुरे! इति सम्बोधनमत्रापि ग्राह्यम्। इदं सावद्यं सदोषं यदिवा निरवद्यं निर्दोषमस्तु। सालङ्कारत्वसरसत्वाभावदोषयुक्तं तद्विहीनं वा, भवतु, अनया चिन्तया किं वा, न किमपि प्रयोजनम्। कुतः, यस्य त्वयि भक्तिरस्ति, स जन इदं स्तोत्रं पठिष्यति। नूनं निश्चितमेतत्। तदपि कुतः। यस्मादात्मनि मयि भवत्याः स्तोत्ररचनोद्यते। अतो हेतोः सञ्जायमानमशक्यार्थकरणोद्यमात्तदैव मय्युत्पद्यमानं लघुत्वमाभासबुद्धित्वं दृढं संचिन्त्य निश्चयेनावगम्य तूष्णीमासीनेनापि। त्वद्भक्त्या त्वयि या भक्तिर्निरतिशयप्रीतिरूपिणी तया

---

१. 'अतन्त्र' ख. पाठः.

मुखरीकृतेन वाचालतां नीतेन प्रवर्तितवाक्प्रसरेण मयाल्पश्रुतेनापि हठाद् वेगेनाबुद्धिपूर्वमेव ध्रुवं निर्बाधमिदं रचितम् । निर्बाधमिति सालङ्कारत्वसरसत्वाभावदोषोऽपि विचारदशायां नास्मिन् स्तोत्रे समस्ति । कुतः । 'स एष रसानां रसतम' इति मुख्यरसत्वेन श्रुतौ श्रुतस्य शिवशक्त्यात्मकस्य तत्त्वस्याखण्डानन्दसंविद्रूपस्य तद्भक्तिरसस्य च सर्वत्रात्र प्राधान्येन व्यञ्जितत्वाद् अन्येषामपि रसानां यथायोगमेतदङ्गतयालङ्कारत्वेन व्यञ्जितत्वाच्च । 'दृष्ट्वा सम्भ्रमे'त्यद्भुतस्य, 'यन्नित्ये ! तवे'ति करुणस्य, विरलो बालकोऽपि बुध इत्युक्तेः, 'यत्सद्यो वचसामि'ति चाद्भुतस्य, औकारस्य गकारसाहित्ये सरस्वतीवाचकत्वं तद्राहित्ये तन्मन्त्रत्वमित्युक्तेः, 'एकैकं तवे'त्यद्भुतस्य, 'वामे पुस्तके'ति शान्तस्य, 'ये त्वां पाण्डरे'त्यद्भुतस्य, 'ये सिन्दूरे'ति विप्रलम्भशृङ्गारस्य, 'चञ्चत्काञ्चने'ति शृङ्गाराद्भुतयोः पूर्वापरार्धाभ्याम्, 'आर्भव्ये'ति सम्भोगशृङ्गारशान्तयोः, 'जातोऽपी'त्यद्भुतवीरयोः, 'चण्डि ! त्वच्चरणाम्बुजे'ति भयानकस्य, 'विप्राः क्षोणिभुज' इति करुणस्य, सर्ववर्णाश्रमिणां स्त्रीपुरुषाभेदेन येन केनापि यथालब्धेन द्रव्येणाभ्यर्चिता भगवती तं तं काममनुगृह्णातीति परमकारुण्यप्रतीतेः, 'शब्दानां जननी'त्यद्भुतभयानकयोः पूर्वापरार्धाभ्यां, 'देवानां त्रितयमि'त्यप्यद्भुतस्य, त्रिपुरानाम्नः सर्वार्थकबलनशक्तिप्रकारस्याविष्कृतत्वात्, 'लक्ष्मीं राजकुले' इति भयानकस्य, 'माया कुण्डलिनी'त्यन्तयोराद्ये च भाव एव, न पुना रसान्तरमत्रास्ति । भक्तिरसेनोपक्रम्य तेनैवोपसंहारे तत्रैवास्य तात्पर्यमिति च प्रत्यायितं भवति । प्रथमश्लोकादिषूपमालङ्कारोऽपि क्वचित् क्वचिद् भवति, अनुप्रासस्तु कामार्यादयः शब्दालङ्काराश्च भवन्ति । गूढयोजनत्वगूढवर्णत्वादिना चित्रकाव्यता च विस्पष्टा विपश्चितामिति । तदेवं निर्दोषत्वात् सगुणत्वात् सरसत्वाच्च सर्वैः पठनीयमेतदिति सिद्धम् । यद्वा अनादिगुरुपरम्पराप्राप्तत्वेन नित्यत्वादपौरुषेया इतीहोपदिष्टा मन्त्राः स्वतः प्रमाणत्वेन ग्राह्याः । इदं स्तोत्रं त्विदानीं त्वयोक्तमिति पौरुषेयत्वादत्र

---

१. 'कः' क. पाठः.

न प्रामाण्यनिर्णयः, तन्निर्णये वा न स्वतःप्रामाण्यनिश्चयः, येन सर्वे जना इदमङ्गीकुर्युरित्यत्राह — सावद्यमिति । अवद्यं दोषोऽप्रामाण्यं, तेन सह वर्तत इति सावद्यम् । यदिवा निरवद्यमिदमस्तु । अनया चिन्तया किं वा । नैषा चिन्ता कार्येत्यर्थः । कुत इत्यत आह — नूनमिति । यस्य त्वयि भक्तिरस्ति, आस्तिकपक्षपतितो भवति यः, स जन इदं स्तोत्रं पठिष्यति । नूनं तस्यैतत् स्वतःप्रमाणमेव भवतीत्यर्थः । तदेवोपपादयति — आत्मनि सञ्जायमानं लघुत्वं सञ्चिन्त्यास्माभिरशक्यक्रियोऽयमर्थ इति रचनोद्योगान्निवृत्तेनाल्पज्ञेन मयापि त्वद्भक्त्या मुखरीकृतेन त्वत्सेवनेन स्वात्मतयाविर्भूतया त्वया प्रबोधितबुद्धित्वेनात एवाविर्भूतवाक्प्रसरेण च हठादक्लेशेन ध्रुवं नित्यमेवेदं रचितमाविष्कृतं न पुनरिदानीन्तनास्मद्बुद्धिविलाससम्भूतम् । तेन स्वतः प्रमाणमेवेदमागमयितव्यं विद्वद्भिरित्यर्थः । कर्त्रा स्वात्मनि लघुशब्दः प्रयुक्त इति लघुस्तुतिरित्यस्या लोके प्रसिद्धिः प्रवृत्तेति ज्ञेयम् । क्षिप्रकरणाद्वा, अर्थतो बहुत्वेऽपि विंशतिश्लोकमितत्वेन वा लघुस्तुतिः । लघो[1] ऋज्व्या भक्तानामवञ्चयित्र्या देव्याः स्तुतिर्वा लघुस्तुतिः ॥२१॥

एवमेकाधिकश्लोकविंशत्या शारदास्तुतिः ।
लघुभट्टारकैः क्लृप्ता भक्तानां भुक्तिमुक्तिदा ॥

कृष्णानन्दमुनीश्वरस्य कृपया तुर्याश्रमं योऽश्रमं
प्राप्यान्नायशिरोऽधिरूढमवगम्यात्मानमप्यात्मना ।
आसाद्यापि च पद्धतिं शिवमयीमानन्दनाथाद् गुरो-
रानन्दान्तिकराघवो मुनिरगात् तृप्तिं स वृत्तिं व्यधात् ॥

कृष्णस्त्रिलोचन इति त्रिपुरेन्दिरेति
ब्रह्मेति वा यदुदितं परतत्त्वमेकम् ।
सच्चित्सुखैकतनवे प्रणतोऽस्मि तस्मै
सर्वात्मने सकलबन्धविदारणाय ॥

समाप्तोऽयं ग्रन्थः ।

शुभं भूयात् ।

---

१. 'घमप्रा' ख. पाठः. २. 'ऋद्धया भ' ख. पाठः.

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mimâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I, 1st & 2nd Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1st & 2nd Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II, 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III, 4th, 5th & 6th Kândas)	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas).	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III, 6th, 7th & 8th Sargas)	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I, 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Sri Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pada.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshîraswamin and Tîkasarvaswa of Vandyaghatîya Sarvananda (Part II, 2nd Kanda 1-6 Vargas)	2	8	

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तासिद्धाञ्जनम् (Vedânta) by Srî Krishnânânda Sarasvatî. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part III, 2nd Kanda 7 –10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part IV, 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatindra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa)	0	8	0
No. 57—रघुवीरचरितम् (Kavya)	1	4	0

	RS.	AS.	P.
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Sriharshadeva with the commentary Nâgânanda-vimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Ragha-vânanda.	0	8	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

TRIVANDRUM SANSKRIT SERIES

No. LXIV.

श्रीकालिदासप्रणीतः

मेघसन्देशः

श्रीदक्षिणावर्तनाथप्रणीतप्रदीपाख्यव्याख्यासमेतः ।

THE

MEGHASANDESA

OF

KÂLIDÂSA

With the commentary Pradîpa of

DAKSHINÂVARTANÂTHA

EDITED BY

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1919

(All Rights Reserved.)

T 5778 (illegible)

TRIVANDRUM SANSKRIT SERIES

No. LXIV.

THE

MEGHASANDESA

OF

KÂLIDÂSA

With the commentary Pradîpa of

DAKSHINÂVARTANÂTHA

EDITED BY

MAHÂMAHOPÂDHYÂYA

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.



PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

D x. m 5

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1919.

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६४.

मेघसन्देशः

श्रीकालिदासप्रणीतः

श्रीदक्षिणावर्तनाथप्रणीतप्रदीपाख्यव्याख्यासमेतः ।

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

संशोधितः ।



स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितः ।

कोलम्बाब्दाः १०९४, क्रैस्ताब्दाः १९१९.

M1658

PREFACE.

The Meghasandesa along with the commentary Pradîpa is now placed before the public for the first time. It is a beautiful and dignified commentary written by Dakshinâvartanâtha. Aruṇâchalanâtha, the illustrious commentator of Kumârasambhava and Raghuvamsa has followed the path shown in this commentary by Dakshiṇâvartanâtha. Many beautiful readings of the text are preserved in this commentary which are far better than those adopted by Mallinâtha.

Dakshiṇâvartanâtha quotes as authority Kesavasvâmin, the author of Nânârthârṇavasamkshepa written in the 12th century A. D. and is also quoted by Aruṇâchalanâtha. Hence it is clear that the commentator should have flourished between the dates of Kesavasvâmin and Aruṇâchalanâtha, who is earlier than Mallinâtha.

From the name Dakshinâvartanâtha, it seems probable that he is a native of the country of Cholas, as the presiding deity of Tiruvalanchuzhi, a village in the Chola country is known as Dakshinâvartanâtha and as it is likely that the name of the same deity is borne by the commentator. The word Dakshinâvarta appears to be a sanskritised form of Valanchuzhi, the word "Tiru" being prefixed to show the sacredness of the place.

The commentaries on Raghuvamsa and Kumârasambhava by Dakshinâvartanâtha have also been obtained by us which will be taken up for publication in due course in this series.

Two manuscripts were consulted for preparing this edition, one of them being obtained on loan from Mr. Govinda Pisharodi of Kailasapuram and the other from Mr. Krishna Varyar of Thiruparpu. I am grateful to these gentlemen for having placed their manuscripts at my disposal.

Trivandrum,
14th June 1919.

T. GANAPATI SÂSTRÎ.

निवेदना ।

मेघसन्देशस्य प्रदीपाख्यव्याख्यासचिवस्येदं प्रकाशनम् इदम्प्रथमं नाम । प्रदीपस्य प्रस्थानं तावत् प्रौढं च सहृदयमनोरमं च यज्जातीयमेव तत्रभवान् व्याख्यानविद्याप्रवीणचूडामणिः अरुणगिरिनाथः कुमारसम्भवादिव्याख्यायामाश्रितवान् । अत्र बहुषु स्थलेषु मूलपाठा मल्लिनाथाद्यतमूलपाठेभ्यश्चारुतरा उपलभ्यन्ते ।

अस्य प्रणेता दक्षिणावर्तनाथो नानार्थार्णवसंक्षेपकर्तारं कैस्ताब्दीयद्वादशशतकस्थितं केशवस्वामिनं स्मरति, अरुणगिरिनाथेन स्मर्यते च । अतस्तयोरन्तरालकालप्रभवोऽयमिति स्फुटमेव । दक्षिणावर्तनाथ इति नाम्नायं चोलाभिजनः सम्भाव्यते, यतः चोलमण्डलान्तर्वर्तिनः 'तिरुवलञ्चुषि' (திருவலஞ்சுழி) इति द्रमिलभाषाप्रसिद्धस्य ग्रामस्याधिष्ठातृदेवो दक्षिणावर्तनाथ इति श्रूयते; तस्यैव देवस्य नामधेयमस्मिन् निवेशितमिति च सम्भाव्यते । दक्षिणावर्त इत्येतच्च 'वलञ्चुषि' (வலஞ்சுழி) इत्यस्यैव संस्कृतीकरणं भाति । तिरुवलञ्चुषि शब्दे तिरुशब्दस्तु श्रीपर्यायवाची पूजायां प्रयुक्तो द्रष्टव्यः । अनेन विनिर्मितं कुमारसम्भवव्याख्यानं रघुवंशव्याख्यानं चास्माभिरुपलब्धमास्ति, यदनतिचिरादस्यां ग्रन्थावलौ ग्रथयिष्यामः ।

अस्य चिरन्तनस्य मेघसन्देशव्याख्यानरत्नस्यादर्शदानेन कृतपरोपकारं कैलासपुर–गोविन्दपिषारोटिमहोदयं तिरुपार्पु–कृष्णवार्यमहोदयं च प्रति वयं कृतज्ञाः स्मः ॥

अनन्तशयनम्,
३१–१०–१०९४.

त. गणपतिशास्त्री.

॥ श्रीः ॥

महाकविश्रीकालिदासप्रणीतः

मेघसन्देशः

श्रीदक्षिणावर्तनाथप्रणीतप्रदीपाख्य-
व्याख्यासनाथः ।

(पूर्वसन्देशः)

रघुवंशकुमारसंभवौ द्वौ स्फुटभावौ किल यस्य दीपिकाभ्याम् ।
स ददाति रसोज्ज्वलं प्रदीपं तिमिरं मेघसमुद्भवं विहन्तुम् ॥

इह खलु कविः सीतां प्रति हनूमता हारितं सन्देशं हृदयेन[1] समुद्वहन् तत्स्थानीयनायकाद्युत्पादनेन सन्देशं करोति—

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्[2] प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

कश्चिदिति । रामकथाभिलाषे लिङ्गम् 'इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा' इति वक्ष्यमाणवचनम् । कश्चिद् यक्षः रामगिर्याश्रमेषु वसतिं चक्रे । कश्चिद् देवयोनिविशेषः रामनाम्नः पर्वतस्य आश्रमेषु देवभूमिषु वसतिं पदं चकार । कीदृशो यक्षः, स्वाधिकारात्[3]

---

१. 'ये कुर्वाणः त' ख. पाठः. २. 'नम् । स्वा', ३. 'त् प्रमत्तः इति पाठः । जुगुप्साविरामार्थानामित्यपादाने पञ्चमी । प्रमत्तोऽनवहितः ।' क. पाठः,

प्रमत्तः स्वस्याधिकारात् स्थानात् प्रमत्तः भ्रष्टोऽनवहितः। 'प्रमादोऽनवधानता' इत्यमरः[1]। 'जुगुप्साविरामप्रमादार्थानाम्—'(वा० १.४.२४) इत्यपादाने पञ्चमी। स्वाधिकारप्रमत्त इति पाठे समासः कृच्छ्रलभ्यः। शापेन शापफलेन। निग्रहवचनं शापः। अस्तंगमितमहिमा, अस्तमिति मकारान्तमव्ययमिदम्। अस्तंगमितेत्येकं पदम्। वर्षभोग्येण कृत्स्नैकवर्षभोग्येण। 'अत्यन्तसंयोगे च' (२. १. २९) इति समासः। भर्तुः पोष्टुः, स्वामिन इत्यर्थः। यक्षो देवयोनिविशेषः। जनकतनयेत्यादिना रामकथा सूचिता। स्निग्धच्छायातरुषु स्निग्धा लावण्यशालिनः छायाप्रचुरास्तरवो येषु रामगिर्याश्रमेषु। अनेनापि रामकथा सूचिता। बहुवचनेन विरहखेदादेकत्रावस्थानं तस्य न भवतीति सूचितम्॥ १॥

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥ २॥

तस्मिन्निति। अद्रिग्रहणं पूर्वश्लोके रामगिर्याश्रमे(ष्वित्युक्त)त्वात् कृतम्। कतिचित्, अनिर्दिष्टसंख्याविशेषेऽप्यस्मिन् पदे संख्याविशेषो द्रष्टव्यः। तद्यथा 'मासानन्यान् गमय चतुरो लोचने मीलयित्वा' इति वक्ष्यमाणवचनेन चतुर्णां मासानां गमयित(व्यं। व्यत्वं) प्रतीयते। ते चाषाढात् प्रभृति चत्वारो मासाः, 'आषाढस्य प्रथमदिवस' इति वक्ष्यमाणत्वात्। पारिशेष्यादेकस्मिन् वत्सरे मासाष्टकं गमितमिति प्रतीयते। अबलाविप्रयुक्तः। पूर्वश्लोके कान्ताविप्रयोगे कथिते सत्य(पि) पुनर्वचनं वक्ष्यमाणकनकवलयभ्रंशादेः कान्ताविरह एव निमित्तमिति सूचयितुम्। कामीति पदमाश्रमवासित्वेऽपि तस्य तपःपरत्वं नास्तीति सूचयितुम्। कनकवलयभ्रंशरिक्तप्रकोष्ठः। विरहकार्श्यात् कामिनां कनकवलयभ्रंशो भवति। तथा शाकुन्तले—

---

१. 'रः। स्वा' क. पाठः,

"इदमशिशिरैरन्तस्तापाद् विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः ।
अनतिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥"

इति । न त्वधिकारनिषेधादिति भावः । वप्रक्रीडापरिणतगजप्रेक्षणीयं वप्रक्रीडा तटाघातक्रीडा तदर्थं परिणतस्तिर्यग्दन्तप्रहारवान् गजः । 'तिर्यग्दन्तप्रहारस्तु गजः परिणतो मतः' इति हलधरः । अनेन विशेषणेन मत्तगजदर्शनात् कार्यसिद्धिर्भवतीति सूचितम् । अत्र महायात्रायां वराहमिहिरः —

"ज्वलितशिखिफलाक्षतेषुभक्षद्विरदमृदङ्गकचामरायुधानि ।
मरतककुरुविन्दपद्मरागस्फटिकमणिप्रमुखाश्च रत्नभेदाः ॥
स्वयमपि रचितान्ययत्नतो वा यदि कथितानि भवन्ति मङ्गलानि ।"

इति ॥ २ ॥

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

तस्य स्थित्वा कथमपि पुर इति । स्वप्रवृत्तिं प्रियां प्रति मेघेन हारयितुकामस्तदर्थं मेघस्य स्वागतादिकरणाय कामार्तोऽपि महता यत्नेन तस्य पुरः स्थित्वेत्यभिप्रायः । कौतुकाधानहेतोरिति पाठः । कौतुकं कामविषयौत्सुक्यम् । कौतुकार्पणहेतोरित्यर्थः ।

"कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले ।
कामे ख्याते मङ्गले च"

इति यादवः । केतकाधानहेतोरिति पाठे केतकानां गर्भाधानहेतोरित्यर्थः किल भवेत् । इदमत्यन्तश्लाघ्यविशेषणं न स्यादिति बोद्ध-

व्यम्। कौतुकाधानहेतोरिति विशेषणं मनोरथस्थितं मेघस्वागतादिकार्यं विस्मृत्य स परवशो बभूवेत्यर्थस्य कारणत्वेनोक्तम्। अन्तर्बाष्पः प्रभुत्वादन्तःस्तम्भितबाष्पः। प्रभुत्वं राजराजस्यानुचर इति सूचितम्। चिरं दध्यौ इति संबन्धः। दध्यौ चिन्तयामास। मोहाद् विषयशून्यचित्ततया ध्यायतेः कर्माप्रयोगः। सुखिनः सुखहेतुमतः, सन्निहितप्रियजनस्येत्यर्थः। अन्यथावृत्ति उत्कण्ठापरवशम्। कण्ठाश्लेषप्रणयिनि जन इति। वर्षासमये मेघगर्जितश्रवणभयाद् भर्तृकण्ठमालिङ्गितुं प्रार्थयमाने प्रियजन इत्यर्थः। तस्याश्लेषप्रणयिनि जन इति पाठः। तस्य यक्षस्य। दूरसंस्थे दूरास्थिते ॥ ३ ॥

प्रत्यासन्ने मनसि दयिताजीवितालम्बनार्थां
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

प्रत्यासन्न इति। प्रत्यासन्ने प्रकृतिस्थे मनसि चेतसि। ध्यानव्याकुलिते हृदये पुनः प्रतिष्ठिते सतीत्यर्थः। प्रत्यासन्ने नभसि इति पाठे नभःशब्दः श्रावणमासवचनः। 'नभः खं श्रावणो नभा' इत्यमरसिंहवचनात्। तदा प्रस्तुतमाषाढं विहाय विलम्बनमयुक्तमिति मन्तव्यम्। किञ्च श्रावणमासे 'मासानन्यान् गमय चतुरो लोचने मीलयित्वा' इति वचनं स्यादयुक्तमिति। अन्ये त्वाहुः — नभःशब्दो वर्षर्तुवाचकः, वर्षासमये समागते दयिताजीवितालम्बनार्थां स्वप्रवृत्तिं जीमूतेन हारयिष्यन्निति वर्षासमयात् प्रागेव तस्य चिन्तेति। तदप्यसङ्गतम्। 'इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे' इति तात्कालिककार्यचिन्तानिर्देशात्। दयिताजीवितालम्बनार्थां दयिताजीवितप्रयोजनाम्। जीमूतेन। प्रकृतस्य तच्छब्दं विना नाम्नोपादानं वाक्यान्तरव्यवधानादित्यनुसन्धेयम्। प्रवृत्तिं वृत्तान्तम्। कुटजकुसुमैः। 'कुटजो गिरिमल्लिका' इति हलायुधः। कुटजकुसुमग्रहणं वार्षिकत्वात् कृतमित्यनुसन्धेयम्। कल्पितार्घाय इति पाठः। कल्पितपूजाविधये। 'मूल्ये

१. 'रत्नेन सू' ख. पाठः.

पूजाविधावर्घः' इत्यमरः । प्रीतिप्रमुखवचनं पूज्यानां प्रीतिवचने प्रधानवचनं स्वागतं शोभनमागतमागमनम् । अनेन स्वागतशब्दो विवक्षितः ॥ ४ ॥

सन्देशहरणाख्यस्य वस्तुनश्चैतन्यशून्येन मेघेन दुष्करत्वमाशङ्क्य परिहरति —

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थः क्व पटुकरणैः प्राणिभिः प्रापणीयः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रणयकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

धूमेति । सन्निपातः समुदायः । सन्देशार्थः, सन्देश एवार्थः सन्देशार्थ इति कर्मधारयः । सन्देशाश्चेति केचित् पठन्ति । पटुकरणैः पटुेन्द्रियैः । 'खमक्षमिन्द्रियं स्रोतो हृषीकं करणं मतम्' इति हलायुधः । औत्सुक्यात् इष्टार्थोद्युक्तत्वात् । 'इष्टार्थोद्युक्त उत्सुक' इत्यमरः । इत्यपरिगणयन्निति संबन्धः । गुह्यकः, निधिं गूहत इति गुह्यकः । यक्षाणां वैश्रवणनिधिगूहनात् क्रियानामधेयमिदम् । अथवा यक्षगुह्यकशब्दौ धनदेऽपि वर्तेते । 'अथो यक्षगुह्यकौ । धनदेऽपी'ति यादवः । तस्माद् वैश्रवणवाचकेन गुह्यकशब्देन तद्भृत्यानां यक्षाणां व्यपदेशस्य युक्तत्वादुक्तं गुह्यक इति । तस्माद् यक्षगुह्यकयोर्भेदे सत्यपि (यश्चक्रयित्वयक्षश्चक्रया ? यक्षश्चक्रे इत्यपेक्ष्य) गुह्यकशब्दस्य विरोधो (न) भवतीत्यनुसन्धेयम् । ययाच इति वक्ष्यमाणापेक्षया । प्रणयकृपणा याच्ञायां क्षुद्राः । क्षुद्रत्वं च इष्टापरित्यागः । चेतनाचेतनेषु, इयं हि विषयसप्तमी । अचेतनेष्वपीति वक्तव्ये (चेतना) चेतनग्रहणं धूमज्योतिःसलिलमरुतामित्यादिना प्रस्तुतस्याचेतनस्य. तदनन्तरं क्व पटुकरणैरित्युपक्षिप्तस्य चेतनस्य (चा)नुगुणेन कृतमित्यनुसन्धेयम्॥५॥

इदानीं स्तुतिपूर्वां याच्ञां करोति —

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।

तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६॥

जातमिति । पुष्कलावर्तकानां मेघानाम् । कूटस्थाः केचन मेघाः पुष्कलावर्तकाः । प्रकृतिपुरुषम् अमात्यादिप्रकृतिवर्गस्थं पुरुषम् । कामरूपम् इच्छाधीनविग्रहम् । इदं विशेषणं दुर्गादिगमनार्थम् । वक्ष्यति — 'तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी'ति, 'गत्वा सद्यः कलभतनुतामि'ति च । तेनाभिजात्यप्रभुत्वपरिज्ञानेन । अर्थित्वम् अभ्यर्थनाम् । विधिवशाद् दूरबन्धुः इत्यन्वयः । दूरबन्धुर्दूरस्थभार्यः । बध्नातीति बन्धुरिति व्युत्पत्त्या बन्धुशब्दो भाववन्धिन्यां भार्यायां वर्तते । बन्धुशब्दपर्यायेण सुहृत्पदेन भार्यापि गृह्यते —

"पुत्रः प्रियाणामधिको भार्यापि सुहृदां वरा ।
गिरीणामधिको मेरुर्देवानां मधुसूदनः ॥"

इति । मोघा व्यर्था निरर्थका । वरमीषत्प्रियम् । वरिष्ठाश्रयणे तु वरेति वक्तव्यम् । अत्रामरसिंहः — 'देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये' इति । अधिगुणे सगुण इत्यर्थः । अधमे निर्गुणे । लब्धकामा लब्धप्रार्थनीया । अधिगुणे मोघापि याच्ञा वरमीषत्प्रियमित्यर्थः । अलाभादप्रिया च भवतीत्यभिप्रायेण मनाक्प्रियमित्युक्तम् । अधमे याच्ञा लब्धकामापि न वरमित्यन्वयः ॥ ६ ॥

का वा भवतो याच्ञा इत्यपेक्षायामाह —

सन्तप्तानां त्वमसि शरणं तत् पयोद ! प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

सन्तप्तानामिति । आतपसन्तप्तानां कामसन्तप्तानां च । ननु कामसन्तप्तानां मेघालोकनं विरोधि । उक्तं च 'कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे' इति । तत् कथं कामसन्तप्तानामित्यर्थो गृह्यते । उच्यते । मेघः खलु प्रोषितप्रियतमप्रेरणया तान् प्रोषितान् प्रियत-

माभिः सङ्गमय्य तेषां मिथुनानां सन्तापं हरति । तस्मात् सन्तप्तानां त्वमसि शरणमित्युक्तम् । वक्ष्यति 'यो वृन्दानि त्वरयति' इति । मे सन्देशं प्रियाया हर इत्यन्वयः । कुत्र स्थिता सा प्रिया, तत्स्थानस्य नाम किं लक्षणं चेत्यपेक्षायामाह — गन्तव्येति । अलका नाम, नामशब्दः प्रसिद्धौ । यक्षेश्वराणां यक्षमुख्यानाम् । बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या इत्यनेन लक्षणमुक्तम् । अत्र केचित् कैलासालयवर्तिनः परमेश्वरस्यालकोद्याने चैत्ररथेऽवस्थानमयुक्तमिति मन्यमाना एवं व्याचक्षते — कैलासोत्सङ्गवर्तिन्या अलकाया बहिर्निस्सरणप्रदेश उद्यानशब्देन विवक्षितः । 'स्यादुद्यानं निस्सरणे वनभेदे प्रयोजने' इत्यमरसिंहवचनाद् इति ॥ ७ ॥

यदि भवान् मत्कार्ये सन्नह्यति, तन्न केवलं ममैवाश्वासकम्, अन्यस्यापि जनस्येत्यभिप्रायेणाह —

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः॥८॥

त्वामारूढमिति । पवनपदवीम् आकाशम् । उद्गृहीतालकान्ताः प्रियविरहात् कपोललम्बित्वादलकानामुद्ग्रहणमुक्तम् । प्रत्ययात् प्रियागमनविश्वासात् । आश्वसत्य इति नुमागमरहितः पाठः । अत्र केचित् 'क्षमूष् सहने' इत्यस्माद् धातोः षिद्भिदादिपाठेन षित्कार्ये सिद्धे क्षमूष् इति षित्त्वं गणकार्यस्यानित्यत्वज्ञापकं भवति, अत एव 'न विश्वसेत् पूर्वविरोधितस्य' इत्यत्र शपो लुङ् न भवति, तथा भट्टिकाव्येऽपि 'आश्वसेयुर्निशाचराः' इति। तस्मादाश्वसन्त्य इति नुमागमसहितः पाठ इति व्याचक्षते । तन्न । अन्यथापि रूपसिद्धेः । यत्र गणकार्यस्यानित्यत्वमपेक्ष्यैव रूपसिद्धिर्भवति तत्रैव तदाश्रयणस्य युक्तत्वादित्यलं विस्तरेण । सन्नद्धे प्रोषितनिवर्तनोद्युक्ते । विरहविधुरां विरहक्लिष्टां विरहकृच्छ्रगतामित्यर्थः ।

"विधुरः पत्न्यपेते स्यात् क्लिष्टविश्लिष्टयोरपि"

इति यादवः । अन्योऽपि, ममासदृशोऽपि पृथग्जनोऽपीत्यर्थः । 'अन्यौ तु भिन्नासदृशौ' इति यादवः । अयमिव जनः (जनमिति?) इति अहमिवेत्यर्थः । अहं पराधीनवृत्तिर्यथा भवामि, तथा पृथग्जनोऽपि पराधीनवृत्तिर्न स्यात्, स कस्त्वयि सन्नद्धे जायामुपेक्षेतेत्यर्थः ॥

अनया निमित्तगत्या मत्प्रियादर्शनात् प्रागेव भवतः प्रियजन-सङ्गमो भविष्यतीत्यभिप्रायेणाह—

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षमपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगाः खे भवन्तं बलाकाः ॥ ९ ॥

मन्दं मन्दं नुदतीति । मन्दपवनानुकूल्यमत्र निमित्तम् । तथा महायात्रायां वराहमिहिरः—

"प्रोत्क्षिप्तानलपांसुपत्रविहगच्छत्रध्वजापन्नकृद्
दुर्गन्धः क(र?रि)दानशोषजननः संपृक्तलोष्टोद्गमः ।
यातुर्वायुरभीष्टदः शुभकरो यात्रानुगोऽल्पोद्यमः
प्रह्लादी सुरभिः प्रदक्षिणगतिः सारश्च सिद्धिप्रदः"

इति । उक्तं च—

"पवनस्यानुकूलत्वात् प्रार्थनासिद्धिशंसिनः ॥"

इति । पवनश्चेत्यत्र चकारेण निमित्तान्तरं चातकानुकूल्यं समुच्चीयते। यथाशब्दः सादृश्ये । सादृश्यं निमित्तफलयोरानुरूप्यम् ।

'यथा सादृश्ययोग्यत्ववीप्सास्वर्थानतिक्रमे'

इति यादवः । अथवा यथाशब्दो यस्मादर्थे । प्रमाणं तु मृग्यम् । यथा त्वामनुकूलः पवनो मन्दं मन्दं नुदति, तथा बलाकासङ्गमो भविष्यतीत्यर्थः । वामो वामपार्श्वस्थः । चकारस्यार्थः पूर्वोक्तरीत्या बोद्धव्यः । नदति स्वनं करोति । मधुरं सुखश्रवम् । सगन्धः 'स-गन्धो बन्धुरिष्यते' इति हलायुधः । 'पितृपैतामहानमात्यान् कुर्वीत

दृष्टापदानत्वात् ते ह्येनमपचरन्तमपि न त्यजन्ति सगन्धत्वाद्" (अधि० १. अध्या० ८. प्र० ४) इति कौटिल्येन बन्धुविषये सगन्धशब्दः प्रयुक्तः। अत्रापि यथाशब्दोऽनुषञ्जनीयः। वामपार्श्वस्थस्य चातकस्य निनदो यात्रायां निमित्तमित्यत्र योगयात्रायां वराहमिहिरः—

"चुचुन्दरी सूकरिका शिवा च श्यामागलीपिङ्गलिकान्यपुष्टाः।
वामाः प्रशस्ता गृहगोलिकाश्च पुंसंज्ञिता ये च पतत्रिणश्च ॥"

इति। अनेन चातकस्यापि पुंशब्देनोपादानं कृतमित्यनुसन्धेयम्। तथा महायात्रायां स एव वराहमिहिरः कालविशेषमाश्रित्य चातकस्वरं निषेधति—

"न तु भाद्रपदे ग्राह्याः सूकराः श्वदृकादयः।
शरद्यब्जादगोक्रौञ्चाः श्रावणे हस्तिचातकौ ॥"

इति। कालविशेषनिषेधादनिषिद्धे काले चातकस्वरस्य निमित्तत्वं प्रतीयते। गर्भाधानक्षमपरिचयात्, गर्भशब्दः कुक्षिस्थायिजन्तुवाचकः।

"गर्भोऽपवरकेऽन्नेऽग्नौ सुते पनसकण्टके।
कुक्षौ कुक्षिस्थजन्तौ च"

इति यादवः। क्षमशब्दः शक्तवाचकः।

"क्षितिक्षान्त्योः क्षमायुक्ते क्षमं शक्ते हिते त्रिषु"

इत्यमरः। गर्भाधानशक्तः परिचयो गर्भाधानक्षमपरिचयः, तस्माद्धेतोः। मेघसंगत्या बलाका गर्भं धारयन्तीति प्रसिद्धम्।

"मेघाभिकामा परिसंपतन्ती संमोदिता भाति बलाकपङ्क्तिः"

इति लिङ्गदर्शनं चास्ति। नूनमिति निश्चये। 'नूनं तर्केऽर्थनिश्चय' इत्यमरः। आबद्धमालाः आबद्धपङ्क्तयः आबद्धपुष्पस्रज इति च ध्वन्यते। नयनसुभगाः, इदं विशेषणं च बलाकासु मेघप्रियासमाधिलिङ्गम्। खे व्योम्नि। अनेन विविक्तस्थानं च ध्वन्यते ॥ ९ ॥

अनयैव निमित्तगत्या त्वमविघ्नगतिर्मम जायां चाव्यापन्नामेवावश्यं द्रक्ष्यसीत्यभिप्रायेणाह —

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशप्राणमप्यङ्गनानां
सद्यःपातप्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

तां चावश्यमिति । दिवसगणनातत्पराम्, अनेन मद्विरहे सा न विपन्ना स्याद् विरहावधेर्नियतत्वादित्युक्तम् । सा कामं जीवतु, तस्याः शीलं यदि खण्डितं स्यात् तव प्रार्थना व्यर्था भविष्यतीत्याशङ्क्याह —एकपत्नीम्। एका असपत्नीका पत्नी यज्ञसंयोगार्हा वेत्येकपत्नीति कर्मधारयः । असपत्नीकत्वात् पत्नीत्वाच्च तस्याः शीलखण्डनं न भवतीत्यभिप्रायः । तस्मादव्यापन्नाम्। अविहतगतिः त्वमविघ्नितगतिः । भ्रातृजायाम् अनेन परस्त्रीदर्शननिषेधस्तवात्र न स्यात् त्वद्भ्रातृजायात्वादित्युक्तम् । प्रकृत्या सुकुमारहृदयाः खलु स्त्रियः । ततः कथमेतावन्तं कालं दिवसगणनां कृत्वा जीवतीत्याशङ्क्याह — आशेत्यादि । आशाबन्धः प्रियतमश्चेत् जीवति कालान्तरे तत्समागमो भविष्यतीत्याभिलाषः । आशाबन्धशब्देन निगलसमाधिर्विवक्षितः । रुणद्धीति, निगलकार्यस्य वक्ष्यमाणत्वात् । कुसुमसदृशप्राणं कुसुमसदृशबलम् ।

- "प्राणो वायौ बले स्थैर्ये पुंसि भूम्न्यसुवाचकः"

इति केशवस्वामी। कुसुमसदृशं प्रायशो ह्यङ्गनानामिति केचित् पठन्ति। सद्यःपातप्रणयीति पाठः। विरहसमये सद्यःपातप्रार्थनाशीलम् ॥

मार्गे तव सहायाः संभविष्यन्तीत्याह —

कर्तुं यच्च प्रभवति महीमुत्सिलिन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

कर्तुमिति । चकारः सहाया इत्यनेन संबध्यते । उत्सलिन्ध्रामुद्गतकन्दलिकाम् । अत एवावन्ध्याम् । अनेन पदेन गर्जितस्य वार्षिकत्वमुक्तमित्यनुसन्धेयम् । श्रवणसुभगं राजहंसानां श्रवणसुभगमित्यर्थः । परुषं मेघगर्जितमिति प्रसिद्धम् । वक्ष्यति च — 'यस्यास्तोये कृतवसतय' इत्यादिकम् । तस्मात् कथं हंसानां श्रवणसुभगमित्युक्तम् । सत्यम् । इदं परिगृहीततटाकादिपरित्यागात् किञ्चित्परुषं, स्वेषां निवासस्थानभूतस्य मानसतटाकस्य गमनहेतुत्वादतीव प्रियं च । उक्तं च— 'कचित् खगानां प्रियमानसानाम्' इति । ननु च हंसाः प्रियमानसाश्चेत् कुतो हेतोस्तद् विहाय देशान्तरे परिभ्रमन्ति । उच्यते । हिमालयैकदेशस्थं मानसं हिमदूषितसलिलादिकत्वादनुपभोग्यं भवति । ततस्तेषां देशान्तरगमनं भवति । वर्षसमये तु वर्षजलविरलितहिमत्वात् तस्य हंसनिवासयोग्यत्वमस्ति । नित्यप्रसन्नत्वाद् देशान्तरतटाकादिवत् कालुष्यं न भवतीत्युदीच्या उपदिशन्तीत्यनुसन्धेयम् । मानसोत्काः मानसोत्सुकाः, इदं च प्रियमानसत्वलिङ्गम् । अनेन पदेन लोके प्रवर्त्स्यतः पुरुषस्य सहायाद्दानसमाधिर्विवक्षित इत्यनुसन्धेयम् । बिसकिसलयच्छेदपाथेयवन्तः । पाथेयं पथि साधु भोज्यं वस्तु । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' (४. ४. १०४) इति ढञ्प्रत्ययः । बिसकिसलयच्छेदपाथेया इत्युक्तेऽपि विवक्षितसिद्धिर्यद्यपि भवति, तथापि स्पष्टार्थं मतुप्प्रत्ययः कृत इत्यनुसन्धेयम् । नभसि, अनेन सहायवद्भिरेव गन्तव्यः शून्यः पन्थाः सूचितः । राजहंसा लोहितचञ्चुचरणा हंसाः ।

"राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः"

इत्यमरः ॥ ११ ॥

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवता यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

आपृच्छस्वेति । आपृच्छस्व सभाजयस्व संमानयेत्यर्थः । 'आङि नुप्रच्छयोरुपसंख्यानम्' (वा० १. ३. २१) इत्यात्मनेप-

दम्। 'आनन्दनसभाजने । आप्रच्छनमि'त्यमरः । अत्र गच्छामीति प्रश्नवचनेन पूजनं विवक्षितम्। न केवलं भवतः सख्यादेवास्य पर्वतस्य सभाजनं कार्यं, विशिष्टपुरुषपरिग्रहाच्चेत्याह —वन्द्यैः पुंसामिति । अङ्कितं कृतसञ्चारम् । मेखलासु सानुषु । अस्य मया सह सख्यमस्तीति कुतोऽवगम्यत इत्यपेक्षायामाह — काले काले इति । प्रतिवर्षासमयं सुहृत्सङ्गमकालश्च विवक्षितः । स्नेहव्यक्तिः प्रेमाविष्करणम् । बाष्पमूष्माणमश्रुजलं च । 'बाष्पोऽश्रुण्यम्बुधूमे च' इति यादवः । उष्णं, चिरविरहजत्वादुष्णमित्यर्थः । भवता संयोगमेत्य चिरविरहजमुष्णं बाष्पं मुञ्चतो यस्य स्नेहव्यक्तिर्भवतीत्यन्वयः । अत्र कश्चित् सुहृद् दूरादागतं सुहृदं दृष्ट्वा चिरविरहोष्णं बाष्पमुन्मुच्य सौहृदमाविष्करोतीत्यर्थः खण्डश्लेषालङ्कारेण प्रतीयत इत्यनुसन्धेयम् ॥ १२ ॥

मार्गं मत्तः शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद! श्रोष्यसि श्राव्यबन्धम्।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥

मार्गमिति। मार्गं मत्तः शृणु कथयत इति पाठः। मत्त इति पञ्चमी। मार्गं तावत् कथयत इति पाठे कथयत इत्यस्य विशेष्यपदं नास्तीत्यनुसन्धेयम् । सन्देशं 'श्यामास्वङ्गमि'त्यादिना वक्ष्यमाणम् । श्राव्यबन्धम् । अवश्यं श्रोतव्यरचनम् । शृणोतेः 'ओरावश्यके'(३. १. १२५) इति ण्यत्प्रत्ययः । खिन्नः खिन्नः यदा यदा खिन्नः तदा तदा शिखरिषु पदं न्यस्य गमिष्यसीत्यर्थः । खेदश्च शारीरः । यत्र यस्मिन् मार्गे । क्षीणः क्षीण इत्यसमस्तम् । क्षयश्चाभ्यन्तरो विवक्षितः । परिलघु गौरवरहितम् । स्रोतसां, पर्वतोद्भूतानामिति शेषः । परिलघुग्रहणं स्रोतोग्रहणं च पानीयस्य पथ्यत्वाय । अत्र वाहटे —

"उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः ।
हिमवन्मलयोद्भूताः पथ्याः"

इति ॥ १३ ॥

अद्रेः किंस्विद् वहति पवनः शृङ्गमित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥

अद्रेरिति। किंस्विदिति वितर्के। अत्रेदमनुसन्धेयं—श्रीपर्वत-रामगिर्यादयः सिद्धानां निवासस्थानमिति प्रसिद्धम्। अत एव राम-गिरिवर्तिनीनां सिद्धाङ्गनानामौन्मुख्यं संभवति। खेचरत्वात् तस्य। वक्ष्यति—'सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्ग' इति। स्थानाद्, अनेनास्थानं च विवक्षितम्। सरसनिचुलाद् आर्द्रवानीरवतः। सरस-निचुलादित्यत्र निचुलपदेन निचुलाभिधानः कश्चन कविर्विवक्षितः। यस्य सूक्तिः सुभाषिते श्रूयते—

"संसर्गजा दोषगुणा भवन्तीत्येतन्मृषा येन जलाश्रयोऽपि।
स्थित्वानुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगात्॥"

इति। अनया निचुलोपवर्णनया तस्य कवेर्निचुलाभिधानत्वमासी-दित्यनुसन्धेयम्। स तु निचुलकविरास्थानगतः कालिदासस्य सूक्तीः संभावयति। तस्मात् सर(स)पदेन तं कविं स्तौति। खमुत्पत। अनेन स्वकाव्यस्योच्छ्रितस्थानविजृम्भणं च विवक्षितम्। अयमभिप्रा-यः—किमन्यैरसूयुभिः, आस्थानगतो रासिकः स निचुल एव तवो-च्छ्रायं करोतीति दुर्जनभीषणभीतं मेघसन्देशाभिधानं स्वप्रबन्धं मेघ-च्छद्मना समाश्वासयति। तव काव्यं के नाम दूषयन्तीत्यपेक्षां हृदि कृत्वाह—दिङ्नागानां दिग्गजानाम्। अनेन दिङ्नागाचार्यश्च विवक्षितः। पथि अनेन विजृम्भणावकाश उत्पतनमार्गश्च विवक्षितः। परिहरन् वर्जयन् स्थूलहस्तावलेपान् उत्पतन्तं मेघमालोक्य सजाती-यभ्रमेण स्थूलहस्तावताडनानि संभावितानि। अनेन प्रबन्धदूषणसमये स्थूलहस्ताभिनयाश्च विवक्षिताः। अयमभिप्रायः—दिङ्नाग इति को-ऽप्याचार्यः कालिदासप्रबन्धानन्यत्रोक्तोऽयमर्थ इति स्थूलहस्ताभिनयै-र्दूषयति। तमाचार्यं स्वप्रबन्धस्यापूर्वार्थाभिधायित्वमाश्रित्य मेघोपदे-शव्याजेन कविरुपालभत इति॥ १४॥

रत्नच्छायाव्यतिकर इव प्रेक्षणीयं पुरस्ताद्
वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

रत्नेति । रत्नच्छायाव्यतिकर इति पाठः । वल्मीकाग्रात् प्रभवति, तदन्तर्गतसर्पशिरोरत्नच्छायाव्यतिकर इव प्रेक्षणीयं धनुःखण्डं वल्मीकाग्रात् प्रभवतीत्यर्थः । वल्मीकाग्रादिन्द्रधनुषः प्रादुर्भाव उक्तः संहितायां—

"जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरूत्थिते व्याधिः ।
वल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम् ॥"

इति । अनेनार्थेनापि निमित्तं सूचितम् । तथाह महायात्रायां—

"चापमैन्द्रमनुलोम(य ? म)खण्डं प्रोज्ज्वलद्धहलमायतमिष्टम्"

इति ॥ १५ ॥

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित् पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

त्वय्यायत्तमिति । अत्रेदमनुसन्धेयं—रामगिरेरुत्तरतः केचिद् देवमातृका जनपदाः सन्ति । तत्रत्याः स्त्रियः पामर्यः । तस्मात् तासां स्त्रीणां भ्रूविलासानभिज्ञत्वमुक्तम् । सद्यःसीरोत्कषणसुरभि, इदमारोहणक्रियाविशेषणम् । वर्षानन्तरं हलोत्कर्षणसुरभिगन्धमित्यर्थः । मालं पर्वतप्रायमुन्नतस्थलम् । तथोत्पलमालायां—

"मेघमन्मथयोर्मारो मारं मरणमिष्यते ।
माला पुष्पादिबन्धे स्यान्मालमुन्नतभूतलम् ॥"

इति । मालयोगान्मालव इति प्रसिद्धो देशः । आरुह्येत्यनेनापि तस्योन्नतत्वं प्रतीयते । लघुगतिः, मालक्षेत्रे वृष्टिविसर्जनाल्लघुगतिरित्यर्थः । मालेन पश्चाद्गमनं तदुत्तरेण गमनं चाम्रकूटाख्ये पर्वते विश्रान्त्यर्थमुक्तमित्यवसेयम् ॥ १६ ॥

तामेव विश्रान्तिमाह —

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥

त्वामासारेति। अनेन प्रथमोपकारः सूचितः। आसारो धारासंपातः। मूर्ध्ना शिखरेण शिरसापीति ध्वन्यते। वक्ष्यति, वहतेरिदं रूपम्। अध्वश्रमपरिगतं अध्वश्रमेण परिक्षीणगमनमिति व्याचक्षते। मद्वहने किं कारणमित्याशङ्क्याह — न क्षुद्रोऽपीति। संश्रयाय निवासाय। तथोच्च इति, हृदयस्थिततद्वैभवानुसन्धानेन तथाशब्दः प्रयुक्तः। क्षुद्रोऽपि स्वस्मिन् संश्रयाय मित्रे प्राप्ते प्रथमसुकृतापेक्षया विमुखो (न) भवति। तथोच्चैः किं पुनरित्यर्थः॥ १७॥

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥

छन्नेति। छन्नोपान्तः छादितपर्यन्तः। परिणतफलद्योतिभिः परिणतफलपाण्डुवर्णोज्ज्वलैः। पाण्डुवर्णत्वं च हरिणसमानवर्णत्वं, न तु श्वैत्यम्। आम्रफलानामनेकवर्णत्वात्।

"अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम्"

इति श्रीरामायणवचनदर्शनात्। अनेन वर्षासु काननाम्राः फलन्तीति सूचितम्। सर्पवेणीसवर्णे। वेणी केशबन्धः। सर्पस्य वेणी सर्पस्य वेष्टनम्। वर्णतः संस्थानतश्च सर्पवेणीसमान इत्यर्थः

"नीलालके मेघचये मेचके स्तनचूचुके।
मण्डले कृष्णसर्पाणां सर्पवेणी निगद्यते॥"

शेषविस्तारपाण्डुः, मध्यादन्यत्र हरिणवर्णः। 'हरिणः पाण्डुरः पाण्डुः' इत्यमरः॥ १८॥

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य॥ १९॥

स्थित्वेति। कुञ्जं लतादिपिहितोदरं पर्वतगृहम्। अनेन वनचरवधूसंभोगं च द्रक्ष्यसीत्युक्तम्। मुहूर्तम्, अनेन वनचरवधूपरिभोगदर्शनात् तव कालविलम्बो मा भूदिति विवक्षितम्। तोयोत्सर्गद्रुततरगतिः 'आसारप्रशमितवनोपप्लवम्' इत्यत्रोक्तस्तोयोत्सर्गोऽत्र विवक्षितः। तत्परं शैलात् परम्। तीर्णोऽतिक्रान्तः। वनचरमिथुनपरिभोगानतिदर्शनात् तव विषादो मा भूत्। संभोगलोलुपं मिथुनान्तरं द्रक्ष्यसीत्यभिप्रायेणाह—रेवां द्रक्ष्यसीति। रेवां नर्मदाम्। विन्ध्यपादे विन्ध्यपर्यन्तपर्वते। विन्ध्यपादे विशीर्णामित्यनेन कामातिशयात् प्रियतमपादे कस्याश्चित् पतनं ध्वन्यते। भक्तिच्छेदैः छेदाकारभक्तिभिर्बहुविधाभिर्भक्तिरेखाभिः। विरचितामर्पिताम्। भूतिं भसितम्। उक्तञ्च—

"भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तहस्तिनः"

इति॥ १९॥

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः।
अन्तःसारं घन! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय॥

तस्या इति। तस्यास्तिक्तैः, तिक्तशब्देन सुरभिगन्धश्च तिक्तरसश्च विवक्षितः।

"कटुतिक्तकषायास्तु सौरभ्ये परिकीर्तिताः"

इति हलधरः। वनगजमदैर्विन्ध्याटवीगजमदैर्वासितं, अनेन गन्धसंस्कारो रूषितत्वं च विवक्षितम्। वान्तदृष्टिः, अनेन वर्षोत्सर्गश्छर्दिश्च। जम्बूकुञ्जप्रतिहतरयम्, अनेन लघुत्वं च कषायभावना च। अन्तःसारम्, अनेनाभ्यन्तरस्थजलत्वमभ्यन्तरबलत्वं च विवक्षितम्। घन!, अनेन मेघश्च स्थिरशरीरश्च। अनिलः, अनेन बाह्यः शारीरवायुश्च। रिक्तः, अनेन कृशश्च कृतवमनशुद्धिश्च विवक्षितः। पूर्णता, अनेन तोयपानेन पेयादिक्रमेण चाप्यायनम्। अयमत्र समाधिः—कृतवमनशुद्धिः पुरुषः शेषदोषोपशोषणार्थं तिक्तकषायवासितं लघुजलं पिबति। पश्चाद् बलवतोऽस्य वायुरपि न कुप्यतीति। अत्र वाहटः—

"कषायांश्चाहिमास्तस्य विशुद्धौ श्लेष्मणो हिताः।
किमु तिक्ताः कषाया वा ये निसर्गात् कफापहाः॥"

इति। खरनादेऽपि—

"कृतशुद्धेः क्रमात् पीतपेयादेः पथ्यभोजिनः।
वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिनः" ॥ २० ॥

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२१॥

नीपमिति। नीपः कदम्बः। स च द्विविधः जलकदम्बः स्थलकदम्बश्चेति। जलकदम्बस्तरुप्रायः। स्थलकदम्बः प्रादेशमात्रप्ररूढ ओषधिविशेषः। अत्र स्थलकदम्बो विवक्षितः। तस्य वर्षास्वेव प्रादुर्भावात्। अत एव कदम्बस्य प्रावृषेण्यसंज्ञा।

"कदम्बः पुलकी श्रीमान् प्रावृषेण्यो हलिप्रियः"

इति यादवः। नीपं हरितकपिशं, हरितः पलाशवर्णः कपिशः स्वर्णाभः। अर्धरूढैः एकदेशप्ररूढैः। अनेन तस्य नवप्रादुर्भावः सूचितः। आविर्भूतप्रथममुकुलाः, अनेनापि कन्दलीमुकुलप्रादुर्भावस्य नवत्वमुक्तम्। अनुकच्छमनुजलप्रायदेशम्।

"जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः"

इत्यमरः। जग्ध्वेति पाठः। जग्ध्वा भक्षयित्वा। 'अद भक्षणे' इत्यस्माद् धातोः क्त्वाप्रत्यये कृते 'अदोजग्धिर्ल्यप् ति किति' (२. ४. ३६) इति जग्ध्यादेशः। ननूर्वीगन्धस्य वक्ष्यमाणत्वाद् दग्धारण्येष्विति पाठ एव युक्त इति। तन्न। दाहमन्तरेणापि वसुधागन्धस्य संभवात्। उत्तरत्र वक्ष्यति च—'त्वं निःष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्य' इति। अरण्येषु, सर्वशेषमिदम्। अधिकसुरभिं, स्वभावत एव उर्व्या गन्धवत्त्वापेक्षया अधिकशब्दः प्रयुक्तः। सारङ्गाः हरिणाः।

"चातके हरिणे पुंसि सारङ्गः शबले त्रिषु"

इति सिंहः। जललवमुचः, अनेन नीपकन्दलीवसुधागन्धानामुत्पादकत्वमुक्तम्। निर्मनुष्येष्वरण्येषु हरिणास्तवाभिनववृष्टिपातोद्भूतं नीपं दृष्ट्वा तथानुकच्छं कन्दलीश्च जग्ध्वा उर्व्या अधिकसुरभिं गन्धमाघ्राय च त्वद्गमनमार्गं त्वदागमनोत्सुकेभ्यः पथिकेभ्यः सूचयिष्यन्तीत्यर्थः। ये पुनः सारङ्गशब्देन चातकहरिणगजा विवक्षिता इति व्याचक्षते, तेषां तु मतमुपेक्षणीयं, सारङ्गशब्दस्य गजवाचित्वादर्शनात्।

"सारङ्गः शबलो वर्णश्चातकः षट्पदो मृगः"

इति यादवः। किञ्च एकस्यैव शब्दस्य युगपदनेकार्थत्वस्य भिन्नक्रियासमन्वयस्य च क्लिष्टत्वात् कन्दलीश्चेत्यत्र समुच्चयानुपपत्तेश्चेत्यलमतिप्रसङ्गेन ॥ २१ ॥

उत्पश्यामि द्रुतमपि सखे! मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥

उत्पश्यामीति। उत्पश्यामि उत्प्रेक्षे चिन्तयामीत्यर्थः। ककुभसुरभौ, अनेन प्रत्युद्गमने पुष्पसंपत्तिर्निसर्गसिद्धेत्युक्तम्। शुक्लापाङ्गैर्मयूरैः।

"मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावलः"

इति यादवः । सजलनयनैः मेघसन्दर्शनानन्देन साश्रुजलनयनैः । अनेन शु(क्ति ? क्व)पात्रगतं पाद्यजलं सूचितम् । स्वागतीकृत्य केका इत्यनेन कुशलप्रश्नो विवक्षितः । प्रत्युद्यातः प्रत्युद्गतः । आतिथ्यक्रियया प्रत्युद्गमनमत्र विवक्षितम् ॥ २२ ॥

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २३ ॥

पाण्डुरिति । पाण्डुच्छायोपवनवृतयः पाण्डुच्छाया हरिणवर्णच्छाया उपवनवृतयः समीपवृतयः येषाम् । केतकैः केतकीपुष्पैः । सूचिभिन्नैः सूच्याकारेषु मुकुलाग्रेषु भिन्नैः विकसितैः । नीडारम्भैः कुलायोपक्रमैः । गृहबलिभुजां गृहेषु बलिहारिणामन्नभोजिनां, काकादीनामित्यर्थः । आकुलग्रामचैत्याः । चैत्यं नाम चतुष्पथोद्देशस्थितो वृक्षः ।

"चैत्यं चिताङ्के बुद्धाण्ड उद्देशद्रौ सुरालये"

इति यादवः । दशार्णा विन्ध्योत्तरस्थाः केचन जनपदाः ।

"दशार्णाः स्युर्वेदिकाला मालवाः स्युरवन्तयः"

इति यादवः । ननु 'पोटायुवति—'(२. १. ६५) इत्यादिसूत्रेण समासे कतिपयशब्दस्योत्तरपदत्वविधानाद् दिनकतिपयस्थायीति वक्तव्यम् । प्रायिकं चैतत् ।

"कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः"

इति भर्तृहरिवचनात् ॥ २३ ॥

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत् तत्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २४ ॥

तेषामिति । तेषां दशार्णानाम् । दिक्षु प्रथितविदिशालक्षणां प्रसिद्धविदिशानामधेयाम् ।

"लक्षणं कार्षिके चिह्ने नाम्नि मुद्राङ्गसंपदोः"

इति यादवः ।

"बभूव विदिशानाम पुरी वेत्रवतीतटे"

इति कथासारे । विदिशेति कापि नद्यप्यस्ति ।

"परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान्"

इति वचनात् । सा त्वन्यत्र देशे, वेत्रवतीपरिभोगस्योक्तत्वादित्यनुसन्धेयम् । राजधानीं प्रधाननगरीम् । तेषां राजधानीमित्यन्वयः । लब्धा इति पाठः । लब्धा लप्स्यते, कर्मणि लुडन्तमिदं रूपम् । राजधानीं प्राप्य त्वया कामुकत्वस्य फलं लप्स्यत इत्यर्थः । कुतो लप्स्यते इत्यपेक्षायामाह — तीरोपान्तस्तनितसुभगमिति । अनेनाधरोपान्तस्तनितसीत्कारसुभगत्वं च विवक्षितम् । यद् यस्मात् । तत् तस्मात् । तच्छब्देन प्रसिद्धं परामृश्यते । 'यच्छब्दनिकटवर्ती तच्छब्दः प्रसिद्धिं परामृशती'ति वचनात् । सभ्रूभङ्गं भ्रूभङ्गसहितम् । वेत्रवत्याश्चलोर्मि इति पाठः । चलोर्मि चलतरङ्गम् । इदं विशेषणं सभ्रूभङ्गविशेषणस्थानीयम् । कामिन्याः ससीत्कारं सभ्रूभङ्गं मुखमिव वेत्रवत्यास्तीरोपान्तस्तनितसुभगं चलोर्मि स्वादु तत् पयः पास्यतीति यस्मात् तस्मात् कामुकत्वस्य फलं त्वया लप्स्यत इत्यर्थः । उत्तरश्लोकपरिज्ञानायात्रेदमनुसन्धेयं — विदिशानगरवर्तिन्यः पण्याङ्गनाः सर्वाङ्गसुन्दर्यः सर्वललितकलाविचक्षणाः सर्वपुरुषावर्जनकुशलाश्च भवन्ति । तत्रत्याः पुनर्नागराः पुरुषास्ताभ्योऽप्यतिसुन्दराः सुभगयौवनाः स्त्रीसंभोगविदग्धाश्च भवन्ति । तेषां नागराणां सौन्दर्यातिशयेन तान् कामयमानाः पण्याङ्गनाः मात्रादिभयेन स्वगृहेषु भोक्तुमपारयन्त्यस्तस्मान्नगरान्निर्गत्य प्रत्यासन्नस्य नीचैराख्यस्य गिरेः सङ्केतस्थानभूतेषु शिलागृहेषु तैर्निर्दयं रतान्यनुभूयानुभूय पुनर्विदिशां गुप्तं प्रविशन्तीत्यैतिह्यमस्ति इति ॥ २४ ॥

---

१. 'दशाः प्र' ख. पाठः.

तदैतिह्यं हृदये कुर्वन्नाह —

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५ ॥

नीचैरिति । सुरतगृहवत्तया नीचैराख्यत्वं पर्वतस्य । तत्र तस्मिन् गिरौ । विश्रामहेतोः, 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (७. ३. ३४) इति प्रतिषेधात् विश्रमहेतोरिति वक्तव्यम् । विश्रामहेतोरित्यस्य रूपसिद्धिश्चान्द्रव्याकरणेनेत्यनुसन्धेयम् । प्रौढपुष्पैः परिणतपुष्पैः । कदम्बैरित्युक्तेऽपि कदम्बकुसुमैरित्यर्थो गृह्यते । कदम्बकुसुमानां पुलकसन्निवेशत्वमस्ति ।

"कदम्बः पुलकी श्रीमान् प्रावृषेण्यो हलिप्रियः'

इति यादवः । पण्यस्त्रीरतिपरिमलोद्गारिभिर्गणिकाजनरतिमर्दगन्धोद्गारिभिः । नागराणां विदिशानगरवासिनाम् । उद्दामानि विशृङ्खलानि । अयमभिसन्धिः— पण्यस्त्रीरतिपरिमलोद्गारीणि यस्य शिलावेश्मानि दृष्ट्वा तत्रत्या जना एवं विस्मयन्ते 'अहो नागराणां यौवनानि, यतः पण्याङ्गना अपि पणप्रदानं विना स्वसौभाग्येन वशीकृत्य स्वैरमेतेषु शिलागृहेषु भुञ्जत' इति ॥ २५ ॥

विश्रान्तः सन् व्रज वननदीतीरजानां निषिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्रान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥

विश्रान्त इति । वननदीतीरजानाम्, अक्लान्तिमत्त्वान्नदीतीरमुक्तम् । उद्यानानां पुष्पारामाणाम् । यूथिकाजालकानि मागधीनां प्रत्यग्रकुसुमजालानि । ननु

"तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि"

इत्यत्र सिञ्चतेर्धातोः द्रवद्रव्यरूपममृतं कर्मीभवति । कथमत्र जलकणान् विहाय सिञ्चतेर्जालकानि कर्मत्वेनोक्तानि । किरतिसिञ्चतीत्यादीनां कुसुमजलादीनि कदाचित् कर्मीभवन्ति । कदाचित् करणीभवन्ति । गण्डस्वेदापनयनरुजाक्रान्तकर्णोत्पलानां गण्डस्वेदापमार्जनकरस्पर्शवेदनाक्रान्तकर्णोत्पलानाम् । पुष्पलावीमुखानां, पुष्पं लुनन्तीति पुष्पलाव्यः । 'कर्मण्यण्' (३. २. १) इत्यण् । 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप् ॥ २६ ॥

वक्रः पन्थास्तव भवतु च प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितः स्याः ॥ २७ ॥

वक्र इति । चेति समुच्चये । उत्तराशां प्रस्थितस्य तव पन्थाः वक्रश्च भवतु । तथापि कार्यगौरवात् तत् सोढव्यमित्यभिप्रायः । अत्रेदमनुसन्धेयं—विन्ध्याद्रिप्रभवा विन्ध्यं निर्भिद्य उत्तरवाहिनी काप्ति न ह्यस्ति निर्विन्ध्येति । तस्याः प्राक्तीरे कियन्तं चाध्वानं प्रागतिक्रम्य वर्तते खलूज्जयिनी । तस्मान्निर्विन्ध्यायाः पश्चिमतीरदेशेनोत्तरां गच्छतो मेघस्योज्जयिनीगमने पन्था वक्रः स्यादिति । सौधोत्सङ्गप्रणयविमुखो मा च भूरुज्जयिन्या इति (पाठः) । प्रणयः परिचयः ।

"प्रणयः स्यात् परिचये याच्ञायां सौहृदेऽपि च"

इति यादवः । चकारो वाक्यान्तरसमुच्चये । अनया मार्गवक्रत्वालोचनयापि तवोज्जयिनीसौधोत्सङ्गपरिचये वैमुख्यं च मा भूदित्यर्थः । वञ्चितः स्या इति, यदि तव तां रतिं न वेदयामि, ततस्त्वं मया वञ्चितः स्या इत्यर्थः । यद्वा वञ्चितः स्याः व्यर्थजन्मा भविष्यसीति ॥

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।

निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २८ ॥

वीचीति । संसर्पन्त्याः स्खलितसुभगमिति, अनेन विलासगमनमपि ध्वन्यते । रसाभ्यन्तरः, अनेन रसशब्देन जलं शृङ्गारश्च विवक्षितम् । संनिपत्य सङ्गमं कृत्वा । एवं विलासमाविष्कुर्वत्या निर्विन्ध्याया रतिमनुभवेत्यर्थः । प्रार्थनां विना कथमनुभवामीत्याशङ्क्याह—स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु इति । प्रणयवचनं प्रार्थनावाक्यम् । प्रियेषु स्त्रीणामाद्यं प्रार्थनावाक्यं विभ्रमो हि, स तु तस्याः सञ्जात इति भावः । प्रस्तुतमुज्जयिनीगमनं विहाय मार्गवशान्निर्विन्ध्यागमनमुक्तमित्यनुसन्धेयम् ॥ २८ ॥

वेणीभूतप्रतनुसलिला सा त्वतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती
काश्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ २९ ॥

वेणीभूतप्रतनुसलिला इति पाठः । वेणीशब्देन स्रोतश्च केशबन्धश्च विवक्षितः । सा त्वतीतस्येति पाठः । सा निर्विन्ध्या । अतीतस्यातिक्रान्तस्य, भविष्यत इति शेषः । सिन्धुर्नदी । पाण्डुच्छाया, अनेन विरहपाण्डुत्वं च विवक्षितम् । विरहावस्थयेति पाठः । विधिना दृष्टिमोक्षेण । त्वयैव, एनामनुभूय स्थितवता त्वयैवेत्यर्थः । सुभग! अतीतस्य ते विरहावस्थया वेणीभूतप्रतनुसलिला तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः पाण्डुच्छाया ते सौभाग्यं व्यञ्जयन्ती सा सिन्धुः येन जलमोक्षेण काश्यं त्यजति स विधिः प्रियतमभूतेन त्वयैव कार्य इत्यर्थः । तामतीतस्य इति पाठमाद्दत्य सिन्धुरिति नद्यन्तरमुच्यत इति केचिद् वदन्ति । तदानीमर्थश्चापुष्टः । अत्र देशे सिन्धुरिति कापि नदी नास्ति । काश्मीरेषु सिन्धुः प्रवहतीत्यनुसन्धेयम् ॥ २९ ॥

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥

प्राप्येति । उदयनकथाकोविदग्रामवृद्धान् । उदयनो वत्सराजः, तस्य महान्त्यद्भुतानि कर्माणि विद्यन्ते, तत्कथापण्डितग्रामवृद्धानिति। पूर्वोद्दिष्टां मा च भूरुज्जयिन्या इति पूर्वोद्दिष्टाम् । विशालाम्, उज्जयिन्या विशालेति नामापि। 'विशालोज्जयिनी समे'त्यमरः। उज्जयिन्याः स्वर्गसाम्यं पौराणां देवसाधर्म्यं चाभिप्रेत्याह — स्वल्पीभूत इति । सुचरितफले सुचरितस्य स्वर्गाख्ये फले । गां भूमिम् । अयमभिप्रायः — स्वर्गिणः स्वपुण्यफले सकलस्वर्गोपभोगे स्वल्पावशिष्टे सत्यस्मात् फलोपभोगात् पुण्यानि क्षीयन्ते, सकलस्वर्गोपभोगोऽपि दुर्लभ इति मत्वा शेषैः स्वकीयैः पुण्यैर्भूमौ स्वपुण्यानुरूपं स्वर्गैकखण्डं यदि कुर्युस्तदिव विराजमानामित्यर्थः । ननु "सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखं, ततः परिहृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यत" इत्यापस्तम्बवचनात् प्राणिनः कर्मशेषयुक्ता एव जायन्त इति प्रतीयते । तस्मादयमर्थः किमित्युपेक्षित इति । एतत्पक्षाश्रयणे विशालायाः समुत्कर्षो न स्यात्, कर्मशेषयोगेन जननस्य सर्वप्राणिसाधारणत्वादित्यलं विस्तरेण ॥

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
सिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३१ ॥

दीर्घीकुर्वन्निति । सारसकूजितस्य दीर्घीभावो वातानुधावनेन । स्फुटितकमलामोदमैत्रीकषायः विकसितकमलपरिमलसंपर्कसुरभिः ।

"रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे"

इति यादवः । प्रार्थनाचाटुकारः प्रार्थनया प्रियवचनकारी । अयमत्र समाधिः — कृतापराधः सुभगः प्रियतमः प्रातरेत्य स्वप्रेयसीवचनस्यावसरमवितरन्नेव पटु मदकलं स्ववचनं दीर्घीकुर्वन् परानङ्गनापरिभोगसुरभिगन्धः प्रेयसीं मदीयमपराधं क्षमस्वेति प्रार्थयमानश्चाटुकारी तस्याः पादपतनादङ्गानुकूलः सुरतालाभजनितां ग्लानिं यथा हरति तथा सिप्रावात इति ॥ ३१ ॥

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्तोपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः
पश्यन् लक्ष्मीं ललितवनितापादरागाङ्कितेषु ॥ ३२ ॥

जालेति । गवाक्षोद्गान्तैः केशसंस्कारधूपैः, वनितानामिति शेषः । ललितवनितापादरागाङ्कितेष्विति वक्ष्यमाणत्वाद् वनितापदस्याप्रयोगः । कुसुमसुरभिष्वध्वखेदं नयेथाः पश्यन् लक्ष्मीमिति पाठः । श्रीविशालामित्युक्तत्वात् पश्यन् लक्ष्मीमित्युक्तम् । नीत्वा खेदमिति पाठे वक्ष्यमाणेन 'पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य' इत्यनेन सम्बन्धः ॥ ३२ ॥

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडाभिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३३ ॥

भर्तुरिति । भर्तुः स्वामिनः कण्ठच्छविरिति कण्ठप्रभेति दृश्यमान इत्यर्थः । ईदृशः प्रयोगश्च दृश्यते —

"षण्ढ इत्यन्यनारीभिः स्वस्त्रीभिर्धूर्त इत्यपि ।
शमीति साधुभिर्वीरैः साहसीति य ईक्ष्यते ॥"

इति । त्रिभुवनगुरोः । उज्जयिन्यां महाकालमिति किमपि देवतायतनमस्ति । 'तत्र परमेश्वरः सदा संनिधत्ते, सर्वेभ्यो वरांश्च ददातीति प्रसिद्धम् । तस्मात् त्रिभुवनगुरोरित्युक्तम् । चण्डेश्वरस्य, इदं महाकालनिकेतनेश्वरस्य देवस्याभिधानमिति केचित् । अन्ये रौद्राकारत्वाच्चण्डेश्वरपदं प्रयुक्तमिति वदन्ति । धूतोद्यानमिति पाठः । कुवलयरजोगन्धिभिः कुवलयपरागगन्धिभिरित्यर्थः । गन्धवत्याः, इदं नाम । तोयक्रीडाभिरतयुवतिस्नानतिक्तैर्मरुद्भिरिति पाठे स्नानं स्नानीयम् । 'स्नानीयेऽभिषवे स्नानम्' इति यादवः । गन्धवत्या मरुद्भिरिति संबन्धः । अत्रेदमनुसन्धेयं — पूर्वार्धे तु पुण्यं यायास्त्रिभुवनगुरोर्धाम इति धाम्नः पावनत्वमुक्तम् । उत्तरार्धे तु तस्यैव धाम्नः उद्यानादिमत्तया विलासास्पदत्वं चोक्तमिति । ननु कुवलयरजोगन्धिभिरित्यनेन गन्धवतीमरुतां गन्धवत्त्वमुक्तम् । पुनश्च कथं तोयक्रीडाभिरतयुवतिस्नानतिक्तैर्मरुद्भिरिति गन्धवत्त्वमुच्यत इति । उच्यते । विलासिनीनां शरीरसंस्कारहेतुना कुसुमादिना स्त्रीसंभोगसंमर्देन च उभयथा गन्धवत्त्वमस्ति । तत्समाधिना मरुतामपि विशेषणमुक्तमिति ॥ ३३ ॥

अप्यन्यस्मिन् जलधर! महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥

अपीति । अप्यन्यस्मिन् सन्ध्यासमयादन्यस्मिन्नपि काल इत्यर्थः । महाकालम्, इदमुज्जयिन्यामीश्वरस्य स्थानम् । स्थातव्यं ते स्थातव्यं त्वया । नयनेन यावान् देशो दृश्यः तावान् देशो नयनविषयः । नयनविषयं यावदतिक्रामतीत्यर्थः । सन्ध्याबलिपटहतां, सन्ध्यासमयभूतबलिप्रदानार्थः पटहः सन्ध्याबलिपटहः । आमन्द्राणामीषद्गम्भीराणाम् 'मन्द्रस्तु गम्भीरे' इत्यमरः ॥ ३४ ॥

---

१. 'ति वि' क. पाठः.

पादन्यासक्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥

पादेति । पादन्यासक्वणितरशनाः नृत्तार्थैः पादन्यासैः शब्दितकाञ्चीकलापाः । क्वणतेरकर्मकत्वात् 'गत्यर्थाकर्मक —'(३.४.७२) इति कर्तरि निष्ठा । तत्र तस्मिन् सन्ध्याबलौ । लीलावधूतैर्विलाससञ्चारितैः । रत्नच्छायाखचितवलिभिः रत्नच्छायासंबद्धचामरदण्डवलिभङ्गैः । चामरैर्महाकालस्य सेवाचामरैः । नखपदसुखान् नखपदानीव सौख्यहेतून् । अयमभिप्रायः — महाकालं सेवित्वा सेवोपकरणानि तान्येव चामराणि धारयन्त्यः क्लान्तहस्ता देवदास्यस्तत्र बलिप्रदानसमये नृत्यन्ति । तासामुपरि सेवाक्लेशापहान् नखपदसुखान् वर्षप्रथमबिन्दून् भवान् यदि मुञ्चति, ताश्चानन्यदुर्लभान् मधुकरश्रेणीदीर्घान् कटाक्षान् त्वय्यामोक्ष्यन्ति । आमोचनमिन्दीवरमालासमाधिनोक्तमिति । अन्ये त्वाहुः—

"दुकूलदण्डिकामालाखड्गचामरगोलकैः ।
हस्तसञ्चारिभिः कुर्युर्नृत्तं तद् देशिकं मतम् ॥"

इति वचनात् चामराणि धारयन्त्य एव देशान्तरे नृत्तं कुर्वन्तीति ॥

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३६ ॥

पश्चादिति । पश्चात् । उच्चैर्भुजतरुवनमित्येकं पदम् । भुजवनमिति वक्तव्ये तरुशब्दप्रयोगो मेघावतरणयोग्यत्वं सूचयति । प्रतिनवजपापुष्परक्तं प्रत्यग्रजपाकुसुमलोहितम् । शान्तोद्वेगस्तिमितनयनं, भयङ्करस्य गजाजिनस्यादर्शनाद् देव्याः शान्त उद्वेगः ॥ ३६ ॥

---

१. 'भाः' ख. पाठः.

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः ॥ ३७ ॥

गच्छन्तीनामिति । तत्र उज्जयिन्यां नरपतिपथे राजमार्गे। सूचिभेद्यैः, अतिबहुलत्वात् सूच्यग्रभेदनार्हैरित्यर्थः । मा च भूरिति, चकारो दर्शयेति क्रियया सेवासमुच्चयार्थः ॥ ३७ ॥

तां कस्याञ्चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ३८ ॥

तामिति । कस्याञ्चित् सुप्तपारावतायाम् । अनेन विशेषणेन पौरजनस्तावद् वर्षासमयत्वाद् वलभिं विहाय गर्भगृहे शेते, तत्र पारावता एव भवन्ति, तेष्वपि सुप्तेषु निश्शब्दा भवन्तीत्युक्तम् । चिरविलसनाद्, विलसनशब्देन स्फुरणं विलासश्च विवक्षितः । वाहयेत् प्रापयेदित्यर्थः । वहन्तं यान्तमध्वानं वाहयतीति वाहयेदिति रूपम् । अध्वानं च यातीति प्रयोगोऽस्ति ।

"एष पन्था विदर्भाणामेष यास्यति कोसलान्"

इति दर्शनात् । अभ्युपेतार्था कृत्या कार्यक्रिया यैस्ते ।

"कृत्या क्रियादेवतयोः कार्ये स्त्री कुपिते त्रिषु"

इति यादवः ॥ ३८ ॥

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि करुधि स्यादनल्पाभ्यसूयः ॥

तस्मिन्निति । खण्डितानां, भर्तुरन्यासङ्गदर्शनादीर्ष्यालुः खण्डिता ।

"ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता".

इति दशरूपके । शान्तिमुपरतिं नेयं प्रापयितव्यम् वर्त्म उदयवर्त्म । त्वया प्राचीमुखे निरुद्धे प्रणयिनो रात्रिशङ्कया प्रभातेऽपि खाण्डितानां प्रसादं न कुर्युः । अतो भानोरुदयवर्त्म त्यजेत्यभिप्रायः । सोऽपि भानुरपि नलिन्याः खण्डिताया इत्येव । तस्याः खण्डितात्वं भानोर्देशान्तरगमनात् । प्रत्यावृत्तः प्रतिनिवृत्तः । कररुधि अनेन हस्तरोधश्च प्रतीयते ॥ ३९ ॥

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४० ॥

गम्भीराया इति । गम्भीराशब्देनोदात्तनायिका च प्रतीयते । छायात्मा प्रतिबिम्बात्मा ।

"छाया त्वनातपे कान्तौ प्रतिबिम्बार्कजाययोः"

इति यादवः । अनेन विशेषणेन परमात्मा प्रतिबिम्बं च ध्वन्यते । प्रकृतिसुभगः प्रकृत्या सुभगः, सांख्याभिमतस्य प्रकृत्याख्यस्य तत्त्वस्य संयोगेन सुभग इत्यर्थोऽपि ग्राह्यः । प्रसन्ने चेतसि प्रकृतिसुभगः परमात्मबिम्बः प्रतिफलतीत्यर्थोऽपि ध्वन्यत इत्यवगन्तव्यम् । त्वं स्वरूपेण तां गम्भीरां प्रवेष्टुं यद्यपि नेच्छसि, तथापि तव च्छायात्मा प्रवेक्ष्यत्यवश्यम् । तस्मात् त्वं धैर्यं कृत्वा चटुलशफरोद्वर्तनप्रेक्षितान्यवमानयितुं नार्हस्येव । ततो मत्कार्यविलम्बो भविष्यतीति भावः ॥ ४० ॥

उक्तमर्थं विवृणोति —

तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।

प्रस्थानं ते कथमपि सखे! लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥

तस्या इति । मुक्तरोधोनितम्बं मुक्तरोधः कटीप्रदेशः ।

"नितम्बः पश्चिमे श्रोणिभागे च कटके कटौ"

इति यादवः । ज्ञातास्वादः ज्ञातस्त्रीसंभोगरसः । विवृतजघनां विवृतकटिप्रदेशाम् ।

"जघनं स्यात् कटौ पूर्वश्रोणिभागापराङ्गयोः"

इति यादवः ॥ ४१ ॥

त्वन्निःष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४२॥

त्वन्निःष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः त्वदीयनवजलबृंहितवसुधागन्धसम्पर्करम्यः । अनेन वायोर्गन्ध(व)त्त्वमुक्तम् । स्रोतोरन्ध्रध्वनितसुभगं, स्रोतसां रन्ध्रं स्रोतोरन्ध्रमिति जलप्रणालो विवक्षितः । स्रोतोरन्ध्रसंमूर्छज्जलध्वनितसुभगमित्यर्थः । दन्तिभिः सरन्ध्रेण करेण पीयमानो वायुः जलप्रणालनिस्सरत्प्रवाह इव शब्दायत इत्यर्थः । अनेन मान्द्यमुक्तम् । नीचैः । अधस्ताद् दन्तिभिः पीयमानत्वान्मन्दवेगस्तव नीचैरेव वास्यति । तेन दीर्घाध्वगामिनस्ते वायुप्रेरणया भ्रान्तिर्न भविष्यतीत्यभिप्रायः । देवपूर्वं देवशब्दपूर्वं गिरिं गिरिशब्दम् । एतौ देवगिरिशब्दौ स्वरूपेण मेघानभिगम्यत्वाद् मेघाभिगम्यं स्वसमुदायवाच्यं देवगिरिं लक्षयत इत्यनुसन्धेयम् । काननोदुम्बराणाम् उदुम्बरफलानाम् । कृद्योगे षष्ठी ॥ ४२ ॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।

रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४३ ॥

तत्रेति । तत्र देवगिरौ नियतवसतिम् । पुरा किल देवार्थमसुरान् निहत्य तत्र विश्रान्तः स्कन्दो देवैर्याचितः सन् तत्रैव मद्दर्शनायागताभ्यां शिवाभ्यां सह नित्यं वसामीति प्रतिज्ञातवान् । तस्मात् तत्र स्कन्दस्य नियतवसतित्वमुक्तमित्यैतिह्यमनुसन्धेयम् । पुष्पमेघीकृतात्मा, कामरूपत्वादेतन्मेघस्य संभवति । उक्तमैतिह्यं किञ्चिद् विवृणोति — रक्षाहेतोरिति । इयं 'षष्ठी हेतुप्रयोगे' (२. ३. २६) इति षष्ठी । अत्यादित्यमतिक्रान्तादित्यम् । हुतवहमुखे संभृतं तद्धि तेज इति स्कन्दस्याग्निमुखोत्पत्तेरुक्तम् ॥ ४३ ॥

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलक्षेपि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ ४४ ॥

ज्योतिरिति । कुवलयदलक्षेपीति पाठः । कुवलयदलनिन्दकमित्यर्थः । धौतापाङ्गं शोधितापाङ्गम् । शोधनं च धवलापाङ्गोज्ज्वलीकरणम् । अनेन नर्तकस्य मुखमण्डनसमाधिश्च प्रतीयते । पावकेः स्कन्दस्य । अनेन हुतवहमुखे संभृतं तद्धि तेज इत्यस्य विवरणं कृतम् । पश्चात् पुष्पस्रपनात् पश्चात् । अद्रिग्रहणगुरुभिः, अद्रिग्रहणं गुहाग्रहणम् । नर्तयेथाः, तदाराधनं नृत्तमत्र विवक्षितं, तदभिषेकस्योक्तत्वाद्, आराध्यैनमिति वक्ष्यमाणत्वाच्च । अनेन श्लोकेन शिवयोः सन्निधानमुक्तमित्यनुसन्धेयम् ॥ ४४ ॥

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद् वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥

आराध्येति । सिद्धद्वन्द्वैः, स्कन्दमुपवीणयितुमागच्छाञ्चिरिति भावः । वीणिभिर्वीणावद्भिः । व्रीह्यादित्वादिनिः ।

"व्रीहिः शिखाष्टका माला पताका वर्मकर्मणी ।
मेखला बडवा वीणा संज्ञा चर्म बलाकया ॥"

इति व्रीह्यादिगणः । जलसिक्ततन्त्रीका वीणा न क्वणतीति सिद्धानां मेघमार्गपरित्यागः । वक्ष्यमाणार्थपरिज्ञानायात्रेदमनुसन्धेयं — दशपुराख्यस्य पुरस्याधिपतिः पुण्यश्लोकः कश्चन रन्तिदेव इति राजा बभूव । तदीयानां धेनूनां मध्ये प्रतिदिनं काञ्चनखुरशृङ्गाद्यवयवैः सञ्चरमाणाः काश्चन देवगव्यः समवतीर्य स्वैरं विहृत्य गच्छन्ति । तासां रूपं दृष्ट्वा रन्तिदेवधेनवः पप्रच्छुः कुतो युष्माकमीदृशं रूपं सञ्जातमिति । ताः पुनरब्रुवन् पुरा यज्ञेषु संज्ञपिता वयमीदृश्यो जाता इति । ताश्च धेनवः स्वामिनं रन्तिदेवमुपगम्याब्रुवन् — हे राजन् ! एतावन्तं कालं भवतो वयमुपकृतवत्यः । तस्मादस्मान् क्रतुषु त्वमालभेथाः, येन दिव्यरूपा भवामेति । सोऽपि ता यज्ञेषु विशस्य तासां चर्माणि पर्वतमिव क्वापि संबभार । तस्मात् सरक्तानिःष्यन्दाच्चर्मपर्वतात् क्वापि नदी प्रवहति, यां चर्मप्रभवत्वाच्चर्मण्वतीमाहुरिति भारतीयमुपाख्यानं हृदये कृत्वा तां नदीं तस्य कीर्तित्वेन वर्णयन्नाह — व्यालम्बेथा इति । व्यालम्बेथाः विनम्य प्राप्नुहि । सुरभितनयालम्भजां, सुरभितनया धेनवः तासामालम्भो विशसनम् । स्रोतोमूर्त्या चर्मण्वतीजलमूर्त्या ॥ ४५ ॥

मया तस्याः का माननेत्यपेक्षायामाह —

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचोरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४६ ॥

त्वयीति । पृथुमपि तनुं पृथुमपि दूरभावात् तनुं प्रवाहमित्यन्वयः । गगनगतयः खेचराः सिद्धादयः । एकं मुक्तागुणमिति, एकशब्द एकावलीसमाधिना प्रोक्तः ॥ ४६ ॥

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ४७ ॥

तामिति । उपरिविलसत्कृष्णशारप्रभाणां 'कृष्णरक्तसितः शारः' इति यादवप्रकाशेन शारशब्दो वर्णत्रयसाङ्कर्यवाचको यद्यपि अत्र पृथगेव कृष्णशब्दोपादानात् शारशब्दः सितरक्तवर्णयोः साङ्कर्ये सङ्कुचितवृत्तिः । तथा श्रीरामायणप्रयोगश्च विद्यते — 'कृष्णशारे विलोचने' इति । सप्तशत्यां च — 'एको वि कालसारो ण देइ' इति । कुन्दक्षेपानुगमधुकरश्रीमुषाम् । कुन्दस्य क्षेपो वायुना प्रेरणम् । मधुकरश्रीर्मधुकरशोभा । रक्तकुसुमोदरेषु मधुपानार्थं प्रवेशान्मधुकराणां तत्परागपाटलत्वं च स्वभावतो नीलत्वं च विद्यत इत्यनुसन्धेयम् । आत्मबिम्बं स्वशरीरमण्डलम् ।

"बिम्बोऽस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु ।
प्रतिबिम्बे तत्प्रकृतौ"

इति यादवः । दशपुरवधूनेत्रकौतूहलानाम् । वधूः स्त्री । नेत्राणां कौतूहलादागतानि उन्मेषणादीनि नेत्रकौतूहलानि । तस्मान्नेत्रकौतूहलानां नेत्रोन्मेषणादीनां परिचितभ्रूलताविभ्रमत्वमुपरिविलसत्कृष्णशारप्रभत्वं च संभवति ॥ ४७ ॥

ब्रह्मावर्तं जनपदमथच्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ४८ ॥

ब्रह्मेति । ब्रह्मावर्त इति मध्यदेशे पुण्यः कोऽपि जनपदः । अत्र मनुः —

"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥"

इति । अथानन्तरम् । छायया गाहमानः, अनेन तस्य पुण्यदेशत्वात् स्वरूपेणाक्रमणं न युक्तमिति सूचितम् । क्षत्रप्रधनपिशुनम्, अद्यापि शिरःकपालादिमत्तया पाण्डवानां क्षत्रियाणां युद्धसूचकम् । कौरवं कुरूणां संबन्धि । राजन्यानां मूर्धाभिषिक्तानाम् । गाण्डीवधन्वा अर्जुनः । 'धनुषश्च' (५. ४. १३२) इत्यनङादेशः । मुखानि, मुखग्रहणमनेककर्माश्रयत्वात् कृतम् ॥ ४८ ॥

यद्यपि प्रकृत्या पुण्यं कुरुक्षेत्रं, तथापि यस्मिन् प्रदेशे युद्धमासीत् तं नरशिरःकपालादिदूषितं प्राप्य कथमशुद्धो भविष्यामीत्याशङ्क्याह —

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुस्नेहात् समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य ! सारस्वतीना-
मन्तःशुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः ॥४९॥

हित्वेति । अभिमतरसाम् अभिमतरसत्वं रेवतीलोचनप्रतिबिम्बितां गत्वा । बन्धुस्नेहाद् धर्मपुत्रादिषु दुर्योधनादिषु च तुल्यत्वेन वर्तमानादित्यर्थः । समरविमुखस्त्यक्तसमरः । लाङ्गली, लाङ्गलमस्यास्तीति लाङ्गली बलभद्रः । अनेन सायुधोऽपि बन्धुस्नेहात् समरविमुख इत्यवगम्यते । याः सिषेव इति अपो भक्षयित्वा तपश्चारेत्यर्थः । अभिगममभिमुखत्वेन गमनम् । अन्तःशुद्धस्त्वमसि भवितेति । असीति मध्यमप्रतिरूपकमव्ययमिदम् । तथा माघकाव्ये —
"स्वयमेवशन्तनुतनूज ! यमसि गणमर्घ्यमभ्यधाः" (स० १५. श्लो० २०)
इति । भविता, तृजन्तमिदम् । अन्तःशुद्धो भवितासि अन्तःशुद्धो भविष्यसीत्यर्थः । पापकार्ष्ण्याभ्यां मुक्तद्रव्यवाचिनः शुद्धशब्दस्य श्रवणात् तव कृष्णवर्णलोपो न शङ्कनीय इत्याशङ्क्याह — वर्णमात्रेण कृष्ण इति । वर्णमात्रेण वर्णेनैव । तव चारुत्वहेतोः कृष्णवर्णस्य विपर्ययो न भवतीत्यभिप्रायः ॥ ४९ ॥

तस्माद् गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।
गौरीं वक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५० ॥

तस्मादिति। अनुकनखलम्। कनखल इति गङ्गाद्वारे कोऽपि पर्वतः। तथा महाभारते—

"गङ्गाद्वारं युधिष्ठिर!।
पुण्यं तत् ख्यायते राजन्! ब्रह्मर्षिगणसेवितम्॥
सनत्कुमारः कौरव्य! पुण्यः कनखलस्तथा।
पर्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः॥"

इति। शैलराजावतीर्णां हिमवतः प्रवृत्तां हिमवतः प्रसूतां च। सगरतनयस्वर्गसोपानपङ्क्तिं, सगरपुत्राणां कथा प्रसिद्धा। गौरीं वक्त्रभ्रुकुटिरचनामिति पाठः। वक्त्रभ्रुकुटिरचनां वक्त्रे भ्रुकुटिरचना यस्याः सा तथोक्ता। 'अमूर्धमस्तकात्' (६. ३. १२) इति सप्तम्या अलुक्। भ्रुकुटिर्भ्रूकौटिल्यं, कोपोल्लसितभ्रूभङ्गामित्यर्थः। केशग्रहणम्, अनेन केशेष्ववस्थानं बलात्कारेण केशग्रहणं च विवक्षितम्। इन्दुलग्नोर्मिहस्ता अनेन केशग्रहणे मालत्यादिकृतशेखरलग्नहस्तत्वं च ध्वन्यते। अयमभिप्रायः—आवयोर्द्वयोरपि शैलराजप्रभवत्वे साधारणे त्वं शम्भोरर्धहरासि। अहं तु तस्य मूर्धन्यवस्थानं कृतवतीति केशग्रहणदर्शनकुपितां गौरीं फेनव्याजेन हसन्तीव या विभातीत्यर्थः॥ ५०॥

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।
संसर्पन्त्या सपदि भवतः स्रोतसिच्छायया सौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा॥ ५१॥

तस्या इति। व्योम्नि पश्चार्धलम्बी आकाशे पृष्ठभागे मानः। लोके हि पश्चादुत्तरशब्दौ पर्यायौ भवतः। अत्र प[illegible] लम्ब[illegible]र्धशब्देन कि-

मुत्तरार्धं नेष्यते । उक्तंच — 'तं वाहनादवनतोत्तरकायम्' (रघु० ९. ६०)इति । पश्चार्धशब्दस्य मृगादिषु पृष्ठभागे एव प्रयोगदर्शनात् । तथा शाकुन्तले — 'पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्' इति । तर्कयेश्चिन्तयेः । व्योम्नि तिर्यक् पश्चार्धलम्बी तस्यास्तदम्भः पातुं तर्कयेश्चेदित्यर्थः । संसर्पन्त्या अवगाहमानया । संपदि ससर्पन्त्येत्यन्वयः । छायया प्रतिबिम्बेन अस्थानोपगतयमुनासङ्गमा गङ्गायमुनयोः प्रयागाख्य एव तीर्थे सङ्गमो भवति । ततोऽन्यत् सर्वमस्थानम् । विशिष्टयोः समागमसमाधिरत्र ध्वन्यते ॥ ५१ ॥

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शुभ्रां शोभां त्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५२ ॥

आसीनानामिति । नाभिगन्धैर्मृगमदगन्धैः । 'मृगनाभिर्मृगमदः' इत्यमरः । मृगाणामित्युक्तत्वाद् मृगनाभिगन्धैरित्यनुक्तम् । तस्या एव प्रभवं गङ्गाया एवोत्पत्तिस्थानम् । वक्ष्यसि, वहतेरिदं रूपं, वोढा भविष्यसि । शुभ्रां दीप्ताम् । 'शुभ्रः स्याद् दीप्तशुक्लयोः' इत्यमरः । पङ्कोपमानादुपेक्षितः शुक्लवर्णः । (शुभ्र ? शोभां)त्रिनयनवृषोत्खातपङ्कोपमेयामिति पाठः । कामपि वधूं भुक्त्वा तस्या एव जन्मगृहे गन्धादिभिः श्रममपहरतोजामातुः कान्तिरत्र ध्वन्यते ॥ ५२ ॥

तं चेद् वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
वाधेतोल्काक्षपितचमरीवालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ५३ ॥

तमिति । सरलस्कन्धसंघट्टजन्मा । सरलो वृक्षविशेषः । स्कन्देन स्कन्धशाखा विवक्षिता । हिमजलस्वरूपत्वत् तस्य हिमवतः

किमग्निना व्यसनमित्यपेक्षायामाह— उल्काक्षपितचमरीवालभार इति। दवाग्निः वनवह्निः । वायौ सरति सति सरलस्कन्धसंघट्टजन्मा दवाग्निरुल्काक्षपितचमरीवालभारो भूत्वा तं बाधेत चेदित्यर्थः । वारिधारासहस्रैः वारिधाराणां सहस्रसंख्याभिः । अत्र सहस्रशब्दः संख्यावचनोऽपि क्रियासमन्वयसामर्थ्याभावात् संख्येये पर्यवस्यतीत्येव बोद्धव्यं, वारिधाराभिरित्यर्थः ॥ ५३ ॥

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवफला निष्फलारम्भयत्नाः ॥

य इति। संरम्भोत्पतनरभसा इति, संरम्भः कोपः, कोपोत्पतनवेगिन इत्यर्थः । स्वाङ्गभङ्गाय स्वशरीरभङ्गाय । मुक्ताध्वानं शरभाणां मार्गं मुक्त्वा दूरगामिनम् । मुक्तमार्गत्वात् त्वयि शरभाणां लङ्घनं न संभवति, तेषां शरीरभङ्ग एव भविष्यतीत्यभिप्रायः । तुमुलकरकावृष्टिपातावकीर्णान् । करको घनोपलः । 'घनोपलस्तु करके' इति यादवः । करकाणाम् आ(वृष्टिः?) समन्ताद् वृष्टिपातः । परिभवफलाः तिरस्कारः फलं येषाम् । निष्फलारम्भयत्नाः निष्फला आरम्भयत्नाश्चेति कर्मधारयः । आरम्भयत्नाः कर्मव्यापाराः । आरम्भयत्नानां नैष्फल्यं मेघाभिलङ्घनस्याभावात् । यद्वा निष्फला इति पदच्छेदः । निष्फला अफलाः । रम्भयत्नाः संरम्भयत्नाः । 'रम्भस्तु संरम्भे स्त्री मोचाप्सरसोरि'ति केशवः । के वा निष्फलाः संरम्भयत्नाः परिभवफला न स्युरित्यर्थः ॥ ५४ ॥

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत् सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्भूतपापाः
कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५५ ॥

तत्रेति । हिमवतः कस्यांचिच्छिलायां रुद्रपादन्यासो विद्यत इति प्रसिद्धम् । शश्वत् सिद्धैरुपहृतबलिं सर्वदा सिद्धैरु(पहृतो)पहारम् ।

"बलिः पूजोपहारे च दैत्यभेदे करेऽपि च"

इति यादवः । अनेन ज्ञानोपायः सूचितः । परीयाः परित ईयाः प्रदक्षिणं कुर्वीथा इत्यर्थः । करणविगमात्, करणं शरीरम् ।

"करणं साधकतमक्षेत्रगात्रेन्द्रियेष्वपि"

इति यादवः । शरीरपरित्यागादूर्ध्वमित्यर्थः । कल्पिष्यन्ते स्थिरगणपदप्राप्तय इति । 'नमःस्वस्तिस्वाहास्वधालम्—' (२. ३. १६) इति सूत्रे त्वलंशब्दस्यार्थग्रहणात् पर्याप्तिवाचिनः कॢपिधातोर्योगे स्थिरगणपदप्राप्तय इति चतुर्थीनिर्देशः ॥ ५५ ॥

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादी ते मुरव इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेर्नृत्यतस्तत्र पूर्णः ॥ ५६ ॥

शब्देति । 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' (३. १. १७) इति क्यङ् । संसक्ताभिः भक्तिमतीभिः । शब्दायन्ते गीयते इति च वर्तमाननिर्देशः सर्वदा संभवात् कृतः । निर्ह्रादी ते मुरव इव चेत् कन्दरेषु ध्वनिः स्यादिति ।

"निर्ह्रादो रवणो नादः क्ष्वेडो ध्वानो ध्वनिः कलः"

इति यादवः । पर्यायत्वेन यद्यपि चरन्ति तथाप्यत्रानुनादो निर्ह्रादत्वेन विवक्षितः । मुरव इति सप्तम्यन्तः । मुरवे निर्ह्रादी ध्वनिरिव कन्दरेषु ध्वनिस्ते स्याच्चेदित्यर्थः । सङ्गीतार्थः सङ्गीतस्य हेतुः । सङ्गीतं नाम प्रेक्षणीयनृत्तगीतवाद्यात्मकं त्रयम् । ननु सङ्गीतशब्दस्य नृत्तादित्रयवाचकत्वं नास्ति, नाटकेषु सङ्गीतकमनुतिष्ठामीति दर्शनात् । सङ्गीतशब्दस्तु गानमात्रे प्रयुज्यते । तथा कुमारसंभवे—'वनान्तसङ्गीतसखीररोदयत्' इति । वक्ष्यति च—'सङ्गीताय प्रहतमुरवा' इति ।

---

१. 'र' क. पाठः ।

कथमत्र सङ्गीतशब्दस्य नृत्तादित्रयवाचकत्वमस्तीति व्याख्यायते इति । उच्यते । सङ्गीतशब्दस्यैव नृत्तादित्रयवाचकत्वं यादवेनोक्तं—

"नृत्तं गीतं वाद्यमिति नाट्यं तौर्यत्रिकं त्रिकम् ।
सङ्गीतं प्रेक्षणार्थेऽस्मिन्"

इति । पशुपतेर्नृत्यतस्तत्र पूर्ण इति पाठः । पशुपतेस्तत्र भावी (समग्रः) इति पाठे तु नृत्तानुपादानात् सङ्गीतार्थः पूर्णो न स्यात् । अन्ये तु सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समस्त इति पठन्ति । पादन्यासमन्तरेण स्वरूपेणापि पशुपतिस्तत्र वसतीति प्रसिद्धम् ॥ ५६ ॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिविमथनाभ्युद्यतस्येव विष्णोः ॥

प्रालेयेति । तांस्तान् विशेषान् 'तस्माद् गच्छेरनुकनखलम्' इत्युक्तान् विशेषान् । हंसद्वारं हंसानां मानसाख्यसरोगमनद्वारम् । भृगुपतियशोवर्त्म । अत्रेदमनुसन्धेयं—स्कन्देन क्रौञ्चारातिना स्पर्धमानः परशुरामः क्रौञ्चाचलं शरेण सरन्ध्रमकरोत् । तेन तस्य महती कीर्तिरासीत् । तस्माद् भृगुपतियशोवर्त्मेत्युक्तम् । यथाह मुरारिः—

"यद्बाणव्रणवर्त्मना शिखरिणः क्रौञ्चस्य हंसच्छला-
दद्याप्यास्थिकणाः पतन्ति स पुनः क्रुद्धो मुनिर्भार्गवः ॥"

इति । अनुसरेः उद्दिश्य गच्छेः । रन्ध्रस्य तिरश्चीनोर्ध्वत्वात् तिर्यगायामशोभीत्युक्तम् । बलिविमथनाभ्युद्यतस्येव विष्णोः इति । बलिभङ्गोद्यतस्य । इदं व्याप्तिवाचकत्वात् तत्कालोचितं विशेषणम् ॥ ५७ ॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥ ५८ ॥

गत्वेति । तेन रन्ध्रेणोर्ध्वं गत्वेत्यर्थः । दशमुखभुजोच्छ्वासि-

तप्रस्थसन्धेः दशमुखभुजोद्धारणाद् दलितसानुसन्धेः। त्रिदशवनितादर्पणस्य। ननु इदं विशेषणमयुक्तं मेघवातस्पर्शाद् दर्पणस्यान्धीभावात्। उक्तं च—

"मत्तः सदाचारशुचेः कलङ्कं पयोदवातादिव दर्पणस्य"

इति। अस्य परिहारः—कैलासस्य महत्तया मालिन्यं न संभवतीति। महत्तामेव दर्शयति—शृङ्गोच्छ्रायैरिति। वितत्य विस्तीर्य। यावदाकाशं वितत्येत्यर्थः। अट्टहासो महाहासः। 'अट्टहासो महाहास' इति यादवः॥ ५८॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरदरदनच्छेदगौरस्य तस्य।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव॥ ५९॥

उत्पश्यामीति। स्निग्धभिन्नाञ्जनाभे भग्नस्निग्धाञ्जनशिलासन्निभे। स्तिमितनयनप्रेक्षणीयामिति उत्पश्यामीत्यनेन संबन्धः। हलभृतो नीलाम्बरस्य। अस्यापि सद्यःकृत्तद्विरदरदनच्छेदगौरस्येत्यादि योज्यम्। मेचके नीले।

"कृष्णे नीलासितश्यामकालश्यामलमेचकाः"

इत्यमरः॥ ५९॥

हित्वा तस्मिन् भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विहरेत् पादचारेण गौरी।
भङ्गी भक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानं त्वं कुरु मणितटारोहणायाग्रयायी॥ ६०॥

हित्वेति। भुजगवलयोत्सारणं देव्यास्त्रासाभावाय। यदि चेति चकारस्य त्वमित्यनेन संबन्धः। विहरेत् क्रीडेत् परिक्रामेदिति वा। भङ्गी भङ्गवान्। 'भङ्गो विभङ्गः शकलः' इति केशवः। उक्तंच 'शिलाविभङ्गैरि'ति। भक्त्या ईश्वरभक्त्या। प्रागप्युक्तं 'भक्तिनम्रः परीया'

इति। विरचितवपुः। विच्छिद्य विच्छिद्य रचनं विरचनं सोपानमित्यर्थः। मणितटारोहणायं। मणिग्रहणं मेघस्य नीलवर्णत्वात् तटसोपानयोरेकवर्णत्वं सूचयितुं कृतम्। गौरी क्रीडाशैले पादचारेण यदि विहरेत्, त्वं च भक्त्या भङ्गीभूत्वा विरचितवपुः मणितटारोहणाय सोपानं कुर्वित्यर्थः॥ ६०॥

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे! धर्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः॥ ६१॥

तत्रेति। वलयकुलिशोद्घट्टनोद्गीर्णतोयं वलयमेव कुलिशं वलयकुलिशं तेन वलयकुलिशेन ऊर्ध्वप्रोतत्वं वलयकुलिशोद्घट्टनम्। कुलिशग्रहणेनोद्घट्टनसाधनत्वमुक्तम्। यन्त्रधारागृहत्वं कृत्रिमधारागृहत्वम्। धर्मलब्धस्य धर्मकाललब्धस्य। ननु वर्षाकालो वर्तते। कथं धर्मकाललाभः। देवभूमित्वात् कैलासे षड्ऋतवः सर्वदा वर्तन्ते। वक्ष्यति च—'हस्ते लीलाकमलम्' इति। अथवा धर्मशब्देन श्रमो विवक्षितः। क्रीडाश्रमसमये लब्धस्येत्यर्थः। भाययेर्भयं जनयेः॥ ६१॥

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामात् क्षणमुखपटप्रीतिमैरावतस्य।
धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद! ललितैर्निर्विशेस्तं नगेन्द्रम्॥ ६२॥

हेमेति। प्रसवो जननं पुष्पं वा, तदस्यास्तीति प्रसवि।

"प्रसवो जननानुज्ञापुत्रेषु फलपुष्पयोः"

इति यादवः। कामाद् यथेष्टम्। इदं सर्वशेषम्। क्षणमुखपटप्रीतिं, क्षणग्रहणं सलिलादानमुहूर्तविवक्षायाम्। मुखपटप्रीतिं मुखावगुण्ठनपटप्रीतिम्। ऐरावतस्य मानसावगाहिनः। उन्मज्जत ऐरावतस्य

१. 'न कुरु। म', २. 'य। सोपानं कु' क. पाठः.

मुखे लम्बमानशरीरस्त्वं तस्य मुखावगुण्ठनप्रीतिं जनयेरित्यर्थः। कल्पद्रुमकिसलयानि कल्पद्रुमकिसलयभूतानि। नानाचेष्टैः, नानाविधा चेष्टा येषाम्। ललितैर्लीलायुतैः। निर्विशेः अनुभव। इदमत्रानुसन्धेयं — कश्चित् सखा स्वप्रियसखस्य गृहं गत्वा तदीयानि वापीवाहनारामादीनि स्वैरं निर्विशतीत्यर्थो ध्वन्यते इति॥ ६२॥

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्!।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानै-
र्मुक्ताजालग्रथितमलकं कामिनीवाभ्रबृन्दम्॥ ६३॥

तस्येति। उत्सङ्गे उपरितले अङ्के च। प्रणयिनो भर्तुः। प्रणयिन उत्सङ्गे कामिनीमिति वक्तव्ये कामिनीशब्दानुपादानमुत्तरार्धे वक्ष्यमाणत्वात्। स्रस्तगङ्गादुकूलां, 'दुकूलं शुक्लवस्त्रेऽपी'ति यादवः। इदमुभयत्र योज्यम्। न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यस इति, पूर्वमेवालकाज्ञानं मेघस्यास्तीति सूचयितुं नञ्द्वयं प्रयुक्तम्। कामचारिन्!, अनेन सर्वचारित्वं कामुकत्वं च विवक्षितम्। वः काल इति। वः त्वादृशानां मेघानां काले वर्षाकाल इत्यर्थः। सलिलोद्गारं, सलिलमुद्गिरतीति सलिलोद्गारः। 'कर्मण्यण्' (३. २. १) इत्यण्प्रत्ययः। उच्चैरुत्तुङ्गैर्विमानैः। सप्तभूमिकं भवनं विमानम्।

"विमानोऽस्त्री देवयाने सप्तभूमे च सद्मनि"

इति यादवः। मुक्ताजालग्रथितं मौक्तिकगुणबद्धम्। अत्रेदमनुसन्धेयं— प्रोषिता उदात्ताः पुरुषाः[1] वर्षाकाले समागत्य विगतमाना भूत्वा स्त्रीणां कपोललम्बानलकान् मुक्ताजालैरुद्गृह्य बध्नन्तीत्यर्थो विवक्षितः। उत्तरार्धेनाप्यलकाया ज्ञानोपाय उक्तः॥ ६३॥

पूर्वसन्देशः समाप्तः।

---

१. 'षाः का' क. पाठः.

अथ उत्तरसन्देशः ।

अतः परं च सप्तसु श्लोकेषु ययाकयाचन विधया मेघसंबन्धमुक्त्वा अलकां वर्णयति —

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीतार्थप्रहतमुरवाः स्निग्धपर्जन्यघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥

विद्युत्वन्तमिति । सचित्रा आलेख्यसहिताः । सङ्गीतार्थप्रहतमुरवा इति पाठः । नृत्तवाद्यगीतानां त्रयं सङ्गीतम् । अर्थशब्दो हेतुवचनः । सङ्गीतार्थाः प्रहता मुरवा येषाम् । स्निग्धपर्जन्यघोषं, पर्जन्योऽभ्रध्वनितम् ।

"पर्जन्यो गर्जदभ्रेऽभ्रध्वाने शक्रेऽस्रयन्त्रके"

इति यादवः । स्निग्धगर्जितघोषमित्यर्थः । अत्र मेघगर्जितवाचिनः पर्जन्यशब्दस्य प्रयोगेणैव सिद्धेऽप्यर्थे घोषशब्दप्रयोगः 'केकारवैर्बर्हिण' इत्यत्र केकारववत् सोढव्यः । अभ्रंलिहाग्राः, 'वहाभ्रे लिहः'(३. २. ३२) इति खश् । तुलयितुं तुलां कर्तुम् । तुलाशब्दः सदृशवाचकोऽप्यस्ति । त्वां सदृशीकर्तुमित्यर्थः । ननु 'तुल उन्मान' इत्ययं धातुश्चौरादिकः तुलेति कथं व्युत्पन्नः । णिचोऽनित्यत्वात् तुलेत्यपि भवति । अलं पर्याप्तम् । तैस्तैर्विशेषैः तैस्तैर्ललितवनितादिभिर्विशेषैः । पूर्वोक्तानां विशेषाणां समासवृत्तितिरोहितत्वात् स्पष्टार्थं तैस्तैर्विशेषैरित्युक्तम् । अत्र मेघसंबन्धः स्पष्टः ॥ १ ॥

हस्ते लीलाकमलमलके बालकुन्दानुवेधो
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥

---

१. 'न्त्रिते इ', २. 'सैः' क. पाठः.

हस्त इति । अनेन श्लोकेन शरद्धेमन्तशिशिरवसन्तग्रीष्म-प्रावृषां षण्णामृतूनां लिङ्गभूतैरसाधारणैः पुष्पैरलकायां युगपदेव प्रवृत्तिरुक्ता। तद्यथा — हस्ते लीलाकमलमित्यत्र शरल्लिङ्गेन कमलेन शरत्कालस्य सन्निधिरुक्ता। अलकं बालकुन्दानुविद्धमित्यपपाठः। अलकशब्दस्य पुल्लिङ्गत्वात् । 'अलकाश्चूर्णकुन्तला' इत्यमरः। अलके बालकुन्दानुवेध इति पाठः । अस्मिन् पाठे रीतिभङ्गश्च न भवति । कुन्देन हेमन्तसंनिधिरुक्तः। ननु

"निषिञ्चन् माधवीवृत्तिं कुन्दशेषं च वर्धयन्"

इत्यत्र वसन्तात् प्राचीनस्य शिशिरस्य लिङ्गं कुन्दमिति प्रतीयते। कथं हेमन्तस्य लिङ्गमित्युक्तम् । उच्यते । हेमन्तशिशिरयोर्द्वयोरपि लिङ्गं कुन्दम्। हेमन्ते प्रादुर्भवति शिशिरे प्रौढीभवतीति विशेषः। अत एव बालकुन्दानुवेध इति बालशब्दः प्रयुक्तः । नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीरिति सप्तम्यन्तः पाठः । आनने कान्तिर्लोध्रप्रसवरजसा पाण्डुतां नीतेत्यर्थः । लोध्रपुष्पं हि शिशिरस्य लिङ्गम् । तथा माघकाव्ये शिशिरवर्णने —

"अभिषिषेणयिषुं भुवनानि यः स्मरमिवाख्यत लोध्ररजश्चयः"

(स० ६. श्लो० ६४)

इत्यादि। चूडापाशे नवकुरवकं, चूडापाशे शिखाकलापे। 'शिखा चूडा केशपाश' इत्यमरः। नवकुरवकं हि वसन्तलिङ्गम्। उक्तं च 'अग्रे स्त्रीनखपाटलं कुरवकम्' इति। चारु कर्णे शिरीषं, शिरीषं हि ग्रीष्मस्य लिङ्गम्। उक्तं च —

"स्वेदानुविद्धार्द्रनखक्षताङ्के सन्दष्टभूयिष्ठशिखं कपोले।
च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात॥"

इति। त्वदुपगमजमित्यनेन नीपस्य वर्षालिङ्गत्वं प्रतीयते। वधूनां स्त्रीणाम्। 'वधूर्जाया स्नुषा चे'त्यमरः। त्वदुपगमजं यत्र नीपमिति मेघसंबन्ध उक्तः॥ २॥

---

१. 'रः। ङ' ङ. पाठः.

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ३ ॥

यस्यामिति । सितमणिः स्फटिकमणिः । स्फटिकमणीनां प्रसादवत्तया रात्रिषु प्रतिबिम्बातिशयः सम्भवतीत्यनुसन्धेयम् । आसेवन्ते आदृत्य सेवन्ते । त्वद्गम्भीरध्वनिषु अनेन मेघसम्बन्ध उक्तः । पुष्करेषु वाद्यभाण्डमुखेषु ।

"द्विरदकराग्रे पद्मे खड्गफले व्योम्नि वाद्यभाण्डमुखे ।
अगदे जले च तीर्थे पुष्करमष्टासु निर्दिष्टम् ॥"

इति भट्टहलायुधः । आहतेषु वाद्यमानेषु ॥ ३ ॥

*[मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दारोणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥]

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
विद्युद्दीप्तानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ४ ॥

नीवीति । बिम्बाधराणां बिम्बफलमिवाधरो यासां ता बिम्बाधरा इति स्त्रीणां नामधेयम् । अनिभृतकरेषु व्यापियमाणकरेषु । आक्षिपत्सु आहरत्सु । विद्युद्दीप्तानिति पाठः । त्वदीयविद्युत्तुल्यानि-

* अव्याख्यातत्वान्मेघसम्बद्धार्थाप्रतिपादकत्वाच्च श्लोकोऽयं नूनं प्रक्षिप्तः, मल्लिनाथेन तु व्याख्यातः ।

त्यर्थः। अनेन मेघसम्बन्ध उक्तः। अभिमुखमपि प्राप्य[1] अभिमुखेन प्राप्योपीत्यर्थः। व्रीमूढानां लज्जाविमनस्कानाम्। चूर्णमुष्टिः मुखवासकर्पूरादिचूर्णमुष्टिः ॥ ४ ॥

नेत्रा नीताः सततगतिना याद्विमानाग्रभूमी-
रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यन्त्रजालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ५ ॥

नेत्रेति। नायकेन प्रापकेणेत्यर्थः। सततगतिना वायुना। सलिलकणिकादोषं सलिलकणिकास्पर्शदूषणम्। जलस्पर्शेन चित्राणि विनश्यन्तीत्यभिप्रायः। शङ्कास्पृष्टाः आलेख्यविनाशं दृष्ट्वा कोऽप्यस्मान् ग्रहीष्यतीति शङ्कमाना इत्यर्थः। यन्त्रजालैः मुखबन्धादिरूपजालकैः। धूमोद्गारानुकृतिनिपुणाः धूमनिर्गमानुकारेषु सम्यक् समर्थाः। 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' (२. ३. ४३) इति समासः। जर्जराः, निर्गमद्वारानुरूपं कृतवेषवैषम्यत्वाज्जर्जराः। निष्पतन्ति निर्यान्ति। अनेन मेघसम्बन्धः स्पष्टः ॥ ५ ॥

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गितानां
सङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥

यत्रेति। प्रियतमभुजोच्छ्वासितालिङ्गितानां, बलात्कारात् सञ्जातोच्छ्वासत्वादुच्छ्वासितं, प्रियतमभुजदृढालिङ्गितानामित्यर्थः। तन्तुजालावलम्बाः। हिमजलपातनिवारणार्थमुपरि बद्धे विताने प्रलम्बमानानि मुक्तादामस्थानीयानि तन्तुजालानि अवलम्बमानास्तन्तुजालावलम्बाः। यद्वा तन्तुमयं जालमानायः तन्तुजालम्। प्रासादानामुप-

---

१. 'अभिमुखमपि प्रा' क. पाठः. २. 'प्येत्य', ३. 'सा ख. पाठः.

रितलेषु भेकादीनामवतरणनिषेधाय जालं वितन्वन्तीति प्रसिद्धम् । अत्र चन्द्रकान्तमणिबद्धरचनतन्तुजालं विवक्षितम् । त्वत्संरोधापगम-विशदैः, अनेन मेघसंबन्ध उक्तः । व्यालुम्पन्ति अपहरन्ति । च-न्द्रपादैः स्फुटजललवस्यन्दिन इत्यन्वयः । चन्द्रकान्ताश्चन्द्रकान्तम-णयः ॥ ६ ॥

[अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥

*गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥]

मत्वा देवं धनपतिसखं यत्र साक्षाद् वसन्तं
प्रायश्चापं न वहति भयात् त्वामपि प्रेक्ष्य कामः ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७ ॥

मत्वा देवं धनपतिसखमिति । अनेन वैश्रवणसख्यात् कैलासे नित्यं शिवो वसतीत्युक्तम् । प्रायः, उत्प्रेक्षायामिदमव्ययम् ।

"मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥"

---

१. 'न्ति । स्फुटजललवस्यन्दिनः च' क. पाठः.

---

* इमावपि श्लोकौ मन्दाक्रान्ता इतिश्लोकवत् ।

इत्यलङ्कारे । भयात् त्वामपि प्रेक्ष्य काम इति पाठः । विरहिणां प्रोत्साहकारिणं भवन्तं प्रेक्ष्यापीत्यर्थः । मयि तं देशं प्रविष्टे मदनव्यापारः कथं भविष्यतीत्याशङ्क्याह — सभ्रूभङ्गप्रहितनयनैरिति । तस्यारम्भः तस्य प्रवृत्तिः । सिद्धः सिद्धो भविष्यतीत्यर्थः । त्वामपि प्रेक्ष्येत्यनेन मेघसंबन्ध उक्तः । मन्मथः षट्पदज्यमिति पाठे पूर्वश्लोकेष्विव मेघसंबन्धो न स्यात् ॥ ७ ॥

*[वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥]

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं त्वदमरधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ ८ ॥

तत्रेति । तस्यामलकायाम् । इतः परं पञ्चसु श्लोकेषु यया-कयाचन विधया मेघसंबन्धमुक्त्वा स्वगृहस्य लक्षणमाह । वक्ष्यति च 'एभिः साधो! हृदयनिहितैर्लक्षणैर्लक्षयेथाः' इति । धनपतिगृहानुत्तरेणेति पाठः । धनपतिगृहान् वैश्रवणगृहान् । 'गृहाः पुंसि च भूम्न्येव' इत्यमरः । उत्तरेणोत्तरतः समीपे । 'एनबन्यतरस्यामदूरेऽपञ्चम्याः' (५. ३. ३५) इत्येनप्प्रत्ययः । 'एनपा द्वितीया' (२. ३. ३१) इति द्वितीया । कृतकतनयः कृत्रिमपुत्रकः । बालमन्दारवृक्षः बालकल्पवृक्षः । त्वदमरधनुश्चारुणा तोरणेनेति मेघसंबन्ध उक्तः ॥ ८ ॥

वापी चास्मिन् मरतकशिलाबद्धसोपानमार्गा
हैमैः स्फीता कमलमुकुलैर्दीर्घवैदूर्यनालैः ।

* प्रक्षिप्तत्वधियायं श्लोको न व्याख्यातोऽन्यव्याख्यातोऽपि ।

यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥

वापीति। अस्मिन् अगारे। स्फीता पुष्टा। यस्यास्तोये इति, यस्यां कृतवसतय इति वक्तव्ये तोयग्रहणं वर्षाकालेऽपि तोयस्य प्रसादातिशयसूचकम्। आध्यास्यन्तीति पाठः। आध्यानमुत्कण्ठा। 'आध्यानमुत्कण्ठोत्कलिके समे' इत्यमरः। त्वामपि प्रेक्ष्येत्यनेन मेघसंबन्ध उक्तः ॥ ९ ॥

तस्यास्तीरे विहितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ १० ॥

तस्या इति। पेशलैः चारुभिः। 'चारौ दक्षे च पेशलः' इत्यमरः। मद्गेहिन्याः प्रिय इति, इतिशब्दो हेतौ। तमेव क्रीडाशैलमेव। उपान्तस्फुरिततडितं त्वां प्रेक्ष्य कातरेण चेतसा तमेव स्मरामि इत्यन्वयः। अत्र मेघसंबन्धः स्पष्टः ॥ १० ॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहलच्छद्मनास्याः ॥

रक्तेति। केसरो वकुलः। कुरवकवृतेः कुरवक एव वृतिरावरणं यस्य। माधवीमण्डपस्य, माधवी अतिमुक्तः, माधवीवेष्टितमण्डपस्येत्यर्थः। तव सख्या इति मेघसंबन्ध उक्तः। सह मया वामपादाभिलाषीति वाक्यच्छेदः। दोहलच्छद्मना, दोहलं नाम कुसुमाद्युत्पादकं

---

१. 'त' क. पाठः.

संस्कारद्रव्यम् । तथा सप्तशत्यां —

*"दोहलिअमप्पणो किं ण मग्गसे मग्गसे कुरवअस्स ।
एअं तुह सुहग! हसइ वलिआणणपङ्कअं जाआ ॥"

अयमभिप्रायः—अहं कृतयाच्ञाञ्जलिस्तव सख्या वामपादाभिताडनं दोहलव्याजेन यथाभिलषामि, तथायं चलकिसलयो रक्ताशाकः तस्या वामपादाभिताडनं दोहलव्याजेनाभिलषतीति (न?) तथा कान्तः केसरद्रुमोऽपि दोहलच्छद्मना तस्या वदनमदिरां काङ्क्षतीति च ॥ ११ ॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥

तन्मध्ये गृहमध्ये । स्फटिकफलका स्फटिकमयी निवासफलका यस्याः । स्फटिकफलकोपादानं मयूरस्य शीतप्रियत्वापेक्षया कृतम् । अनतिप्रौढवंशप्रकाशैः तरुणवेणुकादण्डसमानवर्णैः । शिञ्जावलयसुभगैरिति[1] । शिञ्जा शिञ्जितं, शिञ्जावन्ति वलयानि शिञ्जावलयानि । शाखावृक्षवत् समासः । शिञ्जद्वलयसुभगैरिति पाठे, 'शिञ्जि अव्यक्ते शब्दे' इत्ययं धातुरात्मनेपदी । तस्मात् परस्मैपदं न भवति । नीलकण्ठः सुहृद् वः इति मेघसंबन्ध उक्तः ॥ १२ ॥

एभिः साधो! हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥

एभिरिति । साधो! विद्वन्! । लक्षणैः चिह्नैः । लक्षयेथाः पश्येरित्यर्थः । शङ्खपद्मौ शङ्खपद्माख्यौ निधिविशेषौ ।

---

१. 'ति वामे शि' क. पाठः.

---

*दोहदमात्मनः किं न मृगयसे मृगयसे कुरवकस्य ।
एवं तव सुभग! हसति वलिताननपङ्कजं जाया ॥

"निधिर्नौ शेवधिर्भेदाः शङ्खपद्मादयो निधेः"

इत्यमरः । लक्षयतेः कर्मादर्शनाल्लक्षयेस्तदिति केचित् पठन्ति । तस्मिन् पाठे तदिति पूर्वोक्तमगारं परामृश्यते । इदानीमात्मीयं तद्भवनं संस्मृत्य विषण्ण आह — क्षामच्छायामिति, क्षामकान्ति । अभिरूप्यां शोभाम् ॥ १३ ॥

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रत्नसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ १४ ॥

गत्वेति । शीघ्रसंपातहेतोः तीव्रसंपातहेतोः । प्रथमकथिते 'तस्यास्तीरे विहितशिखर' इति पूर्वोक्ते । रत्नसानौ, इदं विशेषणं सौदामनीदर्शनेऽपि रत्नप्रभेति तस्या बुद्धिजननाय कृतम् । विद्युदुन्मेषदृष्टिम् । विद्युदुन्मेषो विद्युत्स्फुरणं तदेव दृष्टिरिति विद्युदुन्मेषदृष्टिः ॥

इदानीं स्वप्रेयस्या लक्षणान्याह —

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्येक्षामा चकितहरिणीप्रेक्षिणी निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥

तन्वीति । श्यामा श्यामवर्णा, हरितवर्णेत्यर्थः । अस्यार्थस्यानुकूलमेव वक्ष्यति — 'श्यामास्वङ्गमि'ति । यद्वा —

"श्यामा यौवनमध्यस्था प्रौढा निष्क्रान्तयौवना"

इत्युत्पलमालायाम् । अस्यार्थस्यानुकूलं द्योतकं युवतिविषय इति पदम् । शिखरिदशनेति पाठः । शिखरीणि कोटिमन्ति दशनानि यस्याः सा शिखरिदशना । तथा सामुद्रे —

"स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः ।
दन्ता भवन्ति यासामासां पादे जगत् सर्वम् ॥"

इति ।

"पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः ।"

मध्येक्षामा, 'अमूर्धमस्तकात्—' (६. ३. १२) इत्यलुक् । क्षामा क्षीणा। चकितहरिणीप्रेक्षिणीति पाठः। 'कर्तर्युपमाने' (३. २. ७९) इति णिनिः। तत्र तस्मिन् भवने। स्याद्, आख्यातप्रतिरूपमव्ययमिदं यद्यर्थे वर्तते। तथा श्रीरामायणे प्रयोगश्च—

"पठन् द्विजो वागृषभत्वमीयात् स्यात् क्षत्रियो भूमिपतित्वमीयात्"

इति। युवतिविषये युवतिपक्षे, युवतिगोचर इत्यर्थः। आद्या प्रथमा। धातुः प्रथमाया युवतिसृष्टेरादरेण निर्मितत्वात् तद्रामणीयकमस्तीति भावः। एवंरूपा तस्मिन् भवने यद्यस्ति, तां जानीया इत्युत्तरत्र सम्बन्धः ॥ १५ ॥

तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बालो
जाता मन्ये शिशिरमथिता पद्मिनीवान्यरूपा ॥

तामिति। परिमितकथां स्वभावतः स्वल्पभाषिणीम् दूरीभूते दूरस्थे। सहचरे चक्रवाकीमिवैकामिति वाक्यच्छेदः। सहचरे चक्रवाके दूरीभूत इत्यर्थः। अस्यार्थस्य मूलं

"सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना।"

इति श्रीरामायणवचनम्। एकामसहायाम्। पूर्वोक्तानां लक्षणानामन्यथाभावमाशङ्क्याह— गाढोत्कण्ठेति। शिशिरमथिता हिमसंपर्कविशीर्णा। अन्यरूपा नष्टशोभा। अस्यार्थस्य मूलं 'हिमहतनलिनीव नष्टशोभा' इति वचनम्। अनेन श्रीरामायणवचनार्थानुसारेण कवेः पूर्वोक्तो रामकथाभिलाषः स्पष्टः ॥ १६ ॥

सर्वेषामङ्गानां प्रधानभूतस्य मुखस्यान्यरूपत्वमाह—

---

१. 'कुक्षौ च', २. 'तिविषये सु', ३. 'यास्ति चेत् तां' क. पाठः.

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदुपगमनक्लिष्टकान्तेर्बिभर्ति ॥ १७ ॥

नूनमिति । नूनं वितर्के । प्रबलरुदितोच्छूननेत्रं भूयिष्ठरोदनोच्छ्वसितनेत्रम् । उच्छूनं, 'टुओश्वि गतिवृद्धयोः' इति धातोर्निष्ठानत्वे 'वचिस्वपि—' (६. १. १५) इत्यादिना संप्रसारणे कृते रूपमिदम् । असकलव्यक्ति अस्पष्टसकलप्रदेशम् । त्वदुपगमनक्लिष्टकान्तेरिति मेघसम्बन्धः । मेघसंवृतत्वमलकलम्बनस्थानीयम् ॥ १७ ॥

तां ज्ञातुं लक्षणान्तराण्याह —

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां शारिकां पञ्जरस्थां
कच्चिद् भर्तुः स्मरसि गिरिके ! त्वं हि तस्य प्रियेति ॥

आलोक इति । आलोके दर्शने । 'आलोको दर्शनोद्द्योताविति'-त्यमरः । पुरा, भविष्यत्कालद्योतकमव्ययमिदम् । पुरा निपततीति निपतिष्यतीत्यर्थः । त्वां दृष्ट्वा सा भृशं मद्विरहाद् भूमौ निपतिष्यतीति यावत् । अस्मिन्नर्थे लिङ्गं — 'तामुन्निद्रामवनिशयनाम्' इति वक्ष्यमाणवचनम् । अथवा त्वद्दर्शनात् पुरा वक्ष्यमाणान् कुर्वती सा तवालोके भूमौ निपततीत्यर्थः । बलिव्याकुला, अत्र प्रियतमागमनार्थं देवताभ्यो बलिप्रदानं विवक्षितम् । तथा सप्तशत्यां —

* "णेच्छइ पासासङ्की काओ दिण्णं पि पहिअवहुआए ।
ओअन्तकरअलोज्झिअवलअअमज्झट्ठिअं पिण्डं ॥"

इति । मत्सादृश्यं मत्प्रतिकृतिं मद्विषयमालेख्यम् । 'आलेख्येऽपि च

---

* 'नेच्छति पाशाशङ्की काको दत्तमपि पथिकवध्वा ।
अवनतकरतलोज्झितवलयमध्यस्थितं पिण्डम् ॥

सादृश्यम्' इत्यजयः। उक्तं 'सादृश्यप्रतिकृतिदर्शनैः प्रियाया' इति। विरहतनु विरहेण तनुसंस्थानम्। इदं विशेषणं सादृश्यशब्दस्यालेख्यवाचित्वे घटते। भावगम्यं, विरहात् प्राक् तादृशस्य संप्रत्येवमन्यथाभावः संभवतीत्युत्प्रेक्षागम्यमित्यर्थः। शारिकां, शारिकेति व्यक्तवाक् काऽपि चटकविशेषस्त्री। 'वाचाला मुखरा शारी' इति यादवः। पञ्जरस्थां, विलालादिभयेन पञ्जरस्थामित्यर्थः। भर्तुः स्मरसीति 'अधीगर्थदयेशां कर्मणि' (२. ३. ५२) इति कर्मणि षष्ठी। स्मरसि उत्कण्ठस इत्यर्थः। गिरिके!, मार्जारादिसन्निधानात् पञ्जराभ्यन्तरं प्रविश्य बालमूषिकेव विभेतीति बालमूषिकानामान्तरेण शारिकाया उपालम्भपूर्वं संबोधनम्। 'गिरिका बालमूषिका' इत्यमरः॥ १८॥

उत्सङ्गे वा मलिनवसने सौम्य! निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयो भूयः स्वयमधिकृतां मूर्छनां विस्मरन्ती॥

उत्सङ्ग इति। मद्गोत्राङ्कं मन्नामधेयचिह्नम्। सारयित्वा करेण परामृश्य। स्वयमधिकृताम् आत्मप्रस्तुताम्। कथञ्चित् स्वयमधिकृतामित्यन्वयः। मूर्छनां सप्तस्वरक्रमस्थापनाम्।

"क्रमयुक्ताः स्वराः सप्त मूर्छना परिकीर्तिता"[1]

इति भरते॥ १९॥

शेषान् मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीमुक्तपुष्पैः।
मत्संयोगं हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः॥ २०॥

शेषानिति। शेषान् गतशेषान्। अवधेः शापान्तावधेरित्यर्थः। देहलीमुक्तपुष्पैः, गृहद्वारयन्त्रस्य तिरश्चीनफलकं देहली। सा च बहिर्द्वारदेहली, तत्रैव तस्याः प्रियतमालोकनोत्सुकतयावस्थानात्॥ २०॥

१. 'ति निघण्टुः॥' ख. पाठः.

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रां विरहशयनां सद्मवातायनस्थः ॥ २१ ॥

सव्यापारामिति । सव्यापारां सविनोदाम् । रात्रौ निर्विनोदां तव सखीं यथा विप्रयोगः पीडयति, अहनि सव्यापारां न तथा पीडयेदित्यर्थः । सद्मवातायनस्थ इति पाठः । भवनवातायनस्थ इत्यर्थः । निशीथे साध्वीमत एवोन्निद्रां तां मत्सन्देशैः सुखयितुमलं पश्येत्यर्थः ॥ २१ ॥

कीदृशीं तां सुखयामीत्यपेक्षायामाह —

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ २२ ॥

आधिक्षामामिति । प्राचीमूले तनुमिवेति, प्राचीमूलग्रहणं दिने दिने क्षीयमाणत्वं सूचयितुं कृतम् । तनुं शरीरम् । कलामात्रशेषां, मात्रशब्दोऽवधारणे । क्षण इवेति पाठः । या यज्जातीया तामेव तज्जातीयामेव ॥ २२ ॥

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।
मत्संभोगः कथमुपनमेत् स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥

निःश्वासेनेति । विक्षिपन्तीं चलयन्तीम् । शुद्धस्नानाद् गन्धामलकादिरहितस्नानात् । परुषमस्निग्धम् । आगण्डलम्बम् गण्डावधि लम्बमानमि-

त्यर्थः । उपनमेत् उपगच्छेत् । नयनसलिलोत्पीडरुद्धावकाशां बाष्पौघनिरुद्धनिद्रावसराम् ॥ २३ ॥

आद्ये बद्धा विरहदिवसे या शिरोदाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण ॥ २४ ॥

आद्य इति । शिरोदाम हित्वेति पाठः । शिखादाम हित्वेति पाठे शिखाशब्दः शिरःशब्दपर्यायो न भवति । 'घृणिज्वाले अपि शिखे' इत्यमरसिंहवचने, 'शिखा ज्वालाकेकिमौल्योरि'ति यादवप्रकाशवचनेऽपि शिखाशब्दस्य शिरःशब्दपर्यायत्वादर्शनात् । स्पर्शक्लिष्टां स्पर्शने सक्लेशाम् । परस्परव्यतिषक्तकेशविश्लेषणार्थं हस्तस्पर्शे कृते केशमूलेषु सव्यथामित्यर्थः । अयमितनखेन अकृत्तोपान्तनखेन । सारयन्तीं परामृशन्तीम् । गण्डाभोगाद् गण्डस्थलात् । कठिनविषमां कठिनोच्चावचाम् । एकवेणीम्, एकबन्धनवती वेणी एकवेणी ॥ २४ ॥

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमपि ततः संनिवृत्तं तथैव ।
चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं नप्रबुद्धां नसुप्ताम् ॥

पादानिति । पूर्वप्रीत्या पूर्वकालस्नेहेन । गतमपि इन्दोः पादान् प्राप्तमपि । ततः सन्निवृत्तं तथैवेति पाठः । तत इन्दुपादेभ्यः । सन्निवृत्तं स्वयमेव सन्निवृत्तम् खेदात् विरहव्यसनात् । पूर्वकालप्रीत्या चन्द्रकिरणान् गत्वा तेभ्यो विरहखेदाद् यथागतं निवृत्तं चक्षुरित्यर्थः । पक्ष्मभिरक्षिरोमभिः । साभ्रेऽह्नि मेघच्छन्ने दिने । नप्रबुद्धां नसुप्तां स्थलकमलिनी सूर्यकिरणस्पृष्टा विकसति मेघच्छन्नैः किरणैरस्पृष्टा निमीलति च ॥ २५ ॥

सा संन्यस्ताभरणमबला पेलवं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम्।
त्वामप्यास्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ २६ ॥

सेति। संन्यस्ताभरणं शरीरसादात् त्यक्ताभरणम्। पेलवं मृदु। त्वामप्यास्रं नवजलमयं मोचयिष्यत्यवश्यमिति, तथा दुःखितां दृष्ट्वा त्वमप्यवश्यं बाष्पं मोक्ष्यसीत्यर्थः। करुणावृत्तिः करुणामयाचित्तवृत्तिर्यस्य। आर्द्रान्तरात्मा, मेघस्य जलार्द्रान्तरात्मत्वं विवक्षितम् ॥ २६ ॥

सा त्वद्विरहे खिन्नां दशां प्राप्तुं किं कारणमित्याशङ्क्याह —

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते सकलमचिराद् भ्रातरुक्तं मया यत् ॥

जान इति। इत्थम्भूतां पूर्वोक्तदुःखावस्थाम्। भवान् सौभाग्येनैवमाहेत्याशङ्क्याह — वाचालं मामिति। सुभगंमन्यभावः। सुभगशब्दोपपदान्मन्यतेर्धातोः 'आत्ममाने खश्च' (३. २. ८३) इति खश्। 'अरुर्द्विषदजन्तस्य मुम्' (६. ३. ६७) सुभगंमन्यः। तस्य भावः, सुभगंमन्यभावः। प्रत्यक्षं ते सकलमिति, मयोक्तमिदं सर्वं तवाचिरेण प्रत्यक्षं भविष्यतीत्यर्थः ॥ २७ ॥

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।
त्वय्यासन्ने नयनमुपरिस्पन्दि वामं मृगाक्ष्या
मन्ये मीनोच्चलकुवलयश्रीतुलामेष्यतीति ॥ २८ ॥

रुद्धापाङ्गप्रसरं रुद्धापाङ्गे प्रसरो यस्य। अपाङ्गो नेत्रान्तः। अञ्जनस्नेहशून्यम् अञ्जनेन स्नेहः स्निग्धत्वम् अञ्जनस्नेहः तेन शून्यम्। प्रत्या

देशात् निराकरणात्, निषेधादित्यर्थः। 'प्रत्यादेशो निराकृतिरि'त्य-मरः। मधुनः मधुपानस्य निषेधाद् विस्मृतभ्रूविलासामित्यर्थः। ननु विलासिनीनां स्वभावत एव भ्रूविलासः सम्भवति। उक्तं च —

"तस्याः शलाकाञ्जननिर्मितेव कान्तिर्भ्रुवोरायतरेखयोर्या।
तां वीक्ष्य लीलाचतुरामनङ्गः स्वचापसौन्दर्यमदं मुमोच॥"

इति। कथमत्र मधुपानायत्तो भ्रूविलास इत्युक्तम्। सत्यम्। अत्र स्वभावसिद्धोऽपि भ्रूविलासः स्वोद्दीपनविभावस्य मधुपानस्याभावान्नाभिव्यज्यत इति कवेरभिप्रायः। अत एव विस्मृतभ्रूविलासमिति विस्मृतपदं प्रयुक्तम्। त्वद्दर्शनेन तस्याः कुशलसूचकं वामाक्षिस्पन्दनरूपं निमित्तं भविष्यतीत्याह[1] — त्वय्यासन्ने, भवति समीपप्राप्ते। उपरिस्पन्दि वामं मृगाक्ष्या मन्ये मीनोच्चलकुवलयश्रीतुलामेष्यतीतीति पाठः। स्त्रीणां वामाक्षिस्पन्दनमेतन्निमित्तमिति श्रीरामायणे दर्शितं —

"तस्याः शुभं वाममरालपक्ष्मराजीवृतं कृष्णविशालशुक्लम्।
प्रास्पन्ददेकं नयनं मृगाक्ष्या मीनाहतं पद्ममिवाभिताम्रम्॥"

इति॥ २८॥

त्वद्दर्शनात् तस्या वामोरुस्पन्दनमपि भविष्यतीत्याह —

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरविरचितं त्याजितो दैवगत्या।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम्॥ २९॥

वाम इति। कररुहपदैः नखपदैः। मुक्ताजालं, स्त्रीणां मुक्तामयं दृष्टीभूषणं मुक्ताजालमित्युच्यते। हारयष्टिप्रभेदाधिकारे कौटिल्यः — 'सुवर्णसूत्रान्तरं सोपानकं माणिमध्यं वा मणिसोपानकम्। तेन शिरोहस्त-

---

१. 'मिति', २. 'इ उ' क पाठः.

पादकटीकलापजालकविकल्पा व्याख्याता' इति । चिराविरचितं चिरकालेन विनिर्मितम् । इदमत्रानुसन्धेयम् — ऊरुमूले निहितानां नखक्षतानां निर्वापणाय स्त्रियः खलु प्रियतमैः सार्धं स्वयं विरचितानि मुक्ताजालकानि बिभ्रति । सा पुनरिदानीं नखक्षताभावाद् नखक्षतनिर्वापणं मुक्ताजालकं दैवगत्या न बिभर्तीति खेदवचनमिति । अस्मिन्नर्थे लिङ्गं तज्जातीयदन्तक्षतनिर्वापणवचनम् । यथा कुमारसंभवे —

"दष्टमुक्तमधरोष्ठमम्बिका वेदनाविधुतहस्तपल्लवा ।
शीतलेन निरवापयत् क्षणं मौलिचन्द्रशकलेन शूलिनः ॥"

इति । हस्तसंवाहनानां हस्ताभ्यां सुखमर्दनानाम् । 'संवाहनं मर्दनं स्याद्' इत्यमरः । सरसकदलीस्तम्भगौरम् आर्द्रकदलीस्तम्भपाण्डुरम् । ऊर्वोर्गौरत्वं च निवातवर्तित्वात् । चलत्वं स्फुरणम् ॥ २९ ॥

तस्मिन् काले जलद! यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यःकण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ३० ॥

तस्मिन्निति । तस्मिन् निशीथे काले । 'मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे' इत्युक्तत्वात् । लब्धनिद्रासुखा स्यादिति, सा सततं विरहवेदनादनिद्रा भवति दैवाद् यदि सुप्ता स्यादित्यर्थः । अन्वास्य याममात्रं सहस्वेति । ननु विरहिणां याममात्रं स्वापो न भवति । उक्तं च —

"त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत"

इति । सत्यमिदम् । न तत्स्वापापेक्षया याममात्रपदं प्रयुक्तं, किन्तु संभोगापेक्षया । संभोगस्य परमावधिरेकवारो यामावसायिक इति कामतन्त्रविदो वदन्ति । तथा रतिविलासे —

---

१. 'नि' ख. पाठः.

"परमा तु रतिर्यूनामिष्टा यामावसायिकी"

इति। सद्यःकण्ठच्युतभुजलताग्रन्थीति पदच्छेदः। गाढोपगूढं गाढालिङ्गनम् ॥ ३० ॥

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरैः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ३१ ॥

तामिति। प्रत्याश्वस्तां प्रतिबुद्धाम्। सममभिनवैर्जालकैर्मालतीनामिति, यथा जालकानि मेघजलकणिकाशीतलेनानिलेन रात्रौ समुच्छ्वसन्ति तथा प्रत्यागताश्वासां तामुत्थाप्येत्यर्थः। अनेन जातीकुसुमेभ्योऽप्यधिकं तस्याः सौकुमार्यमस्तीति सूचितम्। मालत्यः[1] खलु वर्षासु पुष्प्यन्ति रात्रौ च विकसन्ति। अस्मिन्नर्थे लिङ्गं श्रीरामायणवचनं—

"निलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः।
विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥"

इति। विद्युद्गर्भः अन्तःस्तम्भितविद्युत्कः। इदं विशेषणं तस्या मेघसन्दर्शनसुखार्थमुक्तम्। स्तिमितनयनां निश्चलनयनाम्। त्वत्सनाथे त्वदधिष्ठिते त्वत्सहित इत्यर्थः। भर्तृसकाशादेवं कोऽप्यागच्छेद् इत्युत्कण्ठया सर्वदा वातायनदत्तदृष्टिमित्यभिप्रायः। धीरैर्गम्भीरैः। स्तनितवचनैः गर्जितवचनैः। मानिनीमुन्नतचित्तां मनस्विनीमित्यर्थः। 'मानश्चित्तसमुन्नतिरि'त्यमरः। अनेन विशेषणेन तस्याः पुरस्ताद् धीरमेव वक्तव्यं कातरवचने तु सा मिथ्येति जानातीत्युक्तम् ॥ ३१ ॥

भर्तुर्मित्रं प्रियमविधवे! विद्धि मामम्बुवाहं
तत्सन्देशान्मनसि निहितादागतं त्वत्समीपम्।

---

१. 'लि' ख. पाठः. २. 'ल्यः व', ३. 'व न को' क. पाठः

यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३२ ॥

भर्तुरिति । अविधवे!, अनेन तव भर्ता जीवतॉत्युक्तम् । अविधवापदं कविसमये भ्रष्टमिति न मन्तव्यं, तथा श्रीरामायणे प्रयोगात्—

"ये मामाहुः पितुर्गेहे पुत्रिण्यविधवेति च"

इति । तत्सन्देशात् तत्सन्देशवचनकरणात् । अस्यार्थस्य द्योतकं मनसि निहितादिति वाक्यम् । न केवलं मित्रमात्रमहं, किन्तु त्वत्समागमाय तस्य प्रेरकश्च भवामीत्यभिप्रायेणाह—यो वृन्दानि त्वरयतीति । पथि श्राम्यतां पथिकानामित्यर्थः । प्रोषितानां स्वभार्यादिकं विहाय कार्यवशाद् देशान्तरगामिनामित्यर्थः । मन्द्रस्निग्धैः गम्भीरसुखश्रवैः । इदं विशेषणम् उग्रगर्जितश्रवणे प्रोषितानां विनाशो मा भूदित्यभिप्रायेण प्रयुक्तम् ॥ ३२ ॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव ।
श्रोष्यत्यस्मात् परमवहिता सौम्य! सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः ॥ ३३ ॥

इतीति । पवनतनयं हनूमन्तम् । सम्भाव्य चैव सम्भावनां च कृत्वैवेत्यर्थः । अन्योऽयमिति न तूष्णीमास्ते, भर्तुर्मित्रमिति बुद्ध्वा सा निश्शङ्कमेव त्वां प्रेक्षिष्यते सम्भावयति चेत्यर्थं द्योतयितुमेवकारः प्रयुक्तः । अस्मात् परं भर्तुर्मित्रमित्येतस्माद् वचनात् परम् । अतः परमवधाने किं कारणमित्यपेक्षायामाह—सङ्गमात् ॥ ३३ ॥

तामायुष्मन्! मम च वचनादात्मनश्चोपकर्तु-
र्ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।

---

१. 'त्वेत्य' ब. पाठः

अव्यापन्नः कुशलमबले! पृच्छति त्वां वियुक्तः
पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव ॥ ३४ ॥

तामिति । आयुष्मन्नित्यनेन त्वयि जीवति साहं च जीवा(व)इत्युक्तम् । आत्मनश्चोपकर्तुरिति पाठः । उपकर्तुरुपकारिणः । मम वचनाच्चायुष्मन्! उपकारिणस्तव वचनाच्च तामेवं ब्रूया इत्यर्थः । मेघवचनप्रकारमाह — तव सहचरो रामगिर्याश्रमस्थ इति । आश्रमपदं तत्रापि तपस्विप्राय एव वर्तते इति द्योतयितुं प्रयुक्तम् । अत्रेदमनुसन्धेयं— तव सहचर इत्यादि मन्मुखेनेदमाह इत्यन्तं वाक्यजातं मेघस्य वचनम् । अतः परं श्यामास्वङ्गमित्यादिवचनं यक्षस्य चेति । पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेवेति, स्वयमव्यापन्नः सन् प्रियजनं प्रति कुशलप्रश्नं करोतीति यद् एतदेव सुलभविपदां प्राणिनां प्रथमप्रार्थनीयमित्यर्थः ॥ ३४ ॥

अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकखरोच्छ्वासिना दूरवर्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ॥ ३५ ॥

अङ्गेनेति । अङ्गेन शरीरेण । कीदृशेन शरीरेण कीदृशमित्यपेक्षायामाह — तनु च तनुनेति । चकारः प्रतिविशेषणमाख्यातसम्बन्धं कर्तुं प्रयुक्तः । अङ्गस्य तनुत्वे निदानमाह — गाढतप्तेन तप्तमिति । तापस्य किमभिव्यञ्जकमित्यपेक्षायामाह — सास्रेणेति । आस्रद्रुतमिति पाठः । द्रुतास्रमित्यर्थः । आहिताग्न्यादिषु पाठात् साधुत्वम् । आस्रस्य किं निमित्तमित्यपेक्षायामाह — अविरतोत्कण्ठमुत्कण्ठितेन । आत्मधर्मा अप्युत्कण्ठादयः शरीरेऽपि प्रयुज्यन्ते । उक्तं च — त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैरिति । उत्कण्ठायाः किमभिव्यञ्जक-

२. 'वित इ' क. पाठः.

मित्यपेक्षायामाह — उष्णोच्छ्वासमिति । समधिकखरोच्छ्वासिनेति पाठः । खरमुष्णम् ।

"तिग्मं तीव्रं खरं तीक्ष्णं चण्डमुष्णं पटु स्मृतम्"

इति भट्टहलायुधः । उच्छ्वासशब्देन निःश्वासो विवक्षितः । सङ्कल्पैस्तैरिति । सङ्कल्पैर्मानसकर्मीभूतैस्तनुत्वतापादिविशिष्टैः शरीरावस्थान्तरैः । किमर्थमेवं करोतीत्याशङ्क्याह — विधिना वैरिणा रुद्धमार्ग इति ॥ ३५ ॥

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ३६ ॥

शब्देति । शब्दाख्येयं शब्दा एवाख्येयमभिधेयं यस्य तच्छब्दाख्येयं निरर्थकमित्यर्थः । सखीनां पुरस्तादिति वचनं जनाकीर्णत्वान्निर्व्याजाननस्पर्शदौर्लभ्यादुक्तम् । श्रवणविषयं श्रवणदेशम्, अन्योन्यवार्ताश्रवणदेशमित्यर्थः । उत्कण्ठाविरचितपदम् उत्कण्ठामधिकृत्य विरचितशब्दमित्यर्थः । इदं वक्ष्यमाणं वाक्यजातम् ॥ ३६ ॥

अतः परं चतुर्भिः श्लोकैर्विरहिणां कामतन्त्रोक्तानि विरहिणीसदृशावलोकनचित्रकर्मस्वप्नसमागमतदङ्गस्पृष्टस्पर्शनानि चत्वारि विनोदनान्युक्तानीत्यनुसन्धेयम् । यथा गुणपताकायां —

"वियोगे चायोगे प्रियजनसदृक्षानुगमनं
ततश्चित्रालोकं स्वपनसमये दर्शनमपि ।
तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमिति
प्रतीकारः कामव्यथितमनसां कोऽपि गदितः ॥"

इति । तेषु प्रियासदृशावलोकनमाह —

---

१. 'भवनं' ख. पाठः,

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूपताकां
हन्तैकस्थं क्वचिदपि न ते चण्डि! सादृश्यमस्ति॥

श्यामास्विति। श्यामासु प्रियङ्गुलतासु। उत्पश्यामि उत्प्रेक्षे। प्रतनुषु अतिशयेन तन्वीषु। भ्रूपताकां, पताका ध्वजं भ्रूरेव पताका भ्रूपताका। भ्रुवः पताकात्वेन रूपणं भावादिसूचकत्वात्। हन्त विषादे। एकस्थं एकत्र स्थितम्। चण्डि! अत्यन्तकोपने!। अनेनैकत्र सादृश्यं लब्धं चेद् भवति तदेवालं भवति किं मया कार्यमिति मह्यं मा कुप्य इति परिहासाभिप्रायेण प्रयुक्तम्। सदृशमेव सादृश्यं, पूर्वोदाहृतानां सदृशवाचित्वात्॥ ३७॥

चित्रदर्शनमाह—

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
आस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥३८॥

त्वामिति। धातुरागैः धात्वाख्याञ्जनद्रव्यैः। आत्मानं माम्। तस्मिन्नप्यालेख्येऽपि। नौ आवयोः। कृतान्तः दैवम्॥ ३८॥

स्वप्नसमागममाह—

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति॥ ३९॥

मामिति। सम्भावनार्थं नञ्द्वयं प्रयुक्तम्। स्थलीदेवतानां, तरुकिसलयेष्विति वक्ष्यमाणत्वाद् वनशब्दाप्रयोगः। तरुकिसलयेषु,

इदं पतितानामश्रुलेशानां प्रकाशनाय प्रयुक्तम् । स्वप्नसन्दर्शने कथमपि लप्स्यमानायास्तव निर्दयाश्लेषहेतोः स्वापात् प्रागेवाकाशप्रणिहितभुजं मां दृष्ट्वा करुणरसाविद्धहृदया वनस्थलीदेवता बाष्पं मुञ्चन्तीत्यर्थः । अन्ये तु पश्यन्तीनां तुहिनकणिकाच्छद्मना देवतानामिति पाठमादृत्य व्याचक्षते । इदं रसावहं न भवति। कामार्तस्य तत्त्वं विहाय व्याजबाष्पमोचनवर्णनस्यायुक्तत्वात् ॥ ३९ ॥

तदङ्गस्पृष्टस्पर्शनमाह—

भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ४० ॥

भित्त्वेति। देवदारुद्रुमाणाम्। दारुशब्दे सति किमर्थं द्रुमशब्दः प्रयुक्त इति नाशङ्कनीयं, संज्ञापातित्वाद् दारुशब्दस्य । उक्तं च—'स देवदारुद्रुमवेदिकायाम्' इति । दक्षिणेन, मार्गेणेति शेषः । 'प्रकृत्यादिभ्य उपसंख्यानम्'[1] (वा० २. ३. १८) इति तृतीया । अस्य विशेष्याप्रयोगः समेन धावति विषमेण धावतीतिवत् । प्रयुक्तं च 'भूय एवोत्तरेण' इति । गुणवति!, गुणः शरीरस्य हृद्यः स्पर्शगुणो विवक्षितः । गुणवति!, आलिङ्गनादिषु सुखस्पर्शवतीत्यर्थः । एतदेव विवृणोति—पूर्वस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति। किलशब्दः सम्भावनायाम्। एभिः तुषाराद्रिवातैः। इतिशब्दो हेतौ। अस्यार्थस्य मूलं—

"वाहि वात! यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश"

इति श्रीरामायणवचनम् ॥ ४० ॥

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्

---

१. 'ष्पस्य यु' क. पाठः.

इत्थं चेतश्चटुलनयने! दुर्लभप्रार्थनं मे
गाढोष्णाभिः कृतमशरणं त्वद्वियोगव्यथाभिः॥ ४१॥

सङ्क्षिप्येतेति । प्रार्थनायां लिङ् । सर्वावस्थासु ग्रीष्ममध्यन्दिनावस्थासु। मन्दमन्दातपं 'प्रकारे गुणवचनस्य' (८. १. १२) इति द्विर्वचनम् । अहरपि मन्दातपमेव स्यादित्यर्थः । दुर्लभप्रार्थनं दुर्लभत्रियामासंक्षेपादिप्रार्थनम् । गाढोष्णाभिः, अनेन दिवसस्य मन्दातपस्य विघातो विवक्षितः । अशरणम् अरक्षकं त्वद्वियोगव्यथाभिः । अनेन त्रियामासंक्षेपप्रतिबन्धो विवक्षितः ॥ ४१ ॥

इदानीं स्वशोकावस्थाकर्णनेन सा दुःखिता भविष्यतीत्याशङ्क्य तामाश्वासयति —

न त्वात्मानं बहु विगणयन्नात्मना नावलम्बे
तत् कल्याणि! त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ४२ ॥

नेति । तुशब्दोऽवधारणे । बहु विगणयन् बहु भद्रकं भविष्यतीति विजानन्नित्यर्थः । आत्मना स्वयमेव । अवलम्बे धारयामि । बहु विगणयन्नात्मानं स्वदेहं स्वयमेव धारयामीत्यर्थः । अस्य मूलं —

"दुष्करं कुरुते रामो हीनो यदनया प्रभुः ।
धारयत्यात्मनो देहं न शोकेनावसीदति ॥"

इति श्रीरामायणवचनम् । तत् तस्मात् । कल्याणि! कल्याणार्थिनि! । त्वमपि कल्याणाशंसिनी भूत्वा कातरत्वं मा गच्छेरित्यर्थः । मद्विशिष्टस्यापि सर्वस्य जनस्य सुखदुःखे पर्यायेण भवत इत्याह — कस्येति। अत्यन्तम् अतिक्रान्तावसानं, नित्यमिति यावत् । एकान्तत एकान्तम् । प्रथमार्थे तसिल् ॥ ४२ ॥

कदा कल्याणमावयोर्भविष्यतीत्यपेक्षायामाह —

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानन्यान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ४३ ॥

शापान्त इति । भुजगशयनादुत्थिते शार्ङ्गपाणाविति, अनेन यस्मिन् शरत्काले परमपुरुषः प्रबुध्यते तस्मिन् काले मम शापान्त इत्युक्तम् । तथा कौर्मे पुराणे—

"क्षीराब्धौ शेषपर्यङ्क आषाढ्यां संविशेद्धरिः ।
निद्रां त्यजति कार्त्तिक्यां तयोः संपूजयेद्धरिम् ॥"

इति । मासानन्यान् गमय चतुर इति, आषाढमासादिकानाश्वयुजमासान्तानित्यर्थः । ननु आषाढस्य प्रथमदिवस इत्युक्तम् । आषाढश्रावणौ प्रावृट् । ततः परं शरदिति प्रसिद्धम् । तस्मात् कथमाषाढात् प्रभृति मास चतुष्टयात् परः शरत्काल इत्युक्तम् । उच्यते । ऋतूनां कल्पना द्विधा । केचित् षड्ऋतव इति वदन्ति । अपरे त्रय इति । अत्र तावद् ऋतुत्रयपक्षाश्रयेणोक्तम् । तथा श्रीरामायणे—

"चत्वारो वार्षिकाः प्रोक्ता गता वर्षशतोपमाः"

इति । लोचने मीलयित्वेति वचनं लोकोक्तिच्छाययोक्तम । विरहगणितमिति पाठः । विरहकाले पश्चादेवमनुभविष्याव इति गणितं सङ्कल्पितम् । आत्माभिलाषं गणयित्वा हृदये निहितमित्यर्थः । निर्वेक्ष्यावोऽनुभविष्यावः ॥ ४३ ॥

सर्वमिदं वञ्चकवचनमिव प्रतिभाति । मया ज्ञातपूर्वं किमपि लक्षणं वदेत्याशङ्क्याह—

भूयश्चाह त्वमास शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।

सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव! रमयन् कामपि त्वं मयेति ॥

भूय इति। भूयश्चाह इति पाठः। भूयश्चाह पुनरपि मन्मुखेनाहेत्यर्थः। मन्मुखेनेदमाह इत्युक्तत्वात्। त्वमसीति पाठः। सस्वरं सशब्दम्। कितव! धूर्त!। अयमर्थः—निद्रासमये रुदित्वा सशब्दं प्रबुद्धासि। किमिति बहुशः पृच्छतो मे कितव! स्वप्ने त्वं कामपि रमयन् मया दृष्ट इति सान्तर्हासं पुरा त्वया कथितमिति ते प्रियतमो भूयश्च मन्मुखेनेदमभिज्ञानमाहेति ॥ ४४ ॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनादसितनयने! मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ह्रासिनस्ते ह्यभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ४५ ॥

एतस्मादिति। अभिज्ञानदानाद् अभिज्ञानस्य वाचा प्रदानात्। कौलीनाल्लोकवादाद्, एतावता कालेन तव भर्ता परासुः स्यान्नो चेदागमिष्यतीति जनवादादित्यर्थः। असितनयने!, इदमप्यभिज्ञानम्। कौलीनान्मय्यविश्वासिनी मा भूः इत्यर्थः। एतावन्तं कालं विरहितयोरावयोः स्नेहा विगलन्तीत्याह—स्नेहानाहुः किमपि विरहे ह्रासिन इति। स्नेहान् विरहे ह्रासिन इत्याहुः। तत् किमपि किञ्चिदतितुच्छमित्यर्थः। प्रत्युत स्नेहा विरहे वर्धन्त इति स्वमतेनाह—ते ह्यभोगादिति। अभोगाद् भोगालाभात्। वस्तुनि प्रयोजनादिविषये। उपचितरसा उपचितशृङ्गारादिरसाः। ते स्नेहाः इष्टे वस्तुनि भोगालाभादेव उपचितरसाः प्रेमराशीभवन्तीत्यर्थः। ननु 'प्रेमा ना प्रियता हार्दम्' इत्यमरसिंहवचनात् प्रेमस्नेहयोरैक्यं प्रतीयते। कथं तयोर्भेदवचनमिति। उच्यते। स्नेहादन्यत् प्रेम। यथाहुरलङ्कारविदः—

"अवलोकनाभिलाषौ रागस्नेहौ ततः प्रेम ।
रतिशृङ्गारौ योगे वियोगगतौ विप्रलम्भश्च ॥"

इति ॥ ४५ ॥

[आश्वास्यैवं प्रथमविरहोद्ग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥]

इदानीं मेघं स्तौति —

कच्चित् सौम्य! व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ४६ ॥

कच्चिदिति । इदं बन्धुकृत्यं त्वया व्यवसितं कच्चिदित्यन्वयः । अहं करिष्यामीति प्रत्युत्तरं न ब्रूषे । तथाप्यन्येषामिव प्रत्युत्तरप्रदानात् तव धैर्यं न कल्पयामीत्याह — प्रत्यादेशादिति । आदेशो वचनं, प्रत्यादेशः प्रतिवचनम् इत्युत्तरं विनापि भवतो धीरतां कल्पयामीत्यभिप्रायः । यद्यपि प्रत्यादेशशब्दः प्रत्याख्यानवचनः, तथाप्यत्र प्रतिवचनवाचको भवति प्रत्युक्तमिति वक्ष्यमाणत्वात् । उक्तमर्थमुपपादयति — निःशब्दोऽपीति । अनेन निरुत्तरत्वं विवक्षितम् । प्रत्युक्तं प्रतिवचनम् । प्रणयिषु प्रार्थयमानेषु । सतामुत्तमानाम् । ईप्सितार्थक्रिया ईप्सितार्थसम्पादनम् । प्रणयिषु ईप्सितार्थादनतिवृत्तिरेव प्रतिवचनं भवतीत्यर्थः ॥ ४६ ॥

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे
सौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्धया ।

इष्टान् देशान् विचर जलद! प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ४७ ॥

एतादिति । अनुचितप्रार्थनावर्त्मनः भवतः प्राधान्यमनादृत्य मत्प्रियायै सन्देशं हरेत्येवमनुचितप्रार्थनाप्रकारस्य । सौहार्दाद् वा एतावन्तं कालमाभाषणादिजनितात् सुहृद्भावादित्यर्थः । उक्तं च — 'सम्बन्धमाभाषणपूर्वमाहुः' इति । विधुर इति वा । विधुरः प्रियाविश्लिष्टः । मयि विधुर इत्यनुग्रहबुद्धया वेत्यर्थः । विचर, विपूर्वश्चरतिः सकर्मको भवति । 'अधिज्यधन्वा विचचार दावम्' इत्युक्तत्वात् । प्रावृषा संभृतश्रीः वर्षाकालेन संभृतशोभः । अयमत्र समाधिः — कश्चित् पथिको देशान्तराणि गच्छन् कयापि दास्या संभृतार्थो भवतीति । एवं मम वियोगप्रकारेण । तव विद्युता विप्रयोगो मा भूदिति देशान्तरगमनात् पथिकायमानस्य भवतः क्षणमपि मम कान्तयेव विद्युता विप्रयोगो मा भूदित्यभिप्रायः ॥ ४७ ॥

इति श्रीदाक्षिणावर्तनाथविरचितो

मेघसन्देशप्रदीपः समाप्तः ।

शुभं भूयात् ॥

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Varya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Sri Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pada.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshîraswamin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part II, 2nd Kanda 1—6 Vargas).	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânânda Sarasvatî. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part III. 2nd Kanda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part IV. 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kavya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Raghavânanda.	0	8	0

No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Sri Krishnananda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha)	0	8	0
No. 63—किरातार्जुनीयम् (Kavya) by Bharavi with the commentary Sabdarthadipika of Chitrabhanu (1, 2 and 3 Sargas)	2	8	0
No. 64—मेघसन्देशः (Kavya) by Kalidasa with the commentary Pradipa of Dakshinavartanatha.	1	0	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

TRIVANDRUM SANSKRIT SERIES

No. LXII.

सर्वमतसंग्रहः ।

THE SARVAMATASANGRAHA

EDITED BY

MAHĀMAHOPĀDHYĀYA

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT GOVERNMENT PRESS
1918.

TRIVANDRUM SANSKRIT SERIES

No. LXII.

THE

SARVAMATASANGRAHA

EDITED BY

MAHĀMAHOPĀDHYĀYA

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.



PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

D. N. M. 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT GOVERNMENT PRESS
1918.

(All Rights Reserved.)

121658

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६२.

सर्वमतसंग्रहः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

संशोधितः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितः ।

कोलम्बाब्दाः १०९३. क्रैस्ताब्दाः १९१८.

PREFACE.

This edition of the Sarvamatasangraha is based on two palm-leaf manuscripts in Malayalam characters obtained from Mr. Paramesvaran Potti of Changarappalli Mathom. The name of the author is not found in the manuscripts.

The work deals, at first, with the eight Pramânas Pratyaksha and others and then with the six Darsanas or schools of Philosophy. Of these the Laukâyata, Ârhata and Bauddha are the non-Vedic schools and the Tarka, Sânkhya and Mîmâmsâ are the Vedic ones. The Bauddha schools being again sub-divided into Mâdhyamika, Yogâchâra, Sautrântika and Vaibhâshika, the non-Vedic schools become six-fold; and similarly the vedic schools also come to be six, if we split the Tarka into Nyâya and Vaiseshika and the Sânkhya into Sesvara-Sânkhya and Nirîsvara-Sânkhya and the Mîmâmsâ into Brahma-Mîmâmsâ and Karma-Mîmâmsâ. The tenets of Prabhâkara and Kumârila are dealt with under Karma-Mîmâmsâ and the Aupanishada and Paurânika schools are described under Brahma-Mîmâmsa. The doctrines of Nirguna-Brahma and Saguna-Brahma of the Aupanishada schools are then considered and the work then closes with a description of the Paurânika school.

Trivandrum,
31st May 1918.

T. GANAPATI SÂSTRI.

निवेदना ।

सर्वमतसंग्रहो नामायं ग्रन्थः, चङ्गारप्पल्लिमठस्वामिनः श्रीयुतपरमेश्वरपोत्तिमहाशयस्य सकाशाल्लब्धं केरलीयलिपि तालपत्रात्मकमादर्शद्वयमाश्रित्य संशोधितः । एतत्प्रणेतुर्नामधेयं ग्रन्थे न दृष्टम् ।

अत्र प्रत्यक्षादीन्यष्टौ प्रमाणानि संक्षेपत आदावुपन्यस्य ततः षड् दर्शनानि निरूपितानि । तत्रावैदिकानि, लौकायता-र्हत-बौद्धभेदात् त्रीणि दर्शनानि, वैदिकानि च त्रीणि, तर्क-सांख्य-मीमांसाभेदात् । तत्रापि माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकभेदेन बौद्धचातुर्विध्याद् अवैदिकदर्शनानि षट् पर्यवसितानि । एवं वैदिकदर्शनान्यपि षट् पर्यवस्यन्ति, तर्कस्य काणादाक्षपादभेदेन, सांख्यस्य सेश्वरनिरीश्वरभेदेन, मीमांसायाः कर्मब्रह्मरूपविषयभेदेन च द्वैविध्यात् । कर्ममीमांसायां च प्राभाकरं कौमारिलमिति यन्मतद्वयं तदपि प्रकाशितम् । ब्रह्ममीमांसकानपि औपनिषदपौराणिकभेदेन द्वेधा विभज्य औपनिषदमतप्रसिद्धां च निर्गुणसगुणब्रह्मवादप्रक्रियां व्युत्पाद्यान्ते पौराणिकमतं निरूपितम् ॥

अनन्तशयनम्
३१-५-१९१८.

त. गणपतिशास्त्री.

॥ श्रीः ॥

सर्वमतसंग्रहः ।

प्रमाणनिरूपणम् ।

इह सम्यगनुभवः प्रमाणम् । सम्यग्ग्रहणं संशयविपर्ययापोहार्थम् । तत्रानवधारणज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वायमित्यादि । मिथ्याध्यवसायो विपर्ययः । यथा द्वौ चन्द्रमसावित्यादि । स्मृतिव्यवच्छेदार्थमनुभवग्रहणम् । संस्कारमात्रजं ज्ञानं स्मृतिः । यथा सा मे मातेत्यादि । प्राचीनानुभववासना संस्कारः । स च सदृशवस्तुसन्दर्शनोद्बुद्धः स्मृतिहेतुः । कथं पुनरनुभवग्रहणेन स्मृतिव्यवच्छेदः, स्मृत्यन्यज्ञानस्यानुभवत्वात् । यथाहुः— 'अनुभूतिः प्रमाणं सा स्मृतेरन्ये'ति । संस्कारमात्रजमिति मात्रचा प्रत्यभिज्ञा व्यावर्तिता । संस्कारसम्प्रयोगाभ्यां जायमानं ज्ञानं प्रत्यभिज्ञा । यथा स एवायं घट इति । नन्वनुभवस्यैव प्रमाणत्वे कुत आगमादिषु प्रमाणत्वव्यवहारः । प्रमाणजनकत्वादेवेति ब्रूमः । तदुक्तं श्रीभगवत्पादैः— "अत्र ब्रह्मविद्योपनिषच्छब्दवाच्या । तत्पराणां सहेतोः संसारस्यात्यन्तावसादनात् । उपनिपूर्वस्य सदेस्तदर्थत्वात् । तादर्थ्याद् ग्रन्थोऽप्युपनिषदुच्यते" इति । तच्च प्रमाणमष्टविधं

प्रत्यक्षमनुमानमागम उपमानमर्थापत्तिरभावः सम्भव ऐतिह्यमिति ॥

प्रत्यक्षनिरूपणम् ।

तत्र सम्यगपरोक्षानुभवः प्रत्यक्षम् । तद् द्विविधं सविकल्पकं निर्विकल्पकं चेति । तत्र संज्ञादिविशिष्टार्थविषयं सविकल्पकं, यथा घटोऽयमिति । तदनुल्लिखितार्थविषयकं निर्विकल्पकं, यथेदमिति वस्तुमात्रानुभवः । तत् पुनर्द्विविधं योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति । तत्रेन्द्रियसन्निकृष्टार्थविषयमयोगिप्रत्यक्षम् । द्विविधानि चेन्द्रियाणि बाह्याभ्यन्तरभेदात् । बाह्यानि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि । आन्तराणि मनोबुद्ध्यहङ्कारचित्ताख्यानि । अर्थाश्च बाह्याभ्यन्तरभेदेन द्विविधाः । बाह्याः शब्दादय आकाशादयश्च । आन्तराः सुखादयो बुद्ध्यादयश्च । इन्द्रियार्थसन्निकर्षस्तु पञ्चविधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायश्चेति । षष्ठोऽपि तादात्म्यलक्षणः सम्बन्धः । सोऽयं बुद्ध्यात्मनिष्ठः । न च जडाजडयोस्तयोस्तादात्म्यानुपपत्तिः । काष्ठदहनन्यायेन तदुपपत्तेः । तत्सम्बन्धस्य मायीयत्वेन दुर्घटताया भूषणत्वाच्च । तेना(य)महमस्मीति प्रत्यय उत्पद्यते । तत्रानिदमंश आत्मा स्वतो भासते, चिदेकरसत्वात् । इदमंशो बुद्धिरात्मसंवित्सम्भेदादवभासते, अचित्स्वभा-

वत्वात् । न चाहमित्यात्मैव भाति न बुद्धिरपीति युक्तम् । तस्य स्वप्रकाशत्वेनाहम्प्रत्ययविषयत्वायोगात्, सुषुप्तिमूर्छामरणादिष्वहम्प्रत्ययविलयेऽप्यात्मनो भासमानत्वाच्च । न (च) बुद्धिरेव भासत इति युक्तम् । तस्या जडत्वेनात्मसंभेदं विना भानानुपपत्तेः । तस्मादहमित्यन्योन्यतादात्म्येन बुद्ध्यात्मानौ भासेते इत्यास्थेयम् । आत्मतादात्म्यवत्यां बुद्धौ समवेतत्वात् सुखादीनां ग्रहणं सुख्यहमित्यादि । आत्मतेजोनुविद्धबुद्धिमच्चक्षुस्संयोगाद् घटादिद्रव्यग्रहणम् । तथाविधचक्षुःसंयुक्तसमवायात् तद्गतरूपादिग्रहणं, यथा शुक्लो महानयं घट इति । तथाविधचक्षुःसंयुक्तसमवेतसमवायाद् घटरू(पत्वा ? पा)दिस्थरूपत्वादिसामान्यग्रहणम् । आत्माभिन्नबुद्धिमच्छ्रोत्रसमवायाच्छब्दग्रहणम् । तथाविधश्रोत्रसमवेतसमवायाच्छब्दत्वादिसामान्यग्रहणं, यथा सशब्दमिदं गिरिगह्वरमिति । एवं चक्षुषैव रूपज्ञानम् । श्रोत्रेणैव शब्दज्ञानम् । त्वचैव स्पर्शज्ञानम् । रसनेनैव रसज्ञानम् । घ्राणेनैव गन्धज्ञानम् । अन्तःकरणेनैव सुखादिज्ञानम् । तच्च मनोरूपमर्थप्रतिभासमात्रसाधनम् । बुद्धिरूपं तन्निश्चयसाधनम् । अहङ्काररूपं तस्यात्मन्यारोपहेतुः । चित्तरूपमनुसन्धानसाधनम् । यथा घटोऽयं, घट एवायं, घटमहं जानामि, ज्ञातो मया घट इति च । यदा रूपस्य चक्षुषैव ग्रहणं, तदाधारस्य द्रव्यस्यापि तेनैव ग्रहणम् । एवमन्यान्यपि । शब्दाश्रयस्य तु

व्योम्नो मनसैव। तत्तद्द्रव्यगुणसमवायस्येन्द्रियसंसृष्टैः स्वसम्बन्धिभिः सह विशेषणविशेष्यभावाद् ग्रहणम्। यथा घटे रूपसमवायः रूपसमवायवान् घट इति। लोकालोकतत्त्वसाक्षाज्ज्ञानं योगिप्रत्यक्षम्। तत्र समाधिदशायां चिरकालनिरन्तराभ्यस्तभक्तिज्ञानयोगानुभावपरिशोधिततिमिरपटलेन मनश्चक्षुषैवाहं ब्रह्मास्मीत्यलौकिकस्यात्मतत्त्वस्यैव ग्रहणम्। व्यवहारदशायां भोक्तृभोग्यभोजयित्रात्मकस्य लोकालोकतत्त्वस्य योगपरिभावितमनःसनाथेन शास्त्रचक्षुषा ग्रहणम्॥

अनुमाननिरूपणम्।

अविनाभावेन सम्यक् परोक्षानुभवोऽनुमानम्। यथा व्याप्यधूमादिना व्यापकाग्न्यादिज्ञानम्। स्वभावतः साध्येन साधनस्य व्याप्तिरविनाभावः। स द्विविधः, अन्वयव्यतिरेकभेदात्। तत्र साध्यसामान्येन साधनसामान्यस्य व्याप्तिरन्वयः। यत्र यत्र धूमस्तत्र तत्राग्निरिति। साधनसामान्याभावेन साध्यसामान्याभावस्य व्याप्तिर्व्यतिरेकः। यत्र यत्र अग्निर्नास्ति तत्र तत्र धूमोऽपि नास्तीति। बाष्पधूमादिना अग्न्याद्यनुमानव्यवच्छेदार्थं सम्यग्ग्रहणम्। प्रत्यक्षव्यवच्छेदार्थं परोक्षग्रहणम्। आगमव्यवच्छेदार्थमविनाभावग्रहणम्। तच्च द्विविधं स्वार्थानुमानं परार्थानुमानं चेति। परोपदेशानपेक्षं स्वार्थम्। तदपेक्षं परार्थम्। परोपदेशस्तु त्र्यवयवं वाक्यम्। प्रति-

ज्ञाहेतूदाहरणानि वा उदाहरणोपनयनिगमनानि वावयवाः ।

तत्र (वतिवि?साध्यवत्तया) पक्षवचनं प्रतिज्ञा । यथाग्निमानयं पर्वत इति । लिङ्गवचनं हेतुः । यथा धूमवत्त्वादिति । सम्यग्दृष्टाभिधानमुदाहरणम् । यो यो धूमवान् स सोऽग्निमान् यथा महानस इति, योऽग्निमान् न भवति स धूमवानपि न भवति यथा जलाशय इति वा । दृष्टान्ते प्रसिद्धाविनाभावस्य साधनसाध्यस्य दृष्टान्तोपमानेन पक्षे व्याप्तिव्यापकवचनमुपनयः ? । तथाचायं धूमवानिति, न तथायं धूमवान् न भवतीति वा । सहेतुकं प्रतिज्ञायाः पुनर्वचनं निगमनम् । तस्मादग्निमानिति, तस्मादग्निमान् न भवतीति नेति वा ।

तत् पुनस्त्रिविधम् अन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिभेदात् । तत्र पञ्चरूपमन्वयव्यतिरेकि । रूपाणि तु पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद् व्यावृत्ति(म ? र)बाधितविषयत्वमसत्प्रतिपक्षत्वं चेति । साध्यधर्मविशिष्टो धर्मी पक्षः । तत्र व्याप्यवृत्तित्वं हेतोः पक्षधर्मत्वम् । साध्यसजातीयधर्मा धर्मी (विव ? सप)क्षः । तत्र सर्वत्र एकदेशे वा वृत्तिः सपक्षे सत्त्वम् । साध्यविजातीयधर्मा धर्मी विपक्षः । तत्र सर्वत्र हेतोरवृत्तिर्विपक्षाद् व्यावृत्तिः । प्रमाणाविरोधिनि प्रतिज्ञातेऽर्थे हेतोर्वृत्तिरबाधितविषयत्वम् । प्रतियोगिशून्यत्वमसत्प्रतिपक्षत्वमिति ।

अन्वयव्यतिरेक्यनुमानं तु हेतुसाध्ययोरन्वयव्याप्तिमद् व्यतिरेकव्याप्तिमच्च भवतीति पञ्चरूपमुच्यते। तद् यथा—विमतं मिथ्या दृश्यत्वाद्, यद् यद् दृश्यं तत्तन्मिथ्या यथा गन्धर्वनगरादि। यन्न मिथ्या तन्न दृश्यं, यथात्मेति। केवलान्वयि चतूरूपम्। अविद्यमानविपक्षत्वेन विपक्षाद् व्यावृत्त्यभावाद्, तत्सत्त्वे केवलान्वयित्वासिद्धेः। तद् यथा—विमतं सकर्तृकं कार्यत्वाद्, यद् यद् कार्यं तत् तत् सकर्तृकं यथा घट इति। केवलव्यतिरेक्यपि चतूरूपम्। अविद्यमानसपक्षत्वेन सपक्षे सत्त्वाभावात्। यथा—सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कार्यत्वात्। यत् सर्ववित्कर्तृपूर्वकं न भवति तत् कार्यमपि न भवति यथात्मेति। एषु चानुमानेषु प्रतिज्ञाहेतूदाहरणदोषाः परिहरणीयाः। प्रमाणान्तराधिगतार्थत्वं तद्बाधितार्थत्वं व्यर्थविशेषणत्वं व्यर्थविशेष्यत्वं च प्रतिज्ञादोषाः। यथा—अग्निर्दाहकः अनुष्णोऽग्निः अयं महीधरः पिङ्गलाग्निमान् विमतं जगन्मिथ्येति। (असिद्धत्वं विरुद्धत्वं हीनत्वं?) तदेवं प्रतिज्ञाद्युदाहरणान्तैस्तदादिनिगमनाद्यैर्वा त्रिभिरवयवैर्युक्तं परोपदेशक्षममनुमानम्। तच्च व्याप्तिभेदात् त्रिधा भिन्नमिति सिद्धम्॥

आगमनिरूपणम्।

शब्दविज्ञानात् सम्यगसन्निकृष्टार्थानुभव आगमः। प्रत्यक्षव्यवच्छेदार्थमसन्निकृष्टेत्युक्तम्। विप्रलम्भकवा-

क्यीयज्ञानव्यवच्छेदार्थं सम्यगिति । अनुमानव्यवच्छेदार्थं शब्दविज्ञानादिति । विषं पिब आकाशं भक्षयेत्यादिव्यवच्छेदायार्थेति । यथाहुः —

"शब्दविज्ञानजा यार्थेऽसन्निकृष्टे सुनिश्चिता ।
बुद्धिस्तच्छाब्दमानं हि सङ्गिरन्ते विपश्चितः ॥"

इति । स आगमो द्विविधः पौरुषेयापौरुषेयभेदात् । अपौरुषेयो वेदश्चतुर्विधः ऋग्यजुःसामाथर्वभेदात् । षट् च तेषामङ्गानि शीक्षाव्याकरणनिरुक्तच्छन्दोज्योतिःकल्पभेदात् । पौरुषेयस्त्रिविधः पञ्चमवेदोपवेदस्मृतिभेदात् । तत्र पञ्चमवेद इतिहासपुराणभेदेन द्विविधः । इतिहासो महाभारतात्मा । पुराणान्यष्टादशविधानि । तथाच वायवीये —

"दशधा चाष्टधा चैतत् पुराणमुपदिश्यते ।
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥
भविष्यद् नारदीयं च मार्कण्डेयमतः परम् ।
आग्नेयं ब्रह्मवैवर्त्तं लैङ्गं वाराहमेव च ॥
स्कान्दं च वामनं चैव कौर्मं मात्स्यं च गारुडम् ।
ब्रह्माण्डं चेति पुण्योऽयं पुराणानामनुक्रमः ॥"

इति । उपवेदश्चतुर्विधः आयुर्वेदधनुर्वेदार्थवेदगान्धर्ववेदभेदात् । मन्वादिप्रणीतानि वर्णाश्रमधर्मशास्त्राणि स्मृतयः ।

मन्वत्रिविष्णुहारीता याज्ञवल्क्योशनाङ्गिराः ।
यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ॥

पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्त्तकाः ॥

यः पुनर्ऋगादिलक्षणश्चतुर्विधो वेदः, स पूर्वोत्तरकाण्डात्मना प्रत्येकं द्विविधः धर्मब्रह्मविषयभेदात् । एवं पञ्चमवेदोऽपि, तद्व्याख्यानरूपत्वात् । यथोक्तं वायवीये—

"यो विद्याच्चतुरो वेदान् साङ्गोपनिषदान् द्विजः ।
न चेत् पुराणं संविद्यान्नैव स स्याद् विचक्षणः ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रतरिष्यति ॥"

इति । तत्र धर्मस्य शुभकर्मसंस्काराकारस्यानात्मत्वे(पि?)न रूपरहितत्वेन चक्षुराद्यग्राह्यत्वादसन्निकृष्टत्वम् । अभ्युदयनिःश्रेयसनिमित्तत्वादर्थत्वम् । ब्रह्मण आत्मत्वेनेन्द्रियाध्यक्षस्य तद्ग्राह्यत्वासंभवादसन्निकृष्टत्वम्, आनन्दरूपत्वादर्थत्वमिति विवेकः ।

अनयोश्च धर्मस्य परोक्षस्वभावत्वात् तज्ज्ञानं परोक्षम् । ब्रह्मणो नित्यापरोक्षात्मतत्त्वलक्षणत्वात् तज्ज्ञानमपरोक्षम् । अन्यथा उभयज्ञानस्यायथार्थत्वापत्तेः । तत्रापि 'भूतं भव्यायोपदिश्यत' इति न्यायेन मन्त्रार्थत्वादसहकृतविधिरूपाच्छब्दात् सम्यगसन्निकृष्टार्थानुभवो धर्मज्ञानम् । 'भव्यं भूतायोपदिश्यत' इति न्यायेन विध्यर्थवादमन्त्ररूपश्रुतिनिवहकृतान्महावाक्यरूपाच्छब्दात् सम्यगसन्निकृष्टार्थानुभवो ब्रह्मज्ञानम् ।

धर्मश्च इष्टानिष्टप्राप्तिपरिहारोपायत्वेन द्विधा भिद्यते । तत्र दर्शपूर्णमासादयः स्वर्गादीष्टप्राप्तिसाधनम् । सर्वभूताहिंसाविधिलक्षणोऽनिष्टपरिहारसाधनम् । ततश्च कृतियोग्येष्टानिष्टप्राप्तिपरिहारसाधनं विधिनिषेधार्थो न कार्यमात्रं, विषं भुङ्क्ष्वेति विधौ बुद्धिपूर्वकारिणामप्रवृत्तेः । नापीष्टानिष्टप्राप्तिपरिहारसाधनम् । उद्गत उडुपतिरिति वाक्यादप्रवृत्तेः । वत्स! स्तनं पिब, अग्निं मा स्पृशेत्यादिलौकिकवाक्येष्वप्येषैव रीतिः । एवञ्च शब्दशक्तिग्रहणमपि कृतियोग्यहितोपाय एव, न कार्ये । यथा गामानयेत्यत्र तद्ग्रहणं हितोपायमात्र एव, यथा पुत्रस्ते जात इत्यत्र तद्ग्रहणम् । ततश्च सिद्धे ब्रह्मणि वेदान्तानां प्रामाण्ये न विवदितव्यम् । विधिवाक्यानि च दृष्टादृष्टफलत्वेन द्विविधानि । तत्र पूर्वकाण्डे कारीरीष्टयादीनि दृष्टफलानि । उत्तरकाण्डे आत्मदर्शनाय श्रवणादिविधायकवाक्यानि दृष्टफलानि । तत्प्रामाण्यदर्शनादन्येषां च वेदत्वलिङ्गेन प्रामाण्यमनुमेयम् ।

ब्रह्म च सगुणनिर्गुणभेदेन द्विविधम् । सगुणं च जीवेश्वरभेदेन द्विविधम् । तत्र सत्यज्ञानानन्तादिलक्षणत्वेन श्रुत्युपदिष्टं निर्गुणम् । जगत्कारणत्वादिरूपेणोपदिष्टं सगुणमैश्वरम् । स्वसृष्टप्रपञ्चप्रवेष्टृत्वादिरूपेणोपदिष्टं जीवरूपम् । तैरेतैस्तत्त्वंपदार्थपरिशोधनपरैरुपकृतानि तत्त्वमस्यादिमहावाक्यानि प्रमाणान्तरान-

वगतं परमपुरुषार्थप्रयोजनं च ब्रह्मात्मैक्यमुपदिशन्ति। तदवगमात् परमपुरुषार्थलाभं च तान्येवोपदिशन्ति।

एवं पूर्वोत्तरकाण्डात्मना भिन्नस्य वेदस्याध्ययनविधिपरिगृहीतत्वाद् विवक्षितार्थत्वेन निश्चितस्यार्थविचाराय मीमांसाशास्त्रं प्रवृत्तम्। तच्च विंशत्यध्यायपरिमितं काण्डत्रयात्मकं भवति। तत्र पूर्वमीमांसा द्वादशाध्यायमिता कर्मकाण्डनिष्ठा। तत्सूत्रकर्त्ता जैमिनिः। भाष्यकारः शबरस्वामी। तद्व्याख्यातारौ भट्टकुमारप्रभाकरौ। तयोर्भट्टकुमारेण विधिवाक्यानि भावनापरतया व्याख्यातानि, प्रभाकरेण नियोगपरतया। उत्तरमीमांसा तु द्विरूपा सगुणनिर्गुणब्रह्मनिष्ठा अष्टाध्यायमिता व्यासप्रणीता। तत्र सगुणब्रह्मनिष्ठा देवताकाण्डात्मिकाध्यायचतुष्टयवती। इह भाष्यकारः सङ्कर्षः। तत्र प्रथमेऽध्याये सर्वेषां मन्त्रविशेषाणां देवतातत्त्वप्रतिपादने तात्पर्यमिति प्रतिपादितम्। द्वितीये विध्यर्थवादादेर्वेदशेषस्य मन्त्रदेवताशेषत्वमुपपाद्यते। तृतीये देवतातत्त्वं स्वेच्छाविग्रहत्वादिगुणगणालङ्कृतमिति दर्शितम्। चतुर्थे तत्तद्देवताप्रसादतस्तत्तल्लोकवेषविभूषणैश्वर्यानन्दावाप्तिलक्षणं देवतोपासनफलं निर्णीतम्। एवं मध्यममीमांसा सर्वदेवतात्मनो हरेः प्रतिपादिकेति सगुणब्रह्मपरा भवति।

ज्ञानकाण्डात्मिका तु निर्गुणब्रह्मनिष्ठा। सापि चतुरध्यायमिता। अस्या भाष्यकारः शङ्करभगवत्पादः।

तदेकदेशिनश्च ब्रह्मदत्तभास्कररामानुजानन्दतीर्थाद-
यो मतभेदेन तद्भाष्याभासान् रचयाञ्चक्रुः। इह प्र-
थमाध्यायेन सर्वेषां वेदान्तानां प्रत्यक्तत्त्वे ब्रह्मणि सम-
न्वयः प्रदर्शितः । द्वितीयेन तत्र प्रत्यक्षादिप्रमाणान्त-
रविरोधः परास्तः । तृतीयेन ब्रह्मज्ञानस्यान्तरङ्गसाध-
नानि श्रवणमननिदिध्यासनानि समूलान्युपदिष्टानि।
चतुर्थाध्यायेन सद्यः क्रमेण वा मुक्तिलक्षणं ज्ञानफल-
मुपासनाफलं चोपवर्णितम् । मुक्तिश्चात्मविद्यास्तमय
एव । ततश्चात्मजिज्ञासामपास्यात्मनः सुखदुःखप्राप्ति-
परिहारोपायमात्रमन्विच्छन्तमज्ञं पुमांसं प्रति कर्मका-
ण्डं प्रवृत्तम् । ब्रह्मविष्णुरुद्रेन्द्रसोमसूर्यानिलानलादि-
देवतासालोक्यादिसुखकामं प्रति देवताकाण्डं प्रवृ-
त्तम् । अशेषविषयसुखविरक्तं बन्धमोक्षसुखमेव का-
ङ्क्षमाणमात्मतत्त्वजिज्ञासुं पुरुषप्रवरमधिकृत्य ब्रह्मका-
ण्डं प्रवृत्तमित्यलमतिविस्तरेण ।

अनाप्तवाक्यत्वपरस्परविरुद्धार्थत्वादिभिर्बौद्धाद्या-
रोपिताप्रामाण्यशङ्कापङ्कपरिक्षालनपरत्वात् तदपेक्षित-
प्रमाणप्रमेयप्रमात्रादिलक्षणनिरूपकत्वाच्च तर्कशास्त्रं वे-
दोपाङ्गं भवति । तत् तु नैयायिकवैशेषिकभेदेन द्वि-
विधम् । तत्र नैयायिकं षोडशपदार्थनिष्ठमक्षपा-
दोपज्ञम् । वैशेषिकं षट्पदार्थनिष्ठं कणादोपज्ञम् ।
यत् तु निरीश्वरसेश्वरभेदेन द्विविधं साङ्ख्यशास्त्रं,
तदितिहासपुराणेऽन्तर्भूतमिति न पृथग् गण्यते ।

अनयोर्निरीश्वरसाङ्ख्यं पञ्चविंशतितत्त्वनिष्ठं कपिलश्चकार। सेश्वरसाङ्ख्यं षड्विंशतितत्त्वनिष्ठं पतञ्जलिरकरोद्, येन पाणिनिप्रणीतस्याष्टाध्यायमितस्य व्याकरणस्य भाष्यमनुगृहीतम्। एवमष्टादश विद्यास्थानानि। तान्येतानि कल्पादौ परमपुरुषेण ब्रह्मणेऽनुगृहीतानि। तथाच श्रीवायवीये —

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेत्यनुक्रमात्।
अर्थशास्त्रं परं तस्माद् विद्यास्त्वष्टादश स्मृताः॥

अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्।
आदिकर्त्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः॥

स हि सर्वजगन्नाथः सिसृक्षुरखिलं जगत्।
ब्रह्माणं विदधे साक्षात् पुत्रमग्रे सनातनम्॥

तस्मै प्रथमपुत्राय ब्रह्मणे विश्वयोनये।
विद्याश्चेमा ददौ पूर्वं विश्वस्थित्यर्थमीश्वरः॥"

इति। तानि च विद्यास्थानानि मरीच्यादिमुखेन ब्रह्मणा अस्मिल्लोके प्रवर्त्तितानि युगेऽस्मिन्नल्पायुष्यात्पबुद्धित्वादिदोषाद् मनुष्यैः साकल्येन धारयितुमशक्यानीति परमेश्वरः स्वयमेव व्यासरूपी भूत्वा संक्षिप्तवान्। यथोक्तं द्वितीयस्कन्धे —

"कालेन मीलितदृशामवमृश्य नृणां
स्तोकायुषां स्वनिगमो बत दूरपारः ।
आविर्हितस्त्वनुयुगं स हि सत्यवत्यां
वेदद्रुमं विटपशो विभजिष्यति स्म ॥"

इति । एवमागमप्रमाणं निरूपितम् ।

उपमानादिमानान्तरनिरूपणम् ।

अथोपमानम् । गवयो नाम किंलक्षण इति कृतप्रश्नस्य ग्रामवासिनो यथा गौरेवं गवय इति वनचारिणोऽन्यस्माल्लब्धोत्तरस्य पुंसः पश्चाद् वनं गतस्य यदृच्छया गवयदर्शने यद् गोर्गवयस्य च सादृश्यविषयं प्रत्यक्षप्रत्यभिज्ञानमुत्पद्यते अनेन सदृशी मदीया गौरिति, तदुपमानम् । यथाहुः—

"अव्युत्पन्नपदोपेतवाक्यार्थस्य च संज्ञिनि ।
प्रत्यक्षप्रत्यभिज्ञानमुपमानमिहोच्यते ॥"

इति । अन्यथानुपपत्तिसम्भूतोऽनुभवोऽर्थापत्तिः । सा द्विधा दृष्टश्रुतभेदात् । तत्र परिदृश्यमाना सवितुर्देशाद् देशान्तरप्राप्तिर्गमनं विना नोपपद्यत इति निश्चयो दृष्टार्थापत्तिः । क्षणिकस्य यागस्य कालान्तरदेशान्तरभाविफलसाधनत्वं श्रूयमाणं तत्संस्कारमन्तरेण नोपपद्यत इति मध्येऽपूर्वनिश्चयः श्रुतार्थापत्तिः ।

योग्यत्वे सत्यनुपलम्भादभावनिश्चयोऽभावप्रमाणम् । यथा इह भूतले घटो नास्तीति ।

संभावितोऽयमर्थ इति जायमानोऽतीन्द्रियार्थ-निश्चयः संभवः । यथा सोमसूर्य(वंश)वर्णनादिभिः कृष्णरामाद्यवतारादिनिश्चयः । अनिर्दिष्टप्रवक्तृकात् प्रवादपारम्पर्याज्जायमानं ज्ञानमैतिह्यम् । यथा इह वटे यक्षस्तिष्ठतीति । कुतः पुनरत्रैतावन्ति प्रमाणानीति निर्णीतम् ।

"प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः ।
अनुमानं च तच्चाथ साङ्ख्याः शब्दं च ते अपि॥
न्यायैकदेशिनोऽप्येवमुपमानं च केचन ।
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः ॥
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा ।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः ॥"

इति न्यायविदां वचनात् ॥

मतभेदाः ।

अनया प्रमाणचिन्तया प्रमातृप्रमेये अपि लक्षिते स्याताम् । प्रमाश्रयः प्रमाता । प्रमाविषयः प्रमेयमिति ।

इह द्विविधानि विचारशास्त्राणि वैदिकावैदिकभेदात् । तानि च प्रत्येकं त्रिविधानि मीमांसासाङ्ख्यतर्कभेदाद्, बौद्धार्हतलोकायतभेदाच्च । तत्राद्यत्रिकं वेदमूलत्वाद् वैदिकम् । अपरत्रिकं बुद्धक्षपणकबृहस्पति-

विरचितवेदाभासमूलत्वादवैदिकमिति । एवं षड् दर्शनानि ॥

चार्वाकमतनिरूपणम् ।

तत्र प्रत्यक्षैकप्रमाणवादिनो लोकायतशास्त्रप्रवर्तकस्य चार्वाकस्य मनुष्योऽहं स्थूलोऽहं कृशोऽहमिति प्रत्यक्षसिद्धश्चैतन्यगुणाश्रयो देह एव प्रमाता । उच्चावचदेहरूपेण संभवादेव संहतिं पुनर्विहतिं च प्रतिपद्यमानानि पृथिवीवारिवह्निवायुलक्षणानि चत्वारि तत्त्वानि प्रमेयम् । अर्थकामावेव पुरुषार्थौ, न धर्मः । तन्निष्ठावर्थगान्धर्ववेदावेव च वेदौ । धर्माभावान्नाधर्मोऽपि कश्चित् । अतस्तत्फलत्वेन स्वर्गनरकावपि न स्तः । तदभावाद् देहिनां तत्कल्पको न परमेश्वरोऽपि कश्चित् । मरणमेव च मोक्षः । अर्थकामशास्त्रं लोकायतशास्त्रं च प्रत्यक्षमूलत्वात् तत्रैवान्तर्भूतम् । इदमन्नं क्षुन्निवर्तकम् अन्नत्वात्, ह्यस्तनान्नवदित्याद्यनुमानं च तत्रैवान्तर्भवति, प्रत्यक्षमूलत्वाविशेषात् । अभ्युदयनिःश्रेयसफलो धर्मब्रह्मविषयो वेदस्त्वतीन्द्रियार्थानिष्टत्वादप्रमाणमेवेति सिद्धान्तः । तथाच तद्वचनम्—

"अग्निहोत्रं त्रयो वेदास्त्रिपुण्ड्रं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥

त्रयो वेदस्य कर्तारो मुनिभण्डनिशाचराः ।
स्वर्गः कर्तृक्रियाद्रव्यनाशेऽपि यदि यज्वनाम् ॥

भवेद् दावाग्निदग्धानां फलं स्याद् भूरिभूरुहाम्।
प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ॥
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते।"
इत्यादि ॥

क्षपणकमतनिरूपणम्।

प्रत्यक्षानुमानवादिनोः क्षपणकबौद्धयोर्मध्ये क्षपणकस्यायं सिद्धान्तः— ममायं देह इत्यनुभवाद् देहः स्वव्यतिरिक्तद्रष्टृकः, दृश्यत्वाद् भौतिकत्वाद् वा घटवदित्यनुमानात् प्राणचेष्टाचैतन्यस्मृत्यादीनां मृतशरीरेऽनुपलब्धेश्च देहव्यतिरिक्तस्तत्परिमाणोऽणुपरिमाणो वा प्रकाशद्रव्यविशेष आत्माख्यः प्रमाता। अतीन्द्रियार्थो नाभ्युपेयः, अतिप्रसङ्गादिति न युक्तम्। प्रत्यक्षप्रामाण्यस्यातीन्द्रियत्वेनानभ्युपेयत्वापत्तेः। तेनार्हन्मुनिप्रणीतागमप्रामाण्याद् धर्माधर्मस्वर्गनरका अपि सन्ति। धर्माश्च केशोल्लुञ्चनभिक्षाटनमयूरपिञ्छधारणब्रह्मचर्यानशनाच्छादनानलस्नानार्हन्नमनतप्तशिलारोहणादयः। अग्निहोत्रादयस्तु वेदोदिता धर्माभासा एव, चराचरप्राणिपीडासाध्यत्वात्। अनाप्तवाक्यत्वपरस्परविरुद्धार्थत्वादिभिर्वेदस्याप्रामाण्यनिर्णयाच्च। अधर्मः प्राणिहिंसादिलक्षणः। पार्थिवाप्यतैजसवायव्यपरमाणुभिः पुद्गलापरनामधेयैः धर्माधर्माख्यप्राणिकर्मप्रेरितैरारब्धानि चराचरशरीराणि सकारणानि प्रमेयम्। परमाणवश्चा

---

१. 'स्याप्यती', २. 'यो वे', ३. 'णिपीडाल' ४. 'मार्तमकप्रा' ख. पाठः.

नुमानतः सिध्यन्ति । तथाच प्रयोगः — अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं, परिमाणतरतमभावत्वाद्, महत्परिमाणतरतमभाववदिति ।

चेतनाचेतनात्मकं चेदं जगदनेकान्तम् । तज्ज्ञानादहिंसादिधर्मनिष्ठानां देहिनां सततोर्ध्वगतिलक्षणो मोक्षः[1] सिध्यतीति । यथाहुः —

"स्याद्वादः सर्वदैकान्तत्यागात् किंवृत्तचिद्विधेः ।
सप्तभङ्गीनयापेक्षस्तत्त्वज्ञानाय कल्पते ॥"

इति । अनैकान्तिकत्वं चास्तिनास्त्यादिरूपेणानियताकारत्वम् । तच्च सप्तभङ्गीनयेन सिध्यति । कथम् । स्यादस्ति, स्यान्नास्ति, स्यादवक्तव्यं, स्यादस्ति च नास्ति च, स्यादस्ति चावक्तव्यं च, स्यान्नास्ति चावक्तव्यं च, स्यादस्ति च नास्ति चावक्तव्यं चेति सप्तभङ्गीन्यायः । स्यादित्यनैकान्तिकत्वद्योतको निपातः । किं चेतनाचेतनात्मकं जगदस्तीति पृष्टोऽसौ ब्रूते — स्यादस्तीति । अस्तित्वेनानिश्चितं, जन्मादिमत्त्वादित्यर्थः । एवं स्यान्नास्तीत्यादावपि द्रष्टव्यम्, अनुभूयमानत्वान्नास्तित्वानिश्चयः । नीलसुखादिशब्दवाच्यत्वादवाच्यत्वानिश्चयः । अस्तित्वनास्तित्वयोर्विरुद्धत्वेनैकाधिकरण्यायोगादुभयात्मकत्वानिश्चयः । नास्तीत्यपि वक्तुं योग्यत्वाद-

---

१. 'क्षः सेत्स्यती' ख. पाठः.

स्ति चावक्तव्यं(चेत्य)निश्चयः। अस्तीत्यपि वक्तुमुचितत्वान्नास्ति चावक्तव्यं चेत्यनिश्चयः। अस्तीति नास्तीति च वक्तुमुचितत्वादस्ति च नास्ति चावक्तव्यं चेत्यनिश्चयः। एवमेकान्तस्थितिशून्यं विश्वमवधार्य ततो निर्वेदं प्राप्तः पुमान् योगबलेन सततोर्ध्वगतिलक्षणां मुक्तिमुपैतीति॥

सुगतमतनिरूपणम्।

आत्मनोऽणुपरिमाणत्वेन युगपदखिलावयवगतवेदनानुसन्धानासंभवाद्, देहपरिमाणत्वे बाह्यवस्तुज्ञानासम्भवाद् घटवदनित्यत्वप्रसङ्गाच्च, सर्वस्यानैकान्तिकत्वे अनैकान्तिकत्वस्यापि तथात्वापत्तेः, 'पतनान्ताः समुच्छ्रयाः' इति न्यायेन सततोर्ध्वगतिरूपस्य मोक्षस्य पतनान्तत्वेन नित्यपुरुषार्थत्वासिद्धेश्च नायं पक्षः प्रक्षीणदोष इति सुगतमतमारभ्यते—

तदिदं शिष्यभेदेन चतुर्धा भिद्यते। शिष्याश्च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकाः क्रमेण विशुद्धितारतम्यभाजः। तत्रोत्तमाधिकारिणो माध्यमिकस्य — शून्यस्वभावः प्रमाता, सुप्तोत्थितस्य शून्योऽहमेतावन्तं कालमासामिति स्मृतिदर्शनात्। पुनरहमस्मीत्यात्मनि सत्त्वप्रतिभानं तत् संवृत्तितत्त्वविषयम्। एवं घटोऽस्तीत्यादिप्रत्ययोऽपि। ततः प्रमेयमपि शून्यमेव, सतो नाशासम्भवात्। एवं प्रमाणमपि वस्तुतः शून्यमेव, सत्त्वे जन्मविनाशानुपपत्तेः। सत्त्वप्रतीतिः संवृ-

त्तिमात्रम् । संवृत्तिर्नामासतः सत्त्वेन भानहेतुः सदसदादिप्रकारानिर्वाच्यस्वलक्षणः पदार्थः । अतः प्रमात्रादित्रिकं वस्तुतोऽसदेव सदात्मना भातीति तदुपदेष्टारं सुगतमुनिं पञ्चबुद्धपरिषेवितं मनोवाक्कायैः सेवमानस्य सर्वं शून्यमिति चिरकालं निरन्तरमुपासीनस्य साधोर्मनसि शून्ये विलीने सति सर्वशून्यतावासितलक्षणो मोक्षः सेत्स्यतीति सिद्धान्तः ।

ततोऽर्वाचीनस्य योगाचारस्य तु—प्रमातुरसत्त्वे प्रमेयस्य शून्यस्य सिद्धिरेव नास्तीति प्रमाता कश्चिदभ्युपेयः । स च स्वप्रकाशः । अन्यथा साधकान्तरापेक्षाप्रसङ्गात् । स्वप्रकाशत्वं च ज्ञानादन्यस्य न (सं)भाव्यत इत्यतोऽहमस्मीति प्रत्यक्षतः देहो नात्मा दृश्यत्वाद् घटवदित्यनुमानतश्च प्रतिपन्नं क्षणे क्षणे प्रलीयमानमुत्पद्यमानं चालयविज्ञानं प्रमाता । प्रवाहस्य स्थिरत्वादेव तस्मिन् स्थिरत्वाभिमानः । योऽहं प्रातर्गजमद्राक्षं स एवाधुना तिमिरनिकरं दृष्ट्वा तं स्मरामीति सेयं ज्वालेतिवद्भ्रान्तिरेव । रूपविज्ञानवेदनासंज्ञासंस्काराख्या पञ्चस्कन्धी क्षणे क्षणे प्राणिकर्मानुसारेण विलीयमानोत्पद्यमाना च स्वभावेन सुरनरनारकरूपेण परिणतिमुपरतिं च यान्ती प्रमेयम् । तत्रेन्द्रियतद्विषयात्मा रूपस्कन्धः । तज्ज्ञानं विज्ञानस्कन्धः । तत्फलं सुखं दुःखं मोहश्च वेदनास्कन्धः । संज्ञागुणक्रियाजातिविशिष्टप्रत्ययाः संज्ञास्कन्धः । इह गौरश्वः पुरुष इत्यादिका संज्ञा । गोत्वाश्वत्व-

पुरुषत्वादिका जातिः। शुक्लो रक्तः कृष्ण इत्यादिको गुणः। तिष्ठति गच्छत्युपविशतीत्यादिका क्रिया । शृङ्गी चतुष्पाद् लाङ्गूलीत्यादिको विशिष्टप्रत्ययः। वेगवेष्टनस्थितस्थापकतादिलक्षणः संस्कारस्कन्धः वेगः शशादेः। वेष्टनं भूर्जादेः। स्थितस्थापकः शाखादेः। तदुक्तलक्षणं प्रमेयम्। तच्चेत् प्रकाशातिरिक्तं, नैव तर्हि प्रकाशेतेति सर्वं ज्ञानाकारमेव। ज्ञानस्य स्थिरत्वे नीलपीतादयः सर्वदा सर्वस्य भासेरन्, न कर्हिचित् कस्यचिदित्यस्थिरमेव। अतो ग्राह्यग्राहकग्रहणात्मकं सर्वमिदं जगदहमित्यालयविज्ञानसन्ताने नित्यनिमग्नम्। तस्माच्चैत्यवन्दनबुद्धागमाभ्यासादिसद्धर्मनिरतस्य सर्वमिदं विज्ञानमेवेति चिरमुपासीनस्य पुंसो विशुद्धविज्ञानसन्तानोदयमयी मुक्तिरिहैव सिध्यतीति सिद्धान्तः।

तस्मादर्वाचीनस्य सौत्रान्तिकनाम्नोऽन्तेवासिनो विश्वस्यान्तस्थत्वे बहिरसत्त्वेनार्थक्रियाकारित्वासम्भवाद्, भ्रान्तिबाधवैलोम्यप्रसङ्गाद्, ज्ञानस्य ज्ञेयाकारत्वे जडत्वापत्तेश्च तयोः पृथक्त्वमुपेयमिति बाह्यमाभ्यन्तरं चास्त्येव विश्वम्। तच्च स्थिरं चेद् न बीजस्योच्छूनत्वजाताङ्कुरत्वद्रुमत्वपल्लवितत्वपुष्पितत्वफलितत्वाद्यवस्थान्तरापत्तिः परिदृश्यमाना सङ्गच्छत इति क्षणिकत्वलक्षणमास्थेयम्। एवं ज्ञातुः स्थिरत्वे ज्ञानस्यापि स्थिरत्वेन सर्वदा नीलं प्रतीयाद्, न कदाचिदपि पीतं, विपर्ययेण वा। अतो ज्ञाताप्यस्थिर एव। इयान् विशेषः — आन्तरं

ज्ञानं स्वलक्षणं प्रत्यक्षं, बाह्यं नीलाद्यनुमेयमेव। तद् यथा — ज्ञाने ज्ञेयप्रतिबिम्बो बिम्बपुरःसरः, प्रतिबिम्बत्वाद्, दर्पणगतमुखप्रतिबिम्बवादिति। एवञ्च प्रत्यक्षग्राह्यो बाह्यार्थो नास्ति।

वैभाषिकस्यार्वाचीनतमस्यान्तेवासिनो—बाह्यार्थश्च सन्निहितः प्रत्यक्षः, इदं नीलमित्यपरोक्षतयैव प्रतिभासदर्शनात्। तेनानयोरियदेव वैषम्यम्। अन्यत् सर्वं तुल्यम्। एषु च पक्षेषु बुद्ध्याद्यागमानामनुमानमूलत्वेन तत्रैवान्तर्भावाद् न प्रमाणाधिक्यम्। तत्र सौत्रान्तिकवैभाषिकयोः सर्वं क्षणिकमिति शास्त्रेणावगम्य शास्तारं भगवन्तं तथागतं तद्भक्तांश्च सेवमानः सर्वस्य क्षणिकत्वसाक्षाद्बोधे सञ्जाते सति विशुद्धविज्ञानसन्ततावाप्तिरूपां मुक्तिमेतीति सिद्धान्तः।

एषां त्रयाणामप्यन्ततः शून्यवादित्वम्। कथम्। बाह्यार्थस्य शून्यत्वं योगाचारो ब्रूते। प्रत्यक्षस्य बाह्यार्थस्य शून्यत्वं सौत्रान्तिकः। बाह्यस्यान्तरस्य चास्थिरस्य जगतः शून्यत्वं वैभाषिको भाषत इति। अत्र सङ्ग्रहः—

"मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगद्
योगाचारमते हि सन्ति हि धियस्तासां विवर्तोऽखिलम्
अर्थोऽस्ति क्षणभङ्गुरस्त्वनुमितो बुद्ध्येति सौत्रान्तिकः
प्रत्यक्षं क्षणभङ्गुरं च सकलं वैभाषिको भाषते॥"

इति॥

कणादमतनिरूपणम् ।

अत्र जगतः शून्यस्वभावत्वे साधकाभावेनासिद्धिप्रसङ्गात्, सत्त्वानुभवविरोधाच्च, ज्ञानस्य ज्ञेयाकारत्वे जडत्वप्रसङ्गाद्, ज्ञेयस्य बहिरनुपलम्भप्रसङ्गाद्, इदमिति साक्षाद् भासमानस्य नीलस्यानुमेयत्वे अहमिति भासमानस्य ज्ञानस्वलक्षणस्याप्यनुमेयत्वकल्पनावतारात्, ज्ञातुरस्थिरत्वे स्मृतेरनुभूतार्थगामिन्याः संभवायोगाद्, ज्ञेयस्य क्षणिकत्वे स एवायं घट इति प्रत्यभिज्ञायोगाद्, बुद्धिवृत्तिरूपाणां नीलादिविषयज्ञानानामागमापायित्वेऽपि बुद्धिसाक्षिचैतन्यस्य स्थिरत्वोपपत्तेर्विषयोपरागविहीनस्य ज्ञानस्य भेदकाभावेन सन्तानरूपत्वानुपपत्तेश्च, स्वप्रकाशत्वेन स्वतः परतश्चास्य जन्मविनाशावगमासंभवादनवगतार्थस्यासत्त्वानिवारणाच्च क्षपणकादिपक्षवत् सुगतपक्षोऽप्युपेक्षणीय इति वेदप्रामाण्यवादित्वेऽपि तस्यानुमानात्मत्वोररीकरणात् प्रत्यक्षानुमानमात्रप्रमाणवाद्यन्तर्भूतस्य कणादस्य मतमवतार्यते—

इह द्रव्यगुणकर्मसामान्यविशे(षा ? षसमवाया)ख्याः षडेव पदार्थाः । तत्र गुणवद् द्रव्यम् । तन्नवधा भिद्यते । पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदात् । तेष्वात्माख्यमष्टमं द्रव्यं प्रमाता । स च पृथिव्यादिलक्षणेभ्यो देहादिभ्योऽन्यो नित्यो विभुः प्रतिक्षेत्रं भिन्नः परमेश्वरपरतन्त्रो जडस्वभावोऽहंप्रत्ययग्राह्यश्च । द्रव्यान्तराणि गुणादयश्च प्रमेयम् । सामान्यज्ञानसंभवा-

यिकारणमस्पन्दात्मा गुणः । स च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग (विभाग) परत्वापरत्वगुरुत्वद्रवत्वस्नेह(त्व ?) बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारशब्दभेदाच्चतुर्विंशतिधा भिद्यते। तत्र रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्वसंस्काराः पृथिवीगुणाः । गन्धवर्जितस्नेहयुक्तोक्तगुणयुक्ता आपः । रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवत्वसंस्कारास्तेजोगुणाः । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगसंस्कारा वायुगुणाः । संख्यापरिमाणपृथक्त्वसंयोगविभा(गा? गशब्दा) व्योमगुणाः । संख्यापरिमाणपृथक्त्वसंयागविभागाः कालगुणाः । तएव च दिग्गुणाः । संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा आत्मगुणाः । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगसंस्कारा मनोगुणाः । आत्मनो बुद्ध्यादयो नव विशेषगुणाः । आकाशस्य शब्दो विशेषगुणः । वायोः स्पर्शः । तेजसो रूपम् । अपां रसः । भूमेर्गन्धः । दिक्कालमनसां विशेषगुणा न सन्ति । संयोगविभागयोरसमवायिकारणजातीयं कर्म। तदुत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चविधम् । नित्यमनेकवृत्ति सामान्यम्। तद् द्विविधं परमपरं च। परं सत्ता, अधिकवृत्तित्वात् । अपरं द्रव्यत्वादि, न्यूनवृत्तित्वात् । नित्याश्रया

अत्यन्तव्यावृत्तबुद्धिहेतवोऽनन्ता अन्त्या विशेषाः । नित्यः सम्बन्धः समवायः । पृथिव्यादिचतुष्टयं नित्यानित्यरूपम् । आकाशादिपञ्चकं तु नित्यमेव । पार्थिवाप्यतैजसवायव्यभेदेन चतुर्विधा नित्याः परमाणवो द्व्यणुकादिक्रमेण परमेश्वरेच्छया देहघटाद्यन्तावयविपर्यन्तं विश्वमारभन्ते । धर्मादयश्चत्वारः पुरुषार्थाः । अग्निहोत्रादिलक्षण ईश्वराराधनादिलक्षणश्च धर्मः । अर्थकामौ धर्माविरुद्धौ । षट्पदार्थतत्त्वज्ञस्य पुंसः परमेश्वरप्रसादाद् नवगुणोच्छेदस्वलक्षणो मोक्षः ।

येनोक्तोऽर्थः प्रतिपन्नः स वेदश्च नित्येच्छाज्ञानक्रियाशक्तिमता परमेश्वरेण शब्दार्थात्मकं जगत् सृष्ट्वा अस्य शब्दस्यायमर्थ इति शब्दशक्तिसङ्केतं च विधाय प्राणिनामभ्युदयनिःश्रेयसप्रयोजनाय प्रणीत इति परमाप्तवाक्यत्वान्न शङ्काकलङ्कवान् । ईश्वरसद्भावश्चानुमानतो निश्चीयते । विप्रतिपन्नं भूधरादिकार्यं सकर्तृकं कार्यत्वाद्, यदित्थं (तत्) तथा यथा घटादीति । अयं घट एतद्घटजनकानित्यज्ञानेतरज्ञानजन्यः घटत्वात्, घटान्तरवदित्यनुमानादेश्वरं ज्ञानमप्यनुमेयम् । न च स्वभावादेव सर्वं कार्यं जायत इति युक्तम् । स्वस्य भावः स्वभाव इति स्वभावशब्दाज्जायमानवस्तुग्रहणे स्वस्मात् स्वोत्पत्तिकथापत्तेः, तत्सम्बन्धिवस्त्वन्तरग्रहणे कारणात् कार्योत्पत्तिकथा(त्वा?)पत्तेः, अन्योपेक्षां विनैव कार्योत्पत्त्य-

र्थत्वे घटाद्यर्थिनां मृदाद्यादानवैयर्थ्यापत्तेश्च ।' अतः कार्यस्य कारणावश्यंभावात्, सावयवत्वात् कार्यत्वेन निश्चितस्य जगतः कारणमनुमेयम् ।

नियतप्राक्सत् कारणम् । तत् त्रिविधं समवाय्य-समवायिनिमित्तभेदात् । कार्यं यत्र समवैति तत् समवायिकारणम् । यथा घटस्य मृत् । समवायिप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणम् । यथा मृदवयवानामन्योन्यसंयोगः । समवाय्यसमवायिभ्यामन्यदवधृतसामर्थ्यं निमित्तकारणम् । यथा कुलालदण्डचक्रादि । तत्र जगदुत्पत्तौ परमाणवः समवायिकारणम् । तेषामन्योन्यसंयोगोऽसमवायिकारणम् । ईश्वरो निमित्तकारणम् । जन्म च प्रागसतः सत्तासम्बन्धः । सृष्टस्य विश्वस्य सुखदुःखमयत्वात् प्राणिकर्मणामप्यत्र निमित्तत्वमित्येषा दिक् । 'यतो वे'त्यादिश्रुतयः 'अहमादिश्चे'त्यादिस्मृतयश्च तथाविधाः 'परास्य शक्तिरि'त्यादिका अपि नित्येच्छाज्ञानप्रयत्नानुमानात्मिकाः । एवमन्यास्वपि श्रुतिषु न्यायः । 'ज्योतिष्टोमेने'त्यादिश्रुतिवाक्यान्यनुमानात्मकानि । तैर्हि ज्योतिष्टोमादीनां परमेश्वरसमाराधनक्रियाणां स्वर्गादिफलसाधनत्वं प्रकाश्यते । तत्रैवं प्रयोगः—विमता यज्ञादिक्रिया समीहितफलसाधनम्, ईश्वरपरिचरणत्वाद्, लौकिकेश्वरपरिचरणवदिति । एवमात्मदर्शनाय श्रवणादिविधायकवाक्यान्यपि । तानि हि परमात्मश्रवणादेस्तत्प्रसादजनन-

द्वारेण निखिलदुःखोच्छेदलक्षणमोक्षसाधनत्वं प्रकाशयन्ति । तत्रैवं प्रयोगः—परमात्मबोधो बन्धनिवर्तकः, आत्मबोधत्वाद्, अस्मज्जाग्रद्बोधवदिति । परमात्मज्ञानं तच्छ्रवणादिजन्यं, प्रमाणज्ञानत्वाद्, धर्मज्ञानवदिति च। 'यो वै भूमे'त्यादिश्रुतिवाक्येषु परमात्मनो दुःखासंस्पृष्टस्वभावत्वमेवोच्यत इति निःशेषदुःखोच्छेद एव मोक्षः। स च बुद्ध्यादिगुणान्तरसद्भावे न संभवतीति नवगुणोच्छेदलक्षण इत्याचार्यः कणादः स्मरतीति ॥

अक्षपादमतनिरूपणम् ।

प्रत्यक्षानुमानागमोपमानप्रमाणवादिनोऽक्षपादस्य कणादवत् प्रमातृकल्पना, परमेश्वरस्य प्रमातुरन्यत्वकल्पना, प्रमातृणामनेकत्वनित्यत्वविभुत्वज्ञानादिगुणत्वकल्पना, जडत्वकल्पना, अहंप्रत्ययवेद्यत्वकल्पना, वेदकल्पना, प्रमेयेषु नित्यानित्य(त्व)कल्पना, परमाणूनां जगदारम्भकत्वकल्पना, धर्मादित्रिवर्गकल्पना, बन्धमोक्षकल्पना, तमस आलोकाभावत्वेन द्रव्यान्तरत्वाभावकल्पना च । इयान् विशेषः— निर्विशेषोऽक्षपादः षोडशपदार्थवादी । तथाच तत्सूत्रं— 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति । षोडशपदार्थतत्त्वज्ञानादनात्मनि देहादावात्मभ्रान्तिप्रभृतीनां मिथ्याज्ञानानां

निवृत्तिः, ततो रागादिदोषनिवृत्तिः, ततः शुभाशुभकर्मनिवृत्तिः, ततो निमित्ताभावान्नैमित्तिकनानायोनिजन्मनिवृत्तिः, ततो गर्भाधिवासादिमरणान्तदुःखनिवृत्तिरित्येवं क्रमेण मोक्षः । तथाचाक्षपादसूत्रं — 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरा*-भावादपवर्गः' इति ।

प्रत्यक्षानुमानागमप्रमाणवादिनो नैयायिकैकदेशिनोऽक्षपादवदेव प्रमाणादिस्वरूपस्थितिः । मोक्षस्तु न दुःखनिवृत्तिमात्रम्, अपितु नित्यसुखस्याविर्भावोऽपि । तस्य जन्यत्वेऽपि, निखिलदुःखप्रध्वंसरूपत्वाद्-विनाशित्वं चोपपद्यत इति ॥

सेश्वरनिरीश्वरसांख्यमतनिरूपणम् ।

त्रिष्वप्येतेषु पक्षेषु आत्मनो जडत्वेन ज्ञातृत्वानुपपत्तेः, बुद्ध्यादिगुणाश्रयत्वेन विकारित्वापत्तेः, चेतनादन्यत्वेन परमेश्वरस्याचेतनत्वापत्तेः, चेतनाभेदस्य च स्वतः परतश्च ग्रहणासंभवाद्, आत्मनोऽहप्रत्ययवेद्यत्वे घटवदचेतनत्वापरिहाराद्, ज्ञानानां चानुव्यवसायज्ञानवेद्यत्वे तस्य स्वप्रकाशत्वाभ्युपगमेऽपसिद्धान्तापत्तेः, परप्रकाश्यत्वेऽनवस्थापत्तेः, ज्ञेयत्वे ज्ञानत्वानुपपत्तेः, वेदस्य पौरुषेयत्वे मूलप्रमाणापेक्षापत्तेः, ईश्वरस्य नित्येच्छादिमत्त्वे नित्यशरीरित्वापत्तेः, मोक्षस्य नवगुणोच्छित्तिरूपत्वे पाषाणादितुल्यतापत्तिदोषात्, सुखस्य दुःखाभावत्वे चेतनस्य नवगुणाश्रयत्वासिद्धेः, सुखाभा-

* रापायादपवर्गः इति मुद्रितन्यायसूत्रपाठः ।

वो दुःखमित्यपि वक्तुं शक्यत्वात्, परमाणूनां निरवयवत्वे अन्योन्यसम्बन्धेऽपि स्थौल्यासिद्धेः, सावयवत्वे परमाणुत्वासिद्धेः, 'मायां तु प्रकृतिं विद्यादि'त्यादिश्रुतेर्मायाया एव जगन्निदानत्वश्रवणात्, परमाणुकारणवादस्य श्रुतिविरोधाच्चाविचारितरमणीयत्वमिति सांख्यपक्षोऽवतार्यते—

यद्यपि न्यायैकदेशिनः सांख्यस्य च प्रत्यक्षानुमानागमप्रमाणवादित्वं तुल्यं, तथापि वेदस्याप्तप्रणीतत्वेन प्रामाण्यमक्षपादवत् तदेकदेशिनोऽपि। प्रत्यक्षादीनां च परत एव प्रामाण्यं, तस्य बाधाभावाधीननिश्चयत्वाद्, भ्रान्तिज्ञानानामपि प्रामाण्यं मा प्रसाङ्क्षीदिति। सांख्यस्य तु सर्वे प्रत्यया यथार्थाः, प्रत्ययत्वात्, संप्रतिपन्नवदित्यनुमानेन भ्रान्तिसंशयादिज्ञानान्यनङ्गीकुर्वतः प्रत्यक्षादीनां स्वत एव प्रामाण्यं प्रभाकरवद्, यो निरीश्वरं विश्वं मन्यते। नित्यः शब्दः अमूर्तत्वादाकाशवदित्याद्यनुमानैः,

"नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्।"
"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।"

इत्यादिश्रुतिस्मृतिभिश्च वेदस्य नित्यत्वं च समं भट्टकुमारवत्। न च ग्रहणस्मरणरूपाण्येव ज्ञानानि, भ्रा-

१ 'च भ' ख. पाठः.

न्तिसंशयज्ञानानभ्युपगमे देहाद्यात्मत्वप्रत्ययानां चैत्यवन्दनादिधर्मप्रत्ययानां च प्रमात्वापत्तेः सन्दिग्धे धर्मिणि न्यायः प्रवर्तत इति संशयाभावेन मीमांसादिशास्त्राणां[1] धूमाद्यनुमानानां चानुदयप्रसङ्गाच्च । न चेह प्रत्यक्षादिप्रामाण्यस्य बाधाभावाधीनसिद्धिकत्वदोषः अज्ञातार्थज्ञापकत्वलक्षणस्य प्रामाण्यस्य भ्रान्त्यादिष्वप्रवृत्तेः । न च भ्रान्त्यादिविषयः पूर्वोत्तरकालयोरस्ति, येनाज्ञाततया तिष्ठेत् । अनयैव रीत्या स्मृत्यप्रामाण्यमूह्यम् । यः पुनः प्रामाण्यस्य बाधाभावात्मकत्वं मन्यते, तस्य कथं स्मृतेरप्रामाण्यम् । न तस्याः पुनर्बाधो दृश्यते। अतो भ्रान्तिसंशयादिज्ञानाभ्युपगमे न दोषः कश्चित् ।

नित्योदितानस्तामितानिर्विषयज्ञानस्वरूपः पुरुषः प्रमातेत्यनयोर्निरीश्वरसेश्वरयोरविशिष्टम् । तस्मिन् जीवपरभेदेन द्वैविध्यं सेश्वरो मन्यते । जीवे सुरनरनारकादिभेदेन त्रैविध्यं चावधारयति । उभयत्रापि पक्षे पुंसः कूटस्थत्वेन सत्त्वरजस्तमोगुणात्मिकायाः प्रकृतेरेव जगदाकारेण परिणामित्वं सृष्टस्य जगतः सुखदुःखमोहात्मकत्वं चानुमतम् । पुरुषप्रकृतिमहदहङ्कारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमय इति निरीश्वरस्य

---

१. 'णामनु' ख. पाठः.

पञ्चविंशतिस्तत्त्वानि । सेश्वरस्य परः पुरुषोऽतिरिच्यत इति षड्विंशतिः । यथाह —

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥"

इति । जन्ममरणादिव्यवस्थया पुरुषबहुत्वं चाह —

"जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥"

इति । पुंसां शुभाशुभमिश्रकर्मभिः संसारं प्रकृतिपुरुषतत्त्वज्ञानेन मोक्षं च —

"धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥"

इति च । उभयत्राग्निहोत्रदर्शपूर्णमासादयो यमनियमादयश्च प्रवृत्तिनिवृत्तिलक्षणा धर्माः । प्रवृत्तिलक्षणः संसारहेतुः । निवृत्तिलक्षणस्तत्त्वज्ञानद्वारेण मोक्षहेतुः । इयान् विशेषः — सेश्वरस्य तत्त्वज्ञानसहकृतो योगो मुक्तिहेतुः । इतरस्य योगसहितं तत्त्वज्ञानं मुक्तिहेतुरिति । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो योगाङ्गानि । योगफलानि च द्विविधानि विद्याविद्याभेदात् । तत्र विद्यामयानि भक्तिज्ञानवैराग्यानि । अविद्यामयान्यणिमाद्यष्टैश्वर्याणि । एवमन्या अपि बाह्या योगसिद्धयः । यथाहुः —

"आत्मनो वै शरीराणि बहूनि मनुजेश्वर!।
प्राप्य योगबलं कुर्यात् तैश्च सर्वां महीं चरेत्॥"
इत्यादीनि।

इह सेश्वरस्य तत्त्वज्ञानसहितेन योगेन योगिनः परमेश्वरतावाप्तिर्मुक्तिः। निरीश्वरस्य योगसहितेन ज्ञानेन प्रकृतिपुरुषविवेकलाभो मोक्षः। कः पुनः सेश्वरपक्षे क्षेत्रज्ञात् परमपुरुषस्यातिशयः। क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, क्लेशादिसंसृष्टः क्षेत्रज्ञ इति। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। कर्म पुण्यापुण्यात्मकम्। विपाकः सुखदुःखमोहलक्षणं कर्मफलम्। आशयोऽन्तःकरणमिति॥

प्रभाकरादिमीमांसकमतनिरूपणम्।

अर्थापत्त्या सह प्रत्यक्षादिचतुष्टयप्रामाण्यवादिनः प्रभाकरस्य, अभावेन सह प्रत्यक्षादिपञ्चकप्रामाण्यवादिनो भट्टकुमारस्य च जैमिनीयभाष्यव्याख्यातृत्वे तुल्येऽपि प्रमातृप्रमेययोः प्रमाणवद् विसंवादः। कथम्। यस्याभा(नो?वो) न प्रमाणं तस्य गुरोर्नाभावो नाम कश्चिद् विषयः। किं तर्हि, भूतले घटो नास्तीति केवलभूतलमात्रं प्रकाशते। तमश्च रूपदर्शनाभावमात्रं, न द्रव्यान्तरम्। यस्य पुनरभावः प्रमाणं, तस्य कुमारस्याभावलक्षणोऽपि विषयोऽस्ति। स चात्यन्ताभावादिभेदात्

पञ्चविधः । तत्र शशे शृङ्गस्यात्यन्ताभावः । उत्पत्तेः प्राचीनो घटादीनां प्रागभावः । विनाशोत्तरकालीनः प्रध्वंसः । घटस्य पटाद्यात्मत्वाभावोऽन्योन्याभावः । अपवर(कस्थादीना?कादिस्थाना)मङ्गणादावभावः संसर्गाभाव इति । तमश्च द्रव्यान्तरं, नालोकाभावमात्रम् । नापि रूपदर्शनाभावमात्रम् । कुतः । 'तम आसीद्' इत्यादिश्रुतिविरोधात् । किञ्च आलोकाभावत्वे एकालोकाभावः सर्वालोकाभावो वा तमः । आद्ये सदोपलम्भप्रसङ्गः, एकालोकाभावस्य सर्वदा सर्वत्र सम्भवात् । द्वितीये न कदाचिदपि तम उपलभ्येत, सर्वालोकाभावस्य क्वचिदप्यसम्भवात् । एवं रूपदर्शनाभावपक्षोऽपि दूष्यः । भावत्वेनोपलभ्यमानस्य तमसोऽभावत्वकल्पने प्रकाशस्य तमसोऽभावत्वकल्पना कथं निवार्येत । अभावमनङ्गीकुर्वतो गुरो रूपदर्शनाभावश्च नास्तीति तमसस्तद्रूपत्वकथा कथङ्कारं सङ्गच्छताम् । अभावज्ञानस्य निर्विषयत्वं वदन्नसौ भावज्ञानस्य निरालम्बनत्वं साधयन्तं माध्यमिकं वा कथं निराकुर्यात् । अतो यत्किञ्चिदेतत् । तदुक्तं भट्टपादैः—

"तमः खलु चलं नीलं परापरविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥"

इति । वेदस्य नित्यत्वे स्वतः प्रामाण्ये च सत्यपि मन्त्रार्थवादभागस्योपनिषद्भागस्येतिहासपुराणानां चा-

TRIVANDRUM SANSKRIT SERIES

No. LX.

श्रीलघुभट्टारकप्रणीता

लघुस्तुतिः

श्रीराघवानन्दप्रणीतया वृत्त्या समेता।

THE

LAGHUSTUTI

OF

SRÎ LAGHUBHATTÂRAKA

WITH THE COMMENTARY OF

SRÎ RÂGHAVÂNANDA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.



PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1917.

(All Rights Reserved.)

ORI
Sgpi-SSI

प्रामाण्यं, विधिशेषत्वेन वा कथञ्चित् प्रामाण्यं, स्वर्भू-पाताललोकानां नित्यत्वं, निरीश्वरत्वं, चेतनाचेतनात्मकस्य विश्वस्यानेकत्वं, सत्त्वम्, इन्द्राग्न्यादिदेवतानां विग्रहपञ्चकाभावेन चतुर्थ्यन्तपदमात्रत्वं, धर्मस्याग्निहोत्रदर्शपूर्णमासपशुबन्धसोमयागाद्यात्मत्वं, मोक्षस्यात्मनः स्वरूपावस्थानात्मकत्वं च गुरुकुमारयोरविशिष्टम्। इयान् विशेषः। गुरोः सर्वज्ञानानि यथार्थानि, भ्रान्तिसंशयादिज्ञानानामविवेकमात्रत्वात्। प्रत्यभिज्ञाच प्रागज्ञातघटादिस्थाय्यवगाहित्वेनानुभव एवान्तर्भवतीति ग्रहणस्मरणरूपेण द्वैराश्यमेव ज्ञानम्। तेषां च स्वप्रकाशत्वं सांख्यादिवत्। ज्ञानस्यापि ज्ञानान्तरवेद्यत्वे तस्यापि तथात्वमित्यनवस्थापत्तेः, ज्ञेयत्वे घटवदज्ञानत्वापत्तेश्च। ज्ञाता तु वैशेषिकादिवज्जडद्रव्यविशेषो बुद्ध्यादिधर्माश्रयोऽत एव देहादिविलक्षणो नित्यो विभुर्लोकत्रयं कर्मवशाद् भ्रमन् प्रत्यक्षादिप्रमाणकः कर्तृभोक्तृ(त्व)स्वभावश्च भवति। तस्य जडत्वेऽपि ज्ञानाश्रयत्वेन प्रकाशनाद् ज्ञातृत्वम्। घटादेर्विषयत्वेनावभासनाद् ज्ञेयत्वमित्यतो घटमहं जानामीत्यत्र स्वतो ज्ञानं, तदाश्रयत्वेन ज्ञाता, तद्विषयत्वेन घटश्च प्रकाशत इति त्रिपुटीप्रत्यक्षवादी गुरुर्भाषते[1]। तथाच तद्वचनं —

"बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः।
नानाभूतः प्रतिक्षेत्रमर्थभित्तिषु भासते॥"

१. 'ते। भेद' ख.पाठः.

इति। भेदश्चास्यान्यानपेक्षि[1] स्वरूपमेव, न धर्मः। तथात्वे भेदान्तरापेक्षाप्रसङ्गात्।

विध्यर्थश्च यागादिविषयो नियोग एव। असौ मानान्तरायोग्यत्वादपूर्वमिति, कृतिसाध्यत्वात् कार्यमिति, कृत्युद्देश्यत्वात् प्रधानमिति चोच्यते। स्वसाधकस्य नियोज्यस्वर्गादिफलदत्वं तु न स्वातन्त्र्यभङ्गाय। (अस्मिन्प्र?)अतोऽग्निष्टोमेन स्वर्गकामो यजेतेत्यस्मिन् वाक्ये यजेतेत्यत्र प्रत्ययांशेन लिङा नियोगः प्रतीयते। सुखवासकामो मां भजेतेति राजवाक्यवत्। स च कस्यचित् कस्मिंश्चिद् विषये प्रसिद्ध इति यजतिधातुलक्षणया प्रकृत्या विषयः, स्वर्गकाम इति नियोज्यश्च समर्प्यते। अग्निष्टोमेनेति तृतीयाश्रुत्या कस्मिन् यागे नियोग इति विशेषार्पणम्, अधिकारिणः स्वर्गकामत्वविशेषणेन नियोज्यविशेषार्पणं च कृतम्। तस्मादयमर्थः — स्वर्गकामस्य ज्योतिष्टोमयागे नियोग इति। अन्येऽपि विधयः 'फलवत्सन्निधावफलं तदङ्गम्' इति न्यायादेतदङ्गविधयः। मन्त्राश्चानुष्ठानस्मारका इत्येतदङ्गतां भजन्ते। अर्थवादाः फलप्राशस्त्यप्रकाशका इति तेऽपि तत्साधकनियोगचिकीर्षापादकत्वाद् विधिं प्रत्युपकुर्वन्ति। एवमन्यत्रापि न्याय इति।

---

१. 'क्षभेदिस्व' क. पाठः।

गुरोरपि गुरोः कुमारस्यानुभवस्मरणप्रत्यभिज्ञाभेदेन, अनुभवेऽपि सम्यङ्मिथ्यासंशयभेदेन चानेकविधानि ज्ञानानि कणादाक्षपादपतञ्जल्यादिवत् । ज्ञाता तु द्रव्यबोधस्वरूपः प्रत्यक्षानुमानार्थापत्त्यागमप्रमाणकश्च । तत्र ज्ञेयविलक्षणस्वभावत्वाद् ज्ञानरूपत्वं, बुद्ध्यादिगुणाश्रयत्वाद् द्रव्यत्वम् । न च ज्ञानाश्रयस्य द्रव्यस्य ज्ञानादन्यत्वान्न ज्ञानसंभेदः सम्भवतीति वाच्यम् । प्रकाशनिदानत्वेन तस्मादन्यस्यापि सवितृमण्डलस्य प्रकाशत्वदर्शनात् । जडाजडाकारत्वमन्तरेणात्मनोऽस्मत्प्रत्ययविषयत्वासिद्धेश्च । यत् पुनर्भ्रान्तिज्ञानानामविवेकात्मकत्वमिति । तन्मन्दम् । अभावमभ्युपगच्छतोऽख्यातेर्विवेकाभावस्वरूपस्याविवेकस्य वक्तुमयोग्यत्वात् । कयोर्वेहाविवेकः । ग्रहणस्मरणयोश्चेद्, न । इदं रजतमिति पुरोवर्तिरजततादात्म्यानुभवात्मकत्वाद् भ्रमस्य । अतो रजतानुभवसंस्कारवतः पुंसः काचादिकरणदोषात् सादृश्यादिविषयदोषाच्च सितभास्वरवस्तुमात्रतया इदमिति प्र(ति)पन्नस्य शुक्तिशकलस्यैव स्मर्यमाणरजतात्मना भानं भ्रान्तिः । घटसुखादिज्ञानानि चानुव्यवसायज्ञानगम्यानि । अयं घट इति ज्ञानस्य घटमहं जानामीत्यौत्तरकालिकज्ञानेन विषयीक्रियमाणत्वात् । न चात्रानवस्था, द्रष्टुरतः परं जिज्ञासाभावात् । भेदश्च न भेदिस्वरूपमात्रं, भेदशब्दस्य घटादिशब्दपर्यायत्वापत्तेः, अन्यापेक्षसिद्धिकस्य भेदस्य स्वरूपत्वायोगाच्च ।

न च भेदिधर्मत्वेऽस्य भेदान्तरापेक्षादोषः, स्वपरनिर्वाहकत्वोपपत्तेः आत्मवत्। स हि सर्वं वस्तु जानन्नात्मानमपि जानाति। भावना च विध्यर्थः। सा च किं केन कथं वेत्यंशत्रयवती(प्रतीयाः?)। तत्र किमित्यंशपूरणाय स्वर्गकामपदम्। केनेत्यंशपूरणाय यजतिः प्रकृत्यंशः। तद्विशेषप्रकाशनायाग्निष्टोमेनेति प्रकृत्यंशः। तृतीयालक्षणः प्रत्ययांशस्तस्य करणत्वख्यापनाय। न च क्षणिकस्य यागस्य कालान्तरीयफलसाधनत्वासंभवः। यजमानसमवेतस्वसंस्कारद्वारेण तत्संभवात्। कथं भावयेदित्यंशार्थकाः प्रयाजादिविधयः। तस्मादयमर्थः — ज्योतिष्टोमयागेन तत्कामः स्वर्गं भावयेदिति।

अनयोः पक्षयोर्य आत्मनः स्वरूपावस्थितिलक्षणो मोक्षः, सोऽपि कर्मणैव लभ्यः। कथम्। प्रतिषिद्धानि काम्यान्यपि कर्माण्यकुर्वतः पुण्यपापात्मकनिमित्ताभावान्नैमित्तिकोर्ध्वाधोमध्यलोकगतिविहीनस्य प्रत्यवायपरिहारार्थं नित्यनैमित्तिकानि चानुतिष्ठतः प्राचीनानि शुभाशुभकर्माणि च फलभोगेन क्षपयतश्च यजमानस्यायत्नतो ज्ञानमन्तरेणैव स्वरूपावस्थितिर्भवतीति।

स्यादेतत्। गुरुकुमारयोरसर्वज्ञत्वे सर्वज्ञत्वे वा निरीश्वरं विश्वमिति वचनमविश्वास्यम्। आद्ये अल्पज्ञ(त्व?)वाक्यत्वादन्त्ये विप्रलम्भकवाक्यत्वाच्च। यः सर्वज्ञः स एवेश्वर इत्यौपनिषदैरास्थितत्वात्। एवं

ता(भ्यामु)पासितयोर्जैमिनिशबरस्वामिनोरपि वचनमविश्वास्यमेव । अथ तैस्तार्किकाभिमत ईश्वर एव निरस्तो नोपनिषदभिमतः क्षेत्रज्ञस्वरूपभूत इति चेत् । तन्न । 'कर्मैव देहिनामिष्टानिष्टफल(दं) नेश्वर इति वदतां वेदस्य धर्मैकनिष्ठतां चाभ्युपगच्छतां क्षेत्रज्ञस्वरूपस्येश्वरस्याकिञ्चित्करत्वात् , प्रमाणप्रतिपन्नत्वाभावाच्च। अनुमानप्रमाणकत्वं च परमेश्वरस्य स्वैरेव निरस्तमागमस्य धर्मैकपरत्वं च साधितमिति किंप्रमाणकः स्यात् । स्वरूपावस्थानलक्षणो यो मोक्ष उक्तः, तत्रापि किमात्मा प्राक् स्वरूपावस्थितः, किं वा न । आद्ये न मोक्षस्य कर्मसाध्यत्वम्, उत्पत्त्याप्तिविकृतिसंस्कारात्मकत्वात् कर्मफलस्य सिद्धस्य चोत्पत्त्याद्यसंभवात् । नापि द्वितीयः । प्रागविद्यमानस्य रूपस्य स्वरूपत्वानिर्वाहात् । अव्यभिचारिरूपं हि स्वरूपं भाष्यते । कर्मसाध्यत्वे मोक्षस्य नित्यपुरुषार्थता च न स्यात्, यत् कृतकं तदनित्यमिति न्यायात् । जडात्मवादे कैवल्यस्य शून्यकल्पता चापरिहार्या पाषाणकल्पता वास्थेया ।

यत् पुनर्द्रव्यबोधस्वरूप आत्मेति । तदप्यसत् । बोधाबोधयोरभेदाभ्युपगमे सदसदादिष्वप्यैक्यप्रसक्तेः । ज्ञानस्यानुव्यवसायज्ञानगम्यत्वं चायुक्तम् । ज्ञेयं च तद् ज्ञानं चेति विरोधात् । अनुव्यवसायज्ञानस्य स्वसिद्धावन्यानपेक्षत्वे पूर्वज्ञानस्यापि तथात्वसंभवात् ।

आत्मन्यप्यसिद्धस्य ज्ञानस्यार्थप्रकाशकत्वे अर्थस्य ज्ञानप्रकाशकतापि स्याद्, अविशेषात्। अतः सर्वज्ञानानां स्वप्रकाशत्वमास्थेयम्। तेषां च बुद्धिवृत्तिविशेषत्वेन जडत्वान्न स्वतः प्रकाशात्मकता सङ्गच्छत इति चिदात्मसान्निध्यादेव तथात्वमास्थेयम्। "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेः। यत् पुनर्भेदस्य भेदिधर्मत्वमादाय स्वपरनिर्वाहकत्वेनानवस्थादोषनिरसनं, तदप्यचारु। रूपरसादीनां धर्माणां धर्मिभ्योऽन्योन्यतश्च भेदासिद्धेः। न खलु धर्माणां धर्मान्तराश्रयत्वं सम्भवतीति। किञ्च सर्ववस्तूनां भेदो नामैकः, किं वानेकः। एकोऽपि किं जडः किं वाजडः। आद्ये नाजड आत्मन्यसौ सम्भवति। दृशि दृश्यान्वयायोगात्। द्वितीये त्वात्मन एव भेदशब्दार्थतापत्तिः, एकस्य सर्वगतस्याजडस्य वस्तुनस्तल्लक्षणत्वात्। अचेतनश्चेत् स किं भेदान्तरमपेक्षते, किं वा नापेक्षते। अपेक्षते चेदनवस्था। नापेक्षते चेद् भेदमनपेक्ष्यैव भेदिनोऽप्यने (का?के) स्युर्भेदवत्। तस्मात् स्वरूपत्वेन धर्मत्वेन वा भेदो न निर्वोढुं शक्यः शक्रेणापीति। कथं चेतनाचेतनप्रपञ्चस्य भेदः। कथं वा जीवेश्वरभेदः। तस्मात् कर्ममीमांसकमतमपि श्रेयस्कामैर्नोपादेयमिति ब्रह्मवादिमतमवतार्यते।

ब्रह्मवादिनोऽपि द्विविधाः। औपनिषदाः पौराणिकाश्च। औपनिषदा अपि द्विविधाः सगुणब्रह्मप्रधाना

निर्गुणब्रह्मप्रधानाश्चेति। तत्र सगुणब्रह्मप्रधाना रामानुजादयः। निर्गुणब्रह्मप्रधानाः[1] आचार्यभगवत्पादादयः।

सगुणब्रह्मवादिमत निरूपणम्।

तेषु सगुणनिष्ठानां[2] जीवेश्वरजगद्भेदः सत्य एव। तन्निदानभूता मायापि भगवच्छक्तित्वात् सत्यैव। सतस्तिलादेः शक्तीनां सद्भावदर्शनात्। अघटितघटयितृत्वेन तस्यां मायात्वव्यवहारः, नावस्तुत्वात्[3]। 'इन्द्रो मायाभिः पुरुरूप ईयते' इतिश्रुतेस्तस्याः प्रतिजीवं भेदश्चास्तीति युगे युगे मुमुक्षवो जीवा वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यचतुर्व्यूहात्मनो भगवतः श्रवणकीर्तनध्यानपूजनानि भक्तिश्रद्धापूर्वमनुतिष्ठन्तो भगवत्प्रसादेन जन्मादिसंसारकर्त्रीं तन्मायामतिलङ्घ्य सेवानुरूपं सालोक्यसारूप्यसामीप्यसायुज्यलक्षणं मोक्षमिच्छन्ति। भगवत्प्रसादशून्यास्तु तन्मायाव्यामोहिता इह संसरन्तीति सिद्धान्तसङ्ग्रहः[4]। यथोक्तं शारीरकसङ्ग्रहकृद्भिः —

"अज्ञानानि बहून्यसंख्यवपुषो जीवान्मुमुक्षूनपि
ज्ञानाज्ञानसमाश्रयादनुयुगं तेषां च निःश्रेयसम्।
मायामीश्वरसंश्रयादनुगमात् ससारसंवर्धिनीं
केचिद्देवनिघातनिघ्नमनसः संचक्रुरल्पश्रुताः॥"

---

१. 'ना म' ख. पाठः. २. 'नां जगज्जीवेश्वरात्मकञ्चैतत् स' ख. पाठः. ३. 'त् तस्याः' ख. पाठः. ४. 'न्तः देवमायाविमोहितानामल्पश्रुतानामेतस्य सिद्धान्तस्यावस्तुभूतजगज्जीवेश्वरभेदवस्तुत्वभ्रान्ति' ख. पाठः.

इति। दैवनिघातनिघ्नमनसोऽल्पश्रुता इति तन्मतस्यावस्तुभूतजगज्जीवेशभ्रान्तिमूलत्वेनापेक्षणीयत्वमभिहितमभियुक्तैः।

निर्गुणब्रह्मवादिमतनिरूपणम्।

निर्गुणब्रह्मप्रधानानां शङ्करभगवत्पादादीनामौपनिषदानां पौराणिकानां च षड्विधाष्टविधप्रमाणवादिनां परमार्थतः सच्चिदानन्दब्रह्मैकमेव तत्त्वम्। तच्च न मानान्तरगतम्। प्रमातृप्रमाणप्रमेयात्मकस्य विश्वस्य तस्मिन् कल्पितत्वेन ततः पृथगसत्त्वात्, स्वतो जडत्वेन तदधीनप्रकाशत्वाच्च। तदभावोऽपि न चिदात्मानमनाश्रित्य प्रकाशेत, अप्रकाशस्वभावत्वात्। किं पुनर्भावा घटपटादयः, आत्मैव चेद् वस्तु। यदि च सोऽखण्डात्मा, कुतो जगज्जीवेश्वरात्मकं द्वैतमवभासते। स चेन्न वस्तु, न चैकस्सः, कुतस्तरां विश्वं भासेत। न खल्वेकं स्वप्रकाशं च तत्त्वमनपेक्ष्यानेकात्मकस्य जडस्य विश्वस्य सिद्धिः साधयितुं शक्यते। द्वैतस्य चेदेकान्ततोऽसत्त्वं, तर्हि कुतः सत्त्वप्रतिभासः। अधिष्ठानसत्तयेति ब्रूमः। यथा शुक्तिसत्तया रजतसत्त्वप्र(ती?)तिभासः। सा हि इदमि सितभास्वरवस्तुमात्रत्वेन ज्ञाताऽपि स्वेन रूपेणाज्ञाता सती रजतानुभवसंस्कारवतः पुंसः स्वाविद्याविजृम्भितरजताभासात्मना भासते। एवमात्माप्यहमिति प्रकाशद्रव्यमात्रत्वेन ज्ञायमानोऽपि सच्चिदानन्दात्मकेन स्वेन रूपेणाज्ञातः सन्नात्माविद्या-

---

१. 'न्दधनब्र' ख. पाठः.

विजृम्भितजगज्जीवेश्वरात्मकं भेदप्रपञ्चमात्मनि पश्यतीति । अस्मिन् पक्षेऽपि व्यवहारदशायां दृग् दृश्यश्चेति द्वौ पदार्थौ । तत्र दृश्यं माया । दृक् तदधिष्ठाता पुरुषः । माया च न सती, सत आत्मनोऽन्यत्वात्, शुक्तिरूप्यवन्मिथ्याभूतजगन्निदानत्वात्, अधिष्ठानतत्त्वज्ञानबाध्यत्वाच्च । नाप्यसती, विश्वनिदानत्वाद्, मामहं न जानामीत्यपरोक्षत्वाच्च । नापि सदसती, सत्त्वासत्त्वयोरन्योन्यनिषेधरूपत्वेनैकाधिकरण्यासम्भवात् । परिशेषादनिर्वचनीयेत्यायातम् । सा च नात्मनो भिन्ना । अनुपलब्धिप्रसङ्गाद्, अत्यन्तासत्त्वापत्तेश्च । नाप्यभिन्ना । जडाजडयोरैकात्म्यायोगात् । नापि भिन्नाभिन्ना, भेदाभेदयोः परस्परनिषेधात्मनोरविवादमेकत्र वर्तनानुपपत्तेः । न सावयवा, कार्यत्वापत्तेः । न निरवयवा, विश्वपरिणामित्वात् । नचोभयरूपा, विरोधात् । तस्मादविचारितरमणीया काचित् परमात्मनः शक्तिरेव माया । सा च त्रिगुणमयी । सत्त्वरजस्तमांसि गुणाः । तथात्वं च मायायास्तत्कार्ये जगति सुखदुःखमोहमयत्वदर्शनाच्छ्रुतेश्च । इयमेव क्वचिदविद्येति क्वचित् प्रकृतिरिति क्वचिदक्षरमिति क्वचिच्छक्तिरिति क्वचिन्मोह इति चोच्यते । (तद्वत आत्मनः सकाशादाकाशादीनि पञ्च भूतानि तेभ्यश्चिदात्माधिष्ठितेभ्यः समष्टिव्यष्टिशरीराणि चोत्पद्यन्त इति वेदान्तिनः । पौराणिकास्तु द्वैतस्य चाधिष्ठानसत्तयैव शब्दप्रातिभासः,

यथा रजतस्य। अस्मिन् पक्षे व्यवहारदशायां दृग् दृश्यं चेति द्वौ पदार्थौ। दृश्यं माया। दृक् पुरुषः। अविचारितरमणीया परमात्मनः शक्तिरेव माया। ?) सा च त्रिगुणमयी एका च 'अजामेकामि'त्यादिश्रुतेः। 'इन्द्रो मायाभि'रिति तद्बहुत्वश्रवणं चावयवभेदादेव। इयमेवाविद्यादिशब्दैरभिधीयते। तद्वत आत्मन आकाशादीनि जायन्ते। तेभ्यः समष्टिव्यष्टिरूपाणि शरीराणि चोत्पद्यन्त इति वेदान्तिनः।

पौराणिकमतनिरूपणम्।

पौराणिकास्तु मायाशबलात् परमात्मनो महान्। महतोऽहंकारः। स च द्रव्यज्ञानक्रियाशक्तिभेदेन त्रिरूपः। तत्र द्रव्यशक्तेस्तामसाहंकाराच्छब्दादितन्मात्राण्याकाशादिभूतानि च जायन्ते। ज्ञानशक्तेः सात्त्विकाहंकाराद् दिगादिचतुर्दशकरणदेवता अन्तःकरणानि च जायन्ते। क्रियाशक्ते राजसाहङ्काराच्छ्रोत्रादीनि वागादीनि च जायन्ते। तान्येतानि महदाद्यवन्यन्तानि मायाविना पुरुषेण प्रेरितान्यन्योन्यं मिलित्वा हैमं ब्रह्माण्डमारभन्ते। तत्र च चतुर्दश भुवनानि चतुर्विधशरीराणि च भवन्तीति, तेषु च देहेषु सर्वनिदानभूतश्चिदात्मा साक्षित्वेनाभिमानित्वेन प्रविशति। साक्षी परमेश्वरः। अभिमानी जीवः, 'द्वा सुपर्णे'त्यादिश्रुतेः, 'ईश्वरः सर्वभूतानाम्' इत्यादिस्मृतेश्च। एवं चानयोः पक्षयोर्भूतभौतिकलक्षणं मायाकार्यं प्रमेयम्। प्रत्यक्षा-

दीनि षडष्टौ वा प्रमाणानि। जीवः प्रमाता। स प्रत्यक्षानुमानगम्यः प्रतिक्षेत्रं मायया भिन्नः। परमेश्वरस्तर्कापरपर्यायानुमानसहकृतश्रुतिप्रमाणतो नित्यशुद्धबुद्धमुक्तस्वभावः सर्वज्ञः सर्वशक्तिर्गुणत्रयात्मिकया मायया विश्वसृष्टिस्थितिसंहारतिरोभावानुग्रहलक्षणैः पञ्चविधैः कृत्यैः स्वात्मन्येव विहरति। सर्वक्षेत्रेष्वेक एव स्थितः सन् सर्वान् क्षेत्रज्ञान् नियमयति च। न चैकस्मिन् नियाम्यनियामकभावासंभवः। मायीयभेदाश्रयेण तत्संभवात्। एवं द्वैतप्रपञ्चः सर्वो मायामयः। अद्वितीयं ब्रह्मैव परमार्थतोऽस्ति। अनयोर्मतयोर्बन्धस्याविद्यानिबन्धनत्वात् तन्निवृत्तिरेव मोक्षः। स च 'आत्मा वा अरे द्रष्टव्यः' इत्यादिश्रुत्या आत्मदर्शनमनूद्य तत्साधनत्वेन श्रवणादिविधानाद्, वेदान्तश्रवणादि कुर्वतो विवेकादिसाधनसम्पन्नस्य पुंसो भगवच्चरित्रश्रवणादिभिः परिशोधितान्तःकरणस्याहं ब्रह्मास्मीति जीवपरैक्यसाक्षाद्बोधे सति सिध्येदित्यखिलमनाविलम् ॥

शुभं भूयात् ।

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0

	RS.	AS.	P.
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Varya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1st & 2nd Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas)	1	0	0
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0

	RS.	AS.	P.
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas)	5	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I, 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivaraná of Srî Sankara Bhagavat Pada.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshîraswamin and Tîkasarvaswa of Vandyaghatîya Sarvananda (Part II. 2nd Kanda 1—6 Vargas)	2	8	0
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânânda Sarasvatî. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpâla.	3	0	0

	RS.	AS.	P.
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part III. 2nd Kanda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part IV. 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa)	0	8	0
No. 57—रघुवीरचरितम् (Kavya)	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Raghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Sri Krishnananda Sarasvati (Part IV)	1	8	0
No. 62—सर्वमतसग्रहः (Sarvamatasangraha)	0	8	0

Apply to:—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

TRIVANDRUM SANSKRIT SERIES.
No. LXXIII.

श्रीमधुसूदनसरस्वतीप्रणीतः

ईश्वरप्रतिपत्तिप्रकाशः ।

THE

ÎSVARAPRATIPATTIPRAKÂSA

OF

MADHUSÛDANA SARASVATÎ

EDITED BY

MAHÂMAHOPÂDHYÂYA

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1921.

(All Rights Reserved.)

TRIVANDRUM SANSKRIT SERIES.

No. LXXIII.

THE
ÎSVARAPRATIPATTIPRAKÂSA

BY

MADHUSÛDANA SARASVATÎ

EDITED BY

MAHAMAHOPÂDHYÂYA
T. GANAPATI SÂSTRÎ
Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

D x. m. 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1921.

(All Rights Reserved.)



अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ७३.

ईश्वरप्रतिपत्तिप्रकाशः

श्रीमधुसूदनसरस्वतीप्रणीतः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
महामहोपाध्यायेन
त. गणपतिशास्त्रिणा
संशोधितः ।

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL
ASIATIC

स च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितः ।

कोलम्बाब्दाः १०९६, क्रैस्ताब्दाः १९२१.

PREFACE.

THIS small work known as Īśvarapratipattiprakāsa establishes the existence of the Īsvara by way of arguments, removing the oppositions of the opponents. The author is the venerable saint Madhusūdanasarasvati, well-known as the author of many important works such as Gūḍhārthadīpikā a commentary on the Bhagavadgītā, and others. On his famous work Advaitasiddhi, has been written the commentary Chandrikā by Gauḍabrahmānanda the fellow-student of the great Naiyāyika Gadādharabhaṭṭāchārya.

The edition of the work is based on a palm-leaf manuscript in Malayalam characters belonging to Brahmasri Subrahmanya Raja of Edappalli.

Trivandrum,
15th August 1921

T. GAṆAPATI SĀSTRĪ.

निवेदना ।

ईश्वरप्रतिपत्तिप्रकाशो नामायं तनीयान् ग्रन्थ ईश्वरं प्रति या वादि-विप्रतिपत्तयस्ता निरांकृत्य युक्त्या संप्रतिपत्तिं प्रकाशयंस्तद्गतान् विशेषान् निरूपयति ।

गीतागूढार्थदीपिकादिबहुग्रन्थकर्तृतया प्रथितः श्रीमान् **मधुसूदन-सरस्वत्याख्यः** परमहंसोऽस्य प्रणेता । अस्यैव कृतिमद्वैतसिद्धिं महानैयायिकश्रीगदाधरभट्टाचार्यसब्रह्मचारी तत्रभवान् **गौडब्रह्मानन्दः चन्द्रिकाभिधानया** स्वव्याख्यया सभाजितवान् ।

इटप्पळ्ळि श्री**सुब्रह्मण्यराज**सम्बन्धिनं केरलीयग्रन्थलिपिं तालपत्रादर्शमाश्रित्य ग्रन्थोऽयं संशोधितः ॥

अनन्तशयनम्
१५—८—१९२१

त. गणपतिशास्त्री.

॥ श्रीः ॥

श्रीमधुसूदनसरस्वतीप्रणीतः

ईश्वरप्रतिपत्तिप्रकाशः ।



अन्तर्यामी समस्तेशो वादिविप्रतिपत्तिभिः ।
यः क्रीडति परानन्दस्तं वन्दे नन्दनन्दनम् ॥

अथ कीदृशास्ता वादिविप्रतिपत्तयः ? उच्यन्ते — बार्हस्पत्यास्तावद् देहमात्रात्मवादिनः पारलौकिककर्मतत्फलविमुखाः सुखाय तादात्विकाय भोजनाच्छादनादिभिर्दृष्टैरेवोपायैः प्रयतमाना नानाविधश्रुतिस्मृतिपुराणानुमानादिप्रमाणप्रतिपादितमपि परमेश्वरं प्रत्यक्षातिरिक्तप्रमाणानभ्युपगमेन जडीकृतान्तःकरणा मरणान्तमेव मोक्षं मन्यमाना दुर्दैववैभवेनैव दुर्विनीता नोररीकुर्वते ।

बुद्धमतानुसारिणस्तु बुद्धदेवप्रामाण्या अपि न देहमात्रम् आत्मानम् उपयन्ति, किन्तु प्रत्यक्षातिरिक्तम् अनुमानम् अभ्युपगच्छन्तः प्रतिक्षणविनाशिनं देहादिव्यतिरिक्तं विज्ञानस्कन्धम् आत्मानम् अभ्युपेत्य बन्धमोक्षादिव्यवस्थाम् आस्थाय पारलौकिकमपि किञ्चित् क्रियाकलापम् अवैदिकमेव सेवमानाः सर्वज्ञविज्ञानसन्तानरूपम् ईश्वरम् अखिलस्य भौतिकस्याभ्युपगच्छन्ति ।

G. P. T. 4724. 500. 12-8-21. B

14.658

दिगम्बरास्तु देहादिव्यतिरिक्तं देहमात्रपरिमाणम् नियतावयवम् अविनाशिनम् आत्मानम् अभ्युपगच्छन्तः सप्तभङ्गीनयं नाम न्यायम् अवतारयन्तः क्षणभङ्गवादम् अनङ्गीकृत्य स्थिरम् अर्हन्तम् ईश्वरम् उपयन्ति—स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति ।

स्याच्छब्दोऽयम् अप्यर्थे निपातः। तेन च सर्वेषाम् अनैकान्तिकत्वम् आदर्शितम् । तथाचायमर्थः। सदेव सर्वमिति सांख्याः, असदेव सर्वमिति माध्यमिकाः, सदसदेव सर्वमिति तार्किकाः, अनिर्वचनीयमेव सर्वम् इत्यौपनिषदाः। अनिर्वचनीयत्वं च सद्विलक्षणत्वे सति असद्विलक्षणत्वे सति सदसद्विलक्षणत्वम् । तेन सदपि, असदपि, सदसदपि, अनिर्वचनीयमपीति प्रत्येकं चत्वारो भङ्गाः, सदपि सद्विलक्षणमपि, असदपि असद्विलक्षणमपि, सदसदपि सदसद्विलक्षणमपीत्यनिर्वचनीयतासमुच्चयेन त्रयो भङ्गा इति मिलित्वा सप्तभङ्गीनय एवं धर्मान्तरेऽपि योज्यः । तथाच न क्षणिकत्वसिद्धिः सर्वेषां पदार्थानां सप्तरूपताया अनुभवादित्यभिप्रायः ।

माध्यमिकास्तु सप्तभङ्गीनयन्यायस्य शून्यतापर्यवसायित्वात् सर्वानिर्वचनीयत्वेन शून्यमेवेश्वर इति सर्वप्रमाणापलापेनैव प्रगल्भमानाः परिकल्पयन्ति ।

एवं सर्वेऽपि नास्तिका वेदप्रमाणशून्यतया यत्किञ्चिज्जल्पन्ति ।

आस्तिकास्तु सर्वेऽपि वेदप्रामाण्यम् अव्याहतं मन्यमाना देहादिव्यतिरिक्तम् आत्मानं नित्यं विभुम् उपगच्छन्ति। परन्तु परमेश्वरे केचन विप्रतिपद्यन्ते। तथाहि —

पातञ्जला मन्यन्ते "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" (पात० १. २४) इति। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः। क्लेशमूलः कर्माशयो दृष्टादृष्टवेदनीयः। विपाको जात्यायुर्भोगाः। आशयो वासना। एतैः संसारी पुरुषो विवेकाभावेन परामृश्यत इव जलप्रतिबिम्बितचन्द्र इव जलकम्पादिभिः। यस्तु सर्वज्ञत्वात् तैर्न परामृश्यते, स पुरुषविशेषः शुद्धज्ञानस्वरूपः सर्वज्ञः सर्वव्यापको नित्यश्च परमेश्वर इति। प्रमाणं चानुमानम् आहुः — "तत्र निरतिशयं सर्वज्ञबीजम्" (पात० १. २५) इति। सर्वज्ञशब्दो भावप्रधानः "द्व्येकयोरि"तिवत्। तथाच विज्ञानैश्वर्यतारतम्यं क्वचिद् विश्रान्तम् अणुत्वमहद्भावेनोत्कृष्यमाणत्वात् परिमाणतारतम्यवद् इत्यनुमानं सूचितम्। तथाच एकविषयवद् द्विविषयत्रिविषयत्वादिनोत्कृष्यमाणं ज्ञानं यत्र सर्वविषयत्वेनोत्कृष्यते स सर्वज्ञः, सर्वविषयैश्वर्ययोगाच्च सर्वेश्वरः सिद्ध इति।

वैशेषिकास्तु जन्यमात्रकर्तृत्वेन परमेश्वरम् अनुमिमते। तथाहि—घटादीनां जन्यानां कुलालादयः कर्तारो जनका दृष्टा इति क्षित्यादेरपि सावयवस्य जन्यस्य केनचित् कर्त्रा भवितव्यम्। कर्ता चोपादानगोचरापरोक्षज्ञानचिकीर्षाकृ-

तिमान् । न च क्षित्याद्युपादानपरमाण्वादिगोचरापरोक्षज्ञानवान् संसारी भवति । तस्माद् नित्यज्ञानचिकीर्षाकृतिमान् सर्वज्ञः परमेश्वरः सिद्ध इति । तथाच क्षितिः सकर्तृका कार्यत्वाद् घटवद् इत्यनुमानं सूचितम् ।

नैयायिकास्तु सर्वकर्मफलदायित्वेनेश्वरम् अनुमिमते। तथाचाहुः — "ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात" (न्याय० ४. ३. १९) इति । सर्वमचेतनं चेतनाधिष्ठितं सत् प्रवर्तते । धर्माधर्माख्यं कर्माचेतनं येन चैतन्येनाधिष्ठितं सत् स्वफलदानाय प्रवर्तते, स सर्वज्ञः परमेश्वर इति । इदं च सूत्रम् ईश्वरोपादानत्वे पूर्वपक्षभूतमपि तन्निमित्तत्वे सिद्धान्त एवेति द्योतकभूतयः ।

एवं **पशुपतिरेव** पाशुपतागमसिद्धः परमेश्वर इति **पाशुपताः** ।

चतुर्व्यूहात्मको विष्णुरेवेति **पाञ्चरात्रिकाः** ।

हिरण्यगर्भ एव परमेश्वरः, स एव विष्णुशिवादिरूपतामपि गृह्णातीति **हैरण्यगर्भाः** ।

वेदान्तवेद्यः सच्चिदानन्दरूपः सर्वज्ञः सर्वशक्तः सर्वजगदुपादानं निमित्तं च परमात्मैव परमेश्वर इति **ब्रह्मवादिनः** ।

अत्राहुः सांख्याः — संसारिपुरुषविलक्षणे परमेश्वरे किं प्रमाणं? न तावत् पातञ्जलोक्तम् अनुमानम्, अप्रयोजकत्वात् । यथा हि परिमाणतारतम्यं नैकत्रैव विश्रान्तं, किन्त्वणुत्वं परमाणुषु महत्त्वं च परममहत्सु कालाकाशादिष्विति

तार्किकमतं दृष्टान्तीकृतं, तथा च दार्ष्टान्तिकेऽपि अल्पविषयत्वविश्रान्तिर्वक्तव्या । तदनभ्युपगमे च परिमाणतारतम्यं कथं दृष्टान्तः । एवञ्चाल्पत्वविश्रान्तिरेकविषयत्वेन बहुत्वविश्रान्तिश्च परार्धविषयत्वेनेति न सर्वज्ञसिद्धिः । संख्यातारतम्ये व्यभिचाराच्च ।

नापि वैशेषिकोक्तं जगत्कर्तृत्वानुमानं, व्याप्यत्वासिद्धेः । नहि जन्यत्वेन जन्यत्वं कर्तृत्वेन कर्तृत्वमिति व्याप्तिरस्ति, जन्यत्वेन जन्यत्वे जनकत्वेन जनकत्वाद् अविशेषाद् । अन्यथा (न ?) जन्यमात्रे संप्रदानादेरप्यनुमानं स्यात् क्वचित् दर्शनात् । नचैकस्य कर्तृत्वं सिध्यति विचित्रप्रासादादौ बहुकर्तृत्वदर्शनात्, चतुर्दशभुवनरचनाया अप्यतिविचित्रत्वात् । अकारणपारिमाण्डल्यादिज्ञाने च मानाभावाद् न ज्ञानस्य सर्वविषयत्वसिद्धिः । नित्यत्वेन सर्वविषयत्वं विषयतया संकोचकाभावात्; जन्यं हि कारणविशेषवशात् संकुचितविषयं भवतीति चेन्न, अनित्यत्वेन क्वापि सर्वविषयत्वदर्शनाद् अनित्यस्यापि योगिज्ञानस्य (प्रयोमि ?)ति ज्ञानस्य च सर्वविषयत्वाच्च । नित्यत्वे किं मानं? शरीरेणानवच्छेदात, शरीरावच्छेदेन हि ज्ञानम् उत्पद्यते, परमेश्वरस्य च नास्ति शरीरं धर्माधर्मशून्यत्वादिति चेद्, न तावद् असिद्धं, साक्षात् प्रयत्नाधिष्ठेयं हि शरीरम् उच्यते, परमेश्वरस्य च साक्षात् प्रयत्नाधिष्ठेयाः परमाणवः । अतः परमाणुशरीरत्वम् ईश्वरस्य युक्तम्। इदमेवाङ्गीकृतम् उदयनाचार्यैः टीकाप्रथमश्लोकव्याख्याने । आकाशो वा तस्य शरीरम् "आकाशशरीरं ब्रह्मे"ति

श्रुतेः । तथाच तस्यापि शरी(रि)त्वसम्भवाद् ज्ञानत्वेन जन्यत्वमिति व्याप्तिर्न भञ्जनीया । एतेन शरीराजन्यत्वेन क्षित्यादेः कर्त्रजन्यत्वमिति मीमांसकमतमपि प्रत्याख्यातं, क्षित्यादेः तच्छरीरपरमाणुजन्यत्वात् । तथाच अनित्यज्ञानवान् सर्वज्ञकल्पः सिद्धः, क(श्चि)देव परमेश्वरत्वेन व्यवह्रियते, स च प्रतिकल्पं भिद्यते, तत्परतयैव सर्वे श्रुतिस्मृतिवादा योजयितव्या इति निर्विवेकतया सांख्यैरुक्तम् ।

अत्रोच्यते ब्रह्मवादिभिः — अनुमानादीश्वरसिद्धिर्नास्तीति यदुक्तं, तत् तथैव तस्य स्वातन्त्र्येणातीन्द्रियार्थासाधकत्वात् । परन्तु वेदान्तात् सिद्धिः ।

"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।"
"तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥"
"यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः ।
तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते ॥"
"न तस्य कर्ता करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥"
"विज्ञानमानन्दं ब्रह्म । "

इत्याद्याः श्रुतयः सर्वज्ञसर्वशक्तिपरमानन्दरूपं हिरण्यगर्भादिसकलसिद्धिकारणं परमेश्वरं प्रतिपादयन्ति सहस्रशः । नचैतासाम् अन्यपरत्वं संभवति, उपक्रमादिषड्विधलिङ्गानां परमेश्वर एवोपलम्भात् । नच कार्य एवार्थे वेदस्य

प्रामाण्यं सिद्धमिति वाच्यम् । कार्यपरत्वस्य प्रामाण्याप्रयोजकत्वात्, "चैत्यं वन्देत स्वर्गकाम" इत्यादिनास्तिकवाक्यस्यापि प्रामाण्यप्रसङ्गात् । तत्र च दुष्टकरणत्वेनैवाप्रामाण्ये प्रामाण्यम् अदुष्टकरणत्वेनैवेति कार्यपरत्वम् अप्रयोजकम् । तस्मात् प्रयोजनवदबाधिताज्ञातज्ञापकत्वमेव प्रामाण्यं न कार्यपरत्वं चेति विस्तृतमन्यत्र ।

एवं सिद्धे परमेश्वरे तद्विशेषनिरूपणं क्रियते । तत्र पञ्चधा विष्णुरिति मुक्ताफलकाराः । तथाहि— साकारनिराकारभेदेन प्रथमं द्विधा । तत्र निराकर एकरूप एव । साकारश्चतुर्धा —पुरुषो ब्रह्मा विष्णुर्महेश्वरश्चेति । एवमेव शिवतन्त्रे व्यक्तम् —

"ब्रह्मा विष्णुर्महादेव ईश्वरश्च सदाशिवः ।"

इति । तत्र सदाशिवो निराकारश्चेति निरुपाधिचैतन्यस्वरूपः सिद्ध एकः पुरुषः । ईश्वरश्चेति गुणत्रयावच्छिन्नमायोपाधिरेकः, रजोगुणावच्छिन्नो ब्रह्मा, सत्त्वगुणावच्छिन्नो विष्णुः, तमोगुणावच्छिन्नो रुद्र इति ।

नृसिंहतापनीये तु चतुर्धा विभाग उक्तः—"ओताऽनुज्ञाता अनुज्ञाविकल्पः" इति । तत्र पञ्चीकृतमहाभूताभिमानी विराट् तदन्तर्यामी परमात्मा ओतः स्थूल उच्यते, स एवानिरुद्धः । एवमपञ्चीकृतमहाभूताभिमानी जीवो हिरण्यगर्भः, तदन्तर्यामी अनुज्ञाता परमात्मा सूक्ष्म उच्यते; स एव प्रद्युम्नः । गुणत्रयावच्छिन्नमायोपाधिरव्याकृतरूपः सर्वबीजम् अनुज्ञोच्यते; स एव सङ्कर्षणः । अयमेव पुरुष ईश्वरश्च

प्रागुक्तः । एतस्यैव भेदा ब्रह्मविष्णुमहेश्वराः, त्रिगुणावच्छिन्न एकैकगुणावच्छिन्नस्यान्तर्भावात् । अत एव पृथङ् नोक्ताः । सर्वोपाधिविनिर्मुक्तस्त्वविकल्पो वासुदेवः परमात्मा मोक्षावलम्बनम् । स एव सदाशिवो निराकारश्च । एतेषां चतुर्णां जाग्रत्स्वप्नसुषुप्ततुरीयभेदेन षोडशावस्था भवन्ति ।

तथाहि — चक्षुरादिकरणवृत्त्या स्थूलविषयपरिज्ञानं जाग्रज्जागरणं, बाह्यकरणव्यापारशून्यमनोवृत्त्याविद्यावृत्त्या वा जायमानं स्मरणविभ्रमादि जाग्रत्स्वप्नः, बाह्यान्तर्विषयानुभवस्तब्धभावम् अन्तरेण केवलस्यैवावस्थानं स्तब्धीभावापरपर्यायं जाग्रत्सुषुप्तिः, बाह्यान्तर्विषयानुभवस्तब्धीभावव्यतिरेकेण पुण्यपुञ्जपरिपाकादज्ञस्यापि साक्षिमात्रानुभवो गुरूपदेशात् त्वम्पदलक्ष्यशुद्धसाक्षिमात्रानुभवो वा जागरणंतुरीयमिति चतुर्विधं जागरणम् ।

तथा स्वप्नेऽपि देवतादिप्रसादाद् यन्त्रादिप्राप्तिः स्वप्नजागरणं स्वाप्नैरेवेन्द्रियैः स्वप्ने रूपाद्यनुभवो वा, स्वप्नेऽपि स्वप्नोऽयं मया दृष्ट इत्यनुभवः स्वाप्नमनसैवं स्मरणादिकं वा स्वप्नस्वप्नः, स्वप्नेऽपि स्तब्धीभावरूपा प्रबोधे वक्तुमशक्या काचिद् वृत्तिः स्वप्नसुषुप्तिः, एवं स्वप्नेऽपि पुण्यपुञ्जपरिपाकाद् तत्रत्याचार्योपदेशाद् वा अहमेव सर्वोऽस्मीति वेदार्थानुभवः स्वप्नतुरीयमिति चतुर्विधः स्वप्नः

एवं सर्वबाह्यान्तःकरणवृत्तिशून्या ज्ञानमात्रशेषापि सुषुप्तावस्था ज्ञानस्य [illegible] त्रयभेदाभ्यां(सात्त्विक) सत्त्वसाक्षात्

मती भवति सुखम् अहम् अस्वाप्सामिति परामर्शजनिका, सा सुषुप्तिजागरणम्। एवं रजोमात्रवृत्तिमती दुःखम् अहम् अस्वाप्सामिति परामर्शहेतुः सा सुषुप्तिस्वप्नः, तथा तमोमात्रवृत्तिमती गाढमूढोऽहम् आसमिति परामर्शकारणं सा सुषुप्तिसुषुप्तिः, एतादृशसर्ववृत्तिशून्या तु साक्षिचिन्मात्ररूपा सा सुषुप्तितुरीयमिति चतुर्विधा सुषुप्तिः। सर्वावस्थात्रयं परित्यज्य तुरीयावस्थैवादेया वासुदेवपर्यवसायिनी।

एतास्तिस्रोऽवस्थाः अज्ञविज्ञसाधारण्यः। तुरीयावस्था तु विज्ञस्यैव। सापि चतुर्विधा सवव्यष्टीनां समष्ट्यनतिरेकादात्मानं सर्वस्थूलसमष्टिरूपं विराजं ब्रह्माण्डमयविग्रहं ज्ञात्वा सर्वस्थूलाभिमानिजीवचैतन्यस्य तदन्तर्याम्यनिरुद्धचैतन्येनाभेदज्ञानं तुरीयजागरणम्। एवं सर्वस्थूलानां तत्कारणभूतसूक्ष्मानतिरेकादपञ्चीकृतमहाभूतविग्रहं हिरण्यगर्भम् आत्मानं ज्ञात्वा तदभिमानिजीवचैतन्यस्य तदन्तर्यामिप्रद्युम्नचैतन्येनाभेदज्ञानं तुरीयस्वप्नः। एवं स्थूलसूक्ष्मयोः कारणानतिरेकात् सर्वकारणम् अव्याकृतम् अज्ञानमात्रोपाधिम् आत्मानं ज्ञात्वा तत्प्रतिबिम्बितजीवचैतन्यस्य बिम्बभूतान्तर्यामिसंकर्षणचैतन्येनाभेदज्ञानं तुरीयसुषुप्तिः। जडस्य सर्वस्य कल्पितत्वेनाधिष्ठानचैतन्यानतिरेकात् सर्वोपाधिशून्यं त्वम्पदलक्ष्यम् आत्मानं ज्ञात्वा अद्वितीयशुद्धचैतन्येन पूर्णेन सहाभेदपरिज्ञानात् तद्रूपेणैवावस्थानं तुरीयतुरीयम्।

एता एवैतानुज्ञात्रनुज्ञादिकल्पाख्याः स्थूलसूक्ष्मबीजसाक्षिभूता अकारोकारमकारोङ्कारवाच्या अनिरुद्धप्रद्युम्न-

संकर्षणवासुदेवरूपेण पर्यवस्यन्ति चतस्रोऽवस्थाः । अत्र प्रत्येकं मन्त्रास्तन्न्यासादयश्च गुरूपदेशादवसेयाः किमधिकेन ॥

इति श्रीमधुसूदनसरस्वतीविरचितः
ईश्वरप्रतिपत्तिप्रकाशः
समाप्तः ।

शुभं भूयात् ।

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः (Kavya) Syânandûrapuravarnanaprabandha by H. H. Svâti Srî Râma Varma Mahârâjah, with the commentary Sundarî of Râjarâja Varma Koil Tampurân.	2	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Adisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas).	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	Rs.	As.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Srî Krishnânanda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha).	0	8	0
No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadipika of Chitrabhanu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni.	3	8	0
No. 66—महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda.	2	8	0
No. 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1–6 Patalas)	3	4	0
No. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the commentary Tâtparyadîpikâ of Srî Kumara.	2	0	0
No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevamisra (Part I. Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः (Tantra) by Narayana with the commentary Vimarsini of Sankara (Part II. 7—12 Patalas).	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudevamisra (Part II. Mantrapada)	4	0	0
No. 73.—ईश्वरप्रतिपत्तिप्रकाशः (Vedanta) by Sri Madhusudanasarasvati	0	4	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

IN THE PRESS.

1. Silparatna (Silpa)
2. Manjusrimulakalpa (Part II).
3. Yajnavalkyasmriti with the commentary Balakrida of Visvarupacharya.
4. Kavyaprakasa (Alankara) with the commentary Sampradayaprakasini of Sri Vidyachakravartin and the Sahityachudamani of Bhattagopala.
5. Asvalayanagrihya with the commentary Anavila of Haradatta.

UNDERTAKEN FOR PUBLICATION.

1. Asvalayanagrihya with Devasvamin's Bhashya.
2. Arthasastra of Kautilya.
3. Pramanalakshana (Mimamsa) by Sarvajnatmapada.
4. Sarasvatikanthabharana (Vyakarana) of Bhoja with the Vritti of Narayana.
5. Vishnusamhita (Agama).
6. Uttaragargya Do.
7. Slokavartika (Mimamsa) with the Kasikatika of Sucharitamisra.

TRIVANDRUM SANSKRIT SERIES

No. LVI.

मनुष्यालयचन्द्रिका।

THE MANUSHYÂLAYACHANDRIKÂ

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY.

DX-m 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1917.

(All Rights Reserved.)

TRIVANDRUM SANSKRIT SERIES

No. LVI.

THE

MANUSHYÂLAYACHANDRIKÂ

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.



DX. 211. 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917.

(All Rights Reserved.)


C.I.T
Station
181658

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५६.

मनुष्यालयचन्द्रिका

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधिता ।

सा च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशिता ।

1911658

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५६.

मनुष्यालयचन्द्रिका

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधिता ।

सा च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशिता ।

कोल्लम्बाब्दः १०९२. क्रैस्ताब्दः १९१७.

PREFACE.

Manushyâlayachandrikâ is a treatise on the construction of houses and allied subjects. Works on architecture are generally found to be full of grammatical errors, but this work is free from any such error and is written in various metres.

Very little is known about the author of this work. It can, however, be surmised that he was a native of the Kerala country as he refers to the place Nâvâ or Tirunâvâ in one of the introductory verses at the beginning of this work. The author says that he has closely followed Tantrasamuchchaya of Nârâyana in his work. It is clear therefore that he is later than the author of Tantrasamuchchaya who flourished in the early part of the 15th century A. D.

There are, throughout this work, many technical expressions peculiar to architecture. I hope to publish a vocabulary of all such terms occurring in this work as well as in the Mayamata, Silparatna and other works under preparation soon after their publication.

The edition of the work is based on the following three palmleaf manuscripts.

1. (क) Belonging to the Palace Library.
2. (ख) Belonging to Manalikkara Mathom.
3. (ग) Belonging to Ennakkattu Kottaram.

All these manuscripts are in Malayalam characters. The colophon at the end of the manuscript ख shows that it was copied in the Kollam year 950. The other two manuscripts appear older than the Manuscript ख.

Trivandrum,
18th May 1917

T. GANAPATI SÂSTRÎ.

निवेदना ।

इय **मनुष्यालयचन्द्रिका** नाम मनुष्यगृहनिर्माणसम्बद्धान् विधीन् बोधयति । अपभ्रंशभूयिष्ठाः प्रायः शिल्पग्रन्थाः । **मनुष्यालयचन्द्रिका** तु साधुभिः शब्दैः श्रव्यैश्च नानावृत्तैरुपनिबद्धा ।

अस्याः प्रणेता क इति न ज्ञायते। किन्तु स 'श्रीमत्कुण्डपुरे' (१. २) इति श्लोके 'नावानाम्नि धाम्नि' इति **तिरुनावाक्षेत्रं** केरलीयं स्मरन् केरलीय इत्यनुमातुं शक्यते। **तन्त्रसमुच्चयकर्तुर्नारायणा**दर्वाचीनश्चासौ, यतः तन्त्रसमुच्चयोक्तमनुसृत्यैवात्र संक्षिप्यते' (१. ८) इत्यात्मनस्तन्त्र**समुच्चया**नुसारित्वमाह । **तन्त्रसमुच्चयस्य** तु कालः क्रैस्ताब्दीयस्य पञ्चदशशतकस्य पूर्वो भाग इति **वाररुचसंग्रह**स्योपोद्घातेऽवोचाम ।

इह शिल्पशास्त्रैकव्यवहार्याः सन्ति सांकेतिका बहवः शब्दाः। तेषाम् अस्मत्प्रकाशयिष्यमाण**मयमत**–**शिल्परत्ना**दिग्रन्थगततथाविधशब्द-सहितानाम् अर्थनिर्देशहृद्यां कामप्यनुक्रमणीं **मयमता**दिमुद्रणोत्तरं रचयित्वा प्रकाशयितुमिच्छामः ।

अस्याः शोधनाधारभूता ग्रन्थास्तावत् त्रयः । तत्रैको राजकीयग्रन्थशालीयः क.संज्ञः, द्वितीयः **पद्मनाभपुरा**भ्यर्णमणलिक्करमठीयः ख.संज्ञः, तृतीय **एण्णक्काट्टुराज**स्वामिको ग.संज्ञः । सर्व एते तालपत्रात्मकाः केरलीयग्रन्थलिपयः । तत्र ख.संज्ञः ९५० तमकोलम्बाब्दलिखितः, ततोऽपि वृद्धतरवदवभासमानावन्यौ ।

अनन्तशयनम्
१५-९-१९१७.

त. गणपतिशास्त्री.

॥ श्रीः ॥

मनुष्यालयचन्द्रिका ।

नृसिंहयादवाकारतेजोद्वितयमद्वयम् ।
राजतें नितरां राजराजमङ्गलधामनि ॥ १ ॥

श्रीमत्कुण्डपुरे विराजति परक्रोडे च तेजः परं
नावानाम्नि च धाम्नि यच्च नितरां मल्लीविहारालये ।
अश्वत्थाख्यनिकेतनेऽपि च पुरे श्रीकेरलाधीश्वरे
सम्भूयैतदुरुप्रकाशविषये चित्ते ममोज्जृम्भताम् ॥

श्रीमङ्गलास्पदसदाश्रयनीलकण्ठ-
प्रेमप्रकर्षनिलयः सकलाभिवन्द्यः ।
श्रीमद्विरीन्द्रतनयातनयोऽङ्घ्रिभाजां
कामप्रदो जयति मत्तमतङ्गजास्यः ॥ ३ ॥

तद्देवपादकमलैकसमाश्रयः को-
ऽप्युद्द्योतमानगुरुवर्यकृपाभियोगात् ।

---

१. 'व' ख. पाठः.

G.P.T. 2770. 500. 19-9-1092. B

विद्यापरिश्रमपरो बहुधात्मशुद्ध्या-
मुद्योगवान् भवति बालविबोधने च ॥ ४ ॥

येषां श्रुतिप्रणयिनी धिषणा यदीय-
सङ्कल्पकल्पिततनुः परमेश्वरोऽपि ।
तेषां महीसुमनसां महनीयभासा-
मुत्तंसये परमुदारपदारविन्दम् ॥ ५ ॥

निसर्गसंसिद्धसमस्तशिल्प-
प्रावीण्यमाद्यं द्रुहिणं प्रणम्य ।
मया मनुष्यालयचन्द्रिकैषा
विलिख्यते मन्दधियां हिताय ॥ ६ ॥

मयमतयुगलं प्रयोगमञ्ज-
र्यपि च निबन्धनभास्करीययुग्मम् ।
मनुमतगुरुदेवपद्धतिश्री-
हरियजनादिमहागमा जयन्ति ॥ ७ ॥

मार्कण्डेययुगं पराशरमुरारिप्रोक्तरत्नावली-
सारान् काश्यपविश्वकर्ममतयुग्माद्यं कुमारागमम् ।
सव्याख्यां हरिसंहितां विवरणाद्यं वास्तुविद्यादिकान्
दृष्ट्वा तन्त्रसमुच्चयोक्तमनुसृत्यैवात्र संक्षिप्यते ॥ ८ ॥

मर्त्यो विप्रादिवर्णेष्विह भवनविधानोत्सुको यः स पूर्वं
विप्रं तद्देशसम्बन्धिनमखिलगुणैरन्वितं संवृणीत ।

सोऽयं तद्वर्णयोग्यां क्षितिमथ परिकल्प्यात्र पूजादि कृत्वा
वास्तोः शास्त्रोक्तरीत्या गृहमतिनिपुणैः कारुभिः कारयेत ॥

वेदागमादिविहितान्यवधार्य विप्रैः
कार्यो विधिः सकलदेवनरालयानाम् ।
तद्वाक्यतः सकलधामसु मृच्छिलादे-
रन्योन्यमेलनमुशन्ति हि कारुकृत्यम् ॥ १० ॥

स्थपतिः सूत्रग्राही तक्षकसंज्ञश्च वर्धकिः क्रमशः ।
स्वोचितकर्मणि दक्षा ग्राह्यास्ते कारवश्चतुर्धेति ॥ ११ ॥

सर्वशास्त्रविहितक्रियापटुः
सर्वदावहितमानसः शुचिः ।
धार्मिको विगतमत्सरादिको
यः स च स्थपतिरस्तु सत्यवाक् ॥ १२ ॥

जानीयात् स्थापनार्हं स्थपतिमथ गुणैः प्रायशस्तेन तुल्यः
सूत्रग्राही सुतो वा स्थपतिमतिगतिप्रेक्षकः शिष्यको वा ।
स्थूलानां तक्षणात् तक्षक इति कथितः सन्ततं हृष्टचित्तो
दार्वाद्यन्योन्यसंमेलनपटुरुदितो वर्धकिः सावधानः ॥ १३ ॥

विना स्थपत्यादिचतुष्टयेन
गृहादि कर्तुं न च शक्यतेऽस्मात् ।
प्रसादितैस्तैरथ विप्रवर्यः
सुसूक्ष्मधीः कारयतां गृहाणि ॥ १४ ॥

लक्षणहीने धामनि वसतामशुभानि सम्भवन्त्येव ।
जन्माद्यवसानान्तं मनसा निश्चित्य कारयेत् तस्मात् ॥ १५ ॥

तत्र क्रमेण बहुधा धरणीपरीक्षा
दिङ्निर्णयादिशुभवीथिपरिग्रहश्च ।
धाम्नां प्रमाणविधिरङ्कणकुट्टिमादी-
न्यङ्गानि बाह्यविधयश्च तथा विधेयाः ॥ १६ ॥

गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्या समा प्राक्प्लवा
स्निग्धा धीररवा प्रदक्षिणजलोपेताशुबीजोद्गमा ।
सम्प्रोक्ता बहुपांसुरक्षयजला तुल्या च शीतोष्णयोः
श्रेष्ठा भूरधमा समुक्तविपरीता मिश्रिता मध्यमा ॥ १७ ॥

वृत्तार्धेन्दुनिभा त्रिपञ्चरसकोणा शूलशूर्पाकृति-
र्मत्स्यानेकपकूर्मपृष्ठकपिलावक्रोपमा मेदिनी ।
भस्माङ्गारतुषास्थिकेशचितिवल्मीकादिभिः संयुता
वर्ज्या मध्यनता सगर्भकुहरा विस्रा विदिक्स्थापि च ॥

इन्द्राशादिनतावनी तदितराशाद्युन्नताष्टौ क्रमाद्
गोवह्न्यन्तकभूतवारिफणभृन्मातङ्गधान्याह्वयाः ।
वीथ्योऽत्र क्रमशोऽभिवृद्धिधनहान्यन्तार्थहानिप्रदा
दारिद्र्यात्मजहानिवित्तशुभदास्तादृक्क्षितौ तस्थुषाम् ॥

प्रवासदा मध्यनता धरित्री
मध्योन्नता वित्तसुखादिहन्त्री ।

वह्न्यादिवाय्वन्तनता धरित्री
प्रायेण दारिद्र्यफलप्रदा स्यात् ॥ २० ।

मध्योच्चायां धरित्र्यां प्रथममथ गृहे कल्पिते स्याद् दशाब्दं
वृद्धिः प्रागुन्नतायामपि हुतवहयाम्योन्नतायां शताब्दम् ।
साहस्राब्दं निर्ऋत्युन्नतधरणितले वारुणे स्यात् तदर्धं
शेषास्वर्काष्टषट्का; शरद इह ततः स्वोक्तरूपं फलं स्यात् ॥

पूर्वस्यां वकुलो वटश्च शुभदोऽवाच्यां तथोदुम्बर-
श्चिञ्चा चाम्बुपतौ तु पिप्पलतरुः सप्तच्छदोऽपि स्मृतः ।
कौबेर्यां दिशि नागसंज्ञिततरुः प्लक्षश्च संशोभनाः
प्राच्यादौ तु विशेषतः पनसपूगौ केरचूतौ क्रमात् ॥

अश्वत्थोऽग्निभयं करोति बहुधा प्लक्षः प्रमादप्रदो
न्यग्रोधः परशस्त्रपातमुदरव्याधिं तथोदुम्बरः ।
सम्प्रोक्तप्रतिदिक्स्थितास्त्वपि च ते चान्ये सुवर्णात्मका-
श्छेद्या मन्दिरतस्तरूच्चयुगसीमाभ्यन्तरस्था यदि ॥ २३ ॥

स्थाप्या मन्दिरपार्श्वपृष्ठदिशि तु श्रीवृक्षबिल्वाभया
व्याधिघ्नामलकीसुरद्रुमपलाशाशोकमालेयकाः ।
पुन्नागासनचम्पकाश्च खदिरस्तद्वत् कदल्यादयो
जातीनागलतादयोऽपि सकलाः सर्वत्र संशोभनाः ॥

अन्तःसारास्तु वृक्षाः पनसतरुमुखाः सर्वसाराश्च शाका-
श्चिञ्चाद्यास्तालकेरक्रमुकयवफलाद्या बहिस्सारवृक्षाः ।

---

१. 'शस्ता म' ग. पाठः.

निःसाराः शिग्रुसप्तच्छदशुकतरवः किंशुकाद्याश्च कार्या-
स्तेष्वाद्या मध्यभागे बहिरपि च ततः सवसारास्ततोऽन्ये ॥

कारस्करारुष्करकण्टकिद्रुश्लेष्मातकाक्षद्रुमपीलुनिम्बाः ।
स्नुहीपिशाचद्रुमहेमदुग्धाः सर्वत्र नेष्टा अपि शिग्रुरन्तः ॥

विष्णोः पृष्ठे च वामे नरभवनमनर्थप्रदं दक्षिणे चा-
प्यग्रे भागे च कालीनरहरिशिवतद्भिन्नसर्वोग्रमूर्तेः ।
आर्यो निम्नस्थलस्थो यदि मनुजगृहं दक्षिणेऽग्रेऽस्य तस्मा-
दुच्चत्वं नेष्टमिष्टं निकटमपि तदन्यत्र तत्पादभाजाम् ॥

व्रीहिक्षेत्रादिदेवालयजलधिनदीतापसागारगोष्ठ-
ग्रामादीनामतीवान्तिकमपकुरुते नैकधा मन्दिरेषु।
देवागारान्नराणामतिशुभदमिदं किञ्चिदूनं समं वा
तस्मादभ्युन्नतं च द्वितलविधिरयं नेष्यते तत्समीपे ॥

विप्रादिक्रमतः कुशेषुवनदूर्वाकाशयुक्ता भुव-
स्तुल्यातानवितानसिन्धुररसाब्ध्यंशाधिदीर्घा अपि ।
श्वेता पाटलपीतमेचकरुचश्चाज्यासृगन्नासवा-
मोदाः स्वादुकषायतिक्तकटुकास्वादान्विताश्च स्मृताः ॥

विप्राणां भूरवागुन्नतधनदनतोदुम्बराढ्या शुभा स्यात्
प्राङ्निम्ना वारुणोच्चा चलदलसहिता भूः शुभा बाहुजानाम् ।
प्रागुच्चाब्धीशनिम्ना वटतरुसहिता भूर्विशां पादजानां
सा सप्तक्षा तथा चेद् यमनतधरणी चान्यथा सर्ववर्ज्याः ॥

---

१. बे' ख. ग. पाठः.

सङ्कीर्णरूपा वसुधात्र वर्णैर्गन्धै रसैश्चाखिलवर्जनीया ।
एनामनालक्षितवर्णचिह्नां नक्तं परीक्षेत निमित्ततश्च ॥ ३१ ॥
क्ष्मां खात्वामघटं निधाय भृतधान्यं वर्धमानं मुखे
कृत्वासिच्य घृतं निशासु सितरक्तापीतकृष्णा दशाः ।
विप्रादिक्रमतः प्रदीप्य विधिवन्नीते मुहूर्ते ज्वलेद्
वर्त्तिर्यस्य धरास्य तासु सकलास्विद्धासु सर्वोचिता ॥
भूगर्ते जलपूरितेऽत्र विधिवद् द्रोणादिपुष्पं क्षिपेत्
प्रादक्षिण्यगतिः शुभं सुमनसां यद्यन्यथा निन्दितम् ।
पुष्पो दिक्ष्वथ संस्थिते सति शुभं कोणेषु चेन्निन्दितं
ज्ञात्वेत्यादिशुभाशुभान्यथ समीकुर्यात् क्षमां सूक्ष्मधीः ॥

इति मनुष्यालयचन्द्रिकायां भूपरीक्षापरिच्छेदो नाम
प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः ।

यन्त्रेणावनतादिना च निपुणो यद्वाम्बुसम्पूरणे-
नोर्वीं चारु समीकरोत्वथ दृढं शङ्कुं करार्धायतम् ।
मूले ह्यङ्गुलविस्तृतः क्रमवशादग्रे तदर्धोन्मित-
व्यासं वृत्ततरं सरोजमुकुलाकाराग्रमाकल्पयेत् ॥ १ ॥
शङ्कुदीर्घयुगसम्मितसूत्रेणाकलय्य परिवृत्य सुवृत्तम् ।
वृत्तमध्यमवधार्य सुसूक्ष्मं शङ्कुमत्र तु दृढं निवेशयेत् * ॥२॥

---

१. 'प्य' क. पाठः.

---

* इह स्वागतावृत्तयोरुपजातिः ।

शङ्कुच्छायाग्रभागे त्ववहितहृदयो वृत्तलग्नेऽङ्कयित्वा
प्राह्णान्ते पश्चि(मस्यां ? मायां) दिशि तदितरदिश्येवमेवापराह्णे ।
पाश्चात्येऽन्येद्युरप्यङ्कनमपि च विधायाङ्कयोरेतयोर-
प्यन्तर्भागत्रिभागे नयतु गतदिनाङ्कं तदेवेह सूक्ष्मम् ॥ ३ ॥
पूर्वापरेद्युः प्रभवाङ्कयुग्ममेवं सुसूक्ष्मं परिकल्पितं यत् ।
तदङ्कयुग्माहितसूत्रमेव पूर्वापराशाप्रभवं सुसूक्ष्मम् ॥ ४ ॥
एवं क्षेत्रस्य मध्ये सुविहितामिह यद् ब्रह्मसूत्रं तदाहु-
स्तन्मध्येऽन्योन्यमन्तर्गतमथ रचयेद् वृत्तयुग्मं च धीमान् ।
तद्योगात् तिर्यगुद्यज्झषजठरसुषुम्नाध्वना सूत्रमेकं
याम्योदग्गामि सूक्ष्मं रचयतु यमसूत्रं तदित्यामनन्ति ॥५॥
तत्सूत्रद्वितयेऽथ दिक्षु चतसृष्वङ्कान् समं कल्पयि-
त्वाङ्कारोपितमध्यकानि सुसमं चत्वारि वृत्तानि च ।
सिध्यन्त्यत्र विदिक्षु वृत्तयुगलीयोगेन मत्स्याः शिवा-
ग्न्यग्रास्तद्गतसूत्रयुग्ममपि चात्राब्ध्यश्रमाकल्पयेत् ॥ ६ ॥
सूत्रे प्रागुदगग्रके क्षितितले कृत्वा चतुःखण्डिते
खण्डे कल्पयतु द्विजादिवसतिं शार्वेऽथ वा नैर्ऋते ।
क्षेत्रे विस्तृतिरस्ति चेत् पुनरपि श्रुत्यंशिते गृह्यते
शैवे नैर्ऋतखण्डमेव निर्ऋतौ शैवं शुभं चोभयोः ॥ ७ ॥
धात्रीतलेऽब्ध्यंशिनि मानुषाख्यं गृहाभिवृद्धिप्रदमैशखण्डम्
देवाह्वयं नैर्ऋतमिष्टदं स्यादुभे शुभे गेहविधौ नराणाम् ॥ ८ ।
आग्नेयखण्डं यमसंज्ञितं स्यान्मृतिप्रदं चाखिलवर्ज्यमेतत् ।
वायव्यमप्यासुरसंज्ञितत्वान्निन्द्यं विशे[illegible]व गृह्यते तत्

भूपादिवर्णनियमेन यमोदगाया-
मोपेतमध्यचतुरश्रमहीतले तु ।
कर्णाध्वना निर्ऋतिमारुतकोणमूल-
शैवानलाग्रभवसूत्रयुगं हि रज्जुः ॥ १० ॥

सूत्रस्य रज्ज्वोरपि चाग्रमूलैर्विद्धे गृहादिस्थितमध्यसूत्रे ।
हीनायतिप्राङ्गणतश्चतुःशालागारतोऽन्यत्र भवन्ति दोषाः ॥

प्रागादि क्रमशः स्याद् वेधफलं पतिवियोगकुष्ठरुजौ ।
रिपुपीडात्मजधनहान्यनिलरुजः स्वकुलधान्यहान्याद्याः॥१२॥

क्षेत्रस्यैशादिखण्डे नवकृतिपदसम्भिन्नवास्त्वङ्गकोष्ठ-
ष्वेकस्यार्काशतः स्याद् वितातिरिह महासूत्ररज्ज्वोः प्रसिद्धा ।
तत्तद्दिग्वर्गकोष्ठैर्विहितशतपदेष्वेककोष्ठे भभागो
विस्तारं सूत्ररज्ज्वोरहिकृतिपदभिन्नेष्वथैकाष्टिभागः ॥ १३ ॥

समस्तगेहाङ्गणकूपवापीद्वारादिमध्यस्थितसूत्रवेधः ।
मिथः समस्तेष्वपि वर्जनीयो रज्ज्वोश्च कोणालयकर्णयोश्च ॥

वीथीविस्तृतिकल्पनासु बहुधा दण्डो भवेन्मेदिनी-
विस्ताराद् गृहकर्तृपूरुषसमोत्सेधोऽत्र तालो मतः ।
तालैस्तैर्दशनन्दवारणमितैर्दण्डस्त्रिधा तेषु त-
द्वीथीविस्तृतिमेकतो वितनुयाद् यद्यस्ति भूविस्तृतिः ॥१५॥

नन्दद्वन्द्वपुटेन वा वृतितया बाह्यादिमध्यान्तिमा
वीथ्यः स्युः परितः पिशाचदिविषद्वित्ताधिभूदण्डिनाम् ।

---

१. 'लतं बा' ग. पाठः.

नागाम्बग्निविनायकद्रुहिणनाम्नां चासु निन्द्याः स्मृताः
पैशाचाग्न्यहिदण्डिनां गृहविधौ वीथ्यश्चतुर्दिक्ष्वपि ॥ १६ ॥

यावत् कल्पितमङ्गणं गृहविधौ स्वार्धान्विता तावती
वीथीविस्तृतिरुत्तमाङ्गणसमा मध्या तदल्पाधमा ।
क्षेत्रेऽल्पे पुनरङ्गणार्धवितता वीथीं प्रकुर्यात् तदा
प्राच्योदीच्यगृहं भवेत् सलिलवीथ्यारूढमेवं च वा ॥

क्षेत्रेऽत्यल्पे तु मध्येऽङ्गणमपि च कृतान्तात्मभूसूत्रयोगात्
किञ्चिन्नीत्वा स्वगत्यापि च भवनचतुष्कं कृतं दृश्यते च ।
अत्यल्पा एव वीथ्यो ह्यशुभशुभफलान्येवमेवाल्परूपा-
ण्यस्मादीशादिखण्डाद्यधिगतनववीथीविधिर्नेष्यतेऽत्र ॥

यावत् प्राङ्गणदैर्घ्यमानममुनैकाध्यर्धवीथीततं
तेनाष्टादशभूमिमानमिति वा क्षेत्राप्तिरन्तः क्रमात् ।
मर्यादानियमप्रहीणमनुजागारेऽपि तत्प्राङ्गणा-
देवं क्षेत्रमितिं करोतु च पुनर्वप्रान्तमौचित्यतः ॥ १९ ॥

एकीकृत्य गणेशपङ्कजभुवोर्वीथीमथैशेऽथवा
खण्डे नैर्ऋतकेऽत्र वास्तुपदमेकाशीतिखण्डात्मकम् ।
यद्वा नागकृतिप्रभिन्नमथवा दिग्वर्गखण्डोदितं
कुर्यादेकमिहाङ्गमर्मरचनां वास्तोश्च[1] तद्देवता ॥ २० ॥

नाड्यः प्रागुदगग्रगा दश दशैकाशीतिकोष्ठे शिवा-
ग्न्यग्राः पञ्च पृथङ् नवोर्मिगुणकोष्ठस्थास्तथा रज्जवः ।

---

१. 'स्त्वोल्पत' क. पाठः. 'स्त्वोच्चत' ख. पाठः.

मर्माण्यष्टरसाशुगाब्धिगुणसङ्ख्यानैरकोष्ठस्थितै
सूत्रैर्योगसमुद्भवानि तु शतं वर्ज्यानि कुड्यादिषु ॥ २१ ॥

प्राग्वोदक्पदभास्करांशदलमात्रं मर्मसूत्रस्थितै-
र्नीत्वा विन्यसनान्न मर्मपरिपीडा स्तम्भकुड्यादिषु ।
वास्तुन्यत्र निपीडिते महिषसिंहानेकपानां शिरो
हैमं कूर्मवराहयोश्च निखनेत् तच्छान्तये शान्तिकृत् ॥

एकाशीतिपदे प्रकल्प्य नवकं मध्येऽस्य बाह्यावृतौ
षट्कं दिक्षु विदिक्षु युग्मयुगलं चैकैकशस्तद्बहिः ।
चत्वारिंशदथैषु पञ्च च विरिञ्चाद्याः पदेषु स्थिता
बाह्येऽष्टावपदस्थितास्त्र्यधिकपञ्चाशत् स्युरेवं सुराः ॥ २३ ॥

ईशाद्यं बहिरावृतिस्थपदकेष्वीशानपर्जन्यका-
वैन्द्रीन्द्रौ रविसत्यकौ भृशखगौ[1]व्यादांस्तथा पूषणः ।
भूयो वै वितथं गृहक्षतयमौ गन्धर्वभृङ्गौ मृगं
पित्राख्यान् प्रतिहारपालमपि सुग्रीवं क्रमात् कल्पयेत् ॥

भूयः पुष्पादिदन्तं वरुणमसुरशोषाख्यरोगेरनागौ[2]न्
मुख्यं भल्लाटमिन्द्रर्गलमदितिदिती चेति बाह्यावृ[3]तौ स्युः ।
ईशाद्यावापवत्सार्यकसवितृकसावित्रसंज्ञौ विवस्वा-
निन्द्राख्यश्चेन्द्रजिन्मित्रकशिवशिवजिद्भूभृतोऽन्तर्वृतौ स्युः ॥

---

१. 'गौ', २. 'खमु' (?), ३. 'वृति स्युः' ग. पाठः.

ब्रह्मा मध्यपदेऽथ शर्वसहितः स्कन्दोऽर्यमा जृम्भकः
प्रागादौ पिलिपिञ्छकश्च चरकीशादौ विदार्याह्वयौ[1] ।
भूयः पूतनिका च पापपदपूर्वा राक्षसी बाह्यत-
श्चैतेऽष्टावपदस्थिताश्च परितो देवग्रहास्तद्बहिः ॥ २६ ॥

आसीद् दैत्यः प्रदृप्तो निजभुजबलवीर्यादिनाक्रान्तकाष्ठा-
निष्ठो द्वेष्टा सुराणां स तु युधि पतितो विद्धगात्रो धरित्र्याम् ।
व्याप्तः सर्वत्र पश्चाद् बहुतरपरिवृत्त्यैव पृथ्वीं विमथ्नन्
मर्त्या दुःस्था मुनीन्द्रास्त्वपि च मखभुजस्तावदेवं बभूवुः ॥

सर्वव्याप्तेऽप्यमुष्मिन्ननतनु तनुघटाभ्यन्तरे व्योम यद्वत्
तद्वन्नित्यं विशेषान्नगरपुरमहीक्षेत्रखण्डाङ्गणादौ ।
उत्ताने नैर्ऋताशाविनिहितचरणे यावदीशात्तशीर्षे
जाते तावन्निषेदुः स्थिरमिह विबुधास्तस्य देहे क्षणेन ॥

मूर्ध्नीशोऽस्य तु संस्थितो नयनयोः पर्जन्यकश्चादिति-
श्चापस्तद्धृदने तथा गलतले तस्यापवत्साह्वयः ।
वामश्रोत्रगतो जयन्त इतरत्रास्यादितिः संस्थिता
वामांसे स्थितवानमर्त्यपतिरप्यंसेऽर्गलो दक्षिणे ॥ २९ ॥

अर्कादयो वामभुजस्थिताः स्युश्चन्द्रादयो दक्षिणहस्तगाश्च ।
वामप्रकोष्ठे सविता च सावित्रोऽन्यत्र रुद्रः शिवजित् प्रकोष्ठे ॥

महीधरार्यौ कुचयोर्विवस्वान् मित्रश्च कुक्षौ द्रुहिणोऽथ नाभौ ।
इन्द्रोऽस्य मेढ्रेऽण्डयुगे तु तज्जित् पादद्वये तस्य परे प्रविष्टाः ॥

---

१. 'विठिवञ्छकं च च' ग. पाठः. २. 'यः' ख. ग. पाठः.

ता देवता वास्तुशरीरसंस्थाः सन्तर्पितास्त्विष्टफलप्रदाः स्युः ।
ताश्चेदनिष्टा विपरीतदाः स्युस्तस्माद् विदध्यादिह वास्तुपूजाम्॥

इति मनुष्यालयचन्द्रिकायां दिङ्निर्णयादिशुभवीथी-
परिग्रहवास्तुदेवतानिर्णयो नाम
द्वितीयोऽध्यायः ।

अथ तृतीयोऽध्यायः ।

शिम्बिः साष्टतिलैर्यवोदरमिति प्राहुस्तदष्टोन्मितं
मात्राख्याङ्गुलमङ्गुलैरिनमितैः प्रोक्ता वितस्तिस्ततः ।
तद्वन्द्वं करकिष्कवरत्निभुजदोर्मुष्ट्यादिसंज्ञं तत-
स्त्वेकैकाङ्गुलवृद्धितोऽङ्गुलविशेषादप्यथो भिद्यते ॥ १ ॥

मात्राख्याङ्गुलिपञ्चविंशतिमितं मानं विमाने स्मृतं
प्राजापत्यकसंज्ञितं सुरगृहे तेनापि मेयं क्वचित् ।
एतैरेव वराङ्गुलैः परिमितं षड्विंशतिप्रोन्मितै-
र्मानं क्वापि समस्तधाम्नि विहितं नाम्ना धनुर्मुष्टिकम् ॥

सम्प्रोक्ताङ्गुलिसप्तविंशतिमितं मानं यदुक्तं बुधै-
र्नाम्ना तत्तु धनुर्ग्रहं[1] यदमुना ग्रामादिकं मीयते ।
रथ्याध्वोपवनादिसम्मितिविधौ वापीतटाकादिके
चेष्टं तत्र धनुर्ग्रहं[2] त्वथ धनुर्मुष्टिश्च तत्रेष्यते ॥ ३ ॥

अष्टाविंशतिसंमिताङ्गुलिमितं प्राच्याख्यमानं भवेद्
वैदेहं नवविंशतिप्रतिमितैर्मात्राङ्गुलैः सम्मितम् ।

१, २. 'नुग्रहं' क. ख. पाठः.

स्यात् त्रिंशत्प्रवराङ्गुलीपरिमितं वैपुल्यमेकाङ्गुली-
युक्तं तत्तु भवेत् प्रकीर्णमिति दोर्मानप्रभेदोऽष्टधा ॥ ४ ॥

भूसुरकार्ये निलये धनुर्ग्रहं[1] च प्रकीर्णं च ।
वैपुल्यधनुर्मुष्टी भूपानां मानसाधने योज्ये ॥ ५ ॥

प्राजापत्यं च वैदेहं वैश्यानां सम्मतं भवेत् ।
किष्कुः प्राच्यं च शूद्राणां किष्कुः सर्वत्र संमतः ॥ ६ ॥

स्वस्वोक्तमानादुपरि प्रदिष्टं सर्वं न चेष्टं क्षितिपादिकानाम् ।
अधःस्थमानं सकलं क्रमेण वैश्यक्षितीशद्विजवर्णयोग्यम् ॥७॥

सुरालये समस्तान्यप्यभीष्टानि यथेप्सितम् ।
मानानि श्रेष्ठमध्याधमाङ्गुलोत्थानि च क्वचित् ॥ ८ ॥

यवोदरैरष्टभिरुन्मितं यन्मात्राङ्गुलं तत् कथितं वरिष्ठम् ।
क्रमेण सप्तांशयवोदरैर्यत् तन्मध्यमं चाधमसंज्ञितं च ॥ ९ ॥

षाष्टिकशाल्युदरैरप्यष्टाद्यङ्गैर्वराङ्गुलाद्यं वा ।
तच्छाल्यायतजलधिः सार्धत्रितयं त्रिसंमितैर्वापि ॥ १० ॥

नवधेत्युदिताङ्गुलिप्रभेदा नवधा तत्र कराः स्युरुत्तमाद्याः ।
अथ तेऽङ्गुलिवृद्धितोऽष्टधोक्तैः करभेदैः सहिता द्विसप्ततिः स्युः॥
आदौ चतुर्विंशतिसंमितैर्यो मात्राङ्गुलैरुक्तकरः स एव ।
सर्वत्र पूज्यो मतभेदतोऽन्ये सर्वेऽपि च क्वापि यथार्हमिष्टाः ॥
हस्तेनैव गृहाद्यमुक्तमुदितं कुत्रापि मात्राङ्गुलै-
रत्यावश्यकतो यवैरपि परीणाहं च गत्यादि च ।

---

१. 'नुग्रहं' क. ख. पाठः.

मानुष्येषु तु बाह्यगेहगतिनिष्ठादौ चतुर्हस्तको
दण्डो यष्टिरिति स्मृतोऽष्टगुणितो दण्डोऽत्र रज्जुर्भवेत् ॥१३॥

तालाद्यैः प्रतिमादिकं खलु यवैर्मेयं च भूषादिकं
वस्त्रावरणांशुकादि परिमेयं स्याद् वितस्त्या तथा ।

शस्त्राद्यं तदनामिकाङ्गुलियुगेनैवं च तद्व्यासतो
मुष्ट्या याज्ञिकभाजनादि यजमानस्यान्यदङ्घ्र्यादिना(म् ?)॥

द्विजभवनादिबहुत्वाद् ग्रामाद्याः सम्भवन्ति बहुभेदाः ।
उत्तममध्याधमतो मानविशेषैश्च सम्भवेदेषाम् ॥ १५ ॥

योजनमितचतुरश्रं भूभागं ग्राममुत्तमं प्राहुः ।
मध्यममर्धप्रमितं *प्रायशोऽधमं ग्रामम् ॥ १६ ॥

नगरस्य सहस्रादि द्विसहस्रान्तं च दण्डमानं स्यात् ।
पत्तनसंज्ञं तद्वत् पोतान्वितवारि(नि)धितटोपेतम् ॥ १७ ॥

पुरमिति नरवरभवनप्रधानमाहुर्वणिग्जनादियुतम् ।
नगरं राजवरालयसकलजनागारमण्डितं विदितम् ॥ १८ ॥

एकविप्रवरागारतत्कुटुम्बसमन्वितम् ।
एकभोगं भवेद् ग्रामं तद्भृत्यायतनावृतम् ॥ १९ ॥

ग्रामाद्यखिलं द्विजभवनादिबहुत्वादनेकधा ज्ञेयम् ।
मानविशेषैरुत्तममध्याधमसंज्ञितं च सम्भवति ॥ २० ॥

उत्तरयुगबाह्यान्तो मन्दिरविस्तार एव देवगृहे ।
श्रेष्ठो दण्डस्तद्वज्जगति प्रान्तावसानिको मध्यः ॥ २१ ॥

---

* इह 'तदर्धकम्' इत्यपेक्षितं भाति ।

पादुकयुगलावधिको दण्डः प्रोक्तोऽधमः सुरागारे ।
प्रासादाद् बहिरेतैर्मर्यादाः पञ्च तत्र कल्प्याः स्युः ॥ २२ ॥

यानाङ्गादिषु केतुरेव विहितः सर्वत्र शस्तो ह्ययं
पर्यङ्कादिषु कुञ्जरो मृगपतिः पीठासनादौ हितः ।
भाण्डे कूपतटाकपञ्जरविधौ योनिर्वृषो वा ध्वजो-
ऽथाश्वत्थादिसमस्तकुट्टिमविधौ केतुर्विधेयः सदा ॥ २३ ॥

अन्तर्योनिर्मानपात्रादिवापीकूपादीनामङ्गणे गर्भगेहे ।
तुर्यश्रागारोत्तरव्यासमध्ये कुत्राप्युक्तोऽन्यत्र सर्वत्र बाह्ये ॥

इष्टातानवितानमाननिचये त्रिघ्नेऽष्टभिर्भाजिते
शेषो योनिरिह व्ययो मुनियुजाथायोऽष्टनिघ्नेऽरुणैः ।
ऋक्षैर्ऋक्षमवाप्तिरत्र तु वयो ज्ञेयं तिथिस्त्रिंशता
वारो भूमिधरैर्निधिप्रगुणिते धर्माहृते वा व्ययः ॥ २५ ॥

ध्वजधूमसिंहकुक्कुरवृषखरगजवायसाः क्रमेण स्युः ।
प्रागादियोनयोऽष्टौ तेष्वयुजः सम्पदे युजो विपदे ॥

केतुयोनिरभिवाञ्छितार्थदः
सात्त्विकोऽमरगुरुर्द्विजो भवेत् ।
पूर्वदिक्त्वभिहितोऽपि सर्वदा
सर्वदिक्त्वविहितो विशेषतः ॥ २७ ॥

सिंहो दक्षिणदिक्स्थितः क्षितिसुतो लक्ष्मीप्रदस्तामसो
भूपोऽथो वणिगुत्तरे शुभकरो दन्ती बुधो राजसः ।

शूद्रः पश्चिमदिक्स्थितोऽर्कतनयो धान्यप्रदस्तामसः
सम्प्रोक्तोऽथ विदिक्षु ये निगदितास्तत्रापि ते निन्दिताः ॥

उद्वेगः स्याद् धूमे शुनि कलहश्चपलता खरे भवति ।
ध्वाङ्क्षे कुलहानिः स्यात् सर्वविदिग्योनयस्ततो निन्द्याः॥२९॥

प्राच्यां केतुर्विधेयः स तु भवति विधानेषु सर्वत्र नित्यं
शालायां दक्षिणस्यां मृगपतिरुदितः केतुयोनिश्च योज्यः।
मातङ्गः केतुसिंहावपि च धनपतौ पश्चिमे स्याद् वृषोऽन्ये
केतुः सिंहो गजश्चापि च निजनिजकोणालयेऽप्येवमेव ॥

योनिः प्राणा एव धान्नां यदस्माद्
ग्राह्यस्तत्तद्योग्ययोनिप्रभेदः ।
मृत्युर्वर्ज्यः सर्वगेहेष्ववश्यं
सर्वव्यापत् प्राप्यतेऽस्मिन् गृहीते ॥ ३१ ॥

आयाधिक्यं व्ययतः सम्पाद्यं सर्वथान्यथापत्तिः ।
नक्षत्रादिशुभत्वं ज्योतिःशास्त्रादिभिः सुविज्ञेयम् ॥ ३२ ॥

बालत्वं कौमारं यौवनमथ वार्द्धकं च निधनं च ।
पञ्च वयांस्येष्वन्त्यं नेष्टं शिष्टानि वास्तुनीष्टानि ॥ ३३ ॥

द्वेधा योनिश्चतुर्धा व्ययविधिरुदितश्च द्विधायो वयश्चा-
प्यृक्षं विप्रादिवर्णास्तिथिरपि च तथा राशयो द्विप्रकाराः।
त्रेधा वारो ध्रुवादिस्त्रिविध इति विकल्पेन योन्यादयः स्युः
प्रोक्तेष्वेतेषु पूर्वोदितमखिलमतं कार्यमावश्यकेऽन्यत् ॥३४॥

सामान्यं परिणाहतः सुविहिता योन्यादयो दीर्घतो
विस्तारेण च पादमानचरणाधिष्ठानतुङ्गैरपि ।

विस्ताराहतदैर्घ्यतोऽपि च पृथक् स्वस्वोक्तयोन्यादयो
जाताश्चेदतिशोभना गृहविधौ पक्षान्तरोक्तैरपि ॥ ३५ ॥
सर्वागारे प्रधानोत्तरपरिधिवशाद् दीर्घविस्तारतुङ्ग-
स्तम्भाधिष्ठानगर्भालयमितिविधयो द्वारबिम्बादयोऽपि ।
आरूढाद्युत्तरं च द्वितलविधिसमस्ताङ्गभेदा विकल्पे-
नोक्तैरंशैश्च कार्या यदि निकटगता योनिभेदाश्च योज्याः ॥
गेहे क्षेत्रफलं वितानिहतायामं विदुश्चेष्टदिग्-
योनिर्यन्मितदीर्घविस्तृतिविधानादत्र पूर्णो भवेत् ।
तावद्विस्तृतिदीर्घमानमभिकल्प्य प्रागथो नाहवत्
सर्वं कल्पयतु व्ययादिकमिदं त्वभ्यन्तरव्यापि हि ॥ ३७ ॥
पूर्वे त्रिघ्नचतुर्दशाप्तपरिधेः सामान्यमुक्तो व्ययो
नन्दघ्नेऽष्टहते च पङ्क्तिविहते शिष्टो व्ययो वा भवेत् ।
सिद्धर्क्षे वसुभाजितेऽपि च चतुर्धेति व्ययः सर्वथा-
स्याल्पत्वं परिकल्प्यमात्मजधनादीनां विनाशोऽन्यथा ॥
स्वव्ययांशेन युते तथेक्षणहते नाहेऽष्टभक्ते भवे-
दायो वा पुनर्ऋक्षनिघ्नपरिधौ दिग्द्वन्द्वभक्ते वयः ।
बालत्वादिविशेषमात्रमवगन्तव्यं फलैः शेषत-
स्तेषामेव गताब्दमानमिह तारुण्यं वयः शोभनम् ॥
नन्दघ्ने परिधौ च केवलपरीणाहेऽथवा त्रिंशता
भक्ते तत्र विकल्पपक्षयुगले प्राग्वत् तिथिः शिष्यते ।
त्रिघ्नेऽङ्कादिहतेऽथवार्णवहते नाहे द्विजाद्याः क्रमाद्
वर्णाः स्युर्निगमाहते वसुहते वार्काहते राशयः ॥ ४० ॥

---

१. 'ल्य' क. ख. पाठः.

केवलनाहेऽद्रिहते त्रिघ्ने नाहे च शिष्यते वारः ।
द्विघ्ने वा त्रिघ्ने वा नाहे नृपभाजिते ध्रुवाद्याः स्युः ॥ ४१ ॥

क्षेत्रफले व्यययुक्ते नृपभक्ते वा ध्रुवादयः शिष्टाः ।
ध्रुवधान्यजयविनाशाः खरकान्तमनःप्रसादसुमुखत्वम् ॥ ४२ ॥

सौमुख्यासौम्यत्वे विरोधवित्तोद्भवक्षयाक्रन्दाः ।
वृद्धिजयौ च क्रमशः संज्ञातुल्यं फलं भवेदेषाम् ॥ ४३ ॥

इति मनुष्यालयचन्द्रिकायां मानभेदयो-
न्यायव्ययादिनिर्णयो नाम
तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः ।

स्वाभीष्टालयदीर्घमङ्गणविधिं तेषां पृथङ् नाहतो
योन्यायर्क्षवयोव्ययादि शुभदं सर्वप्रकारादपि ।
सम्पाद्याथ गृहेऽष्टदीर्घगुणविस्तारादिभेदान् पृथग्
दीर्घव्यासमितिं करोतु च यथात्राल्पान्तरालं सुधीः ॥ १ ॥

इष्टाद् दीर्घात् सर्वधान्नां च नाहो
विस्तारोऽस्माद् विस्तृतेः पादमानम् ।
तस्मान्मासूरं च तच्छेषतः स्यात्
स्तम्भः स्तम्भाद् विस्तृतिश्चोत्तराणाम् ॥ २ ॥

---

१. 'वधनघा' ख. पाठः.

तत्तदुत्तरविस्ताराल्लुपानीप्रादिविस्तृतिः ।
उत्तरादेर्घनं तत्तद्विस्तारादेव कल्प्यते ॥ ३ ॥

षड्भस्तादिनिजेष्टदीर्घकरसङ्ख्यानेऽष्टनिघ्ने स्वदिग्-
योन्याढ्ये सति तत्त्रिभाग इह तद्गेहस्य नाहो भवेत् ।
व्यत्यासक्रियया भवेदपि च तद्दीर्घोऽथ नाहेऽर्धिते
दीर्घोने परिशिष्यतेऽत्र विततिः सर्वत्र मर्त्यालये ॥ ४ ॥

स्वाभीष्टदीर्घहस्ते द्विघ्ने सति तत्त्रिभागसंयुक्ते ।
स्वाभीष्टयोनिसङ्ख्याऽन्यंशयुते नाह इति च सम्भवति ॥ ५ ॥

नाहाङ्घ्र्यंशेन दीर्घो वितातिरपि भवेत् तुल्यवेदाश्रगेहे
नाहार्धे नन्दभक्ते वितातिरुदधिभागैश्च दीर्घो विशिष्टैः ।
स स्यात् पादाधिकोऽर्धाधिक इह परिणाहेऽर्धिते दिग्विभक्ते
षड्भिर्दीर्घश्चतुर्भिर्विततिरिति सुरागारयोग्यास्त्रयोऽमी ॥ ६ ॥

पादाधिको मनुजसद्मनि गृह्यते त-
त्रावश्यके समततायतिकोऽपि कैश्चित् ।
अर्धाधिकोऽत्र न हितो मुनिभिः समस्त-
पादोनतापि कथिताखिलराशिनीति ॥ ७ ॥

नाहार्धे द्वादशाद्यैस्त्रिभिरपि च विभक्तेऽथवा षोडशाद्यै-
र्विंशत्याद्यैश्च तत्त्वादिभिरपि मनुयुग्मादिभिर्दन्तसङ्ख्यैः ।
तत्तत्तुर्यप्रहीणैरथ वितातिरुदध्यंशतः शेषभागै-
र्दीर्घो वस्वङ्कपङ्क्त्यादिभिरपि गुणविस्तारमाहुर्मुनीन्द्राः ॥ ८ ॥

नाहार्धे शिवभक्ते वितातिस्त्रिभिरष्टभिश्च दीर्घो वा ।
दीर्घार्धादधिकतरं व्यासं नेच्छन्ति गर्गदक्षाद्याः ॥ ९ ॥

चत्वारोऽत्र तु दिग्गृहाः पृथगथो कोणालयाश्चैवमि-
त्यष्टावेव नृणां गृहा मुनिमताः संस्थानभिन्नास्ततः ।
भिद्यन्ते नवधोत्तरस्य गतिभिर्मानेन नामादिभि-
श्चैतेषां द्वितलादिलक्षणविधौ मानानि तान्येव च ॥ १० ॥

भिन्नाभिन्नवशाद् द्विधैव विदिता शालात्र भिन्ना पृथग्
दिक्स्था स्वाङ्गविशेषपूर्णविभवा कोणालयासम्भवात् ।
अन्तर्बाह्यभवोत्तराभिमिलनादेकीभवेत् कोणगे-
हापर्यन्तलसद्भुजो भवति यत्राभिन्नशालैव सा ॥ ११ ॥

शालास्त्वन्योन्यभिन्ना निजविहितगतिव्यासयोन्यादियुक्ताः
पर्युद्यत्पत्रमानावधिनिहितलसत्पादुकाभिन्नशालाः ।
सर्वार्हास्ता विशेषादवनिसुरहिताः कोणवेश्मप्रहीणा-
स्तत्रापि प्राङ्गणं केतुजमिति विदिता भिन्नशाला विशुद्धाः ॥

मित्रे दक्षिणपश्चिमे पुनरुदक्प्राच्ये च गेहे मिथ-
स्तस्मात् तद्युगलोत्थकोणनिलयः शेषो विधेयोऽपि च ।
अन्यत् कोणयुगं तथैकमथवा न श्लेषयेत् सूतिका-
शूद्राद्यागमनिष्क्रमार्थमुदितो मार्गोऽयमेवात्र तु ॥ १३ ॥

एकद्वित्रिककोणश्लेषवशाच्छिष्टभिन्नशाला स्यात् ।
धरणीदेवहिता साप्यखिलार्हा भिन्नमिश्रभावेन ॥ १४ ॥

दिग्गेहोत्तरपृष्ठसंहितविदिग्गेहोत्तराणि क्रमा-
न्नन्द्यावर्तपदप्रदक्षिणगतीन्यातत्य संयोजयेत् ।
अन्तःस्थोत्तरयोगनाहमिह सर्वत्रापि केतूद्भवं
बाह्यस्थं च तथैव चेदतिशुभं संश्लिष्टभिन्ना त्वियम् ॥

---

१. 'श्मं' क. ग. पाठः.

सर्वत्रापि च कोणगेहपरिणाहाप्त्यै स्वदिग्योनिरे-
वोक्तस्तत्र विदिग्गृहास्तु सकला जन्या भवन्त्येव हि ।
दिक्शालाजनका भवन्ति च ततः केतुर्भवेदीश्वरे
सिंहोऽग्नौ निर्ऋतौ वृषः करिवरो वायौ नृणां धामनि ॥ १६ ॥

एवं संश्लिष्टभिन्नालयविधिवदथाकल्प्य सर्वोत्तराणि
स्वोक्तैर्दिग्योनिभिश्चैव च परिधिमुपादाय कोणालयानाम् ।
दिग्गेहान्तान्तराले पृथगपि च महाद्वारमध्यं विनान्य-
त्रादध्यात् कोणगेहोत्तरमपरिमितिश्लिष्टभिन्नाष्टशाला ॥

कोणगृहोत्तरयोगः सन्धिमृते दिग्गृहोत्तरान्तेषु ।
यत्र स्यात् तत्र भवेद् भिन्नत्वं तद्गृहाश्चतुर्धेति ॥ १८ ॥

दीर्घव्यासाद्यभावे पृथगथ विधिवत् सन्ति कर्मोक्तनीत्या
सन्धायाकोणगेहावधि बहिरुदितान्युत्तराण्यत्र धीमान् ।
आधारीकृत्य पूर्वापरनिलयबहिष्ठोत्तरस्याग्रमूला-
वाधेयत्वेन चान्यद् द्वितयमिति चतुष्कोणसन्धिं विधाय ॥

नाहं केतुजमेवमत्र बहिरप्यन्तश्च कृत्वा विदिग्-
गेहान्तर्विहितोत्तरैर्विरहितं त्वन्तःस्थकोणेष्वपि ।
सन्दध्याद् बहिरुत्तरोक्तवदिदं स्यान्मिश्रभिन्नं चतुः-
शालं दिङ्निलयाः स्वयोनिगतिभिर्युक्ताः समस्ता अपि ॥

कोणेषु सर्वनिलयोत्तरयोगभेदा-
न्मिश्रत्वमत्र तु विदिग्गृहहीनभावान् ।

दिङ्मन्दिराणि निजयोनिगतिप्रभेदै-
र्युक्तान्यमूनि यदतोऽपि च भिन्नतात्र ॥ २१ ॥

पर्यन्तध्वजमादधीत बहिरप्यन्तश्च तत्पत्रमा-
नान्तश्चाङ्गणनाहमप्यथ बहिर्नाहं च दिग्धामसु ।
कोणागारगतोत्तरान्तरुदितं नाहं च केतूद्भवं
युक्त्या तूत्तरविस्तृतिं च जनयेत् संमिश्रभिन्नालये ॥

मानाद् बाह्यान्निजेष्टाद् रहयतु मितिमाभ्यन्तरीं शेषमानात्
कोणाब्ध्यश्रोदरोद्यद्भुजमपि शितधीरष्टनिघ्नं विजह्यात् ।
तच्छेषादुत्तराणामपि जनयतु विष्कम्भमष्टघ्नशतोऽमू-
न्यापर्यन्तायतान्याकलयतु च चतुर्दिक्षु बाह्यान्तराणि ॥

प्राग्वत् प्राङ्गणपत्रमानबहिरन्तर्नाहकोणालयाः
केतूत्था हि दिगालयास्तु निजयोन्याख्याः सगत्यन्विताः।
राजार्हं तदपीह मिश्रकचतुःशालं नृगेहं विदु-
र्दिक्शाला निजयोनिजा यदखिलार्हं तद् द्विजेष्टं न वा ॥

तुल्यातानवितानताङ्गणविधौ गत्या विनान्तर्बहि-
र्योगे तूत्तरपत्रमानपरिणाहोऽप्यस्तु केतूद्भवः ।
केतूत्था अपि दिग्विदिङ्निलयनान्तर्बाह्यनाहाः स्वम-
ध्योद्यद्द्वारपदा भवन्ति च चतुःशालं गृहं भूभुजाम् ॥

क्वचिच्चतुःशालगृहे समस्ते सर्वोत्तराणामपि मध्यसूत्रे ।
नाहो विधेयो यदि तत्तु मध्यप्ररूढमानं भवनं वदन्ति ॥

---

१. 'त्या' क. पाठः,

एकं स्याद् यदि दक्षिणं गृहमुभे चेत् तच्च पाश्चात्यकं
ते सौम्यं च गृहत्रिके गृहचतुष्के प्राच्यमेतानि च ।
वाञ्छन्ति क्वचिदेकमेव भवनं यद्यत्र पाश्चात्यकं
चेष्टं गेहयुगादिनिर्मितिविधौ प्रागुक्तवत् कल्प्यताम् ॥

प्राक्शालारहितं गृहत्रिकमथो सुक्षेत्रमत्यृद्धिदं
चुल्लीदक्षिणमन्दिरेण रहितं तद् वित्तहानिप्रदम् ।
ध्वंसः पश्चिमशालया विरहितं पुत्रक्षयारिप्रदं
सौम्योनं तु हिरण्यनाभमिति[1] तद् वित्तप्रदं सर्वदा ॥

प्राक्पाश्चात्यविहीनके कलहमुद्वेगं च कोचाभिधे[2]
याम्योदग्रहितेऽर्थसिद्धिरुदिता सिद्धार्थकाख्ये द्विके ।
प्रागादिद्वितयोनिते क्रमवशान्मृत्युं भयं विक्रमं
चार्थाप्तिं प्रवदन्त्यतः क्रमवशाद् याम्यादिकं कल्पयेत् ॥

इति मनुष्यालयचन्द्रिकायां गृहाणामिष्टदीर्घपरिणाहदीर्घ-
विस्तारशालाभेदादिनिर्णयो नाम
चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः ।

कुर्याद् गृहाय कृतवास्तुपदं समस्तं
मातङ्गभास्करनृपाङ्गुलमात्रतुङ्गम् ।
बाह्यान्तराङ्गणगतान् गमनाय मध्य-
निम्नत्वदोषविरहाय च मृच्छिलाद्यैः ॥ १ ॥

---

१. 'नाभिरिति' क. ख. पाठः. २. 'कोपाभि' ग. पाठः.

रक्षाशोभोच्छ्रयार्थं सकलनिलयमासूरतोऽधः समन्तात्
कुर्यादेकद्विहस्तप्रविततमुपपीठं गजाद्यङ्गुलाढ्यम् ।
अन्तर्भागे तु गर्ताङ्गणमथ वृषजं केतुजं वायताढ्यं
दिश्यैशान्यामथोदङ्मुखमपि रचयेत् प्राङ्मुखं वाम्बुमार्गम् ॥

गेहाधिष्ठानोच्चतुल्यो रसाद्य-
ष्टाङ्काशांशैरूनितो वा यथेष्टम् ।
मर्त्यागारस्योपपीठोच्छ्रयः स्यात्
तत्तद्भागैः पादुकाद्यं विधेयम् ॥ ३ ॥

गर्तप्राङ्गणतारतोऽधिककृतायामार्धमप्युत्तरे
निक्षिप्यार्धमवाक् च मध्यचतुरश्रेष्टाष्टकोष्ठात्मके ।
मल्लीकुट्टिममापसंज्ञपदयोः कुर्यात् पदे दक्षिणे
यद्वा तत्पुनरापवत्सपदयोश्चोदक्पदेऽन्तर्वृतौ[1] ॥ ४ ॥

केतूत्थं तुल्यतारातितिजलनिधिकोणं च वस्वष्टिकोणं
वृत्तं वा सोपपीठाद्यवयवसहितं कैरवाद्यन्वितं वा ।
गेहाधिष्ठानतुङ्गं कुहचिदपि तदूर्म्यादिरुद्रान्तभागै-
र्हीनं वा रज्जुवेधाद्यपगतमुदितं मल्लिकाकुट्टिमं तत् ॥ ५ ॥

उपपीठोच्चसमोच्चा मासूरोपानहं करोतु दृढम् ।
तदुपरि परितः पादुकमथ कुर्यादुक्तपत्रमानान्ता ॥ ६ ॥

सर्वत्रोत्तरबाह्यपार्श्वविहिताल्लम्बाद् बहिः कुट्टिम-
स्याष्टाष्टाङ्गुलनिष्क्रमो य उदितस्तत् पत्रमानं विदुः ।

---

१. 'न्तर्वितौ' ख. पाठः.

यद्वा तद्विगुणं च तत्त्रिगुणितं वा तद्विधेयं तथै-
वाद्याच्युत्तरयोः षडङ्गुलमदो द्वन्द्वं प्रतीच्यां क्वचित् ॥ ७ ॥

तत्पत्रमानमसमं च समं च बाह्ये-
ऽप्यन्तश्च तद्विहितयोनिकनाहयुक्तम् ।
मर्त्यालयेषु विहितं सुरमन्दिरान्त-
हाराप्रदीपनिलयेषु च गोपुरेषु ॥ ८ ॥

प्राहुर्गेहचतुष्कपादुकबहिर्भागं बुधाः प्राङ्गणं
याम्योदग्विहितायतं च चतुरश्रं केतुयोन्यन्वितम् ।
भूम्यश्वाम्बुधिनागरन्ध्रदिननाथाष्टद्विसङ्ख्याङ्गुलै-
रेकद्वित्रिकरैस्तथैव गुणविस्तारादिभिर्वायतिः ॥ ९ ॥

सूत्रैः प्राङ्गणगेहमध्यविहितैरन्योन्यविद्धैर्भवेत्
तद्गेहस्थितपुत्रपौत्रविलयस्तस्माद् गृहाणां क्रमात् ।
कर्तव्यं गमनं प्रदक्षिणतया प्रागादितो वह्नि-
न्ध्राद्रीष्वङ्गुलकैः स्वयोनिजनकैरावश्यके वा यवैः ॥

गत्यङ्गुलानि निजदिग्विहितानि यानि
तान्यष्टतद्विगुणितत्रिगुणाङ्गुलैश्च ।
युक्तानि तद्विगुचितानि भवन्ति यत् त-
दल्पान्तरालनिलयादिषु तानि युञ्ज्यात् ॥ ११ ॥

दिक्कोणालयभेदकृन्ति च भवन्त्यष्टान्तरालानि तद्-
बाहुल्यं तु धनक्षयाय हि भवेदत्यल्पता व्याधये ।
मृत्युर्भित्तिविरोधनेऽन्तरविहीनत्वादतः प्रायशो
नेष्टं गेहरसांशतोऽधिकतरं द्वित्र्यङ्गुलोच्चोनितम् ॥ १२ ॥

नृणां धामनि पादमानमुदितं स्वस्वोत्तरोपानहो-
र्मध्यं साङ्घ्रिकरत्रिकोन्मितमिदं त्वल्पालये दृश्यते।
गेहव्याससमं तदर्धसहितं व्यासाब्धिषट्सप्तव-
स्वङ्काशांशयुतं च तैर्विरहितं चैवं मुनीन्द्रा जगुः॥ १३॥

भक्तेऽस्मिन् पादमाने गुणचतुरिषुषट्सप्तनागाङ्कदिग्भि-
स्तेष्वेकांशो भवेत् कुट्टिममपि च तथेध्मांशिते वा रसांशः।
नन्दद्वन्द्वैः शरांशो दिनकरयुगभक्तेऽद्रिभागो मुनीन्द्रै-
र्द्व्यंशं तिथ्यंशिते स्याज्जलधिपरिमितो विश्वभक्तेऽप चैवम्॥

मासूरमानानि चतुर्दशैवं भवन्ति तेभ्यः पृथगूनिताश्चेत्।
रसाद्रिनागाङ्कदशेशभागाश्चतुर्युताशीतिमितानि सन्ति॥ १५॥

इष्टाधिष्ठानमाने नवभिरथ विभक्ते त्रिभिः पादुकोच्चं
षड्भिः कुर्याज्जगत्युच्छ्रयमथ नयनाद्यंशकैर्वा क्रमेण।
द्वेधैवं मञ्चकं स्यात् प्रतिगलरहितं सर्वतः पादुकस्य
स्वोच्चाङ्घ्र्यूनार्धवद्वयंशत इह शरभक्ते त्रिभिर्निष्क्रमो वा॥

रसांशिते वाञ्छितकुट्टिमोच्चे प्रकल्पयेत् पादुकमेकतोऽथ।
त्रिभिर्जगत्युच्छ्रयमेकतस्तद्गलं प्रतिं तद्वदिहैकतोऽपि॥ १७॥

सायकांशिनि तु कुट्टिमोच्छ्रये पादुकोच्छ्रयमिहैकभागतः।
द्वयंशतोऽथ जगतीं गलं प्रतिं चैकतो विरचयेदथेति वा॥

देवेन्द्रांशिनि कुट्टिमे द्वितयतः सम्पादयेत् पादुकं
षड्भागैर्जगतीगलाङ्गमिलया कुर्यादधो वाजनम्।
अश्विभ्यां गलमूर्ध्ववाजनमवन्यंशेन नेत्रांशतः
प्रत्युच्चं गलमञ्चकाभिधमिदं सद्वाजनं भूतिकृत्॥ १९॥

---

१. 'मञ्चका' ख. पाठः.

एवं त्रिधोक्तं गलमञ्चकाख्यं प्रतिर्जगत्या समनिष्कमैव ।
तेषां गलान्तर्गमनं गलोत्सेधाङ्घ्र्यंशतः स्याद् गलमञ्चकानाम्
कृत्वाधिष्ठानमेवं दृढतरमथ तच्छेषितं पादमानं
विद्यादङ्घ्र्युच्चमस्मिन्नृतुतुरगभुजङ्गाङ्कपङ्क्तीशभक्ते ।
एकांशेनान्वितं वा विरहितमथवेतीप्सितात्ताङ्घ्रिदीर्घा-
दोमासंज्ञाङ्घ्रिपीठोच्चयमपनयता पोतिकाया घनं च॥२१॥

विन्यस्येत् पादपीठं सुदृढतरशिलासारदारुप्रकृप्तं
मासूरोपर्यथाब्ध्यश्रकवसुनृपकोणं क्वचिद् वर्तुलं वा ।
स्तम्भाधोभागकर्णोन्मितविततदर्धोच्छ्रयं वा तदङ्घ्र्य-
ग्न्यर्धांशोनं च पद्मोपममपि कुहचिद् वाजनाद्यन्वितं च॥

स्तम्भाः स्वविस्तारहुताशभागप्रकृप्तमूलाग्रशिखासमेताः ।
स्थाप्या यथार्हं निजपीठिकोर्ध्वं तद्गर्तसंलग्नशिखाः समस्ताः॥

स्तम्भोच्चाब्धीषुषड्भूधरवसुनवदिग्रुद्रभागैकतः स्यात्
स्तम्भाधोविस्तृतिस्तद्वसुनवदशरुद्रांशहीनोग्रतारः ।
दण्डोप्यश्वायमेतेन च कुहचिदथो मीयते दारुकृप्तौ
कुड्यस्तम्भाग्रतारोऽप्यथ तदवयवाकल्पने दण्डसंज्ञः॥

स्तम्भास्तन्मूलतारश्रुतिमितचतुरश्रोर्ध्वभागाः समस्ता
मूलेऽध्यर्धाग्निवेदाशुगरसतातिकर्णोन्मिताब्ध्यश्ररूपाः ।
मध्ये व्यासश्रुतिघ्नोन्मितकृतचतुरश्रास्तदूर्ध्वाधरोद्यद्-
वस्वश्राः सर्वतो वर्तुलनृपवसुकोणाश्च यद्वा विधेयाः॥ २५॥

---

१. 'पत्यथा' ख. ग. पाठः. २. 'ण्डाख्यश्चा' क. पाठः. ३. 'वा स' ख. ग. पाठः.

वृत्तादयस्ते चरणास्त्रयोऽमी मध्यादधस्ताच्चतुरश्रका वा ।
यद्वा वितानश्रवणोपकृप्ततुर्यश्रमूलाश्च तथा विधेयाः ॥ २६ ॥

अत्युच्चेऽङ्घ्रौ तु तत्तत्यधिचरणदलद्विघ्नविस्तारमासू-
रोच्चोच्चाध्यर्धतुङ्गं रचयतु चरणं कुत्रचिन्मध्यतोऽधः ।
कुर्यादेवं शिलाभिः प्रणिगदितसुधाभेदसंमेलिताभि-
र्यद्वा सारेष्टकाभिः क्वचिदखिलसमुत्सेधमर्धोच्छ्रयं वा ॥

एकं वाजनमुत्तरस्य यदि तत् स्तम्भान्तराब्ध्यश्रकं
नेष्टं संमतमल्पवाजनयुते पत्रान्विते चोत्तरे ।
स्तम्भा मौक्तिकदामशुण्डवलयाद्याढ्यास्तथेष्टास्तयो-
र्गेहाङ्गं च समस्तमुत्तरवशादूर्ध्वाधरस्थं भवेत् ॥ २८ ॥

स्तम्भाग्रोत्तरतारयोगदलविस्तारं तथा स्तम्भम-
ध्योद्यद्व्यासततां च तद्दलघनां रूपोत्तरे पोतिकाम् ।
स्तम्भाग्रोदितदण्डवद्भयुदधिबाणायामिनीं वोत्तर-
व्यासत्रिघ्नसमायतां कलयतु स्तम्भे लसद्वाजनाम् ॥ २९ ॥

पत्रोत्तरे चेद् वितताङ्घ्रिहीनतीव्रा विधेया खलु पोतिकेयम् ।
खण्डोत्तरे तुल्यवितानतीव्रा सर्वाश्च सर्वेषु यथोपशोभम् ॥ ३० ॥

स्तम्भाधस्तारभेदप्रकथनविधिनैवोत्तराणां च तारं
स्वाभीष्टं कल्पयेद् वा वसुवसुयुगलार्कोर्मिसङ्ख्याङ्गुलैर्वा ।
श्रेष्ठं खण्डोत्तरं तद्वितातिसमघनं मध्यमं पत्रसंज्ञं
पादोनोच्चं कनिष्ठं वितातिदलघनं तत्तु रूपोत्तराख्यम् ॥

---

१. 'ण्डु' क. ख. पाठः.

उत्तरविस्तारघने व्यत्यस्यापि प्रकल्पयेत् क्वापि ।
तत्र तु चूलीति मता तस्यामेवार्पयेत लुपाः ॥ ३२ ॥

एक एव यदि वाजनं भवत्युत्तरस्य शरभाजिते घने ।
उच्चमंशयुगलेन निष्क्रमोऽप्यस्य पट्टमवशिष्टभागतः ॥ ३३ ॥

अल्पवाजनयुतोत्तरे घने नागभागिनि महत्[1] त्रिभागतः ।
एकतोऽल्पमुभयोश्च निष्क्रमः स्वोच्चतो भवति पट्टमब्धिभिः ॥

बाणांशिन्यखिलोत्तरस्य तु घने द्वाभ्यां महद् वाजनं
चैकेनाल्पमथातनोतु महितं पट्टं च शिष्टांशतः ।
अब्ध्यादीश्वरपश्चिमांशिनि घने सर्वोत्तरस्यैकतो
युक्त्या वाजनयोश्च निष्क्रममथान्यत्रापि चैवं विधिः ॥

स्तम्भमूर्धनि निधाय पोतिकामुत्तरं तदुपरि प्रकल्पयेत् ।
पोतिकाविवरतः समुद्गतस्तम्भमस्तकशिखाहितावटम् ॥ ३६ ॥

अथोत्तरोच्चोच्चतदर्धतारां क्षुद्रोत्तराख्योत्तरपट्टिकां च ।
सङ्कीलयेदुत्तरबाह्यपश्चादूर्ध्वं दृढैः स्वोचितदारुकीलैः ॥ ३७ ॥

कीलास्ते कूटसूत्रेष्वखिलनिलयमध्येऽपि च द्वारमध्ये
कर्तव्यास्ते समस्ता यवमितगतिभिः सूत्रतोऽतीतमध्याः ।
युक्त्या पङ्क्तिं लुपानां सममपि परिकल्प्याथ मध्ये च तासां
कार्याः कीलास्त्वयुग्माः खलु सकललुपायुग्मसङ्ख्या विधेयाः ॥

एकाङ्घ्र्यूनादिदण्डोच्छ्रयमुपरि निधायोत्तरे वाजनं प्राक्
तिर्यग्दण्डोच्छ्रयाङ्घ्र्यूनितबहलतुलास्तासु वंशानुवृत्त्या ।

---

१. 'हे त्रि' ग. पाठः. २. 'त' क. पाठः.

स्वार्धाक्रान्ता जयन्ती तदुपरि सुसमीकृत्य कृत्वानुवंशं
निश्छिद्रं छादयेत् स्वोचितघनफलकाप्रस्तरेणोर्ध्वभागम् ॥

यद्वा कपोतवलभीविलसत्तुलोलु-
पोद्यत्पिधानफलकादितुलाविशेषैः ।
युक्तं च खण्डफलकादिविचित्राचित्र-
मूर्तिप्रभेदसहितं महितं विदध्यात् ॥ ४० ॥

इति मनुष्यालयचन्द्रिकायां
पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

अल्पे धामनि बाह्यमेव महति त्वारूढमप्युत्तरं
विष्कम्भे तनुयात् स्वगेहविहितैर्योन्यादिभिः संयुतम् ।
वस्वृष्यर्कयुगाङ्गुलादिगतिरन्तः स्यादलिन्दं तु तत्
तावत् स्वोच्छ्रयमस्य कर्णसदृशी विष्कम्भपादायतिः ॥ १ ॥

विष्कम्भपादं तु तदङ्गभेदैर्युक्तं तथा कल्पलतादिचित्रैः ।
महातरङ्गान्तरुदीर्णचूचुक(प्र ?)सूनसंशोभितमातनोतु ॥ २ ॥

कुर्यादुत्तरपट्टतोऽखिललुपालम्बं तदौचित्यतः
स्तम्भोच्चे शरभाजिते द्वितयतो यद्वाङ्कभक्तेऽब्धिभिः ।
अद्र्यंशिन्युरगांशिते च हुतभुग्भागैस्तथाङ्घ्र्युच्छ्रय-
त्र्यंशार्धांशत एव वाभिलषितं षोढोदितेष्वेषु तु ॥ ३ ॥

लम्बोऽयं विहितादधस्थचरणोच्चेऽङ्गादिरुद्रान्तिमै-
र्भक्ते तेष्विलया युतो विरहितो वाङ्ग्युच्चविध्यध्वना ।
यद्वा चन्द्रदिगग्निवारिधिशरोर्म्यद्रयङ्गुलैरूनितो
लम्बोऽसौ क्वचिदन्वितोऽप्युभयतस्तुल्योऽप्यतुल्योऽथवा ॥

विस्तारेण घनेन वापि च लुपालम्बो भवेदुत्तर-
स्यैकेनाधिदलद्वयत्रयचतुर्बाणोर्मिशैलोन्मितैः ।
योगे सत्यपरालयैरपि लुपाच्छेद्याश्च नीप्रादयो
गेहाङ्गेष्वखिलेषु चोत्तममतो नच्छेदयेदुत्तरम् ॥ ५ ॥

ऋजुमञ्चाख्यास्तुल्याः प्रकृतिलुपाः पार्श्वसंस्थिताः सर्वाः ।
कोट्युपकोट्याद्याः स्युर्विकृतिलुपास्तास्त्वतुल्यदीर्घतताः ॥

कार्या लुपाश्चोत्तरपट्टिकोर्ध्वं कूटाहिताग्रा विकृताः समस्ताः ।
पार्श्वाहितास्ताः खलु निर्विकारा निवेशिताग्राः पुनरग्रधान्याम्[२] ॥

पार्श्वप्राप्तलुपाग्रयोगवशतो वंशाख्यया साग्रया
युक्त्वा चोत्तरतारपादरहितव्यासोच्छ्रयं चाथवा ।
अद्र्यूर्म्यङ्गुलतारतीव्रसहिता पत्रैर्लुपातीव्रव-
ह्रयब्ध्यंशप्रमितैर्लुपापदगतैर्युक्ता लसद्वाजना ॥ ८ ॥

कूटः कोटिलुपाग्रकल्पिताशिखासम्प्राप्तपार्श्वावटः
पार्श्वाक्रान्तलुपाग्ररन्ध्रनिहितायःकीलसङ्कीलितः ।
आधारोऽस्य लुपाग्रकल्पिताशिखा तस्मादधो मूल ए-
वोक्तोऽसौ विकृता लुपाश्च सकला गेहे समाब्ध्यश्रके ॥

---

१. 'दस्थितो' ख. पाठः. २. 'ग्रच' क. ख. पाठः.

धुर्धूरप्रसवोपमोऽष्टनृपकोणो वा तथा वर्तुलः
सम्फुल्लाब्जयुतोऽथवाथ गुलिकारूपः स्वमध्यादधः ।
विस्तारद्विगुणायतस्तदुरगाद्यंशोनदीर्घोऽथवा
कूटोऽब्ध्यादियवोत्थपत्रविलसन्मध्यप्रदेशो भवेत् ॥१०॥

प्रायः सर्वलुपाघनोन्मितपरीणाहं करोतूत्तर-
व्यासप्रायततं तथाङ्गुलकृतैर्योन्यादिभिः संयुतम् ।
पट्टं कोटिलुपावितानसदृशायामं लुपासङ्गम-
स्थानं पत्रपदोर्ध्वमित्थमुदितं कूटस्वरूपादिकम् ॥ ११ ॥

आयतचतुरश्रगृहे विकृतिलुपा वंशबद्धकूटगताः ।
वंशस्थाग्रास्त्वन्याः प्रकृतिलुपाः कीलिता ह्ययःकीलैः ॥ १२ ॥

वंशाग्रमूलशिखया यदि कूटपार्श्व-
रन्ध्रप्रवेशकृतसन्धिरिहाजयुद्धः ।
आधारभेदकृतसन्धिवशेन कूट-
स्याधोगतं भवति मूलमिहापि नित्यम् ॥ १३ ॥

मुखसहितायतभवने मुखपर्यन्तायतो भवेद् वंशः ।
गेहवदेव मुखानामुत्तरमूलाग्रयोगविधिनियमः ॥ १४ ॥

मूलप्रदेशविलसत्कबलीसुलग्न-
वंशाग्रमूलपरिकीलितदारुकीलः ।
वंशावलम्बितवशादयमूर्ध्वमूलः
कूटो यथोर्ध्वमवलम्बितबालकूटः ॥ १५ ॥

सर्वत्रेष्टाब्ध्यश्रे तिर्यगधः कल्पितात्र रेखा या ।
सा हि भुजाधोर्ध्वाग्रा कोटिः स्यात् कोणगामिनी कर्णः ॥

सुश्लक्ष्णे फलकातले क्षितितले वा गेहतारार्धमा-
नाब्ध्यश्रं तदधोभुजापरिमिलत्क्षुद्रोत्तरोच्चोन्मितम् ।
तस्याधो घनमुत्तरस्य च लुपालम्बं च तिर्यग्गतैः
सूत्रैः कल्पयतूत्तरोपरि लुपापङ्क्तिं च युक्त्या ततः ॥ १७ ॥

सङ्ख्याः कोट्युपकोटिकादिविकृतानां या लुपानां तत-
स्ताः सङ्ख्या द्विगुणैकसङ्ख्यरहिताः कल्प्यास्तु सर्वत्र च ।
द्वे द्वे कोट्युपकोटिकादिविकृतानामन्तराले पृथक्
तत्रैका गृहतारमध्यनिकटेऽप्येवं विभागो मतः ॥ १८ ॥

इति विकृतिलुपानां पङ्क्तिमाकल्प्य तत्त-
न्मितिनियमकृताङ्को यत्तदाक्रान्तकर्णम् ।
नियतकृतलुपालम्बादथाकूटपार्श्वं
भवति पृथगमीषां दीर्घमानं लुपानाम् ॥ १९ ॥

सर्वत्रोत्तरतारतुल्यमृजुमञ्चानां लुपानां ततं
तद्वस्वद्रिरसाशुगाब्ध्यनलभागैकोनितं वान्वितम् ।
द्विघ्नं चोत्तरतारतोऽङ्घ्रिरहितद्विघ्नं च सार्धं पुनः
कार्यं तद्वनमङ्गुलेन यववृद्ध्या यावद्दत्वङ्गुलम् ॥ २० ॥

अब्ध्यश्रं मञ्चकस्य प्रततिमितमथाकल्प्य तत्कर्णमर्धी-
कृत्य न्यस्येद् भुजायामथ विकृतिलुपापङ्क्तिमत्रैव कुर्यात् ।
तत्तत्कर्णप्रमाणं खलु विकृतिलुपानां पृथग् विस्तृतिः स्यात्
पार्श्वे कार्यं ध्वजादित्रयमपि च वितानं च लम्बं च सूत्रम् ॥

व्यासेऽङ्कांशिन्यधोऽब्धिप्रमितमुपरि बाणोन्मितं कल्पयित्वा
मध्ये सूत्रध्वजाख्यं विरचयतु लुपापार्श्वयुग्मे समन्तात् ।

अद्र्यंशिन्यप्यधस्तादनलमितमुदध्युन्मितं चोर्ध्वभागं
यद्वा बाणांशितेऽग्निप्रमितमुपरि दस्रोन्मितं चाप्यधस्तात्॥
ध्वजसूत्रस्योभयतो द्व्यङ्गुलमानेन कल्पयेत् सूत्रम्।
तदधस्तादप्यूर्ध्वं तत्तद्विस्तारमाननियमः स्यात् ॥ २३ ॥
कृत्वा वेदाङ्गुलाब्ध्यश्रकमखिललुपापार्श्वयोर्मध्यसूत्रे
तद्वेदाश्रोत्थकर्णद्वितयमिह वितानं च लम्बं च विद्यात
सर्वत्रैतद् विधेयं द्वयमपि वलयस्थानकूटावसान-
स्थानेष्वप्युत्तराद्यर्पणनियमपदे नीप्रलम्बान्ततोऽपि॥ २४

इति मनुष्यालयचन्द्रिकायां
षष्ठोऽध्यायः।

अथ सप्तमोऽध्यायः।

चूली वा क्वचिदल्पमन्दिरविधौ तत्रापि युग्माः स्मृता
विष्कम्भाश्च तदर्धसम्मिततदङ्घ्र्यग्रेषु वंशोऽपि च।
तस्मादङ्घ्रिसमुच्छ्रयात् त्यजतु वा क्वाप्यद्रिनागाङ्कदिग्-
रुद्रांशं त्विह चूलिकोपरि लुपाश्च स्वाग्रधान्याचिताः॥ १ ॥
विस्तारे पुनरुत्तरस्य दशधा भक्ते रसाद्यष्टदिग्-
भागैर्वोत्तरतारतोऽङ्घ्रिरहितं वाद्र्यंशितेऽन्यांशकैः।
विस्तारं प्रकरोतु नीप्रफलकस्यैतत्त्रिभागं घनं
विस्तारे शरभाजितेऽपि च घनं द्वाभ्यां प्रकुर्यात् क्वचित्॥
नीप्रव्यासे शरांशिन्यथ तदुभयतस्तूर्ध्वपट्टं तलं च
द्वाभ्यामेकेन पट्टं चरममपि विधेयं तथा षड्विभक्ते।

द्वाभ्यां तस्योर्ध्वपट्टं त्रिभिरपि च तलं स्यादधः पट्टमेके-
नैवं वा नागभक्ते ज्वलननिगमभूम्यंशतः कल्पनीयाः ॥
नीप्रव्यासे विभक्ते शरागिरिनवभिः सर्वतो वह्निभागं
नीप्रस्थानाद् वितानादुपरि तदुचितं कोटिकर्णाध्वनात्र ।
नीत्वा नीप्रं लुपासु स्वयमिह विधिना धूलिकारोधयोग्यं
कृत्वा वायव्यहोमाद्यवहितहृदयः कारुभिः कल्पयेत् तत् ॥
मनुयवचतुरश्रं द्यङ्गुलं तत्र तु द्वि-
द्वययवपरिवृद्ध्या त्र्यङ्गुलान्तं क्रमेण ।
वलयमिति मुनीन्द्रैः षड्विधं दर्शितं ते-
ष्विह विहितलुपौचित्येन तत् कल्पनीयम् ॥ ५ ॥
तत्र सप्तदशभिर्यवैः स्मृता पट्टिकावितातिरङ्गसम्मितैः ।
तद्घनं घनपदोनमन्तरं सन्दधीत च लुपासु कीलकैः ॥ ६ ॥
लोष्टैराच्छाद्यते चेदखिलनिलयने पट्टिकाप्रस्तरः स्यात्
तत्स्थाने क्वापि कार्योऽपि च घनफलकाप्रस्तरो[1] बद्धकीलः ।
लोष्टाधाराय किञ्चित् तलमपि च खनेच्चञ्चुसन्धारणार्थं
ताम्रैराच्छाद्यते चेन्न तु तलरचना देवगेहादिकेषु ॥ ७ ॥
शिरःप्रदेशस्त्वभिधानमुक्तं वेश्माख्यपुंसस्तदधोमुखं स्यात् ।
मासूरतुङ्गार्धपदोनितं तद्विस्तारमाद्यङ्घनाद् घनं च ॥ ८ ॥
द्वाराण्यङ्गणगेहमध्यसिरयोर्मध्यस्थमध्यान्यथो
कुर्यादङ्गुलकल्पितागमवयोयोनीनि पूर्वादितः ।

---

१. 'रे' ख. पाठः.

योगावुत्तरतारतुल्यविततौ विस्तारतुल्याङ्किव-
द्वयधीशोनघनौ भुवङ्गमपतङ्गाढ्यौ लसद्वाजनौ ॥ ९ ॥

योगादङ्घ्र्यग्निभागाधिकघनयुतनिर्वाजनाधः पटी स्या-
दूर्ध्वस्थाने तु तुल्योत्तरमिलितनिजाग्रौ च योगौ विधेयौ ।
योगान्तर्भागनाहो निजदिगुचितयोन्यायवृद्ध्यादियुक्त-
स्वेष्टायामोननाहार्धत इह विततिः स्याद् गुणव्यासतो वा ॥
द्वारोर्ध्वपट्ट्यूर्ध्वमथो गणेशपद्मालयायादवमूर्तिभेदान् ।
यथेष्टमापाद्य विचित्रपत्रिप्रभेदयुक्तां फलकां विदध्यात् ॥ ११ ॥

कुड्ये भूयिष्ठविस्तारिणि दिवसकरैर्भाजितेऽन्तर्बहिश्चा-
प्यद्रीष्वंशान् विधायान्तरविहितसिरालग्नमध्यौ च योगौ ।
कृत्वा काप्येतयोर्मूर्धनि सुदृढतरामूर्ध्वपट्टीं तदूर्ध्वं
भित्त्यङ्गादीनि कुर्याद् दृढतरशिलया मृत्सुधायोगभेदैः ॥
अन्तर्नाहजमन्दिरे घनतरे कार्ये च कुड्ये क्वचिद्
गेहप्राङ्गणपादुकावधि करोतु स्वांशकुड्यं घनम् ।
तत्तत्प्राङ्गणगेहसूत्रमनुसृत्यैवेष्टकुड्यप्रथा-
निष्ठं पृष्ठत एव नेयमुदितद्वारोत्तरादीनि च ॥ १३ ॥

कवाटयुग्मं निजतीव्रयुक्तद्वारप्रथार्धप्रततं विधेयम् ।
मात्राङ्गुलैर्नेत्रहुताशसङ्ख्यैः सार्धैश्च यद्वाब्धिमितैर्घनं च ॥
ऊर्ध्वाधरभ्रमणकार्गलसन्धिपाल-
प्रक्षेपणीयवलयान्यपि पत्रकाणि ।
तिर्यञ्च्युदञ्चि पुलकार्तवकुड्मलानि
सश्रीमुखेन्दुशकलानि कवाटयोः स्युः ॥ १५ ॥

द्वारव्यासाब्धिबाणोर्म्यवनिधरभुजङ्गांशितैकांशतीव्र-
व्यासा व्यासार्धपादोनितबहलमिता द्वारतुल्यायतिश्च ।
कर्तव्या सूत्रपट्टी ज्वलनशरमहीध्रादिकौजस्तनाढ्या
मुक्तादामादिपद्मस्थितमहितरमाकृष्णविघ्नेशयुक्ता ॥

माता वामगता कवाटफलका सा सूत्रपट्टयाश्रया
पुत्री दक्षिणगामिनीति सकलद्वारेषु सम्प्रेक्ष्यताम् ।
द्वारोच्चानलवेदबाणरसभागोच्चां तदुच्चाब्धिबा-
णोर्म्यंशघनप्रतानसहितामाकल्पयेतारमाम् ॥ १७ ॥

द्वारव्यासपयोधिबाणरससप्तादंशकात्तायतं
कुर्यादर्गलमायतोर्मिगिरिमातङ्गांशतारान्वितम् ।
विस्तारार्धघनं घनोन्मितलसत्खण्डद्वयं चारमा-
मूलाग्रान्तिकसम्प्रकल्पितकबलीसम्प्राप्तखण्डान्तरम् ॥

अधोर्गलं मातृकवाटसंस्थं पुत्रीगतं चार्गलमूर्ध्वसङ्गि ।
अथारमामध्यमतीत्य मध्यात् सुकीलयेताथ कवाटपृष्ठे ॥

एकजातितरुभिः प्रकल्पितं द्वारपादफलकादिकं शुभम् ।
अन्यथा यदि वधूकुशीलता सम्भवेदिति वदन्ति केचन ॥

एकं कवाटं यदि वामभागे मध्यादधो वोपरि वारमा स्यात् ।
तदर्गलं वर्तुलमष्टकोणं वेदाश्रकं वा दृढशृङ्खला वा ॥ २१ ॥

आशाभास्करसूत्रभेदिनि गृहे पृष्ठेऽथवा सप्तमे
सूत्रे द्वारमथापरं क्रमवशात् पृष्ठे निजेष्टं पुनः ।

---

१. 'जि' ग. पाठः.

सव्यार्धे भवनस्य कार्यमुचितयौन्यौदिभिः संयुतं
चैकैवेच्छति चेत् कवाटफलका वामे भवेन्निष्क्रमे ॥ २२ ॥
कुर्यात् प्राङ्गणतो गमागमकृते द्वारं महत् पादुके
तद्वाह्ये पथि पादुकोपरि गतं त्यक्त्वा मसूरोच्छ्रयम् ।
मार्गव्यासचतुर्गुणेन परिधिः स्वाभीष्टयोनिर्यथा
तद्व्यासं तु तथा करोतु च विदिग्धामास्ति चेत् कुट्टिमम् ॥
दण्डात् प्राङ्गणमध्यतोऽब्धिशरषट्सप्तादिसङ्ख्यान् व्यती-
त्यादध्यादथ पौष्पदन्तिकपदे द्वारं प्रचारोदितम् ।
भल्लाटेन्द्रगृहक्षतेष्वपि महाद्वाराण्युपद्वारका-
ण्यष्टाप्युन्नतभूतले द्वितलतद्वक्त्रादियुक्तानि वा ॥ २४ ॥
पर्जन्यकेऽष्ठे च भृशे च पूष्णि भृङ्गेऽपि च द्वारपशोषयोश्च ।
नागेऽप्यदित्युक्तपदेऽपि चेच्छन्त्यष्टेत्युपद्वारगृहाणि नृणाम् ॥
स्तम्भाधस्तारतो वोच्छ्रयरसतुरगोऽष्टांशतो वा प्रतेर-
प्युत्सेधेनात्र सार्धावनियुगलहुताशोन्मितैश्चात्र वेदी ।
कर्तव्या कुट्टिमोर्ध्वं तदुपरि चरणैर्युग्मसङ्ख्यैश्च दारु-
स्तम्भार्धाङ्घ्र्यूनतुल्यप्रततिभिरभितः स्वोत्तराद्यैश्च भित्तिम् ॥
पत्रमानवशतोऽङ्गुलवृद्ध्या वेदिकाविहितनिष्क्रमणं स्यात् ।
सार्धयुग्मदहनादिमितैस्तैरङ्गुलैर्विहितमुत्तरलम्बात् ॥ २७ ॥
स्वद्रव्यैरेव वेदीरिह कतिचिदुशन्तीष्टकामृच्छिलाद्यै-
र्वृक्षैर्वा भिन्नजात्यैरपि च विरचितं दृश्यते सर्वगेहे ।
अन्तर्नाहेन योन्यन्वितभवनविधौ गर्भगेहोक्तनीत्या
द्वारं तत्पादुकोर्ध्वं न्यसतु पुनरधस्तात् प्रतेर्गर्तगेहे ॥

युग्मास्तुलाः स्तम्भलुपादधः स्युः
सर्वास्त्वयुग्माः खलु पङ्क्तयस्ताः ।
नृगेहनिर्दिष्टकराधिकाश्चेद्
विनाशदास्ताः खलु पङ्क्तयः स्युः ॥ २९ ॥

प्राचीनेऽग्निसमर्चनादिकमुदीचीने कुटुम्बादिकं
व्यत्यस्य प्रकरोतु वा द्वयमिदं याम्येऽतिथिप्रीणनम् ।
पाश्चात्त्ये धनसन्निधापनमदो द्वन्द्वं विपर्यस्य वा
शेषार्धे तु तयोस्तथा शयनविद्याभ्यासनाद्यं चरेत् ॥

कृत्वा दिङ्नवनागवर्गपदभिन्ने क्षेत्रकेऽन्तर्गतै-
रष्टयङ्काब्धिमितैर्विधातृपदयुक्तं प्राङ्मणं मध्यत ।
शालाः पङ्क्तियुगार्यकादिकजुषस्तद्बाह्यतस्तद्बहि-
र्गोष्ठोलूखलवेश्मकादिविलसत्पङ्क्त्यावृतं कल्पयेत् ॥३१॥

कार्तान्त्यां खलसद्म धान्यभवनं तत्रापि वा नैर्ऋते
कुर्वीताथ धनालयं धनपतौ प्राच्यां तथापांपतौ ।
सिंहे वालितुलाकुलीरभवने धान्यालयोक्तेषु वा
धान्यागारविधिर्धनोदितपदे कुत्रापि चावश्यके ॥ ३२ ॥

गोशालेन्द्रजलेशयोर्वितथपूषाभ्यन्तराले मता
पर्जन्यैन्द्रिपदे तथा कुसुमदन्तद्वारपालान्तरे ।
भृङ्गे शोषपदेऽथवात्र महिषागारं यमेऽप्युक्षशा-
लास्मिन् क्वाप्यथवास्तु मर्मविलसच्छूलं समस्तं त्यजेत् ॥

---

१. 'यः' क. पाठः.

क्षेत्रस्य कोणगतरज्जुमतीत्य यानं
नेच्छन्ति केचन गवामखिलेषु दिक्षु ।
मुख्यं वृषं न मृगराट्करणेषु सिंह-
व्याघ्रौ स्थिरं च करणं शुनि गर्दभाद्याः ॥ ३४ ॥

पर्जन्ये पचनालयं शिखिनि वा मेषे वृषे वानिले
तत्रैवापि च भुक्तिसद्म मकरे चापांपतौ चेष्यते ।
कुम्भे सौख्यगृहं तथैव मकरे वायौ तदावश्यके
कर्तव्यं वृषमेषयोरिदमथो वायौ तथोलूखलम् ॥ ३५ ॥

मीने कूपमतीव मुख्यमुदितं सर्वार्थपुष्टिप्रदं
मेषे चापि घटे च भूतिकृदिदं नक्रे वृषेऽर्थप्रदम् ।
आपे कूपमथापवत्सकपदे मुख्यं तथैवेन्द्रजि-
त्कोष्ठे दृष्टमपांपतौ तु शुभदं नारीक्षयं मारुते ॥ ३६ ॥

कूपं शोभनमन्तरिक्षपदकेऽप्येवं तटाकं हितं
माहेन्द्रे च महीधरे च वरुणे सोमे शिवे मेषभे ।
वायौ वा निर्ऋतौ च दृष्टमथवा स्नानादिपानादिषु
प्रायो नैकजलं(हितं ?) नदीजलमृतेऽत्रान्यत् पृथक् कल्पयेत् ॥

आग्नेय्यां भवनस्य कूपखननं पूर्वं कृतं वा तथा
वापी दाहभयादिकं प्रकुरुते तद्वत् फलं दक्षिणे ।
ग्रामादेरपि दीर्घिकादि कतिचिन्नेच्छन्ति याम्ये तथै-
वारामो गृहसन्निधौ फणभृतां वासोऽपि नैवेष्यते ॥ ३८ ॥

राज्ञां धामनि भूसुरस्थितिगृहं नित्यार्चनायाङ्गणे
शर्वेन्द्राग्निजलेशदिक्षु कुलदैवार्चाप्रतिष्ठादि च ।
प्रासादादिविधानमीशसुरनाथाग्न्यन्तकाशागतं
केतूत्थं वृषजं करोतु च निर्ऋत्यादौ क्रमाच्छ्रेयसे ॥ ३९ ॥

सेवितकुलदैवतधामेशनिर्ऋत्यादिके तु वृषजं स्यात् ।
गृहपुरपत्तननगरग्रामादावभिमुखा भवन्ति तदा ॥ ४० ॥

निरङ्गसाङ्गादिविभिन्नगेहप्रतिष्ठिता याः प्रतिमास्तु तासाम् ।
चलाचलत्वोभयभेदतस्तत्क्रियावशाच्चापि भवेद् विशेषः ॥

सौख्यार्थं धरणीभृतां मणिगृहं मित्रे विहारोऽनिले
व्यायामोऽर्गलके तथैव निर्ऋतौ स्नानादि पर्जन्यके ।
इन्द्रे तोयपतौ च भुक्तिनिलयं नृत्तादि गान्धर्वके
शस्त्राद्यं निर्ऋतौ गृहक्षतपदे प्राच्ये च शय्यागृहम् ॥ ४२ ॥

दण्डान्तं समतीत्य वप्रमुदितं मृद्भिः शिलाद्यैस्तथा
श्रेष्ठं तत् परिखा तु मध्यममते शाखावृतिश्चाधमम् ।
तत्पानादिषु कण्टकिद्रुमलता ग्राह्याश्च वेण्वादयः
कुर्याद् द्रव्यवशादिहैकमुदितान् वृक्षांश्च दिक्षु क्रमात् ॥

एवं निर्माप्य गेहं प्रथममिह वृतस्तन्त्रिवर्यस्तदन्ते
तत्कर्तॄन् शिल्पिनस्तान् वलयमणिलसत्कुण्डलाद्यैर्यथेष्टम् ।
सन्तोष्यापाद्य चैतत् स्वयमपि यजमानेन सम्यङ्मुहूर्ते
गत्वा तद्वास्तुपूजाद्यखिलशुभविधिं साधु कुर्वीत तस्मिन् ॥४४॥

---

१. 'मा ।' क. पाठः.

कर्ता चाथ क्रियान्ते महितगुरुवरं भोजयित्वा यथेष्टं
गोभूम्याद्यैश्च दत्त्वा विधिवदवहितो दक्षिणां मुख्यरूपाम्।
आज्ञामादाय तस्मान्निखिलमपि जनं प्रीणयन् भूरिदानैः
स्वीयैः सार्धं स्वगेहे सुचिरमधिवसेत् पूर्णकामः सुखेन ॥ ४५ ॥

इति मनुष्यालयचन्द्रिकायां बाह्यगेहकूपतटाकादिविधानं नाम
सप्तमोऽध्यायः ॥

समाप्ता मनुष्यालयचन्द्रिका ॥

शुभं भूयात् ।



READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Swâti Śrî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I, 1 & 2 Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1 & 2 Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II, 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III, 4th, 5th & 6th Kândas)	1	0	0

	RS.	AS.	P
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III, 6th, 7th & 8th Sargas)	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I, 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pada.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshîraswamin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part II, 2nd Kanda 1-6 Vargas)	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânânda Sarasvatî. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvanarîda (Part III, 2nd Kanda 7 –10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part IV, 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa)	0	8	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

TRIVANDRUM SANSKRIT SERIES.
NO. XLVI.

6

नीलकण्ठदीक्षितविरचिता

परिभाषावृत्तिः ।

THE

PARIBHÂSHÂVRITTI

OF

NÎLAKAṆṬHA DÎKSHITA

EDITED BY

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

DX. m. 5

TRIVANDRUM:
PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.
1915.

TRIVANDRUM SANSKRIT SERIES.
NO. XLVI.

THE

PARIBHÂSHÂVṚITTI

OF

NÎLAKAṆṬHA DÎKSHITA

EDITED BY

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

L x m - 5

TRIVANDRUM:
PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.
1915.

All Rights Reserved.)

121658

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४६.

परिभाषावृत्तिः

नीलकण्ठदीक्षितविरचिता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधिता ।

सा च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये
मुद्रयित्वा प्रकाशिता ।

कोल्लम्वाब्दाः १०९१, क्रैस्ताब्दाः १९१५.

PREFACE.

The present work is a short Vritti on the Paribhâshas, and follows mostly the large and copious Paribhâshâvritti of Sîradeva. This work will prove useful to the students of Vyâkaraṇa who like brief treatises.

The author of this Vritti is one Nîlakantha Yajvan, and very little is known about his date and birth-place. It is probable that he is earlier than the wellknown Nâgesa Bhaṭṭa, as he makes no mention of the latter in his Vritti. The author refers to a work called Gûḍhârthadîpikâ (a commentary on the Tattvabodhinî) as written by his preceptor. Some other Vyâkaraṇa works are also known as having been written by the author, viz., Bhâshyatattvaviveka, Vaiyâkaraṇasiddhântarahasya (a commentary on the Siddhântakaumudî) and Pâninîyadîpikâ.

The edition of this work is based on two palm-leaf manuscripts in Malayalam character. One of them named क was kindly lent to me by the Râja of Panthalam. The other manuscript named ख is incomplete and belongs to Chunakkara Mr. Krishna Varyar.

Trivandrum,
14-8-1915.

T. GANAPATI SAŚTRI.

निवेदना।

एषा परिभाषावृत्तिः सीरदेवीयपरिभाषावृत्तिं प्रायोऽनुसरति। सा तु विस्तृता, इयं संक्षिप्तरूपा। व्याकरणाध्यायिनो ये संक्षेपरुचयश्छात्राः, तेषामियमुपकाराय प्रभवति।

अस्याः प्रणेता नीलकण्ठयज्वा कदा कस्मिन् देशे स्थित इति न विज्ञायते। किन्तु सुप्रसिद्धं नागेशभट्टमस्मरन्नयं ततः प्राचीनः कामं स्यात्। एष स्वगुरुचरणकृतं गूढार्थदीपिकाख्यानं किमपि तत्त्वबोधिनीव्याख्यानं स्मरति। भाष्यतत्त्वविवेकः, वैयाकरणसिद्धान्तरहस्यं (सिद्धान्तकौमुदीव्याख्यानम्), पाणिनीयदीपिका इति केचिद् व्याकरणग्रन्था एतेन निर्मिता इत्यवगम्यते।

एतद्ग्रन्थसंशोधनाधारभूतौ द्वावादर्शौ केरलीयलिपी-तालपत्रात्मकौ। तत्रैकः पन्तलराजीयः क. संज्ञः, अपरोऽसमग्रः (चुनक्कर)-कृष्णवार्यसंबन्धी ख. संज्ञः।

अनन्तशयनम्
१४-८-१९१५

त. गणपतिशास्त्री.

॥ श्रीः ॥

नीलकण्ठदीक्षितविरचिता

परिभाषावृत्तिः ।

वरदेश्वरयज्वानं नीलकण्ठेन[1] यज्वना ।
नमस्कृत्य सतां प्रीत्यै शब्दन्यायो विविच्यते ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् ॥ १ ॥

अण्ग्रहणेषु पूर्वणकारेण परणकारेण वेति सन्देहवारणाय 'लण्' इति सूत्रेऽन्यानुबन्धे कर्तव्ये पुनर्णकारानुबन्धादियं परिभाषा ज्ञाप्यते । अस्यार्थः— व्याख्यानतो व्याख्यानाद् विशेषप्रतिपत्तिरर्थविशेषज्ञानं, न तु सन्देहमात्रेण $अलक्षणम्, अबाधः । लक्ष्यतेऽनेनेति लक्षणं ज्ञानसाधनम् । अबोधकत्वं[2] नास्तीत्यर्थः ॥ १ ॥

न हि कार्यी निमित्तत्वेनाश्रीयते ॥ २ ॥

कार्यमनुभवन् कार्यी स्थानी निमित्तत्वेन ना-

---

१. 'ण्ठीयय', २. 'त्वान्नास्ती' ख. पाठः.

$ इह शास्त्रमिति शेषः । शास्त्रस्यालक्षणत्वाभावश्च अबाधरूपः । तदाह — अबाध इति ।

श्रीयते, नोपादीयत इत्यर्थः । इयं च 'दीधीवेवीटाम्' (१. १. ६) इति सूत्रेण गुणप्रतिषेधाज्ज्ञाप्यते । अन्यथा 'दीधीङ् दीप्तिदेवनयोः', 'वेवीङ् वेतिना तुल्ये' एतयोर्ङित्त्वादेव गुणनिषेधे सिद्धे किं गुणनिषेधेन । प्रयोजनम् 'इङ् अध्ययने' अध्येता 'शीङ् स्वप्ने' शयितेत्यादौ तृचि 'सार्वधातुकार्धधातुकयोः' (७. ३. ८४) इति गुणः ॥ २ ॥

इतरेतराश्रयाण्यपि[1] कार्याणि[2] प्रकल्पन्ते ॥ ३ ॥

'इग्यणः सम्प्रसारणम्' (१. १. ४५) इत्यत्र भाष्ये भाविसंज्ञाविज्ञानादियं न्यायमूलिकेत्युक्ता । तद्यथा—अस्य सूत्रस्य शाटकं वयेत्युक्ते यदि शाटकः, न वातव्यः, अथ वातव्यः, न शाटकः । शाटको वातव्य इति विप्रतिषिद्धम् । एवं तर्हि भाविनी संज्ञाभिप्रेता, यस्मिन्नुते शाटक इति संज्ञा भवति, तथा वय इति । तेन 'इग्यणः सम्प्रसारणमि'त्यादौ सम्प्रसारणसंज्ञासिद्धिः ॥ ३ ॥

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन[3] गृह्यन्ते ॥ ४ ॥

प्रधानस्यावयवभूता आगमा अवयविग्रहणेन गृह्यन्त इत्यर्थः । इयं च लोकन्यायसिद्धेति 'आद्यन्तौ

---

१. 'णि च' ख. पाठः. २. 'णि क' क. पाठः. ३. 'त' ख. पाठः.

टकितौ' (१. १. ४६) इति सूत्रे भाष्यम् । 'नेटि' (७. २. ४) इति निषेधोऽपि ज्ञापकः । अन्यथेड्वति सिचि[1] 'सिचि वृद्धिः परस्मैपदेषु' (७. २. १) इत्यस्य प्राप्तेरेवाभावात् किं तन्निषेधार्थेन 'नेटी'ति सूत्रेणेति स्पष्टमाकरे[2] । इयं च वर्णग्रहणे न प्रवर्तते, आने मुको विधानादिति 'उरण् रपरः' (१. १. ५१) इति सूत्रे भाष्ये स्पष्टम् ॥ ४ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ ५ ॥

निर्दिश्यमानस्य स्थानित्वेनोपात्तस्यादेशा विधीयमाना भवन्तीत्यर्थः । इयं च 'षष्ठी स्थानेयोगा' (१. १. ४९) इत्यस्यार्थस्यान्वाख्यायिका । अन्यथा 'अस्तेर्भूः' (२. ४. ५२) इत्यादावस्तेः स्थानेऽनन्तरे समीपे वेति सन्देहे 'व्याख्यानतो विशेषप्रतिपत्तिरि'ति सन्देहनिवृत्तिसिद्धौ किं सूत्रेणेत्याक्षिप्य 'षष्ठ्यन्तं स्थानेन (यथा) युज्येत, यतः षष्ठ्युच्चारि(तं[3] ? ता) । किं कृतं भवति 'षष्ठी स्थानेयोगे'ति । एषा *परिभाषा न कर्तव्या भवती'ति 'षष्ठी स्थानेयोगे'ति सूत्रे भाष्ये प्रतिपादितम् । तेन 'षष्ठी स्थानेयोगे'ति सूत्रार्थभूतेति फलितम् । 'पादः पत्' (६. ४.

---

१. 'चि वृ', २. 'भेवाक', ३. 'तं कृ' ख. पाठः.

---

* 'निर्दिश्यमानस्यादेशा भवन्तीत्येषा' इति मुद्रितमहाभाष्यपाठः ।

१३०) इति सूत्रे भाष्येऽपि 'निर्दिश्यमानस्यादेशा भवन्ती'त्येषा न कर्त्तव्या 'षष्ठी स्थानेयोगे'त्यनेन सिद्धेरित्युक्तम्[1] । इयं चावयवषष्ठीविषयेऽपि । तेन तदोः सत्वम् अतिस्य इत्यत्र नेति 'पादः पत्' (६. ४. १३०) इति सूत्रे भाष्ये स्पष्टम् । रिङादीनां ङित्करणाद् वर्णग्रहणे नैषा प्रवर्तते । अनया च 'अलोऽन्त्यस्य' (१. १. ५२) इत्यादीनां स्वस्वनिमित्तसान्निधापितानां समावेश एव न तु बाध्यबाधकभावः, विरोधाभावात् । उभयोरपि तुल्यबलत्वात् परार्थत्वाच्चाङ्गाङ्गिभावोऽपि नेति ध्येयम् ॥ ५ ॥

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

इत्संज्ञकवर्णकृतं सर्वादेशप्रयोजकीभूतमनेकाल्त्वं नाश्रीयत इत्यर्थः । एतच्च 'अनेकाल्शित् सर्वस्य' (१. १. ५५) इति शित्करणेन ज्ञाप्यते । अन्यथा 'इदम इश्' (५. ३. ३) इत्यादेरनेकाल्त्वेन सर्वादेशत्वे सिद्धे किं तदर्थेन शित्करणेन इति 'अनेकाल्शित् सर्वस्ये'ति सूत्रे भाष्ये स्पष्टम् ॥ ६ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ७ ॥

अनुबन्धकृतमित्संज्ञकवर्णकृतमनेजन्तत्वमेजन्तत्वप्रतिबन्धकं नेत्यर्थः । तेन 'धेट् पाने' इत्यस्यैजन्तत्वाद् 'आदेच उपदेशेऽशिति' (६. १. ४५) इत्या-

---

१. 'द्वेत्यु' ख. पाठः.

त्वप्रवृत्तिरप्रतिहता । अत्र च ज्ञापकम् 'उदीचां माङो व्यतीहारे' (३. ४. १९) इति सूत्रे कृतात्वस्य मेङः सानुबन्धकनिर्देश इति 'दाधा घ्वदाप्' (१. १. २०) इति सूत्रे (भाष्ये) स्पष्टम् ॥ ७ ॥

नानुबन्धकृतमसारूप्यम् ॥ ८ ॥

इत्संज्ञकवर्णकृतं वैजात्यं नाश्रीयत इत्यर्थः । तेन शप्यं लभ्यमित्यादौ 'पोरदुपधात्' (३. १. ९८) इति यत्प्रत्यये वासरूपपरिभाषया 'ऋहलोर्ण्यत्' (३. १. १२४) इति ण्यत्प्रत्ययो न भवति अत्र च ज्ञापकं 'ददातिदधात्योर्विभाषा' (३. १. १३९) इति सूत्रे विभाषाग्रहणम् । अन्यथा वासरूपन्यायेन णप्रत्ययप्रवृत्त्या[1] दायो धाय इति रूपसिद्धौ शप्रत्यये ददो दध इति च रूपसिद्धौ किं विभाषाग्रहणेनेति वासरूपसूत्रे भाष्ये स्पष्टम् ॥ ८ ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ ९ ॥

प्राधान्येन वर्णमाश्रित्य यत्र कार्यं विधीयते, तत्राल्विधित्वादप्राप्तप्रत्ययलक्षणविध्यर्थं 'प्रत्ययलोपे प्रत्ययलक्षणम्' (१. १. ६२) इति सूत्रेण विधीयमानं न प्रवर्तत इत्यर्थः । तेन गवे हितं गोहितमित्यत्र प्रत्ययलोपपरिभाषयावादेशो न । इयं च परिभाषा 'प्रत्ययलोपे प्रत्ययलक्षणमि'ति सूत्रे प्रत्यय-

---

१. 'सकृत्या दा' क. पाठः.

पदस्यानुवर्तनाल्लोपे प्रत्ययलक्षणमित्येव सिद्धे पुनः प्रत्ययग्रहणेन ज्ञाप्यते । तेन प्रत्ययस्यैवासाधारणं रूपं यत्राश्रीयते तत्रैव प्रत्ययलक्षणं, नान्यत्रेति प्रत्ययलक्षणसूत्रे भाष्ये स्पष्टम् ॥ ९ ॥

क्वचिदेकदेशोऽप्यनुवर्तते ॥ १० ॥

स्पष्टम् । यदंशे स्वरितत्वप्रतिज्ञानमस्ति, तावदेवानुवर्तत इत्यर्थः । तेन 'समर्थानां प्रथमाद्वा' (४. १. ८२) इति पदत्रयस्याधिकृतत्वेऽपि 'प्राग् दिशः—' (५. ३. १) इत्यस्यानन्तरं समर्थानां प्रथमादित्येतयोर्निवृत्तावपि वेत्यस्यानुवृत्तिरस्ति । एतच्च 'संख्याव्ययादेर्ङीप्' (४. १. २६), 'दामहायनान्ताच्च' (४. १. २७) इति सूत्रयोर्भाष्ये स्पष्टम् ॥ १० ॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ ११ ॥

स्पष्टम् । तेन 'प्रादूहोढ—' (वा० ६. १. ८९) इत्यत्रोढग्रहणेन ऊढवच्छब्दग्रहणाभावः । अत्र ज्ञापकं 'व्रश्च—'(८. २. ३६) इति सूत्रे राजेः पृथग् भ्राजिग्रहणमिति कौस्तुभकाराः । भाष्ये तु 'स्वं रूपं—' (१. १. ६८) इति सूत्रे रूपग्रहणं विहाय स्वं शब्दस्येति सूत्रिते सत्यर्थवद्ग्रहणे नानर्थकस्य ग्रहणाभाव इति 'स्वं रूपं—' इति सूत्रे स्थितम् । ननु 'स्वं रूपमि'ति

---

१. 'त्यनु' क. पाठः. २. 'ते अर्थ' ख. पाठः.

सूत्रस्य भाष्ये प्रत्याख्यानात् कथमियं रूपग्रहणेन ज्ञाप्यत इति चेत्। सत्यम्। उपस्थितस्यार्थस्य शब्दाविनाभूतस्य शब्दं प्रति विशेषणत्वेनान्वयसम्भवे सर्वथा त्यागे मानाभाव इति न्यायमूलैषा परिभाषेति तत्रैव सूत्रे भाष्ये स्पष्टमिति ध्येयम्। इयं च विशिष्टरूपोपादान एव प्रवर्तत इति 'ओतुं' (१. १. १५) इति सूत्रे कौस्तुभादिषु स्पष्टम्॥ ११॥

न वर्णग्रहणेषु॥ १२॥

इयमर्थवत्परिभाषा वर्णग्रहणे न प्रवर्तत इत्यर्थः। तेन 'यस्य हलः' (६. ४. ४९) इत्यत्र यस्येति सङ्घातग्रहणात् पुत्रकाम्येत्यादौ न यलोप इत्याकरे स्पष्टम्॥ १२॥

एतन्मूलकमेव 'येन विधिः—' (१. १. ७२) इत्यत्र भाष्ये स्पष्टं पठ्यते—

अलैवानर्थकेन तदन्तविधिः॥ १३॥

इति। स्पष्टम्। तेन ह्न्यग्रहणे ह्लीहन्यग्रहणं न॥ १३॥

गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः॥ १४॥

गौणत्वमप्रसिद्धत्वं लाक्षणिकत्वं च। तत्रोपात्तविशिष्टरूपपदान्तरसम्बन्धनिमित्तकेकार्यस्याप्रवृत्तिरिति भावः। एतच्च 'निपात एकाजनाङ्' (१. १. १४)

---

१. 'तसूत्रे' ख. पाठः. २. 'के' क. पाठः.

इति सूत्रे भाष्ये स्पष्टम् । इयं चानित्या, 'इणः षीध्वं-लुङ्लिटां धोऽङ्गात्' (८. ३. ७८) इत्यत्राङ्गग्रहणात् । तद्धि परिवेविषीध्वमित्यत्र मूर्धन्यादेशनिवृत्तये क्रियते । यदि चेयं परिभाषा (नित्या) स्यात्, तदा गौणत्वादेर्[1] एव तत्रादेशस्याप्रवृत्तिसिद्धौ किं तद्व्यावृत्त्यर्थकाङ्ग-ग्रहणेन । तत् क्रियमाणं परिभाषाया अनित्यतां ज्ञापयतीति दिक् ॥ १४ ॥

एतन्मूलकमेव 'येन विधिः—' (१. १. ७२) इत्यत्र भाष्ये स्पष्टं पठ्यते—

अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ १५ ॥

इति। अनिन्नादयो गृह्यन्ते येषु तान्यनिनस्मन्ग्रहणानि, अर्थवदनर्थकसाधारण्येन तदन्तविधिं भावयन्तीत्यर्थः। राज्ञेत्यर्थवता साम्नेत्यनर्थकेन, दण्डीत्यर्थवता वाग्मीत्यनर्थकेन, सवया इत्यर्थवता सुस्रोता इत्यनर्थकेन, सुशर्मेत्यर्थवता सुप्र(ति ? थि)मेत्यनर्थकेन ॥ १५ ॥

भाव्यमानोऽण् सवर्णान् न गृह्णाति ॥ १६ ॥

विधीयमानोऽण् स्वग्राह्यदीर्घादीन् न गृह्णातीत्यर्थः । तेन इदम इश् विधीयमानो ह्रस्व[2] एव न तु दीर्घः । ननु 'अणुदित् सवर्णस्य चाप्रत्ययः' (१. १. ६९) इति सूत्रेऽप्रत्यय इति निषिद्धत्वादेव विधीयमा-

---

१. 'वादे', २. 'स्वो न' ख. पाठः,

नस्येशादेशस्य सवर्णग्राहकत्वाभावसिद्धेरियं परिभाषा किमर्थेति चेत् । सत्यम् । असत्यामस्यात्रप्रत्यय इत्यस्योदिदंशेऽपि सम्बन्धः स्यात्, परिभाषारम्भे तु अणंश एव सम्बन्ध इति निर्णीयते । तेनास्यार्थस्येयमन्वाख्यायिकेति फलितम् । यदि तु 'चोः कुः' (८. २. ३०) इत्यादिविधिप्रदेशेषूदित्करणादप्रत्यय इत्यस्योदिदंशे सम्बन्धाभावसिद्धिः, तदा परिभाषा मन्देवेत्यणुदित्सूत्रे भाष्ये स्पष्टम् । इयं चानित्या, 'उरत्' (७. ४. ७) इत्यादौ तपरकरणाल्लिङ्गात् । अन्यथा विधीयमानत्वादकारस्य सवर्णग्राहकत्वाप्राप्तेः किं तन्निवृत्त्यर्थकेन तपरकरणेनेति स्पष्टमाकरे ॥ १६ ॥

यस्मिन् विधिस्तदादावल्ग्रहणे ॥ १७ ॥

सप्तम्यन्तेन विधौ विशेषणं तदादेः संज्ञा स्यात् । तदन्तविध्यपवादः । इयं च वाचनिकी । एतच्च 'येन विधिः —' (१. १. ७२) इति सूत्रे वार्त्तिकत्वेन भाष्ये पठितम् । तेन 'वान्तो यि प्रत्यये' (६. १. ७९) इत्यत्र यादौ प्रत्यय इत्यर्थलाभाद् गव्यमित्यादिसिद्धिः ॥ १७ ॥

विधिविधानविधिभाजां त्रयाणां सन्निधाने तदन्तविधिर्भवति ॥ १८ ॥

स्पष्टम् । इयं च निर्मूलेति केचित् । 'येन वि-

धिः—' (१. १. ७२) इत्यस्य फलितार्थकथनमित्यन्ये ॥ १८॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १९ ॥

सूत्रस्थपरस्परान्वितपदार्थकपदानां सहैवानुवृत्तिनिवृत्ती इत्यर्थः। वाशब्दोऽवधारणार्थः। अत्र च ज्ञापकं 'नेड्वशि कृति' (७. २. ८) इत्यत्रेडित्यनुवर्तमानेनापि सिद्धौ 'आर्धधातुकस्येड् वलादेः' (७. २. ३५) इत्यत्र पुनरिड्ग्रहणम्। तद्धि निषेधसम्बन्धनिवृत्त्यर्थम्। यदि चान्वितपदार्थकपदैकदेशानुवृत्तिरिष्येत, ततो व्यर्थमेवेड्ग्रहणं स्यात्। नच 'दीधीवेवीटाम्' (१. १. ६) इति सूत्रे इडिति वर्तमाने पुनरिड्ग्रहणमिटो गुणनिवृत्त्यर्थमित्युक्तार्थज्ञापकं कथमिति वाच्यम्। 'दीधीवेवीटामि'ति सूत्रकारेणेटो गुणनिषेधारम्भेण तन्मते गुणनिवृत्त्यर्थकोपायान्तरस्यानावश्यकतया पुनरिड्ग्रहणस्य प्रयोजनान्तरालाभेनोक्तपरिभाषाज्ञापकत्वसिद्धेः। भाष्यमते तु वाचनिकीयम्। इयं चानित्या। 'झोऽन्तः' (७. १. ३), 'समर्थानां प्रथमाद्वा' (४. १. ८२) इत्यादावेकदेशस्यानुवृत्तिदर्शनादित्यस्मद्गुरुचरणकृततत्त्वबोधिनीव्याख्याने गूढार्थदीपिकाख्याने प्रपञ्चितम् ॥ १९ ॥

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २० ॥

व्युत्पत्तिकार्याभाववन्तीत्यर्थः। अत्र च ज्ञापकम्

'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (८. ३. ४६) इति सूत्रे कमिग्रहणात् पृथक् कंसग्रहणम् । अन्यथा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादेव कमिग्रहणे कंसग्रहणस्यापि सिद्धत्वात् किं तद्ग्रहणेनेति भाष्ये स्थितम् ॥ २० ॥

उणादयो व्युत्पन्नान्यपि ॥ २१ ॥

एतच्च 'ण्वल्तृचौ' (३. १. १३३) इति सूत्र(भाष्य)पर्यालोचनया लभ्यत इत्याहुः ॥ २१ ॥

सर्वो द्वन्द्वो विभाषयैकवद् भवति ॥ २२ ॥

इयं च न्यायसिद्धा । 'चार्थे द्वन्द्वः' (२. २. २९) इति सूत्रेणेतरेतरसमाहारयोरविशेषेण द्वन्द्वविधानात् । 'तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्' (१. २. ६३) इति सूत्रे बहुवचनग्रहणं ज्ञापकं च । यदि च नित्यमेकवत्, तदा बहुवचनायोगात् तस्य द्विवचनविधानमनुपपन्नं स्यादिति 'तिष्यपुनर्वस्वोरि'ति सूत्रे भाष्ये स्थितम् ॥ २२ ॥

प्रकृतिवदनुकरणं भवति ॥ २३ ॥

स्पष्टम् । अत्र च ज्ञापकं 'भू सत्ताया'मित्यत्र विभक्त्यदर्शनमेव । 'यत्तदेतेभ्यः —' (५. २. ३९) इति

---

१. 'कंसग्र', २. 'त्यादिसू' क. पाठः.

ज्ञापकमप्यस्याः । अत्र चैकशेषाकरणादनित्या चेयम् । 'क्षियो दीर्घात्' (८. २. ४६) इति सूत्रे भाष्ये तु प्रकृतिवदनुकरणमित्याश्रयणे 'क्षियो दीर्घादि'त्यत्र क्षिय इति स्वाद्युत्पत्तिर्न स्यात्। अधातुरिति निषेधेन प्रातिपदिकसंज्ञाया अभावादिति स्थितम् ॥ २३ ॥

विकरणेभ्यो नियमो बलीयान् ॥ २४ ॥

शबादिभ्य आत्मनेपदं परस्मैपदं च बलवदित्यर्थः । अत्र च ज्ञापकं 'वृद्भ्यः स्यसनोः' (१. ३. ९२) इति सूत्रे स्यग्रहणम् । अन्यथा परस्मैपदात् पूर्वमेव 'स्यतासी लृलुटोः' (३. १. ३३) इति लकारापेक्षस्य प्रत्ययस्य प्रवृत्तेर्[1]निर्बाधत्वात् किं स्यग्रहणेनेति 'अनुदात्त ङित—'(१. ३. १२) इति सूत्रे भाष्ये स्थितम् । 'शदेः शितः'(१. ३. ६०) इति सूत्रे भाष्ये तु विकरणव्यवधानेऽपि नियमप्रवृत्तिः स्यग्रहणेन ज्ञाप्यत इति ध्वनितम् । तेन चिनोति सुनोतीत्यादौ[2] तिपमाश्रित्य 'सार्वधातुकार्धधातुकयोः' (७. ३. ८४) इति गुणो न । किन्तु विकरणस्यापित्[3]सार्वधातुकत्वाद् ङित्त्वे 'कृङिति च' (१. १. ५) इति गुणनिषेधः ॥ २४ ॥

सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव ॥ २५ ॥

व्यक्तौ पदार्थे प्रतिलक्ष्यं लक्षणभेदादुभयोरपि

---

१. 'त्तिर्निर्बाधा । तत् किं', २. 'धु', ३. 'दौ विप्रतिषेधमा' ख, पाठः, ३. 'पि सार्व' क. पाठः,

शास्त्रयोस्तत्तल्लक्ष्यविषययोरचारितार्थ्येन पर्यायप्रसङ्गे नियमार्थं 'विप्रतिषेधे परं—' (१. ४. २) इति सूत्रमिति पक्ष इदम्। तेन भवतादित्यत्र हेर्न लुक्, तातङा परत्वाद् बाधादिति 'विप्रतिषेधे परमि'ति सूत्रे भाष्ये स्थितम् ॥ २५ ॥

पुनः प्रसङ्गविज्ञानात् सिद्धम् ॥ २६ ॥

तुल्यबलविरोधे 'विप्रतिषेधे परं—' (१. ४. २) इति बाधितस्य पुनः प्राप्तिविज्ञानादिष्टं सिद्धमित्यर्थः। अयं भावः—जातिपक्षे तत्तज्जात्याक्रान्ते क्वचिच्चरितार्थयोर्द्वयोः सत्प्रतिपक्षन्यायेन विरोधस्थलेऽप्रवृत्तौ तत् सूत्रं परविध्यर्थं, न तु पूर्वनिवृत्त्यर्थम् । तस्मिंश्च कृते पूर्वस्य निमित्तसत्त्वे तदपि भवतीति पक्ष इदम्। तेन भिन्धीत्यत्र हेर्धित्वं बाधित्वा परत्वात् तातङि पुनर्धित्वं भवत्येवेति विप्रतिषेधसूत्र एव भाष्ये स्पष्टम् ॥ २६ ॥

अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः ॥ २७ ॥

अल्पाश्रयबह्वाश्रययोरल्पाश्रयं बलीय इत्यर्थः। अत्र च ज्ञापकम् 'ओमाङोश्च' (६. १. ९५) इत्याङ्ग्रहणम्। अन्यथा सवर्णदीर्घे गुणे च रूपसिद्धौ किं तेनेति 'सम्प्रसारणाच्च' (६. १. १०८) इति सूत्रे विप्रतिषेधसूत्रे च भाष्ये स्पष्टम् ॥ २७ ॥

एतन्मूलकमेव पठ्यते—

पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन ॥ २८ ॥

साधनेनेत्यस्य धातूत्तरप्रत्ययार्थेनेत्यर्थः । एतच्च सुड्विधायकसूत्रे भाष्ये ध्वनितम् ॥ २८ ॥

पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण ॥ २९ ॥

अर्थः प्राग्वत् । अत्र च ज्ञापकं 'णेरध्ययने वृत्तम्' (७. २. २६) इति निर्देशः । एतच्च 'सुट् कात् पूर्वः' (६. १. १३५) इति सूत्रे भाष्ये स्पष्टम् । पक्षद्वयमपीदं यथायथं लक्ष्यानुरोधाद् व्यवस्थितं बोध्यम् ॥ २९ ॥

सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ ३० ॥

स्पष्टम् । इयं च 'व्यत्ययो बहुलम्' (३. १. ८५) इति सूत्रे बहुलमिति योगविभागेन तत्रैव भाष्ये प्रतिपादिता । 'षष्ठीयुक्तश्छन्दसि वा' (१. ४. ९) इति सूत्रे वेति योगविभागाल्लभ्यत इति शब्दकौस्तुभादिषु स्थितम् ॥ ३० ॥

प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम् ॥ ३१ ॥

'यस्मात् प्रत्ययविधिः—' (१. ४. १३) इति सूत्रे तदादीति योगविभागेनास्यां तदादेरित्यन्तांशो ल-(क्ष्य?भ्य)ते । येन विधिः—' (१. १. ७२) इत्यनेन च

---

१. 'म् व्य' क. पाठः.

तदन्तांशः । प्रत्ययाक्षिप्तस्य प्रकृत्यवयवकसमुदायस्य विशेष्यस्य सर्वत्राव्याहतत्वात् । तेन चापाक्षीरोदनमिति वाक्यस्य हरिष्वित्यादौ सोश्च न पदत्वम् । इयं चाङ्गसंज्ञासूत्रे भाष्ये स्पष्टा ॥ ३१ ॥

'येन विधिः—' (१. १. ७२) इत्यत्र च तदपवादः पठ्यते—

प्रत्ययग्रहणे चापञ्चम्याः ॥ ३२ ॥

यत्र पञ्चम्यन्तं प्रत्ययविशेषणं, तत्र तदन्तग्रहणं नेत्यर्थः । तेन यथा 'रदाभ्यां निष्ठातः—'(८. २. ४२) इत्यत्र तदन्तग्रहणाभावः ॥ ३२ ॥

प्रत्ययग्रहणपरिभाषाया अपवादान्तरमाह—

स्त्रीप्रत्यये चानुपसर्जने न ॥ ३३ ॥

विषयसप्तमीयम् । यः शब्दः (स्त्रीप्रत्य?स्त्रि)यं प्राधान्येनाह, तत्र तदादिनियमेन स्त्रीप्रत्ययान्तत्वाभावेऽपि (न?)तदन्तत्वप्रयुक्तकार्यम् । यस्त्वप्राधान्येनाह, तस्य च तदादिनियमेन तदन्तत्वप्रयुक्तकार्यं नेति तदर्थः । तेन परमकारीषगन्धीपुत्र इत्यत्र 'ष्यङः—' (६. १. १३) इति सम्प्रसारणम्, अतिकारीषगन्ध्यापुत्र इत्यत्र च न । एतच्च 'ष्यङः सम्प्रसारणमि'ति सूत्रे भाष्ये स्पष्टम् । एतच्चाङ्गसंज्ञासूत्रे 'नेयङुवङ्—'(१. ४. ४) इत्यतो नेत्यस्य 'वामि' (१. ४. ५) इत्यतो वेत्यस्य चानु-

१. 'प्रधानत्वेना' क. पाठः.

वर्तनेन व्यवस्थितविभाषाश्रयणाल्लभ्यत इति वदन्ति ॥ ३३ ॥

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ ३४ ॥

स्पष्टम् । एतच्च 'सुप्तिङन्तं—'(१. ४. १४) इत्यन्तग्रहणेन ज्ञाप्यत इति 'सुप्तिङन्तमि'ति सूत्रे भाष्ये स्पष्टम् । तेन 'तरप्तमपौ घः' (१. १. २२) इत्यनेन प्रत्यययोरेव संज्ञा, न तदन्तस्य ॥ ३४ ॥

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ ३५ ॥

'प्रत्ययग्रहण' इत्यस्यायमपवाद इत्यङ्गसंज्ञासूत्रे भाष्ये स्पष्टम् । 'गतिरनन्तरः' (६. २. ४९) इति सूत्रेऽनन्तरग्रहणमस्य ज्ञापकम् । तद्धि अभ्युद्धृतमित्यादौ व्यवहितनिरासाय । अन्यथा व्यवहिते प्राप्तेरेवाभावादनन्तरग्रहणं व्यर्थं स्यादिति 'गतिरनन्तर' इति सूत्रे भाष्ये स्थितम् । अपिशब्देन प्रत्ययग्रहणपरिभाषालब्धार्थः समुच्चीयते । एतदभावे हि तयैव व्यवस्था स्यादित्येतावतापवादत्वव्यवहारः । न चैवं ल्यब्विधायकसूत्रस्थेनानयोः सावकाशत्वप्रतिपादकेन द्वयोः सावकाशयोः समवस्थितयोरित्यादिभाष्येण सह विरोध इति वाच्यम् । परस्परं बाध्यबाधकभावमात्रे तात्पर्यादिति भाष्यतत्त्वविवेके प्रपञ्चितमस्माभिः ॥३५॥

---

१. 'षाथः' ख. पाठः. २. 'काभा' क. पाठः.

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ ३६ ॥

पदाधिकारे अङ्गाधिकारे च विधीयमानं कार्यं तस्य[1] च तदन्तस्य[2] चेत्यर्थः । तेन अतित्वाम् अतिमां निर्जरस इत्यादिसिद्धिः । इदं च 'येन विधिः—' (१. १. ७२) इत्यत्र भाष्ये स्पष्टम् ॥ ३६ ॥

उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ॥ ३७ ॥

सप्तमीपञ्चम्योर्निर्देशे 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (१. १. ६६) इति सूत्रापेक्षया 'तस्मादित्युत्तरस्य' (१. १. ६७) इत्यस्य परत्वात् प्रबलत्वमित्यर्थः । तेन 'ङः सि धुट्' (८. ३. २९) इत्यत्र ङात् परस्य सस्य धुडित्यर्थलाभः । एतच्च 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति सूत्रे भाष्ये स्पष्टम् ॥ ३७ ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ ३८ ॥

प्रातिपदिकग्रहण इति बहुव्रीहिः । प्रातिपदिकं गृह्यते यस्मिन् शास्त्रे, तत् प्रातिपदिकग्रहणम् । तत्र लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणमित्यर्थः । तेन अयस्कुम्भीत्यत्र 'अतः कृकमिकंस—' (८. ३. ४६) इति सत्वम् । श्वश्रूरित्यप्युदाहरणम् । अत्र च ज्ञापकं 'कुमारः श्रमणादिभिः' (२. १. ७०) इत्यत्र स्त्रीलिङ्गश्रमणाशब्दपाठः ।

---

१. 'स्य त' ख. पाठः. २. 'शे त' क पाठः.

अपिशब्दात् केवलस्यापि । इयं च यत्र लिङ्गप्रत्ययरहितस्य प्रातिपदिकत्वं, तत्रैवेत्यर्थः । इयं च 'शक्तिलाङ्गला —' (वा० ३. २. ९) इति वार्त्तिके घटघटीग्रहणादनित्या । एषा ङ्याप्सूत्रे भाष्ये स्पष्टा ॥ ३८ ॥

विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ ३९ ॥

विभक्तौ परतः प्रातिपदिकस्य विधीयमानं कार्यं लिङ्गविशिष्टस्य न भवतीत्यर्थः । लिङ्गविशिष्टपरिभाषानित्यत्वमूलिकेयम् । एषा च 'युवोरनाकौ' (७. १. १) इति सूत्रे भाष्ये स्पष्टा ॥ ३९ ॥

लिङ्गवचनमतन्त्रम् ॥ ४० ॥

व्याख्यानमूलिका चैषा । अत एव क्वचिद् विवक्ष्यते । यथा 'सुप्सुपे'ति ॥ ४० ॥

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥ ४१ ॥

स्वस्मादन्यस्मिन् स्वसदृशेऽधिकरणे द्रव्ये वर्तते । हि यतः तथार्थगतिरस्ति । तथा प्रत्ययोऽस्तीत्यर्थः । न्यायसिद्धेयम् । अत एव भाष्ये 'न ह्यब्राह्मणमानयेत्युक्ते लोष्टमानीय कृती भवति' इत्युक्तम् । 'इदुदुपधस्य चाप्रत्ययस्य' (८. ३. ४१) इत्युदाहरणम् । यथा वा 'अर्थवदधातुः —' (१. २. ४५) इति । अत्राधातु-

---

१. 'ति। ले', २. 'थार्थ' क पाठः

रिति पर्युदासादेवार्थवत्त्वलाभादर्थवद्ग्रहणस्योत्तरार्थत्वसिद्धिरित्यादि मनोरमायां स्पष्टम् । 'ओषधेश्च विभक्तावप्रथमायाम्' (६. ३. १३२) 'अकर्त्तरि च कारके संज्ञायाम्' (३. ३. १९) इत्यादौ विभक्तिकारकग्रहणाभ्यामस्या अनित्यत्वं ज्ञाप्यते । अन्यथा अप्रथमायामकर्त्तरि चेति पदादेव विभक्तिकारकलाभात् तदुपादानवैयर्थ्यापत्तेरिति भाष्ये स्पष्टम् ॥ ४१ ॥

गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥ ४२ ॥

गतिकारकोपपदानां कृदन्तेनैव सुबुत्पत्तेः प्राक् समासो वक्तव्य इत्यर्थः । इयं च 'उपपदमतिङ्' (२. २. १९) इत्यतिङ्ग्रहणेन, 'कर्तृकरणे कृता बहुलम्' (२. १. ३२) इति बहुलग्रहणेन च सिद्धा । तेन च व्याघ्री अश्वक्रीतीत्यादिसिद्धिः । 'अम्बाम्ब —' (८. ३. ९७) इति सूत्रे गवादिग्रहणादनित्येयम् । अन्यथा गोष्ठ इत्यादौ 'सुपि स्थः' (३. २. ४) इति कप्रत्यये 'गतिकारकोपपदानामि'ति सुबुत्पत्तेः पूर्वं समासे 'सात्पदाद्योः' (८.३.१११) इति निषेधाप्राप्त्या 'आदेशप्रत्यययोः' (८. ३. ५९)इत्येव सिद्धे तदुपादानवैयर्थ्यात् । 'अम्बाम्बे'त्यत्र हि लक्षणप्रतिपदोक्तपरिभाषया 'सुपि स्थ' इति विहित-

---

१. 'त्यनेनाति' क. पाठः. २. 'स्त' ख. पाठः. ३. 'दिरिति प' क. पाठः.

कप्रत्ययान्त एवानुक्रियत इति सिद्धान्तः । इयं च पदस्यादिः[1] पदादिरिति व्याख्यानपक्षे बोध्यम् । इयं च 'पुंयोगादाख्यायाम्' (४. १. ४८) इत्यत्र[2] भाष्ये स्पष्टा[3] ॥ ४२ ॥

परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते ॥ ४३ ॥

अपवादविषयं मुक्त्वोत्सर्गः प्रवर्तत इत्यर्थः । अपवादवैयर्थ्यापत्तिन्यायमूलिकेयम् । इयं च प्रातिपदिकार्थसूत्रे भाष्ये स्पष्टा ॥ ४३ ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ ४४ ॥

अपवादविषयेऽपवादस्यान्येन निषेधेऽप्युत्सर्गो भवतीत्यर्थः । यथा रामावित्यत्र वृद्ध्यपवादभूतस्य पूर्वसवर्णदीर्घस्य 'नादिचि' (६. १. १०४) इति प्रतिषेधेऽपि वृद्धिः । 'तौ सत्' (३. २. १२७) इति निर्देशोऽत्र लिङ्गम् । 'इको गुणवृद्धी' (१. १. ३) इति सूत्रे भाष्ये स्पष्टेयम् । दिग्यादेशविषये द्वित्वप्रवृत्त्यभावात् क्वचिदिति ॥ ४४ ॥

असति सम्भवे बाधनं भवति ॥ ४५ ॥

उत्सर्गापवादयोरेकत्र सम्भवाभावे बाध्यबाधकभाव इष्यते, विरोधस्य बाध्यबाधक(भाव)नियामकत्वादिति भावः । तेन रामेभ्य इत्यत्रैत्वेन 'सुपि च' (७. ३. १०२) इति दीर्घत्वं बाध्यते । इयं च न्यायसिद्धेति स्पष्टमाकरे ॥ ४५ ॥

---

१. 'दिरिति प' क. पाठः. २. 'ति सूत्रे भा', ३. 'ष्टा ॥ क' ख. पाठः.

अत्रैवोद्वलकमाह —

अस्ति च सम्भवो यदुभयं स्यात् ॥ ४६ ॥

चशब्दश्चेदर्थे । सम्भवोऽस्ति चेदुभयं भवेदेवेत्यर्थः । तेन तथाजातीय इत्यत्र थाल्जातीययोः सम्भवः ॥ ४६ ॥

नन्वेवमौपगव इत्यादावादिवृद्ध्यान्त्यवृद्धिबाधो न स्यादित्याह —

सत्यपि सम्भवे बाधनं भवति ॥ ४७ ॥

स्पष्टम् । तक्रकौण्डिन्यन्यायमूलकमेतत् । एतत्त्रयमपि 'मिदचोऽन्त्यात् परः' (१. १. ४७) इति सूत्रे भाष्ये स्पष्टम् ॥ ४७ ॥

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥ ४८ ॥

प्राप्त इति भावे क्तः[1] । यत्कर्तृकावश्यम्प्राप्तौ यो विधिरारभ्यते, स तस्य नित्यं बाधक इत्यर्थः । अत्र येनेत्यस्य यदि स्वेतरेणेत्यर्थः, तदा स्वविषये प्राप्तमात्रस्य बाधः । एषैव बाध्यसामान्यचिन्तेत्युच्यते । यदा तु यद्धर्मावच्छिन्नकार्यविशेषेणेत्यर्थः, तत् कार्यं केन विहितमिति जिज्ञासा च, तदा बाध्यविशेषचिन्ता । यथा 'एत्येधत्यूठ्सु' (६. १. ८९) इत्यत्र परूपबाधकत्वे ज्ञाते केन विहितस्येति । यथा वा नासि-

---

१. 'कः ।', २. 'य के' ख. पाठः.

कोदरोष्ठ—' (४. १. ५५) इति ङीष् निषेधत्वावच्छिन्नं प्रति बाधकः ॥ ४८ ॥

केन विहितस्य बाधकमिति व्यवस्थाकाङ्क्षायामाद्यव्यवस्थापकमाह —

पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥ ४९ ॥

समीपस्था अपवादाः सन्निहितानेव बाधन्ते, न विप्रकृष्टानित्यर्थः। यथा 'एत्येधत्यूठ्सु' (६. १. ८९) इति वृद्धिः एङि पररूपस्यैव बाधिका, न तु 'ओमाङोश्च' (६. १. ९५) इति स्पष्टं सिद्धान्तकौमुद्यादौ। प्रथमातिक्रमे कारणाभावादिति न्यायमूलिकेयम् ॥ ४९ ॥

द्वितीय आह —

मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ॥ ५० ॥

स्पष्टम्। इयमपि पूर्वोक्तन्यायमूलिका। तेन 'नासिकोदरोष्ठ—'(४. १. ५५) इत्यत्र ओष्ठादिषु पञ्चस्वसंयोगोपधादित्येव बाध्यते, विप्रतिषेधशास्त्रबाधे मानाभावात्। 'बहुव्रीहेरूधस—' (४. १. २५) इत्यस्य 'अन उपधालोपिनः—' (४. १. २८) इत्यत्रानुवृत्तये कृतं स्वरितत्वप्रतिज्ञानं ज्ञापकमपि। तद्धि अनेन न्यायेन पूर्वयोर्ङीप्प्रतिषेधयोरेव बाधकं स्यात्, न तु परस्य 'अन उपधे'त्यस्येति कुण्डोध्नीत्यादौ परत्वान्ङीष्-

---

१. 'षि विषये वि' क. पाठः.

विकल्प एव स्यात् । स मा भूदित्येवमर्थमिति दिक् । स्पष्टं चेदम् 'आवट्याच्च' (४. १. ७५) इति सूत्रे भाष्ये । यदि तु कार्यद्वयं नैकधर्मावच्छिन्नं, तदोभाभ्यां भिन्नधर्मावच्छिन्नाभ्यां केनापि रूपेण येन नाप्राप्तन्यायस्याभावान्नानयोर्विषयः । स्पष्टं चेदम् 'इको गुणवृद्धी' (१. १. ३), 'इको झल्' (१. २. ९), 'नासिकोदरौष्ठ—'(४. १. ५५), 'एत्येधति—' (६. १. ८९) इत्यादौ भाष्यकैयटकौस्तुभादिष्विति सङ्क्षेपः ॥ ५० ॥

अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा ॥ ५१ ॥

विधिप्रतिषेधौ सन्निहितस्यैव भवत इत्यर्थः । तेन 'ऋतो भारद्वाजस्य' (७. २. ६३) इति भारद्वाजनियमप्रापितो निषेधः 'अचस्तास्वत्—'(७. २. ६१) 'उपदेशेऽत्वतः'(७. २. ६२)इति योगद्वयप्रापितस्यैव निषेधस्य, न तु क्र्यादिनियमप्रापितस्येति सिद्धान्तकौमुदीमनोरमातत्त्वबोधिन्यादिषु स्पष्टम् । अत्र च ज्ञापकमाद्येऽंशे 'संख्याव्ययादेर्ङीप्'(४. १. २६) इति ङीब्वचनम् । तद्धि अनन्तरस्य ङीष एव विधिर्मा भूदिति क्रियते । अन्त्ये तु 'न क्तिचि दीर्घश्च'(६.४.३९)इति सूत्रे दीर्घग्रहणम् । तद्धि अनन्तरस्य 'अनुदात्तोपदेश—'(६. ४. ३७) इत्यस्यैव निषेधो मा भूदित्येतदर्थमिति सीरदेवीयपरिभाषावृत्त्यादिषु स्पष्टम् । इयमुपस्थितिन्यायमूला चेति ध्येयम् ॥ ५१ ॥

---

१. 'स्य भ', २. 'स्य प्रा' ख. पाठः

अभ्यासविकारेषु बाध्यबधकभावो नास्ति ॥ ५२ ॥

'अत्र लोपोऽभ्यासस्य' (७. ४. ५८) इत्यारभ्य विधीयमानकार्येषु बाध्यबाधकभावो नास्तीत्यर्थः । तेन दित्स्यं धित्स्यमित्यादावभ्यासादिलोपः । अत्र च ज्ञापकं 'दीर्घोऽकितः' (७. ४. ८३) इत्यकिद्ग्रहणम् । अन्यथा पम्प(स्यृ?इय)त इत्यत्र 'जपजभ—' (७. ४. ८६) इति नुकि कृतेऽनजन्तत्वाद् दीर्घाप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेति भाष्ये स्पष्टम् । इयं च परा(न्तर)ङ्गत्वादिबाधाभा(वे?व)स्यापि बोधिका। यत्तु सर्वेषां प्रवृत्तावेवैतत्प्रवृत्तिरिति कैयटः, तन्न । नुकि कृते दीर्घाप्राप्त्या धर्मिग्राहकमानविरोधापत्तेः, मान्बधादीनां दीर्घे कृते इत्वाप्राप्त्या 'गुणो यङ्लुकोः' (७. ४. ८२) इति सूत्रे मीमांसते अचीकरदित्यादिना भाष्योक्तोदाहरणासङ्गतेश्चेति संक्षेपः ॥ ५२ ॥

ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ ५३ ॥

ताच्छील्यार्थेषु विहितप्रत्यये वासरूपपरिभाषा न प्रवर्तत इत्यर्थः। अत्र च ताच्छीलिकेष्विति विषयसप्तमी । तेन ताच्छीलि(कविकृतोच्छीलि?कानामताच्छीलिकैः) वासरूपविधिर्नेत्यर्थः । एतच्च 'जुचङ्क्रम्य—' (३. २. १५०) इति सूत्रे भाष्ये स्पष्टम् । अत्र च ज्ञापकं निन्दाहिंसादि (३. २. १४६) सूत्रेण वुञ्विधानम् । अन्यथा ण्वुलैव सिद्धे किं तेनेत्यन्यत्र विस्तरः । इयं

चानित्या । 'सूददीप—' (३. २. १५३) इत्यनेन युच्प्रतिषेधात् । अन्यथा 'नमिकम्पि—' (३. २. १६७) इति रप्रत्ययेनैव तद्बाधे सिद्धे किं तेनेति स्पष्टं भाष्यतत्त्वविवेके ॥ ५३ ॥

क्त्यल्युदतुन्मुखलर्थेषु वासरूपविधिर्नास्ति ॥ ५४ ॥

स्पष्टम् । अत्र च ज्ञापकं, 'अर्हे कृत्यतृचश्च' (३. ३. १६९) इति सूत्रे कृत्यतृचोर्ग्रहणम् । तद्धि समुच्चितलिङा कृत्यतृचोर्बाधा माभूदित्येतदर्थम् । यदि च वासरूपविधिः स्यात्, किं तदुपादानेन । तथाच वासरूपविधेरनित्यत्वं ज्ञाप्यत इति फलितम् ॥ ५४ ॥

साम्प्रतिकाभावे भूतपूर्वगतिः ॥ ५५ ॥

तात्कालिककार्यप्रयोजकीभूतधर्मानवच्छिन्नत्वे पूर्वं विद्यमानत्वमादाय शास्त्रं प्रवर्तनीयमित्यर्थः । न्यायसिद्धेयमित्येके । वस्तुतस्तु 'अचो यद्' (३. १. ९७) इति सूत्रस्थाज्ग्रहणमस्य ज्ञापकम् । अन्यथा 'ऋहलोर्ण्यद्' (३. १. १२४) इति हलन्तेभ्यो ण्यत्प्रत्ययस्य विधानादन्तरेणाप्यज्ग्रहणं परिशेषाद(जादेरे?जन्तादे)व यत्प्रत्ययो भविष्यतीति किमज्ग्रहणेन । तत् क्रियमाणं भूतपूर्वाजन्तस्यापि यत्प्रत्ययविधानार्थं सम्पद्यते । तेन धाञो दाञश्च सनि द्वित्वे 'सनि मीमाघु—' (७. ४. ५४) इति इसि अभ्यासस्य 'अत्र लोपोऽभ्यासस्य'

(७. ४. ५८) इति लोपे 'सः स्यार्धधातुके' (७. ४. ४९) इति तत्वेऽनुत्पन्नार्धधातुकेऽतोलोपे हलन्तत्वात् प्राप्तं ण्यतं बाधित्वा भूतपूर्वाजन्तत्वमादाय 'अचो यद्' (३. १. ९७) इति यत्प्रत्यये 'यतोऽनावः' (६. १. २१३) इत्याद्युदात्तत्वसिद्धिरिति संक्षेपः । विस्तरस्तु वैयाकरणसिद्धान्तरहस्याख्यास्मत्कृतसिद्धान्तकौमुदीव्याख्यानेऽनुसन्धेयः । एषा च 'नामि' (६. ४. ३) इत्यादिसूत्रस्थभाष्ये स्फुटा ॥ ५५ ॥

भवति (हि) बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ ५६ ॥

तेषां गुणानामवयवपदार्थानां संविज्ञानं विशेष्यान्वयिनान्वयित्वं बहुव्रीहौ भवतीत्यर्थः । अपिना अतद्गुणसंविज्ञानमपि । हिशब्दः प्रसिद्धौ । तेन संयोगसमवायान्यतरसम्बन्धेन सम्बन्धी यत्रान्यपदार्थः, प्रायस्तत्र तद्गुणसंविज्ञानत्वम् । यथा लम्बकर्णमानय, यथा वा चित्रगुमानयेति । एतच्च 'सर्वादीनि—' (१. १. २७) इति सूत्रे भाष्ये स्पष्टम् ॥ ५६ ॥

चानुकृष्टं नोत्तरत्र ॥ ५७ ॥

चकारेणानुकृष्टं नोत्तरत्रानुवर्तत इत्यर्थः । अत्र च ज्ञापकं णमुल्यनुवर्तमाने 'अव्ययेऽयथाभिप्रेता—' (३. ४. ५९) इति सूत्रे पुनर्णमुल्ग्रहणम् । अन्यथा स्का चेत्युक्तावप्युत्तरत्रोभयोः सम्बन्धसिद्धौ किं तेन । इयं

चानित्या, 'तयोरेव कृत्यक्तखलर्थाः' (३. ४. ७०) इति सूत्रे एवकारग्रहणात् । तद्धि कर्त्रर्थव्यवच्छेदार्थं क्रियते । यदि च चानुकृष्टमुत्तरत्र न स्यात् । 'लः कर्मणि च—' (३. ४. ६९) इत्यत्रा(पि) कर्तुश्चानुकृष्टत्वादुत्तरत्राप्राप्तौ किमेवकारेणेत्यस्मत्कृतपाणिनीयदीपिकायां स्पष्टम् ॥ ५७ ॥

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ५८ ॥

अल्पाश्रयकार्ये कर्तव्ये बह्वाश्रयमसिद्धमित्यर्थः । तेन पचावेदं पचामेदमित्यादौ बहिरङ्गैकादेशगुणस्यासिद्धत्वादन्तरङ्गैत्वाभावः । अत्र च ज्ञापकं 'वाह ऊठ्' (६. ४. १३२) इत्यूठ्ग्रहणम् । तद्धि विश्वौह इत्यादिसिद्ध्यर्थम् । यदि चेयं न स्यात् । वाहः सम्प्रसारणमित्युक्तावपि सम्प्रसारणाच्चेति पूर्वरूपत्वे वृद्धौ च विश्वौह इति रूपसिद्धौ किमूठ्ग्रहणेन । सत्यां ह्यस्यां बहिरङ्गसम्प्रसारणस्यासिद्धतया रूपासिद्धिः स्पष्टैव । एतच्च विप्रतिषेधसूत्रे भाष्ये स्पष्टम् । इयं चोत्तरपदाधिकारे न प्रवर्तत इति 'इच एकाचोऽम्—' (६. ३. ६८) इति सूत्रे भाष्ये स्पष्टम् । इयं च सापवादेति 'अन्तरङ्गं बलीय' इति परिभाषान्तरं प्राक् पठितम् । अनयैव निर्वाहे 'अन्तरङ्गं बलीय' इति परिभाषा न कार्येत्यपि विप्रतिषेधसूत्रे भाष्ये स्पष्टम् ॥ ५८ ॥

नाजानन्तर्ये बहिष्टृप्रकल्पिः ॥ ५९ ॥

बहिरङ्गपरिभाषापवादोऽयम् । यत्रान्तरङ्गे बहिरङ्गे वाचोरानन्तर्यमाश्रीयते, तत्र बहिरङ्गपरिभाषा न प्रवर्तत इत्यर्थः । अत्र च ज्ञापकं 'षत्वतुकोरसिद्धः' (६. १. ८६) इति सूत्रम् । तद्धि कोऽसिचत् कोऽस्येत्यादौ षत्वनिवारणार्थं क्रियते । यदि चासिद्धपरिभाषा प्रवर्तेत, बहिरङ्गत्वेनैकादेशस्यासिद्धतया षत्वाप्राप्तेः किं सूत्रेण । तत् क्रियमाणं 'नाजानन्तर्ये'ति परिभाषां ज्ञापयति । अत्र चाचोरिति द्वित्वं विवक्षितम् । तेनान्तरङ्गे बहिरङ्गे वाचोरानन्तर्यमाश्रीयते (यत्र) तत्रैवेयं परिभाषा प्रवर्तत इति हरदत्तः । तन्न । पचावेदमित्यादौ एत ऐत्वमाशङ्क्य बहिरङ्गत्वेन गुणस्यासिद्धत्वादिति स्थलान्तरीयस्वग्रन्थविरोधात् । किञ्च, बहिरङ्गस्यासिद्धतावलेन प्रेच्छमित्यादिसिद्धिरिति प्रतिपादनपरनधातुलोपसूत्रस्थभाष्यविरोधापत्तेश्च । तस्माद् धर्मिग्राहकमानानुरोधेनोत्तरकालप्रवृत्तकार्ये यत्राजानन्तर्यं, तत्र 'नाजानन्तर्य' इति निषेधः । अस्ति ह्युत्तरकालप्रवृत्तकार्ये षत्वेऽजानन्तर्याश्रयणम्, इणः परस्य सस्येत्युक्तेः । एतच्च न धातुलोपसूत्रे (१.१.४) 'अचः परस्मिन्—' (१. १. ५७) इति सूत्रे च शब्दकौस्तुभे विप्रतिषेधसूत्रे (१. ४. २) भाष्ये च स्पष्टम् ॥ ५९ ॥

वार्णादाङ्गं बलीयः ॥ ६० ॥

युगपत् प्रवृत्तौ समानाश्रये च वार्णापेक्षयाङ्गं बलवदित्यर्थः । युच्छतीत्यत्र गुणवारणाय युगपत्पदम् । कार इत्यादावतिव्याप्तिवारणाय समानाश्रय इति । तेनोहतुरित्यादौ सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद् ह्व(स्वात् ? स्वः) प्राप्तो न भवति, सकृत् प्रवृत्तत्वात् । आङ्गत्वाद्धि पर्जन्यवल्लक्षणप्रवृत्तौ ह्रस्वे कृते ततो दीर्घः, 'वार्णादाङ्गं बलीय' इति न्यायाद् इति सिद्धान्तकौमुदी। (व्याख्याता?) अत्र च 'अङ्गस्य' (६.४.१) 'आडजादीनाम्' (६.४.७२) इत्यादिसूत्रस्थभाष्ये व्याश्रयाणामपि प्रयोजनानामुपन्यासात् समानाश्रयत्वविशेषणमनावश्यकमित्याहुः । इयं च परिभाषा 'अभ्यासस्यासवर्णे'(६. ४. ७८) इत्यसवर्णग्रहणेन ज्ञापितेति षष्ठे प्रथमाह्निकान्ते भाष्ये स्थितम् । तद्धि ईषतुरूषतुरित्यादिवारणाय नोपयुज्यते, अन्तरङ्गेण सवर्णदीर्घेणेयङुवङोर्बाधात् । अतश्च क्रियमाणमसवर्णग्रहणम् (बहिरङ्ग ? इमां) परिभाषां ज्ञापयति । अनित्या चेयं, 'च्छ्वोः शूडनुनासिके च' (६.४. १९) इति सूत्रे सतुक्ग्रहणात् । स हि तुकः श्रवणं मा भूदिति क्रियते । यदि च पूर्वं शादेशः स्यात् । ततस्तुकोऽप्राप्तेस्तद्वैय्यर्थ्यं स्पष्टमेवेति 'येन विधिः'(१. १. ७२) इति सूत्रे कैयटे 'अचः परस्मिन्—' (१. १. ५७) इति सूत्रे कौस्तुभे च विस्तरेण प्रपञ्चितम् ॥ ६० ॥

अकृतव्यूहाः पाणिनीयाः ॥ ६१ ॥

विशिष्ट ऊहो येषां ते व्यूहाः । अकृताश्च ते व्यूहाश्चाकृतव्यूहाः । निमित्तनिर्णयविरहे कार्यं न कुर्वन्तीत्यर्थः । अस्याश्च ज्ञापकं 'गोरतद्धितलुकि' (५. ४. ९२) इति सूत्रस्थातद्धितग्रहणम् । तद्धि राजगवीयतीत्यादौ सुपो लुकः सत्त्वेन टज्निषेधो माभूदिति क्रियते । अन्यथान्तरङ्गत्वाट्टच्सिद्धौ किं तेन । अस्याश्च प्रवृत्तौ निमित्तविनाशसम्भावनैव निमित्तं, न तु विनाश इति ध्येयम् । 'समर्थानां प्रथमाद्—' (४. १. ८२) इत्यत्र समर्थग्रहणमपि ज्ञापकमिति दिक् । इयं चानित्या, 'अल्लोपोऽनः' (६. ४. १३४) इति सूत्रे तपरकरणात् । तद्धि अनितेः क्विप्यानित्यत्र लोपाभावाय क्रियते । अन्यथा दीर्घाभावे लोपसम्भावनासत्त्वेनानया तदप्रवृत्तौ तद्वैय्यर्थ्यं स्पष्टमेवेत्याहुः ॥ ६१ ॥

अन्तरङ्गापि विधीन् बहिरङ्गो ल्यब् बाधते ॥ ६२ ॥

स्पष्टम् । 'अदो जग्धिर्ल्यप्ति किति' (२. ४. ३६) इति सूत्रे ल्यब्ग्रहणमत्र ज्ञापकमिति तत्रैव सूत्रे भाष्ये स्पष्टम् ॥ ६२ ॥

अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ॥ ६३ ॥

स्पष्टम् । तेन गोमत्प्रिय इत्यादिसिद्धिः । अन्यथा लुकः प्रागन्तरङ्गप्रवृत्तौ नुम् स्यात् । अत्र च ज्ञापकं 'प्रत्ययोत्तरपदयोश्च' (७. २. ९८) इति सूत्रे उत्तरपदग्रहणम् । प्रत्ययग्रहणं त्वाचारक्विबन्तादौ चरितार्थम् । न च तदपि

तव पुत्रस्त्वत्पुत्र इत्यादौ तवममादिबाधनेन चरितार्थमिति वाच्यम्। 'त्वमौ—' (७. २. ९७) इति सूत्रे मपर्यन्तस्यैव स्थानित्वनिर्णयेनाधिकस्य स्थानित्वे मानाभावेन सर्वादेशत्वाभावे सिद्धे पुनर्मपर्यन्तानुवृत्तिर्वाक्यभेदेन पुनर्विधानार्थास्यार्थस्य ज्ञापिकेति भाष्ये स्पष्टम्। इयं च न सामासिकलुङ्मात्रविषया, किन्तु लुङ्मात्रविषयैव। अन्यथा 'एङ्ह्रस्वात् सम्बुद्धेः' (६. १. ६९) 'न यासयोः' (७. ३. ४५) इत्यादिसूत्रस्थाकरविरोधापत्तेः। तथा च लुक्स्थानिभूतप्रत्ययनिमित्तकान्तरङ्गकार्यापेक्षयैव लुकः प्राबल्यमनया बोध्यते, धर्मिग्राहकमानात् प्रत्यासत्तेश्चेति। इयमप्यकृतव्यूहपरिभाषान्तर्गतैवेति ध्येयम्॥ ६३॥

निमित्तापाये नैमित्तिकस्याप्यपायः॥ ६४॥

स्पष्टम्। यथापेक्षाबुद्धिनाशे द्वित्वनाशो न्यायनये, प्रारब्धनाशाद् विक्षेपनाशो वेदान्तिनां, तथेति भावः। 'घुमास्था—' (६. ४. ६६) इति निर्देशोऽपि ज्ञापकः। इयमपि 'अकृतव्यूहा' इत्यस्या एव प्रपञ्चः॥ ६४॥

कृतमपि निवर्तयन्ति॥ ६५॥

इत्येषाप्येवमेव॥ ६५॥

उपजनिष्यमाणनिमित्तोऽप्यपवाद उपजातनिमित्तमप्युत्सर्गं बाधते॥ ६६॥

कालान्तरभाविनिमित्तोपजीव्यपवादः कलृप्तनिमित्तमपि सामान्यं बाधत इत्यर्थः। तेन दधतीत्यत्रान्ता-

देशं बाधित्वाभ्यस्ताश्रयोऽदादेश एव। इयमप्यकृतव्यूह-परिभाषान्तर्गतैव, अपवादविषयाभावस्यापि निमित्त-कोटौ प्रवेशात्। स्पष्टं चैतद् 'उभेऽभ्यस्तम्' (६. १. ५) इति सूत्रे भाष्ये ॥ ६६ ॥

स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ ६७ ॥

स्वरोद्देश्यक(विधा?)विधावित्यर्थः। इदं च 'समा-सस्य' (६. १. २२३.) इति सूत्रे भाष्ये स्पष्टम्। 'नोत्तरपदे-ऽनुदात्तादौ—' (६. २. १४२) इत्यत्रेयं ज्ञापितेति स्पष्टं तत्रैव ॥ ६७ ॥

हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ॥ ६८ ॥

स्पष्टम्। 'यतोऽनावः' (६. १. २१३) इत्यत्रानाव इति प्रतिषेधोऽस्य ज्ञापक इति स्पष्टं तत्रैव ॥ ६८ ॥

निरनुबन्धकग्रहणे न सानुबन्धकस्य ॥ ६९ ॥
तदनुबन्धकग्रहणे नातदनुबन्धकस्य ॥ ७० ॥

केवलोपादानेऽनुबन्धसहितस्यान्यानुबन्धकग्रहणे द्व्यनुबन्धविशिष्टस्य च ग्रहणं नेत्यर्थः। अनयोश्च ज्ञापकं 'वामदेवाड्ड्यड्ड्यौ' (४. २. ९) इत्यत्र ड्यड्ड्ययोर्डित्त्वम्। तद्धि 'यतोश्चातदर्थे' (६. २. १५६) इत्यत्रानयोरग्रह-णार्थं सत् परिभाषाद्वयं ज्ञापयतीति 'वामदेवाड्ड्यड्ड्यौ' इति सूत्रे भाष्ये स्पष्टम्। 'दिव औत्' (७. १. ८४) इत्यत्रास्य भाष्ये सञ्चारितत्वात् प्रत्यया-

प्रत्ययविषयेय(मिति) वदन्ति । वर्णग्रहणे चैतयोरप्रवृत्तिरिति 'औङ आपः' (७. १. १८) इति सूत्रे भाष्ये स्पष्टम् ॥ ७० ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ ७१ ॥

प्रत्ययविधौ गृह्यमाणेन प्रातिपदिकेन 'येन विधिः —' (१. १. ७२) इति प्राप्तस्तदन्तविधिर्नेत्यर्थः । इयं च 'समासप्रत्ययविधौ प्रतिषेध' इत्यार्थिकार्थानुवादिका । अत एव स्वस्रादौ तदन्तविधिः सङ्गच्छते । अत एव 'येन विधिरि'ति सूत्रे भगवता नेयमुक्ता । एतच्च 'असमासे निष्कादिभ्यः' (५. १. २०) इति सूत्रे भाष्यकैयटयोः स्पष्टम् । अस्याश्च ज्ञापकं 'पूर्वादिनिः' (५. २. ८६) इत्येव सिद्धे 'सपूर्वाच्च' (५. २. ८७) इति सूत्रम् ॥ ७१ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ७२ ॥

गृह्यमाणेन प्रातिपदिकेन व्यपदेशिवद्भावो नास्तीत्यर्थः । प्रत्ययविषया चेयम् । 'पूर्वादिनिः' (५. २. ८६) 'सपूर्वाच्च' (५. २. ८७) इति योगविभागकरणमस्या ज्ञापकमिति 'येन विधिः—' (१. १. ७२) इत्यत्र भाष्ये स्पष्टम् ॥ ७२ ॥

स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ ७३ ॥

'णचः स्त्रियामञ्' (५. ४. १४) इत्यत्र स्त्रियांग्रहणं ज्ञापकमस्याः । अन्यथा 'कर्मव्यतिहारे णच् स्त्रियाम्' (३. ३. ४३) इति णचः स्त्रियामेव विधानात् किं स्त्रियामित्यनेन ॥ ७३ ॥

समासान्तविधिरनित्यः ॥ ७४ ॥

'प्रतेरंश्वादयस्तत्पुरुषे' (६. २. १९३) इति सूत्रेऽन्तोदात्तार्थम् अंश्वादिषु राजञ्छब्दस्य पाठोऽस्या ज्ञापकः । अन्यथा 'राजाहःसखिभ्यष्टच्' (५. ४. ९१) इति टचि चित्त्वादेवोदात्तत्वे सिद्धे किं तदुपादानेनेति वृद्धिसूत्रे शब्दकौस्तुभे स्पष्टम् ॥ ७४ ॥

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ ७५ ॥

सन्निपातो द्वयोः सम्बन्धः, तन्निमित्तो यो विधिः स तयोः सन्निपातविघातकविधेरनिमित्तमित्यर्थः । तेन शतानि सहस्राणीत्यत्र नुमि कृते नान्तत्वात् 'ष्णान्ता षट्' (१. १. २४) इति प्राप्ता षट्संज्ञा न भवति, विभक्तिसन्नियोगेन जातस्य नुमः षट्संज्ञाप्रयोजकत्वे सति 'षड्भ्यो लुक्' (७. १. २२) इति लुकि विभक्तिसन्निपातविघातकत्वापत्तेः । अत्र च ज्ञापकं 'वामि ह्रस्वश्चे'ति सूत्रमकृत्वा 'वामि' (१. ४. ५) 'ङिति ह्रस्वश्च' (१. ४. ६) इति सूत्रद्वयकरणम् । तद्धि भ्रूणामित्यादौ नुड् यथा स्यादित्येतदर्थम् । नुटि अजादिप्रत्ययसम्बन्धस्य

विनाशाद् यादृशानुपूर्वीसम्बन्धेन कार्यं, तादृशानुपूर्वीसम्बन्धविनाशेऽप्येषा प्रवर्तत इति स्पष्टं 'कृन्मेजन्तः' (१. १. ३९) इति सूत्रे भाष्ये। इयं चानित्या, 'कष्टाय क्रमणे' (३. १. १४) इत्यादिनिर्देशात्। अन्यथाकारान्तसन्निपातेन यादेशस्यादन्तविधातकत्वायोगात्। तेन दाक्षिरित्यादावकारान्ताज्जातस्येञोऽङ्गसंज्ञानिमित्तत्वेनाङ्गसंज्ञाया अल्लोपनिमित्तत्वं नेति 'कृन्मेजन्त' इति सूत्रे भाष्ये स्पष्टम् ॥ ७५ ॥

प्रकृतिग्रहणे यङ्लुगन्तस्य ग्रहणम् ॥ ७६ ॥

आटिटदित्यादौ णिलोपवारणाय द्विःप्रयोगो द्विर्वचनं षाष्ठमिति सिद्धान्ताज्जुहुधीत्यादौ कृते द्वित्वे धित्ववत् कृतद्वित्वयङ्लुगन्तेऽपि प्रकृतिप्रयुक्तकार्यसिद्धिरिति भावः। तथा च न्यायसिद्धेयमिति फलितम् ॥ ७६ ॥

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः ॥ ७७ ॥

स्पष्टम्। अत्र च ज्ञापकं 'बिल्वकादिभ्यश्छस्य लुक्' (६. ४. १५३) इति सूत्रे छग्रहणमित्येके, समुच्चयार्थकचशब्दयोगे विधेययोरैककालिकत्वैकदेशिकत्वानियमान्न्यायसिद्धेयमित्यन्ये ॥ ७७ ॥

संज्ञापूर्वको विधिरनित्यः ॥ ७८ ॥

अत्र च ज्ञापकम् 'ओरोदि' ति वक्तव्ये गुणग्रहणम्। इयं च विधेयकोटौ संज्ञापूर्वकत्व एव प्रवर्तते। तेन 'स्वं

रूपं—'(१. १. ६८), 'अणुदित्—' (१. १. ६९) इत्यादौ प्रवृत्त्यभाव इत्याहुः ॥ ७८ ॥

ताच्छीलिकेऽप्यणकृतं भवति ॥ ७९ ॥

ताच्छील्याद्यर्थे विहितप्रत्ययेष्वणकार्यं भवतीत्यर्थः । 'अन्' (६. ४. १६७) इति अणि विहितप्रकृतिभावबाधनार्थेन 'कार्मस्ताच्छील्ये' (६. ४. १७२) इति निपातेनैषा ज्ञाप्यत इत्यन्यत्र विस्तरः ॥ ७९ ॥

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥ ८० ॥

धातुस्वरूपोपादाने धातुशब्दव्यापारेण विहितप्रत्यये कार्यविज्ञानमित्यर्थः । अत्र च ज्ञापकं भ्रौणहत्ये तत्वनिपातनम् । अन्यथा 'हनस्तः—' (७. ३. ३२) इत्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। अत्र स्वरूपग्रहणं यथाकथञ्चिद्, न तु शृङ्गग्राहिकयोपादानमिति 'मृजेर्वृद्धिः' (७. २. ११४) इति सूत्रे भाष्ये स्पष्टम् । तेन परिमृड्भ्यामित्यादौ 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्'(६.१.५९) इत्यमागमो न। इयं च पदान्तनिमित्तकार्ये न, अप्रशानिति निषेधाल्लिङ्गात् । 'न भूसुधियोः' (६. ४. ८५) इति निषेधेनानित्यत्वज्ञापनादियङ्(पि?दि)विधावपि नेति ज्ञेयम् ॥ ८० ॥

तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ८१ ॥

'येन विधिः—' (१. १. ७२) इति सूत्रे भाष्ये स्पष्टम् ॥ ८१ ॥

तदेकदेशस्तद्ग्रहणेन गृह्यते ॥ ८२ ॥

इति तत्रैव भाष्ये स्पष्टम् ॥ ८२ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम् ॥ ८३ ॥

अत्र च ज्ञापकं 'स्वरतिसूति—'(७. २. ४४) इति सूत्रे सूतिसूयत्योः पृथङ्निर्देशः । अन्यथा सूङ इत्येव वदेत् । इयं च 'गातिस्था—' (२. ४. ७७) इति सूत्रे भाष्ये स्पष्टा ॥ ८३ ॥

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ८४ ॥

अनूद्यमानविशेषणेषु नोपतिष्ठते, किन्तु विधावेवेत्यर्थः । इयं च साक्षाद् विध्यङ्गभूतानां साक्षाद्विधेयेनासिद्धत्वादन्वयासम्भवे तद्विशेषणव्यवस्थापकत्वेन चरितार्थानां तद्विशेषणव्यवस्थापकत्वे मानाभाव इति तर्कमूलेयमित्येके । 'उदीचामातः स्थाने—' (७. ३. ४६) इति स्थानेग्रहणमस्या ज्ञापकमित्यन्ये ॥ ८४ ॥

प्रकृतिग्रहणे ण्यधिकस्य ग्रहणम् ॥ ८५ ॥

केवलधातुग्रहणे णिजन्तस्यापि ग्रहणमित्यर्थः । 'हेरचङि' (७. ३. ५६) इति सूत्रेऽचङीति प्रतिषेधेनास्या ज्ञापनात् कुत्वमात्रविषयेयमिति भाष्ये स्पष्टम् ॥ ८५ ॥

अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ८६ ॥

अङ्गे अङ्गाधिकारे वृत्तं वर्तनं यस्य तदङ्गवृत्तं शास्त्रम् । तस्मिन् कृते सति पुनः शास्त्रान्तरं न प्रवर्त्तत इत्य(र्थेन ? र्थः । तेन) यूयं वयमित्यत्र शेषे लोपोऽन्तलोप इति पक्षे जसः शीभावो न । एषा च परिभाषा

'ज्यादादीयसः' (६. ४. १६०) इति सूत्रे भाष्ये ज्ञापिता। अन्यथा ज्यायानित्यत्रेयसुन ईकारस्य 'बहोर्लोपः—' (६. ४. १५८) इत्यतो लोपमनुवर्त्य लोपं विधाय 'अकृत्सार्वधातुकयोः—'(७. ४. २५) इति दीर्घेण च सिद्धे किमाद्विधानेनेति। अनित्या चेयं, द्वयोरित्यादिनिर्देशात्। अनित्यत्वबललभ्यार्थाभिप्रायेण वा 'भ्यसो भ्यम्' (७. १. ३०) इति सूत्रे निष्ठितस्येति पठितम्॥ ८६ ॥

आगमशास्त्रमनित्यम् ॥ ८७॥

'नि लोडि'त्येव सिद्धे आनिग्रहणमत्र लिङ्गम्। तेन 'सागरं तर्तुकामस्ये'त्यादि सिद्धम् ॥ ८७ ॥

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः ॥ ८८॥

कृत्रिमं स्वशास्त्रसङ्केतितम्। अनित्या चेयम्। 'सङ्ख्याया अतिशदन्तायाः कन्' (५. १. २२) इति सूत्रे शदन्तपर्युदासात्। स्पष्टं चैतत् सङ्ख्यासंज्ञासूत्रे भाष्ये ॥ ८८ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः ॥८९॥

अन्तरङ्गोपजीव्यापेक्षयापि प्रधानप्राबल्यस्य लोके दृष्टत्वान्न्यायमूलिका चेयम्। 'हेतुमति—' (३. १. २६) इति सूत्रे भाष्यकैयटयोः स्पष्टमेतत् ॥ ८९ ॥

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥९०॥

उक्तन्यायमूलिकेयम्। तेन नमस्करोति देवानिति सिद्धम् ॥ ९० ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ ९१ ॥

योगजन्यबोधे रूढिजन्योपस्थितिः प्रतिबन्धिकेति रथकाराधिकरणन्यायसिद्धेयम् ॥ ९१ ॥

गणकार्यमनित्यम् ॥ ९२ ॥

'तनादिकृञ्भ्यः—' (३. १. ७९) इति सूत्रे कृञ्ग्रहणमत्र लिङ्गम् । तेन 'न विश्वसेदि'त्यादि सिद्धम् ॥ ९२ ॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ ९३ ॥

'व्याख्यानत—' इत्यस्य प्रपञ्चोऽयम् । 'लटः शतृ—' (३. २. १२४) इत्यादौ भाष्ये स्पष्टम् ॥ ९३ ॥

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ९४ ॥

अन्त्यसदेशासदेशयोरेकप्रयोगे युगपत् प्राप्तावन्त्यसदेशस्येत्यर्थः । अदमुयङ् । 'ष्यङः सम्प्रसारणम्—' (६. १. १३) इति सूत्रे भाष्येऽस्याः परिभाषायाः प्रयोजनेऽन्यथासिद्धिप्रदर्शनेनेयं प्रत्याख्याता ॥ ९४ ॥

नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ ९५ ॥

अभ्यासविकारं वर्जयित्वानर्थकेऽलोन्त्यविधिर्नेत्यर्थः । अस्या ज्ञापकम् 'इदोऽय् पुंसि' (७. २. १११) इति सूत्रस्थमिद्ग्रहणम् । अन्यथा 'इदमो मः' (७. २. १०८) 'दश्च' (७. २. १०९) 'यः सौ' (७. २. ११०) 'अय् पुंसि' इत्येव वदेत् । अनभ्यासविकार इति तु 'अर्तिपिपर्त्योश्च' (७. ४. ७७) इति निर्देशेन ज्ञाप्यते । इयं चोपधासंज्ञासूत्रे भाष्ये प्रत्याख्याता ॥ ९५ ॥

विधिनियमसम्भवे विधिरेव ज्यायान् ॥ ९६ ॥

मीमांसकानां परिसङ्ख्याविधेर्वैयाकरणैर्नियमविधित्वेन व्यवहारात् । परिसङ्ख्यायाश्च स्वार्थहानिः परार्थपरिकल्पना, प्राप्तबाधश्चेति दोषत्रयविशिष्टत्वाद् नियमविध्यपेक्षयात्यन्ताप्राप्तार्थप्रापकापूर्वविधिरेव युक्त इति भावः ॥ ९६ ॥

सामान्यातिदेशे विशेषानतिदेशः ॥ ९७ ॥

सामान्योपस्थितिकाले नियमेन विशेषोपस्थापकसामग्र्यभावाद् न्यायमूलिकेयम् । तेन 'आशंसायां भूतवच्च' (३. ३. १३२) इति लुङ एवातिदेशो न लङ्लिटोः । 'न ल्यपि' (६. ४. ६९) इति लिङ्वदानित्येयमित्याहुः ॥ ९७ ॥

प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणम् ॥ ९८ ॥

इयं चाङ्गसूत्रे भाष्ये पठिता । तत्रैव कैयटे वर्णग्रहणे न प्रवर्तत इत्यपि स्थितम् ॥ ९८ ॥

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम् ॥ ९९ ॥

सहचरणसम्बन्धज्ञानमूलकतदर्थमात्रतात्पर्यग्रहोऽस्या बीजम् । यथा रामलक्ष्मणावित्युक्ते दाशरथेरेव बोधः ॥ ९९ ॥

श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् ॥ १०० ॥

अत्र श्रुतत्वं साक्षाच्छ्रूयमाणत्वम् । अनुमितत्वं सामान्यरूपेण प्रतीतिविषयत्वम् । तेन विशेषविषयानु-

मानात् । (तथाच?) यद्वा, अनुमितत्वं प्रकरणप्राप्तत्वम् । तथाच विलम्बितोपस्थितिकत्वापेक्षया शीघ्रोपस्थितिकत्वस्य लघुत्वादिति भावः । तेन 'अस्थिदधि—' (७. १. ७५) इत्यादौ लिङ्गं श्रूयमाणास्थ्यादीनामेव विशेषणं, न त्वङ्गस्येत्यतिदिश्य ब्राह्मणेनेति सिद्धम् । अनित्या चेयं 'तस्मादित्युत्तरस्य' (१. १. ६७) इति लिङ्गादित्याहुः ॥ १०० ॥

श्रुतानुमितयोः श्रुतेनैव सम्बन्धः ॥ १०१ ॥

इयमपि पूर्वस्यैव प्रपञ्चभूता ॥ १०१ ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ १०२ ॥

लाक्षणिकत्वं विलम्बितोपस्थितिकत्वम् । तदपेक्षया शीघ्रोपस्थितिकत्वमेव युक्तमिति लौकिकन्यायमूलिकेयमिति स्पष्टं कैय्यटादिषु । एतच्च 'ओत्' (१. १. १५) इति सूत्रे भाष्ये स्पष्टम् ॥ १०२ ॥

गामादाग्रहणेष्वविशेषः ॥ १०३ ॥

एषु लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इत्यर्थः । अत्र च ज्ञापकं दैपः पित्त्वम् । तद्धि अदाबिति सामान्यग्रहणार्थम् । लाक्षणिकत्वादेवाग्रहणे सिद्धे किं निषेधसामान्यग्रहणार्थेन पित्त्वेन । इयं च लक्षणप्रतिपदोक्तपरिभाषाया निरनुबन्धकपरिभाषाया लुग्विकरणपरिभाषायाश्च बाधिका, येन नाप्राप्तन्यायात् । साहचर्यपरि-

भाषाया अर्थवत्परिभाषायाश्च बाधिकेयमित्येके । नेत्यन्ये । 'दाधा घु—' (१. १. २०) इति सूत्रे भाष्ये स्पष्टा ॥ १०३ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ १०४ ॥

यथा 'वृद्धिरादैच्' (१. १. १) इत्यत्र । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्यादौ भुजिवत् ॥ १०४ ॥

क्वचित् सेमुदायेऽपि ॥ १०५ ॥

यत्रान्वर्थतादिकं गमकं, तत्रेति भावः । यथा संयोगसंज्ञायां द्वयोर्बहूनां वा संयोगसंज्ञा । यथा वा गर्गाः शतं दण्ड्यन्तामित्यत्र अर्थिनश्च राजानो हिरण्येन भवन्तीति वाक्यशेषात् समुदाये वाक्यपरिसमाप्तिः ॥ १०५ ॥

उभयथापि वाक्यपरिसमाप्तिः ॥ १०६ ॥

यथा 'अट्कुप्वाङ्—' (८. ४. २) इत्यत्र, यथा-वा गर्गैः सह न भोक्तव्यमित्युक्ते समुदितैः प्रत्येकं च न भुज्यते, तद्वत् । त्रितयं चैतन्न्यायसिद्धं, व्याख्यानगम्यं चेति ध्येयम् ॥ १०६ ॥

अभेदका गुणाः ॥ १०७ ॥

उदात्तादयो गुणा भेदकरा न भवन्तीत्यर्थः । मुण्डित्वजटिलत्वादिभिर्देवदत्तस्यान्यत्वाभावाद् न्यायसिद्धेयम् । 'अनडुदात्त' इत्युदात्तग्रहणमपि ज्ञापकम् । अन्यथा अनड् उदात्तगुण एवोच्चार्येत । एतच्च वृद्धिसूत्रे

भाष्ये स्पष्टम्। 'अणुदित्—'(१. १. ६९) सूत्रेऽण्ग्रहणाद-नित्येयमिति ध्येयम् ॥ १०७ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ १०८ ॥

'येन विधिः—' (१. १. ७२) इत्यस्यायं प्रपञ्च इत्यवोचाम । इयं चोत्तरपदाधिकारेऽपि प्रवर्तते । परं तूत्तरपदशब्दं विशेष्यं कृत्वा तद्विशेषणे तु न प्रवर्तते। 'हृदयस्य हृल्लेख—' (६. ३. ५०) इति लेखग्रहणाल्लिङ्गात् ॥ १०८ ॥

बाधकान्येव निपातनानि ॥ १०९ ॥

शास्त्रेण प्राप्तकार्यस्य बाधकं निपातनमित्यर्थः। तेन सर्वनामानीत्यत्र 'पूर्वपदात् संज्ञायाम्—'(८. ४. ३) इति णत्वाभावः । एतच्च 'सर्वादीनि—' (१. १. २७) इति सूत्रे भाष्ये स्पष्टम् । तक्रकौण्डिन्यन्यायमूलकमेतत्॥ १०९॥

अबाधकान्यपि निपातनानि ॥ ११० ॥

'तयोरेव कृत्य—' (३. ४. ७०) इति सूत्रे एवकारेण तक्रकौण्डिन्यन्यायस्यानित्यत्वज्ञापनात् तन्मूलिकेयम् । एतच्च वृत्त्यादिषु स्पष्टम् ॥ ११० ॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १११ ॥

'कृतकारि खल्विदं शास्त्रं मेघवदि'ति 'इको झल्' (१. २. ९) इति सूत्रस्थभाष्येण न्यायसिद्धेयम्। तेन ऊख-

तुरित्यादौ ह्रस्वस्याप्यभ्यासह्रस्वत्वे ततो दीर्घे पुनर्ह्रस्वो न भवति, 'लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरि'ति न्यायात् ॥ १११ ॥

लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः ॥ ११२ ॥

यथोक्तविषयेषु ह्रस्वाप्रवृत्तिः । 'इरयो रे' (६. ४. ७६) इति द्विवचननिर्देशोऽस्या ज्ञापक इति स्पष्टम् 'एकः पूर्वपरयोः (६. १. ८४) इति सूत्रे भाष्ये ॥ ११२ ॥

निषधाश्च बलीयांसो भवन्ति ॥ ११३ ॥

तासिलादिषु जातीयदेशीययोर्ग्रहणं चास्या लिङ्गम् । अन्यथा 'पुंवत्कर्मधारय —' (६. ३. ४२) इति सिद्धे तद्वैयर्थ्यं स्पष्टमेव । एतच्च 'न लुमताङ्गस्य' (१. १. ६३)'कर्मेर्णिङ्' (३. १.३०)इत्यादौ भाष्ये स्पष्टम् ॥ ११३ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ ११४ ॥

अर्थाकाङ्क्षायामन्यानुपस्थितिरस्या बीजम् । स्पष्टं च 'सुपिस्थः' (३. २. ४) इत्यत्र भाष्ये ॥ ११४ ॥

योगविभागादिष्टसिद्धिः ॥ ११५ ॥

न त्वनिष्टापादनं कार्यमित्यर्थः । तत्तत्समानविधिकद्वितीययोगेन विभक्तस्य *ज्ञापनाद्येतद्बीजम् ॥११५॥

पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते ॥ ११६ ॥

---

* 'अनित्यत्वज्ञापनमेतद्बीजमि'ति परिभाषेन्दुशेखरः ।

तत्र तत्र 'अन्यतरस्यां' 'विभाषा' 'वा' इति सूत्रनिर्देशादिदं सिद्धम् ॥ ११६॥

यथोद्देशं संज्ञापरिभाषम् ॥ ११७ ॥

संज्ञाशास्त्रं परिभाषाशास्त्रं च यत्रोपदिष्टं, तत्रैवेत्यर्थः । इदं यथाश्रुतग्राहिप्रतिपत्त्रपेक्षया । धृतराज्ञामित्यादिनिर्देशाश्चास्या लिङ्गम् ॥ ११७॥

कार्यकालं संज्ञापरिभाषम् ॥ ११८ ॥

यत्र कार्यं तत्रोभयोरुपस्थितिरित्यर्थः । अत्र च 'वृद्धिरादैच्' (१. १. १) इत्यत्र त्रैपादिकस्य रोरुकारस्येत्संज्ञायुक्तलोपकरणं ज्ञापकम् । इत्त्वे हि लोपस्तत्सामर्थ्यादेव सिद्धः । युक्तिसिद्धा चेयम् ॥ ११८॥

ज्ञापकसिद्धं न सर्वत्र ॥ ११९ ॥

तत्र तत्र परिभाषाणामनित्यत्वज्ञापनमूलमेतत् ॥ ११९॥

उभयत आश्रयणे नान्तादिवत् ॥ १२० ॥

इयम् 'अन्तादिवच्च' (६. १. ८५) इति सूत्रे भाष्ये स्पष्टा । नह्युभयोस्तुल्ययोरेकः प्रेष्यो विरुद्धकार्यकृद् भवति, किन्तु द्वयोरपि कार्यकृन्न भवतीति न्यायसिद्धमित्यपि तत्रैव । तेन अभीयादित्यादिसिद्धिः ॥ १२० ॥

समासप्रत्ययविधौ प्रतिषेधः ॥ १२१ ॥

तदन्तविध्यपवादः । तेन कृष्णं परमश्रितः, सूत्रनड इत्यादौ समासप्रत्ययाभावः ॥ १२१ ॥

उगिद्वर्णग्रहणवर्जम् ॥ १२२ ॥

पूर्वोक्तस्यापवादः । उगिद्ग्रहणं वर्णग्रहणं च वर्जयित्वेत्यर्थः । तेनातिमहतीत्यादिसिद्धिः । एतदुभयमपि 'येन विधिः—' (१. १. ७२) इति सूत्रे वार्त्तिकत्वेन भाष्ये पठितम् । 'दित्यदिति—' (४. १. ८५) इति सूत्रेऽदितिग्रहणमाद्यस्य ज्ञापकमित्याहुः ॥ १२२ ॥

वर्णाश्रये नान्तादिवत् ॥ १२३ ॥

इयमपि 'अन्तादिवच्च' (६. १. ८५) इति सूत्रे भाष्ये वार्त्तिकत्वेन पठिता ॥ १२३ ॥

यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावः ॥ १२४ ॥

न त्वादिष्टादच इत्यर्थः । 'अचः परस्मिन्—' (१. १. ५७) इति सूत्रवार्त्तिकसिद्धार्थकथनमेतत् । 'ह्वावामश्च' (३. २. २) इति सूत्रे भाष्ये स्पष्टम् ॥ १२४ ॥

एकदेशविकृतमनन्यवद् भवति ॥ १२५ ॥

स्थानिवत्सूत्रे वार्त्तिकत्वेन भाष्ये पठिता । स्थानिवत्सूत्रादेशग्रहणसिद्धार्थकथनमेतत् ॥ १२५ ॥

पूर्वत्रासिद्धीयमद्विर्वे ॥ १२६ ॥

'सर्वस्य द्वे' (८. १. १) इति सूत्रे वार्त्तिकत्वेन पठितम् । 'न मु ने' (८. २. ३) इत्यत्र योगविभागसिद्धं च। इदं च द्वित्वाश्रयवर्णस्यान्यस्य वासिद्धत्वे कार्ये सर्वत्र प्रवर्तते । अप्रवृत्तौ मानाभावात् । इयं च 'उभौ साभ्यासस्य—' (८. ४. २१) इति लिङ्गादनित्या ॥ १२६ ॥

णौ कृतं द्वित्वे न स्थानिवत् ॥ १२७ ॥

इदं च 'द्विर्वचनेऽचि' (१. १. ५९) इति सूत्रे भाष्ये वार्त्तिकत्वेन पठितम् । 'ओः पुयण्ज्यि—' (७. ४. ८०) इति सूत्रे पययोरिति वक्तव्ये वर्गप्रत्याहारग्रहोऽस्या लिङ्गमिति 'ऊन परिहाण' इति धातौ सिद्धान्तकौमुदीमनोरमयोः, 'द्विर्वचनेऽचि' (१. १. ५९) इति सूत्रे कौस्तुभे च विस्तरेण प्रपञ्चितम् ॥ १२७ ॥

पूर्वत्रासिद्धीये न स्थानिवत् ॥ १२८ ॥

'न पदान्त—' (१. १. ५८) इति सूत्रे वार्त्तिकमिदं त्रिपाद्यसिद्धत्वन्यायमूलकम् ॥ १२८ ॥

सन्देहे बहुवचनं प्रयोक्तव्यम् ॥ १२९ ॥

सन्देहजन्यप्रश्नादावित्यर्थः । तेन कतीत्यस्य नित्यबहुवचनान्तत्वमेव । द्वयोरेकस्मिन् वा सन्देहस्यैवासत्त्वेन न्यायसिद्धमेतत् । सन्देहविषयस्य च बहुत्वात् ॥ १२९ ॥

पित्स्वराच्चित्स्वरो बलीयान् ॥ १३० ॥

परत्वान्न्यायसिद्धमेतत् । 'यङश्चाप्' (४.१.७४) इति सूत्रे भाष्ये स्पष्टमेतत् ॥ १३० ॥

विधिविधानविधिभाजां त्रयाणां समवधाने तदन्त विधिः (१८) ॥

व्याख्यातम् ॥

अथ प्रक्षिप्ता निर्मूलाश्च प्रदर्श्यन्ते—

उदित् सवर्णं गृह्णाति ॥ १ ॥

न सवर्णमात्रं, स्थानमात्रतुल्यं सवर्णं गृह्णातीत्यर्थः । विशिष्टस्यैव सवर्णसंज्ञाविधानाद् भाष्येऽदर्शनाच्चेयं प्रक्षिप्ता ॥ १ ॥

क्वचिद् विकृतिरपि प्रकृतिं गृह्णाति ॥ २ ॥

इयं निर्मूला भाष्याव्यवहृता च । 'निसमुपविभ्यः —' (१. ३. ३०) इत्यादौ ह्येज एवानुकरणे लक्षणवशसम्पन्नमात्वम् । अशितीति प्रसज्यप्रतिषेधः ॥ २ ॥

सम्प्रसारणं तदाश्रयकार्यं च बलवत् ॥ ३ ॥

निर्मूलेयं 'लिट्यभ्यासस्य—' (६. १.१७) इत्युभयेषांग्रहणवैयर्थ्यापातेन भाष्ये प्रत्याख्याता ॥ ३ ॥

क्रियाविशेषणानां कर्मत्वमेकत्वं क्लीबत्वं च ॥ ४ ॥

इयं भाष्यापठिता । 'ज्योतिष्टोमेन यजेते'त्यादौ करणत्वदर्शनात् फलविशेषणे कर्मत्वस्य पूर्वेणैव सिद्धे

श्च सामान्येन नपुंसकत्वस्यापि सिद्धेश्च क्रियाविशेषण-(त्वा)देव न्यायत एकत्वस्य सिद्धेश्च व्यर्था ॥ ४ ॥

औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ ५ ॥

इयं निर्मूला । तत्र तत्रोपदेशग्रहणं कुर्वतः सूत्रकृतोऽसम्मता च 'दादेर्धातोर्घः'(८. २. ३२)इति सूत्रेऽधोगित्यादौ घत्वाप्राप्तिसमाधानपरभाष्यासम्मता च ॥ ५ ॥

सर्वविधिभ्य इड्विधिर्बलीयान् ॥ ६ ॥

इयं भाष्याव्यवहृता निर्मूला च ॥ ६ ॥

सर्वविधिभ्यो लोपविधिर्बलीयान् ॥ ७ ॥

इयं भाष्याव्यवहृता निर्मूला च । आशीरित्यादौ क्किबादेरन्तरङ्गत्वाल्लोप इत्वार्थं 'प्रत्ययलोपे—'(१.१.६२) इत्यस्य चारितार्थ्यान्निष्फला च ॥ ७ ॥

प्रतिपदविधानाद् योगविभागो गरीयान् ॥ ८ ॥

इयं निर्मूला तत्र तत्र योगविभागमाश्रित्य सूत्रप्रत्याख्यानपरभाष्यविरुद्धा च ॥ ८ ॥

गर्भवदाबादयो भवन्ति ॥ ९ ॥

प्रातिपदिकस्वाद्योर्मध्य इत्यर्थः । 'न यासयोः' (७. ३. ४५) इति ज्ञापकसिद्धा । सन्निपातपरिभाषानित्यत्वमूलेयम् ॥ ९ ॥

वर्त्स्यत्प्रवृत्त्येह कार्याणि क्रियन्ते ॥ १० ॥

यथा 'शदेः शितः' (१. ३. ६०) इति। न्यायसिद्धा चेयम् ॥ १० ॥

परिभाव्य महाभाष्यं दिङ्मात्रमिह दर्शितम् ।
तेन तुष्यन्तु विबुधा मत्कृतिं वीक्ष्य सादरम् ॥

इति श्रीपदवाक्यप्रमाणपारावारीणस्य रामचन्द्राध्वरेः पौत्रेण
वरदेश्वरदीक्षितपुत्रेण नीलकण्ठदीक्षितेन
विरचिता परिभाषावृत्तिः

समाप्ता ॥

शुभं भूयात् ।

परिभाषासूची ।

	पृष्ठम्.		पृष्ठम्.
अकृतव्यूहाः	२९	उभयथापि वाक्य	४२
अङ्गवृत्ते पुन	३७	उभयनिर्देशे	१७
अनन्तरस्य वि	२३	एकदेशविकृत	४६
अनन्त्यविकारे	३९	एकयोगनिर्दि	१०
अनिनस्मन्ग्रह	८	औपदेशिक	४९
अनिर्दिष्टार्थाः	४४	कार्यकालं संज्ञा	४५
अन्तरङ्गबहिरङ्ग	१३	कृतमपि निव	३१
अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्	३०	कृत्रिमाकृत्रिम	३८
अन्तर.....ङ्गो ल्यब्	,,	कृद्ग्रहणे गति	१६
अबाधकान्यपि	४३	क्त्युट्तुमुन्खल	२५
अभेदका गुणाः	४२	क्रियाविशेषणानां	४८
अभ्यासविकारेषु	२४	क्वचित् समुदाये	४२
अर्थवद्ग्रहणे	६	क्वचिदपवाद	२०
अलैवानर्थकेन	७	क्वचिदेकदेशो	६
अवयवप्रसिद्धेः	३९	क्वचिद् विकृति	४८
असति सम्भवे	२०	गणकार्यमनि	३९
असिद्धं बहिरङ्ग	२७	गतिकारकोप	१९
अस्ति च सम्भवो	२१	गर्भवदाबादयो	४९
आगमशास्त्रम	३८	गामादाग्रहणे	४१
इतरेतराश्रया	२	गौणमुख्ययो	७
उगिद्वर्णग्रहण	४६	ग्रहणवता प्रा	३३
उणादयोऽव्यु	१०	चानुकृष्टं नोत्त	२६
उणादयो व्यु	११	ज्ञापकसिद्धं न	४५
उदित् सवर्ण	४८	णौ कृतं द्वित्वे न	४७
उपजनिष्यमाण	३१	तदनुबन्धक	३२
उपपदविभक्तेः	३८	तदेकदेशस्त	३७
उभयत आश्र	४५	तन्मध्यपतित	३६

	पृष्ठम्.		पृष्ठम्.
ताच्छीलिकेऽप्य	३६	प्रधानाप्रधान	३८
ताच्छीलिकेषु वा	२४	प्रातिपदिकम्र	१७
धातोः स्वरूप	३६	बाधकान्येव नि	४३
नञिवयुक्तमन्य	१८	भवति (हि) बहु	२६
न वर्णग्रहणेषु	७	भाव्यमानोऽण्	८
न हि कार्यी निमि	१	मध्येऽपवादाः	२२
नाजानन्तर्ये	२८	यथोद्देशं संज्ञा	४५
नानर्थकेऽलोन्त्य	३९	यदागमास्त	२
नानुबन्धकृतमनेका	४	यस्मिन्विधिस्तदा	९
नानुबन्धकृतमनेज	,,	येन नाप्राप्ते	२१
नानुबन्धकृतमसा	५	योगविभागादि	४४
निमित्तापाये	३१	यो ह्यनादिष्टादचः	४६
निरनुबन्धक	३२	लक्षणप्रतिपदो	४१
निर्दिश्यमान	३	लक्ष्ये लक्षणस्य	४४
निषेधाश्च बली	४४	लिङ्गवचनम	१८
पदाङ्गाधिकारे	१७, ४३	लुग्विकरणालु	३७
परिहृत्यापवाद	२०	वर्णाश्रये नान्ता	४६
पर्जन्यवल्लक्षण	४३	वर्णाश्रये नास्ति	५
पर्यायशब्दानां	४४	वर्त्स्यत्प्रवृत्त्येह	४९
पित्स्वराच्चित्स्वरो	४७	वार्णादाङ्गं बली	२९
पुनः प्रसङ्ग	१३	विकरणेभ्यो नि	१२
पुरस्तादपवादा	२२	विधिनियम	४०
पूर्वे धातुरुप	१४	विधिविधानं	९
पूर्वे धातुः साध	,,	विधौ परिभा	३७
पूर्वत्रासिद्धीयम	४६	विभक्तौ लिङ्ग	१८
पूर्वत्रासिद्धीये	४७	व्यपदेशिवद्ग्रा	३३
प्रकृतिग्रहणे ण्य	३७	व्यवस्थितविभा	३९
प्रकृतिग्रहणे य	३५	व्याख्यानतो वि	१
प्रकृतिवदनु	११	श्रुतानुमितयोः श्रुत	४०
प्रतिपदविधा	४९	श्रुतानुमितयोः श्रुते	४१
प्रत्ययग्रहणे चा	१५	संज्ञापूर्वको वि	३५
प्रत्ययग्रहणे य	१४	संज्ञाविधौ प्रत्य	१६
प्रत्ययाप्रत्ययोः	४०	सकृद्गतौ विप्र	१२
प्रत्येकं वाक्य	४१	सत्यपि सम्भवे	२१

	पृष्ठम्.		पृष्ठम्.
सन्देहे बहुव	४७	सर्वो द्वन्द्वो विभा	११
सन्निपातलक्ष	३४	सहचरितासह	४०
सन्नियोगशिष्टा	३५	सामान्यातिदेशे	,,
समासप्रत्यय	४५	साम्प्रतिकाभावे	२५
समासान्तविधि	३४	स्त्रीप्रत्यये चानु	१५
सम्प्रसारणं तदा	४८	स्वरविधौ व्यञ्ज	३२
सर्वविधिभ्य इ	४९	स्वार्थिकाः प्रत्य	३३
सर्वविधिभ्यो लो	,,	हलन्त्यप्राप्तौ	३२
सर्वे विधयश्छ	१४		

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL
SOCIETY.

Ready for sale.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa.	0	4	0
No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita.	2	0	0
No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary.	2	12	0
No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva.	2	0	0
No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî.	2	4	0
No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha.	0	8	0
No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2		0
No. 14 — नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	0	0
No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0

No. 16—प्रतिज्ञायौगन्धरायणम् (Do.)	Do.	1	8 0
No. 17—पञ्चरात्रम् (Do.)	Do.	1	0 0
No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya.		4	0 0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita.		1	4 0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.		1	8 0
No. 21—बालचरितम् (Do.)	Do.	1	0 0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa		1	8 0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas)		1	12 0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.		1	0 0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri		0	12 0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa		0	12 0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (1 & 2 Sargas)		1	12 0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas		0	8 0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (3rd Kânda)		2	4 0
No. 30—वास्तुविद्या (Silpa)		0	12 0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (4th, 5th, & 6th Kâṇḍas)		1	0 0
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Paṇḍita (3rd, 4th & 5th Sargas)		2	8 0
No. 33—वाररुचसंग्रहः (Vyâkaraṇa) with the commentary Dîpaprabhâ of Nârâyana		0	8 0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin		1	4 0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha		1	8 0

No. 36—कुमारसम्भवः (Kâvya)by Kâlidâsa with the two commentaries,Prakâsikâ of Arunagirinâtha and Vivaraṇa of Nârâyaṇa Pandita(6th,7th & 8th sargas) 3 0 0

No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary 0 4 0

No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Sarvânanda (1st Kânda) 2 0 0

No. 39—चारुदत्तम् (Nâtaka) by Bhâsa 0 12 0

No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Srî Mankhuka and its commentary by Samudrabandha 2 8 0

No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivaraṇa of Srî Sankara Bhagavat Pada 0 4 0

No. 42—प्रतिमानाटकम् (Nataka) by Bhâsa 1 8 0

No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakoseddhatana of Kshiraswamin and Tikasarvaswa of Vandyaghatiya-Sarvananda (Par II. 2nd Kanda 1—6 Vargas) 2 8 0

No. 44.—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama 0 4 0

No. 45.—प्रपञ्चहृदयम् (Prapanchahridaya) 1 0 0

No. 46.—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita 0 0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

TRIVANDRUM SANSKRIT SERIES

No. LIII.

श्रीप्रकाशात्मयतीन्द्रप्रणीतः

शाब्दनिर्णयः ।

THE

SÂBDANIRṆAYA

BY

PRAKÂSÂTMAYATÎNDRA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.



PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917.

(All Rights Reserved.)

TRIVANDRUM SANSKRIT SERIES

No. LIII.

THE

SÂBDANIRNAYA

BY

PRAKÂSÂTMAYATÎNDRA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.



PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917.

IM1658

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५२.

शाब्दनिर्णयः

श्रीप्रकाशात्मयतीन्द्रप्रणीतः ।

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधितः ।

स च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितः ।

कोल्लम्वर्षाब्दाः १०९२ क्रैस्ताब्दाः १९१६.

181,45

PREFACE.

Sâbdanirnaya is a treatise on the Advaita school of the Vedânta philosophy, written in the form of *Kârikas* with *Vrittis*.

The author of the work is called Prakâsâtmayatindra, a desciple of Ananyânubhava. He is also known to have written another work named Panchapâdikâvivarana from the fact that the first two invocatory verses and another two verses occurring before the last verse of the Sâbdanirnaya are found in the introductory portion of Panchapâdikâvivarana. The author flourished earlier than Vidyâranya who wrote Vivaranaprameyasangraha, an abridgement of the Panchapâdikâvivarana.

The edition of the work is based on three palm-leaf manuscripts in Malayalam characters. Two of them designated क and ख belong to Mr. Idapalli Raja; a few folios are missing in the beginning and ending respectively of these manuscripts. The third manuscript marked ग is a complete one belonging to Mr. Narayanan Numburi, Haripad.

Trivandrum,
9th April 1917.

T. GANAPATI SÂSTRÎ.

निवेदना ।

शाब्दनिर्णय इत्ययं कश्चिदद्वैतमतानुयायी वृत्तिसंवलितकारिकारूपो वेदान्तप्रकरणग्रन्थः । शब्दाद् ब्रह्मापरोक्षज्ञानं जायत इत्ययमर्थ इह प्रसाध्यते ।

अस्य प्रणेतानन्यानुभवशिष्यः प्रकाशात्मयतीन्द्रः । शाब्दनिर्णयस्य मङ्गलश्लोकयोरुपान्त्यश्लोकयोश्च पञ्चपादिकाविवरणस्यारम्भे दर्शनादयमेव तत्रभवान् पञ्चपादिकाविवरणस्यापि कर्तेत्यवगम्यते । पञ्चपादिकाविवरणप्रतिपाद्यवस्तुसंग्रहात्मकस्य विवरणप्रमेयसङ्ग्रहाख्यस्य ग्रन्थस्य प्रणेता विद्यारण्ययतीन्द्रः पूर्वाश्रममाधवाचार्य इति तस्मात् प्राचीनः प्रकाशात्मयतीन्द्रः ।

अस्य ग्रन्थस्य संशोधनाधारभूतास्तालपत्रमयाः केरलीयलिपयस्त्रय आदर्शाः । तेषु द्वौ इडप्पळ्ळिराजस्वामिकावाद्यन्तयोर्लुप्तकतिपयपत्रौ क. ख.संज्ञौ; अपरो हरिप्पाटुनारायणनम्पूरिमहाशयसंबन्धी ग.संज्ञः समग्रः ।

अनन्तशयनम् ।
९-४-१९१७. ।

त. गणपतिशास्त्री.

॥ श्रीः ॥

प्रकाशात्मयतीन्द्रप्रणीतः

शाब्दनिर्णयः।

यस्याः प्रसादमवलम्ब्य जगद्गुरूणा-
मप्यस्खलद्बहुगुणाः प्रसरन्ति वाचः।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा
भूयात् समग्रवरदैव सरस्वती वः ॥ १ ॥

विघ्नाभितापमभिहत्य[1] मदीयकृत्य-
बीजं प्रवृद्धमदनुग्रहवर्षपातैः।
संप्रार्थितः सिततरोऽपि गणेशमेघः
सिञ्चन्नभीष्टफलमङ्कुरयत्वमोघम् ॥ २ ॥

येषां पादरजस्सङ्घै[2]र्ध्वान्तपङ्कनिरासिभिः।
आत्मा मे स्वच्छतां यातस्तान् नमामि गुरूनहम्॥ ३॥

नत्वा ब्रह्म यथा शाब्दान्मानात् तत्तत्त्वमीक्ष्यते।
तथा वयं निबध्नीमः स्वबुद्धिपरिशुद्धये ॥ ४ ॥

---

१. 'भावम', २. 'प', ३. 'ङ्गै' ग. पाठः.

शाब्दप्रमाणस्वरूपाधिगमाधीना तस्य विषयविशेषे सामर्थ्यावधारणेति शाब्दप्रमाणस्वरूपं निरूपयितुं लोकप्रसिद्धमेव तल्लक्षणमनुवदति —

शब्दविज्ञानजा यार्थेऽसन्निकृष्टे सुनिश्चिता ।
बुद्धिस्तच्छाब्दमानं हि सङ्गिरन्ते विपश्चितः ॥ ५ ॥

शब्दविज्ञानादसन्निकृष्टेऽर्थे बुद्धिः शाब्दप्रमाणमिति सङ्ग्रहः ॥ ५ ॥

तल्लक्षणोपनिविष्टानां विशेषणानां निवर्तनीयानि मतान्तराणि दर्शयति —

वक्तुर्विवक्षा मानं वा विषये लिङ्गतोऽपि च ।
बुद्धिर्मानान्तरेच्छा च निवार्यन्ते विशेषणैः ॥ ६ ॥

अत्र केचिदाहुः — वक्तुर्वाक्यार्थविषये विवक्षां प्रमाणान्तरं वा समधिगमयन्ति शब्दाः, नार्थमात्रम् । तयोश्च शब्दसमधिगतयोरर्थव्यवहारहेतुत्वमिति । तदुक्तं धर्मकीर्तिना — 'वक्तुरभिप्रेतं तु सूचयेयुरि'ति । तान् प्रत्याह — अर्थे बुद्धिरिति । यदपि मतं द्वे एव प्रमाणे प्रत्यक्षमनुमानं च। अतो न शाब्दादेव केवलादर्थसमधिगमः । किन्त्वर्थेनानुबन्धवतो लिङ्गात् । तदुक्तं —

"प्रत्यक्षमनुमानं च प्रमाणे सदृशात्मना ।
अप्रत्यक्षस्य सम्बन्धादन्यतः प्रतिपत्तितः ॥"

---

१. 'कसि', २. 'ब्दमि', ३. 'र्थे' ग. पाठः. ४. 'तिः' क. पाठः.

इति । शाब्दी च बुद्धिरनुमा, सामान्यद्वारेण बोधकत्वात्, प्रत्यक्षादन्यप्रमाणत्वात्, त्रैलोक्यविषयत्वात्, सम्बन्धज्ञानसापेक्षत्वाच्च, धूमादग्निज्ञानवदित्यर्थः । तन्निराकरणायाह— शब्दविज्ञानादिति । यत्तु — 'आप्तोपदेश आगम' इति लक्षणात् प्रमाणान्तरसापेक्षमर्थमवगमयन्ति शब्दा इति, अत्राह — असन्निकृष्टे इति ॥ ६ ॥

इदानीमाद्ये निराकरणप्रकारमाह —

प्रवृत्त्या न विवक्षाधीर्मीयतेऽर्थैकनिष्ठया ।
प्रयोगहेतुतामेव पश्चादपि समीक्षते ॥ ७ ॥

तत्र न तावच्छब्देभ्यो विवक्षाधीसमधिगमः, बालो हि प्रवृत्तिलिङ्गेनार्थविषयेण शब्दविज्ञानसमनन्तरभाविना विशिष्टार्थविषयामेव बुद्धिं शब्दकार्यत्वेनानुमिमीते, न वक्तुर्विवक्षादिगोचरां, तत्प्रतिपत्तौ प्रमाणाभावात् । व्युत्पन्नः स्वयं शब्दं प्रयुञ्जानः स्वसाक्षिकं विवक्षादिभावमवगम्य पूर्वस्यापि प्रतिपत्तुस्तत्सद्भावमनुमानेनावगच्छति । तथा पूर्वोऽपि प्रतिपत्ता स्वप्रयोक्तृगतविवक्षादिभावं स्वात्मानुमानेन तदानीमेवावगच्छतीति[1] तस्यां बुद्धौ पश्चाच्छब्दसामर्थ्यं प्रतिपद्य तेनैतत्प्रयोगहेतुतामेव विवक्षादेरयं स्वात्मन्यवगच्छति, न शब्दविषयतां, तत्र सामर्थ्याज्ञानात् । तथैव पूर्वयोरपि वक्तृप्रतिपत्त्रोरित्यवगच्छन् न तत्र शब्दसामर्थ्यं कल्पयति । किञ्च, विवक्षादिर्न[2] केवलः शब्दार्थः । अर्थे व्यव-

---

१. 'त्यनुमाय त', क. पाठः. २. 'दिकं न के' ग पाठः.

हारात्[1]। किञ्च, अनुपपत्त्या विषयाक्षेपे यं कञ्चिद् विषयमवलम्बेत। अर्थो व्यावृत्तश्चेदर्थ एव तर्हि तद्गोचरोऽव्यभिचारात्। सविकल्पके चार्थमात्रेऽभिलापविशेषानुषङ्गाद्, विवक्षादेरनुमेयतयान्यथासिद्धेः । तद्वाचकपदाभावादपदार्थस्य वाक्यार्थत्वेऽतिप्रसङ्गाच्च। तस्माद् यथासामर्थ्यज्ञानमर्थ[2] एव शब्दगोचर इति ॥ ७ ॥

इदानीमनुमानपक्षं निराचष्टे —

स्वभावकार्ये न स्यातां देशादिनियमोऽपि न ।
नानुमा शक्तिसम्बन्धान्नेक्ष्यते पक्षधर्मता ॥ ८ ॥

त्रिरूपाणि त्रीण्येव लिङ्गानि स्वभावकार्यानुपलब्धयः। तत्र न तावच्छब्दार्थयोरनुपलब्धिः सम्बन्धः, भावरूपत्वात्। गोत्वस्याप्रतिपत्तावगोत्वे[3]व्यावृत्त्यसिद्धेः कल्पनायोगाच्च नापोहः शब्दार्थः। नापि वृक्षत्वशिंशपात्वयोरिव तयोः स्वभावानुबन्धः, एकार्थसमवायेन तादात्म्याभावात्। न च विवक्षादिनाप्येकार्थसमवायः, एकदेशानुपलब्धेः। नापि धूमाग्न्योरिव कार्यकारणता, प्रमाणाभावात्। नापि विवक्षामात्रप्रभवः शब्दः। गोविवक्षाप्रभवो गोशब्द इति चेद्, विवक्षाविषयस्य गोशब्देनाभिलापः कथं, तस्य तदवगम्यत्वाभावे तद्विवक्षाजन्यत्वात् (इति चेन्न?)। अर्थस्यावस्तुत्वेनाहेतुत्वा[4]भ्युपगमात्। सविकल्पके च तावन्मात्रेऽभिलापसंसर्गात् तत्रैव सम्बन्धज्ञानाच्छब्दस्य विवक्षादिजन्यत्वेऽप्यर्थेऽपि बोधकत्वसम्बन्धो

---

१. 'त्। अनु' क. पाठः. २. 'र्थो गोचर एवेति ॥', ३. 'त्वस्य व्या', ४. 'त्वस्याभ्यु' ग. पाठः.

विद्यत एव । नाप्यनयोर्देशनियमो यस्मिन् स्निग्धच्छाया तस्मिन् शैत्यमितिवत् । नापि कालनियमो यस्मिन् घटिकाद्वये कृत्तिकोदयस्तस्मिन् रोहिण्यासक्तिरितिवत् । अव्यवस्थितदेशकालत्वात् । तस्मादनयोरविनाभावाभावान्नार्थस्य शब्दो लिङ्गम् । कुतस्तर्हि सम्बन्धाच्छब्दादर्थप्रतिपत्तिः । तद्बुद्धिसामर्थ्यलक्षणात्[1] । अर्थेनानुबन्धाभावे कथं तद्बुद्धिसामर्थ्यम् । न वयमर्थेनानुबन्धं ब्रूमः । किन्तु तद्बुद्ध्या । स च तज्जननसामर्थ्यलक्षणोऽनुबन्ध इष्यते । नन्वनुबन्धान्तराभावे कथं तद्बुद्धौ सामर्थ्यम् । कृशानोरिव धूमजनने । नहि तत्र तत्सामर्थ्यादन्योऽनुबन्धोऽस्ति, अथ तत्र वह्निमात्रं कारणं न सामर्थ्यं नामास्ति, तथापि वह्नेर्धूमो जायते चेत्, शब्देभ्योऽप्यर्थबुद्धयोऽपि जायन्ताम् । अथ ज्ञानकार्येऽनुबन्धान्तरापेक्षा न कार्यमात्रे, न । चक्षुष्यर्थबुद्धिसामर्थ्यव्यतिरिक्तस्यानुबन्धस्यादर्शनात् । अथ प्रतिपन्नार्थबुद्धिरनुबन्धान्तरनिमित्ता, न । अदर्शनाच्छब्दार्थयोः । स्यात्तर्हि शक्तिलक्षणादेवानुबन्धादनुमानं, न । सम्बन्धान्तरविशिष्टस्यैव बुद्धिसामर्थ्ये[2]ऽनुमानत्वप्रसिद्धेः । ननु प्रतिपन्नसम्बन्धाद् बुद्धिरनुमानं, सत्यम् । अर्थेन प्रतिपन्नसम्बन्धात् तद्बुद्धिसामर्थ्यविलक्षणात् । नतु तद्बुद्धिसामर्थ्यसम्बन्धादेव[3] बुद्धिरनुमानम् । नन्वेतावता कथं प्रमाणवैलक्षण्यम् । का वा प्रमाणवैलक्षण्यस्येयत्ता । अपिच धर्मधर्मिपक्षधर्मतादृष्टान्ताश्च शब्दस्यार्थबोधने न निरूप्यन्ते ।

---

१. 'र्थ्यालक्ष', २. 'र्थ्या' ग. पाठः. ३. 'वानु' क. पाठः.

ततोऽप्यनुमानवैलक्षण्यम् । नन्वत एव बोधसामग्र्यभावाच्छब्दानामप्रामाण्यं स्यात् । न । धूमादग्निबुद्धाविव शब्देभ्योऽर्थप्रतिपत्तावर्थाविसंवाददर्शनात् । तथाच प्रयोगः—'नानुमानं शब्दः, प्रतिपत्तव्यसम्बन्धान्तरनिरपेक्षत्वे सत्यर्थबुद्धिसमर्थत्वात्, चक्षुर्वत्' । तस्मादज्ञाततया स्वसामर्थ्यादेवावगमहेतुः प्रत्यक्षम् । त्रैरूप्योपेततया गृहीताद् बुद्धिरनुमानम् । तद्बुद्धिसमर्थतया गृहीताच्छब्दात् तत्र बुद्धिरागम इति प्रमाणान्तरत्वम् । तस्माद् युक्तं शब्दविज्ञानादिति ॥ ८ ॥

इदानीं मानान्तरसापेक्षत्वपक्षे निराकरणप्रकारमाह—

शब्दो मानान्तरापेक्षो वेदे लोके च नेष्यते ।
वक्तृमानं च शब्दस्य प्राप्तदोषापनोदि हि ॥ ९ ॥

वेदे तु मानान्तरानपेक्षत्वमपौरुषेयत्वप्रतिपादनेन वक्ष्यामः । पौरुषेये तु वक्तृज्ञानं क्वोपयुज्यतामिति विवेक्तव्यम् । यदि वाक्यार्थज्ञाने तत्प्रमितौ वेति मतं, तत्र न तावद् वक्तृज्ञानमनवगतमेव तदुभयं जनयति । प्रतिपत्तुर्बुद्धिद्वारेणापि तत्सम्बन्धाभावात्, कर्तृकरणयोश्च क्रियोत्पत्तौ संबन्धापेक्षत्वात् । अवगतं चेत्, कथमनवगतेऽप्रमिते चार्थे तद्व्यावृत्तं वक्तृज्ञानं गम्येत । नच निर्विषयमवगम्यमानं क्वचित् प्रमितिहेतुः । ननु पदेभ्योऽवबुध्यन्ते पदार्थाः । सत्यम् । न तावन्मात्रे[2] वक्तृज्ञानमपेक्ष्यते । तर्हि सामान्यतो दर्शनेनोत्प्रेक्षया वा संस-

---

१. 'णभेदः । त', २. 'तन्मा' क. पाठः.

गोऽपि प्रतीयताम् । प्रतीत एवास्मिन्निदानीं पदानां पदावबुद्धानां वा पदार्थानां पदातिरिक्तस्य वा वाक्यस्य संसर्गावगमसामर्थ्यसंकथा । यतः सत्स्वपि पदादिष्वसति च विशिष्टवक्तृज्ञानावगमे संसर्गनिश्चयाभावात्, सति च तस्मिन् पदाभावे संसर्गनिश्चयाभावादर्शनात्, तत एव तन्निश्चये सिद्धे कारणकारणतयान्यथासिद्धत्वात् पदादीनां न संसर्गसहकारिकारणतापि सिध्येत् । तत्र कथं लोकसिद्धशक्तिसव्यपेक्षे वक्तृज्ञानविकले वेदे । विशिष्टस्तु वाक्यार्थ इति पदेभ्य एव संसर्गसिद्धिः । ननु शक्तिग्रहणकाले संसर्गे शक्तिरवगता । सत्यम् । प्रतिपत्तिकाले नासावुपयुज्यते, वक्तृज्ञानादेव संसर्गनिश्चयात् । अथवा तत्रापि प्रतिपत्तिकाले दृष्टेनैव न्यायेन संसर्गशक्तिग्रहोऽपि भ्रमः कल्प्येत । तस्मात् सामर्थ्यग्रहणानुसारेण शब्देभ्य एव संसर्गनिश्चयो वक्तव्यः । तत्र मानान्तरविरोधाद् यथाप्रयोगमनन्वितेषु पदार्थेषु तदभिधायिनां शब्दानामितरेतरान्वययोग्यविभक्तिसंबन्धितया संहत्यबुद्धौ सन्निधानं शब्दानां दोषः । ततो भ्रान्तिज्ञानम् । स च शब्दगतो दोषः प्रयोक्तृगतेनार्थविषयेण भ्रान्तिज्ञानेनोत्प्रेक्षाज्ञानेन वा जायते प्रयोगद्वारेणेत्यन्वयव्यतिरेकाभ्यामवगम्यते । तत्र वक्तृप्रमाणं तथाविधदोषनिराकरणमुखेनोपयुज्यते, न प्रमितिहेतुतया । पुरुषसंबन्धे सत्याशङ्कितदोषत्वान्नियमेन तदपेक्ष्यते । वेदे पुनरितरेतरान्वययोग्यविभक्तियुक्तपदसन्निधानबुद्धेस्तदर्थप्रवृ-

---

१. 'दाद्यभा' ग. पाठः. २. 'ल' क पाठः. ३. 'दे तु पु' ग. पाठः.

त्तज्ज्ञानान्तरनिमित्तप्रयोगजन्यत्वाभावान्न दोषशङ्का। नापि तन्निरासापेक्षेति नैरपेक्ष्यमित्युच्यते। अन्यथा न वेदे प्रमितिलाभ इत्युक्तम्। तदेवं लोकेऽपि न प्रमितावपेक्षा। ननु स्वविषयज्ञानान्तरजन्या स्मृतिः सापेक्षा, तथेहापि स्यात्। तन्न। मानान्तरसम्भिन्नार्थत्वात् तत्र सापेक्षता। अन्यथानुमाने व्यापकोऽग्निरिति व्याप्तिज्ञानजन्येऽपि तथा स्यात्। न तथेह संभेदः, शब्दस्यार्थमात्रे सामर्थ्यादिति । तस्माद् युक्तमसन्निकृष्टग्रहणम्। अतः समीचीनमेव शाब्दलक्षणमिति स्थितम् ॥ ९ ॥

कि पुनः शब्दशब्देनाभिधीयते, यदाकारविज्ञानादर्थबुद्धिः शाब्दी। जातिरित्याह —

शब्दशब्दोऽपि तज्जातावखण्डत्वाददृष्टतः।
उपाधेः प्राग्विकल्पाच्च प्रत्यभिज्ञा च लोकवत् ॥ १० ॥

एकस्याभिधानस्य विभिन्नार्थता प्रतीता शक्तिभेदं सामान्यं वावलम्बते। शक्तिभेदे त्वभिधेयानन्त्यात् सम्बन्धज्ञानाशक्तिः कल्पनागौरवं च स्यात्। स्यादेतत्। यथा वाचकशब्दस्तदुभयं नापेक्षते, तद्वदिहापि स्यादिति। नैतद् युक्तम्। तत्र यौगिकत्वाच्छब्दस्यावयवार्थसामान्ययोगेन विभिद्यमानेष्वर्थेषु तदुभयमन्तरेणापि प्रवृत्तिसम्भवात्। अयं पुनरखण्डः शब्दो नावयवशक्त्या शब्दविशेषानाहेतिसामान्यमेवावलम्बनीयम्। नन्विदं तत्कारणमित्यादयः शब्दास्तटस्थमेवोपाधिमवलम्ब्य

---

१. 'त' ग. पाठः. २. 'र्थवृत्तिता श' क. पाठः. ३. 'न.' ग. पाठः. ४. 'नुवृ' क. पाठः. ५. 'षमाहे' ग पाठः.

विशेषाभिधायिनः, तथेहापि श्रोत्रग्राह्यत्वं तटस्थमेवावलम्ब्य विशेषानेव शब्दशब्दोऽप्यभिधत्ताम्। तन्न। अनवगतोपाधौवौपाधिकाभिधानपरामर्शानुपपत्तेः। न हीदानीमुपलभ्यमानेऽपूर्वे शब्दविशेषे तत्परामर्शः, श्रोत्रतज्ज्ञानतद्ग्राह्यत्वानामनध्यक्षत्वात्। प्रथमप्रत्यये च तत्राभिधानमनुरज्यते। ननु विषयसंवेदनानुमितेन श्रोत्रग्राह्यत्वेनोपलक्षिते तस्मिन्नभिधानपरामर्शः स्यात्। न। श्रोत्रग्राह्यतया पूर्वप्रतिपन्नसमानाकारविषयतदभिधानविकल्पानुषक्तावगममन्तरेण तद्ग्राह्यतानुमानायोगात्। न हि संवेद्यमात्रसंवेदनं तद्ग्राह्यतावगमहेतुः। न हि तदानीमेवान्वयव्यतिरेकाभ्यां तद्ग्राह्यतावगन्तुं शक्यते, इन्द्रियान्तराणामपि सन्निधानात्। न चेन्द्रियान्तरग्राह्यवैलक्षण्येन तद्ग्राह्यतानुमानं, तद्ग्राह्यान्तरादपि वैलक्षण्यस्य भावात्। सालक्षण्ये च सामान्यसिद्धेः। न चोपाधेरप्येकत्वमस्ति, श्रोत्रादीनां भिन्नत्वात्। नित्यानुमेयेषु सामान्यायोगात्। अतोऽपूर्वशब्दोपलम्भेऽप्यभिधानानुषङ्गाय शक्तिभेदपरिहाराय श्रोत्रग्राह्यतावगमाय च श्रोत्रप्रथमप्रत्ययोवगम्यं सामान्यमेवोपगन्तव्यम्। ननु सामान्यं प्रत्यभिज्ञानाधीनात्मलाभं तदभावे नावकाशमर्हति। न तावत् सोऽयमित्यवमर्शप्रत्यभिज्ञा प्रसिद्धसामान्येऽप्यस्ति। यदि बुद्ध्यावाकारमात्रानुसन्धानमस्त्येव, तर्हि शब्दं दृष्टवतः शब्दान्तरेऽर्थाद्

---

१. 'धावभि', २. 'त्वादीना', ३. 'दनेना' क. पाठः. ४. 'ताया अनु', ५. 'द्धिः। न' क. पाठः. ६. 'मप्यस्ति' क. पाठः. ७. 'च प्र' ग. पाठः.

विलक्षणाकारप्रतिपत्तिः, येन प्रथममभिधानानुषङ्गः स्यादित्युक्तम् । न च द्रव्यरसादिसमानं शब्दान्तरं प्रतीयते । किञ्च श्रोत्राद्युपाधौ चैकत्वकल्पनाद्वाराभिधेयैकत्वकल्पनं, मा भूच्चोदात्तानुदात्तपटुमृदुत्वादीनां श्रोत्रग्राह्यतया शब्दशब्दार्थता, उदात्तः शब्द इत्यादिना[1] शब्देन धर्मिणासामानाधिकरण्यात् । तस्माज्जातिकल्पनैव श्रेयसी । अतस्तज्जात्युपरक्तज्ञानादर्थ[2]बुद्धिः शाब्दीति स्थितम् ॥ १० ॥

इदानीमर्थप्रतिपत्तिनिमित्तं शब्दं विमृशति —

वर्णातिरिक्तशब्दाद् वा वर्णविज्ञानसंस्कृतैः ।
स्मारकैर्वातिरिक्तैर्वा वर्णेभ्यो वार्थधीर्भवेत् ॥ ११ ॥

वर्णेभ्योऽतिरिक्तादेकशब्दप्रत्ययालम्बनात् पदसंज्ञकात् पदार्थप्रत्यय इत्येके सङ्गिरन्ते । वर्णविज्ञानसंस्कारैर्वर्णस्मृतिहेतुभिरित्यन्[3]ये । तैरेव स्मारकसंस्कारातिरिक्तैरर्थप्रत्यय इत्यपरे । वर्णेभ्य एवेति केचित् ॥ ११ ॥

तत्रान्त्यं पक्षमात्मीयत्वेन स्वीकरोति —

वर्णाः स्वज्ञानसंस्कारैः संभूयस्मृतिकारिभिः ।
क्रमेणैकस्मृतौ बुद्धा बोधयन्त्यर्थमञ्जसा ॥ १२ ॥

तदेतत्पूर्वपक्षनिराकरणमुखेन प्रतिपादयितुं वर्णव्यतिरिक्तशब्दवादं वर्णयति —

वर्णान्नैकै[4]कतो बुद्धिरुपलब्धात् सतोऽपि वा ।
अदृष्टेरुपलब्धाद् वा स्मृताद् वा संहतान्न धीः ॥ १३ ॥

---

१. 'दीनां श' क. पाठः. २. 'र्थ', ३. 'त्येके सङ्गिरन्ते। तै', ४. 'दे' ग. पाठः.

अयोगात् समुदायस्य कारणानां च भेदतः ।
अतो वर्णातिरिक्तात् सा शब्दादेवेति गम्यते ॥ १४ ॥

अस्ति तावद् गकारादिवर्णोपलब्ध्यनन्तरमर्थबुद्धिः । सा किं वर्णेभ्य एव, तद्व्यतिरिक्ताच्छब्दाद् वेति विवेचनीयम् । न तावदेकैकस्माद् वर्णादुपलब्धादनुपलब्धाद् वा सा, अदृष्टेः । नापि वर्णसमुदायात्, तदभावात् । अत एव न वर्णसमुदायोपलब्धेः स्मृतेर्वार्थप्रत्ययः, उपलब्धिकारणानां च वर्णोच्चारणानां क्रमवर्तितया भेदात्, संस्काराणां च स्मृतिहेतूनां प्रतिवर्णं निरपेक्षस्मृतिहेतुतया भिन्नत्वाद् न युगपत् समस्तवर्णोपलब्धिः स्मृतिर्वा सम्भवति । अतोऽर्थबुद्धिकार्यपरिशेषानुमानकल्पिताद् वर्णभेदेऽप्येकोऽयं शब्द इति प्रत्यक्षावसेयादन्यतः शब्दादर्थावगम् इति ॥ १३, १४ ॥

इदानीमिमं पक्षं निराकरोति —

वर्णातिरेकि नाध्यक्षं वर्णाः सोपाधिकाः पदम् ।
अर्थे बुद्धे पदं नैकं योगः शब्दान्तरेऽपि न ॥ १५ ॥

न तावद् वर्णव्यतिरिक्तं पदं वर्णसमवेतं घटादिवत् स्वतन्त्रं वा प्रत्यक्षेणावगम्यते । नन्वेकमिदं पदमिति भिन्नवर्णातिरिक्तं पदमध्यक्ष्यते । न तावच्छ्रोत्रेन्द्रियेण, युगपद् गकारादिवर्णत्रयोपलम्भायोगात् । न च वर्णोपलम्भविकलः शब्दप्रत्ययः । न च गकारमात्रे पदमभिव्यज्यते, गङ्गादिपदानामपि तुल्यत्वात् । सत्यं तत्रैवाभिव्यज्यते । किन्तूत्तरवर्णाभ्यां विशेषेण परिच्छिद्यते । एवमपि वर्णत्रयावमर्शमन्तरेण न विशि-

ष्टार्थावबोधकं पदमभिव्यज्यते । स चावमर्शो न श्रोत्रेन्द्रियनिबन्धनः, असम्भवात् । न च गकारमात्र एव[1] गोत्वमिव खण्डादौ[2] वर्णातिरिक्तं किञ्चित् पदमभिव्यज्यते । नापि मानसप्रत्यक्षं पदं, सकृद्वर्णत्रयानवमर्शात् । एकैकवर्णप्रत्ययजनितसंस्कारेऽन्त्यवर्णप्रत्ययजनितपरिपाके च मनस्यध्यक्ष्यत इति चेद्, न । वर्णत्रयानुपरागेणा[3]नवभासनात् । तेषां युगपदुपरागानुपपत्तेश्च । अथ वर्णोपलब्धिजनितसंस्काराः सम्भूयाशेषवर्णविषयकं स्मृतिज्ञानमेकं सम्पादयेयुः । न तर्हि स्मर्यमाणवर्णालम्बि पदविज्ञानं प्रत्यक्षं, स्मर्यमाणघटगतशौक्ल्यवत् । किञ्च तादृशादेव स्मृतिविज्ञानादर्थबुद्धिसिद्धेः पदकल्पनार्थवती । नन्ववभासते पदम् । सत्यं, वर्णा एवैकार्थबो[4]धनसामर्थ्योपाधौ वनवत् पदबुद्धिभाजः । ननु शक्त्यवधारणायाः प्रागपि पदमवगम्यते । न । अनभ्यस्तभाषायामुदाह्रियमाणायामव्युत्पन्नस्य पदविभागज्ञानाभावाद्, एकानेकत्वाभ्यां पदसन्देहात् । संहितास्वप्यध्येतॄणां पदव्यवहारस्तथाविधबुद्धिमद्व्यवहारनिबन्ध[5]नः । अतः पदबुद्धिरौपाधिकी वर्णविषयैव । ननु वर्णेभ्यो नार्थप्रत्यय इत्युक्तं, सत्यम् । अबोधकपदाभिव्यक्तावप्युक्तानुपपत्तिस्तुल्या । अ[6]र्थैकैव वर्णत्रयावलम्बिनी स्मृतिः पदमभिव्यनक्ति, 'सा तर्ह्यर्थाभिव्यक्तावपि समाना । वक्तव्या च सा पदाभिव्यञ्ज-

---

१. 'मे' क पाठः. २. 'ण्डत्वादौ' ख. पाठः. ३. 'णाव' ग. पाठः ४. 'र्थपतिपादन' क. पाठः. ५. 'ना' ख. पाठः. ६. 'त' ग. पाठः.

कवर्णसङ्ख्यानियमव्यवहाराय । न हि सङ्ख्येयावमर्शमन्तरेण सङ्ख्योपलभ्यते । तस्माद् वर्णव्यतिरिक्तपदकल्पनाकारणाभावाद् वर्णेभ्य एवार्थप्रतिपत्तिरिति रमणीयम् ॥ १५ ॥

द्वितीयं पूर्वपक्षं वर्णयति —

स्मारका एव संस्काराः स्मृतिभिः सम्प्रबोधिताः ।
अर्थधीलब्धसामर्थ्या बोधयन्त्यर्थमञ्जसा ॥ १६ ॥

वर्णोपलम्भजनितसंस्कारा वर्णस्मृतिहेतव एवार्थं प्रत्याययन्ति । नन्वनुपलब्धानां चक्षुरादिवत् कथं प्रत्यायकत्वम् । नैष दोषः । स्वस्वकार्यवर्णविषयस्मरणसमुन्नीतानां तदुपपत्तेः । नन्वदृष्टा संस्कारेभ्योऽपूर्वार्थाधिगतिः । सत्यम् । इहान्त्यवर्णप्रत्ययसहकारिभ्यस्तेभ्य एव प्रत्यभिज्ञेव पूर्वोपलम्भसंस्कारादर्थाधिगतिरित्यनन्तरकार्यदर्शनादेवावगम्यते ॥ १६ ॥

उच्यते —

स्मारकादर्थधीर्न स्यादन्यत्रानुपलब्धितः ।
साम्यात् प्रसिद्धेर्वर्णेभ्यः क्रमसिद्धेभ्य एव सा ॥ १७ ॥

न तावदन्यज्ञानसंस्कारोऽन्यमर्थमवगमयति, अदर्शनात् । कार्यसामर्थ्यात् कल्प्यत इति चेत्, तर्हि तत एव क्रमोपलब्धानामेव वर्णानां सामर्थ्यं कल्प्यताम् । नन्वन्त्यवर्णप्रत्ययात् तत्पूर्वक्षणवर्तिनां पूर्ववर्णोपलम्भानां कथं कालव्यवधानेन कार्यसामर्थ्यमदृष्टपूर्वं कल्प्यते । समानमेतद् युगपद्भाविसंस्कारेष्वदृष्टसामर्थ्यकल्पनम् । कोऽयं निर्णयहेतुः । अनुपपत्तिसाम्याच्छब्दादर्थप्रतिपत्तिप्रसिद्धेश्च वर्णोपलम्भपक्ष एव श्रेयान् । प्रत्यभिज्ञायामपि स्मृत्यंश एव संस्काराज्जायते,

नापूर्वाधिगमः । न चान्त्यवर्णप्रत्ययोऽपि सहकारी । यदि तावत् पदेभ्य एव संसर्गबुद्धिराश्रीयते, तदा वाक्यान्त्यवर्णप्रत्ययसमये पदान्त्यवर्णप्रत्ययानामनवस्थानात् । (न) च वाक्यान्त्यवर्णप्रत्यय एव कृत्स्नपदसहकारी, तस्यानवस्थितवर्णविशेषस्य पदेष्वन्तर्भावे पदानवधारणप्रसङ्गात्, प्रतिप्रयोगं पदस्वरूपभेदात् । अनन्तर्भावे संस्कारमात्रस्य पदस्य स्वाभिधेयपदार्थांशबोधने सामर्थ्याभावः स्थित एव । पदेभ्यः पदार्थास्तेभ्यः संसर्ग इत्येतन्निराकरिष्यते ॥ १७ ॥

अपिच —

व्युत्क्रमे वक्तृभेदे च स्यात् संस्काराविशेषतः ।
कृत्स्नसंस्कारधीहानात् सम्बन्धादिग्रहश्च न ॥ १८ ॥

व्युत्क्रमप्रयुक्तेष्वपि वर्णेषु संस्काराविशेषादर्थबुद्धिः स्यात् । वर्णपक्षेऽपि तथा किं न स्यात्, क्रमविशेषनियमात् । तर्हि संस्कारेऽपि स नियमः स्यात् । न तावदुत्पत्तिक्रमनियमस्तेषामर्थबोधने विनियुज्यते । अन्त्यवर्णसंस्कारजन्मानन्तरमुत्पत्तीनामतिवृत्ततया तत्क्रमस्याप्यतिवृत्तेः । न च देशकालक्रमः, युगपदेकत्रावस्थानात् । ननु न वर्णानामपि देशकालक्रमः, व्यापित्वान्नित्यत्वाच्च । उपलब्धिक्रमस्त्वन्त्यवर्णोपलब्ध्यनन्तरमतिवृत्तः । सत्यम् । अशेषवर्णावमर्शिस्मृतिविज्ञानोपरक्ततयाऽतिवृत्तस्यापि क्रमस्य हेतुत्वाभ्युपगमाद्, उपलब्धिक्रमपक्षस्यानङ्गीकरणात् । वक्तव्या च तथाविधस्मृतिः ।

---

१. 'त्तिनि' ग. पाठः.

अन्यथा एतावद्भिरेवंक्रमकैश्च वर्णैरेकपदबुद्धिगोचरैरुत्पन्नाः संस्कारा एकमर्थमधिगमयन्तीति क्रमसङ्ख्याविशिष्टवर्णपदव्यवहाराद्ययोगः[1] । तदुक्तमौत्पत्तिकसूत्रे* वार्त्तिककारैः—

"अन्त्यवर्णे च विज्ञाते सर्वसंस्कारकारितम् ।
स्मरणं पूर्ववर्णेषु सर्वेष्वन्ये प्रचक्षते ॥"

इति सिद्धान्तत्वेन । अतो व्युत्क्रमप्रयुक्तेषु स्यादेवार्थबुद्धिः । भिन्नवक्तृकेष्वपि क्रमविशिष्टतयाऽनुसन्धीयमानेषूत्पद्यमानार्थबुद्धिः संस्कारपक्षे तदनपेक्षा स्यात् । स्यात् तर्हि क्रमोपहितसंस्कारबुद्धिरर्थाधिगमहेतुः[2] । न । तदुपलम्भकारणाभावात् । वर्णस्मृतिकार्याण्येवोपलम्भकारणमिति चेद्, न । तेषामपि क्रमवर्तित्वात्, क्रमोपहितसकलवर्णविषयकैकज्ञानायोगात् । किञ्च अस्मिन् पक्षे सम्बन्धिज्ञानात् सम्बन्धज्ञानं, ज्ञाताच्छब्दादर्थबुद्धिः, सविकल्पके चाभिधानानुस्मृतिः, इत्यादिव्यवहारो दुस्संपादः[3] । अथ क्रमसंसृष्टाशेषवर्णावमर्शिस्मृतिज्ञानोपगमादेवैतत् सर्वं सम्पत्स्यत इति, तर्हि तत एवार्थसिद्धेः संस्कारेषु सामर्थ्यकल्पना दुर्लभैव । तस्मात् संस्काराणामपूर्वसामर्थ्ययोगात्, प्रसिद्धिविरोधाद्, व्युत्क्रमादिषु प्रसङ्गात्, सम्बन्धज्ञानाद्ययोगाच्च न संस्कारपक्षः श्रेयान् । किन्तु वर्णस्मृतिपक्ष एवेति स्थितम् ॥ १८ ॥

---

१. 'गात्।' क. पाठः. २. 'व', ३. 'वा' क. पाठः.

---

* जैमिनिसूत्रम् (१. १. ९)

ये तु स्मारकसंस्कारव्यतिरिक्तानर्थावबोधकानपूर्वसंस्कारानेव कल्पयन्ति, तान् प्रत्याह—

अयुक्तालौकिकी कल्प्तिः संस्कारे कल्प्तिगौरवात् ।
पदादेवार्थसंबुद्धेस्तत्र कल्प्तिर्लघीयसी ॥ १९ ॥

अवश्यं हि त्वयापि वर्णातिरिक्तं पदं निराकुर्वता अशेषवर्णावमर्शि विज्ञानं पदव्यवहारायोपगन्तव्यम् । तदानीं तत एवार्थसिद्धेर्नालौकिकसंस्कारकल्पनावकाशः । कल्पनागौरवाच्च वर्णज्ञानानामपूर्वसंस्कारसामर्थ्यं संस्कारस्वरूपाणि तेषामर्थबुद्धिसामर्थ्यं चेति । नायं दोषो वर्णस्मृतिपक्षे । ननु न संस्कारा नियमेन स्मृतिमुत्पादयन्ति, यतो नियमेनान्त्यवर्णानन्तरमर्थबुद्धिः स्यात् । अपूर्वसंस्कारपक्षेऽपि समानोऽयं दोषः । कार्यदर्शनाद् नियमेनोत्पादकत्वकल्पना वर्णस्मृतिपक्षेऽपि तुल्या । तस्मात् स्मर्यमाणवर्णेभ्य एव पदार्थप्रतिपत्तिरिति स्थितम् । तथाच *देवताधिकरणे भाष्यं—"वृद्धव्यवहारे चेमे वर्णाः क्रमानुगृहीता गृहीतार्थविशेषसम्बन्धाश्च सन्तः स्वव्यवहारेऽप्येकैकवर्णग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानास्तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्ति" इति ॥ १९ ॥

इदानीं वाक्यार्थप्रतिपत्तिनिमित्तं शब्दं विमृशति—

गृहीतपदसम्बन्धाद् वाक्याद् वा पदभागिनः ।
पदार्थेभ्यः पदेभ्यो वा संसर्गं प्रतिजानते ॥ २० ॥

---

* ब्र० अध्या० १. पा० ३. सू० २८.

गृहीतपदपदार्थसम्बन्धात् पदव्यतिरिक्तादेव वाक्यादविभक्तपदात्मकाद् विशिष्टसंसर्गप्रतिपत्तिरिति केचित् प्रतिजानते। पदावबुद्धेभ्यः पदार्थेभ्य इत्यपरे। पदेभ्य एव संसृष्टाभिधानसमर्थेभ्यः संसर्गप्रत्यय इत्यन्ये प्रतिपादयन्ति ॥ २० ॥

तत्रान्त्यं पक्षमात्मीयत्वेन स्वीकरोति—

पदैरेवान्वितस्वार्थप्रतिपादनशक्तिभिः।
गुणप्रधानभावात्मा संसर्गः प्रतिपाद्यते ॥ २१ ॥

पक्षान्तरनिराकरणमुखेनैतत् प्रतिपादयितुं प्रथमं वाक्यपक्षं निराचष्टे[1]—

तन्मानाभावतोऽज्ञानादानन्त्यात् सङ्गतेस्तथा।
शक्त्यानन्त्यात् प्रयोगाणां भेदाद् वाक्यं न बोधकम् ॥

न तावत् पदव्यतिरिक्तं वाक्यं पदसमवेतं घटादिवत् स्वतन्त्रं वा श्रोत्रेण मनसा वा प्रत्यक्षेणोपलब्धुं शक्यम्, एकवाक्यताबुद्धेः पदवद् विशिष्टैकार्थसामर्थ्योपाधिनिबन्धनत्वात्। अनभ्यस्तभाषायां तथानवगमात्। अपिच अभ्युपगमेऽपि प्रतिप्रयोगं पदावापोद्वाराभ्यां भिद्यमानस्य वाक्यस्य पदशक्तिभ्यो व्यतिरिक्तशक्तिमतश्च शक्येन सम्बन्धग्रहणमशक्यसम्पादनम्। नैवं पदपदार्थसम्बन्धज्ञानादिति चेत्। कथमन्यस्य सम्बन्धज्ञानादन्यमर्थमवगमयेत्। अथ नात्यन्तमन्यानि पदानि वाक्यात्, किन्तु तदेव परोपाधिविभागेन

---

१. 'ष्ट' ग. पाठः.

पदानीति कथ्यते[1]। नैतत् सारम्। गौरित्यखण्डस्यापि पदस्य शक्तिभेदे पृथक् सम्बन्धज्ञानमपेक्ष्यते, किमु शक्तिमद्भेदेऽपि। अथ तत्राभिधेयभेदात् तदपेक्षा, इह तु पदार्थो[2] एव संसृष्टो[3] वाक्यार्थ[4] इति न पृथग् वाक्यस्य शक्तिग्रहणापेक्षा। न। प्रतिपाद्यभेदात्, संसर्गशब्दस्यैव पृथक् शक्तिज्ञानापेक्षेति न शक्तिग्रहणमुपपद्यते। न चागृहीतसम्बन्धं वाक्य बोधयति, पदवच्छब्दत्वात्। तथा पदतच्छक्तिव्यतिरिक्तवाक्यतच्छक्तिकल्पनायां प्रतिप्रयोगं भेदात् कल्पनागौरवं च स्यात्। तथाच शिशो! गामानय, गां बधान। अर्भक! गामानय, गां बधान। बाल! गामानय, गां बधान, डिम्भ! गामानय, गां बधान। इत्यष्टानां प्रयोगाणामष्टौ वाक्यानि तच्छक्तयश्च कल्पयितव्याः। पदवादिनस्तु[5] सप्तैव। तथा[6] शुक्लामिति पदान्तरप्रयोगे वाक्यभेदात् पुनरष्टौ वाक्यानि तच्छक्तयश्चकल्पयितव्याः। पदवादिनस्त्वेकैव शक्तिः। तस्माद् वाक्यपक्षो मुधा॥ २२॥

इदानीं पदार्थपक्षं प्रतिजानीते —

पदार्थान् प्रतिपाद्यैव निवर्तन्ते पदान्यतः।
पदार्था एव संसर्गं बोधयन्त्यूर्ध्वमञ्जसा॥ २३॥

पदेभ्यः प्रतिपन्नानां पदार्थानां स्वात्मसंसर्गप्रतिपादनमभिहितान्वयो नाम पूर्ववादिना प्रतिज्ञातः॥ २३॥

---

१. 'थ्येत। नै' ख. पाठः. २. 'र्थ', ३. 'ष्टो' क. पाठः. ४. 'र्थो' ख. पाठः. ५. 'नः स' क. पाठः. ६. 'था च शु', ७. 'तम्॥' ख. पाठः.

तत्र प्रमाणमाह —

आवापोद्धारलब्धार्थप्रयोजकसमाश्रयात् ।
व्यवधानात् पदेभ्योऽर्थक्रमवत्प्रत्ययैरपि ॥ २४ ॥

संसर्गसिद्धेरर्थेभ्योऽप्यन्यथासिद्धितस्तयोः ।
स्वरूपमात्रे सामर्थ्यं पदानामवसीयते ॥ २५ ॥

गामानय गां बधान, अश्वमानय अश्वं बधान इत्यादिप्रयोगभेदेषु गोशब्दावापे गोरूपमात्रावापात्, तदुद्धारे चोद्धारात् तावन्मात्रस्यैव गोशब्दाभिधेयता, नार्थान्तरतत्संसर्गयोः, व्यभिचारात् । तथा प्रतिपत्तिकालेऽपि गवादिशब्देभ्यः क्रमेणार्थमात्रप्रत्यया एव जायन्ते, नार्थान्तरतत्संसर्गप्रत्ययाः । संसर्गप्रत्ययस्त्वन्त्यपदार्थप्रत्ययात् पराचीनः । तदेवं प्रयोगप्रत्ययाभ्यामर्थस्वरूपमात्रे पदसामर्थ्येऽवगते वाक्यप्रयोगसमनन्तरभाविनः संसर्गप्रत्ययस्यानन्यथासिद्धान्वयव्यतिरेकाभ्यां पदार्था एव हेतवः कल्प्यन्ते । ननु प्रवृत्तिलिङ्गेन संसर्गप्रत्यय एवान्वयव्यतिरेकाभ्यां शब्दकार्यत्वेन गम्यते । तन्न, कारणकारणविषयतया तयोरन्यथासिद्धेः । तस्मात् स्वरूपमात्रे पदानां शक्तिर्न संसर्ग इति स्थितम् ॥ २४, २५ ॥

एतन्निराकर्तुमन्विताभिधानपक्षं प्रतिजानीते —

पदानामेव यन्नाम संसृष्टस्वार्थबोधनम् ।
अन्वितस्याभिधानं तत् सङ्गिरन्ते विपश्चितः ॥ २६ ॥

तत्र प्रमाणमाह —

प्रतिपत्तुः प्रवृत्त्या हि शब्दविज्ञानबन्धना[1] ।
संसर्गबुद्धिर्व्युत्पन्नाव्यवधानानुमीयते ॥ २७ ॥

प्रवृत्त्यनुमिते हि संसर्गज्ञाने शब्दसामर्थ्यमन्वयव्यतिरेकौ गमयतः । ननु पदार्थबुद्धिव्यवधानेना यथासिद्धिरुक्ता, न तदानीं तावद्व्यवधानप्रतिपत्तिः । न । कालान्तरे तदनुसारेणैवावापोद्धारसम्भवात् । न च लोकेऽपि विशेष(ण)प्रतिपत्तिजन्या विशिष्टप्रतिपत्तिरिति नियमः । प्रतिपादकचक्षुरादिसाम्ये सति प्रथमत एव विशिष्टप्रतिपत्तेः । तस्मात् प्रथमत एवान्वयव्यतिरेकौ संसर्गसामर्थ्यं गमयत इति स्थितम् ॥ २७ ॥

नन्वेवमप्यावापोद्धाराभ्यां स्वरूपमात्रे सामर्थ्यमित्युक्तमिति । तत्राह —

योग्येतरान्वितस्यार्थस्यावापोद्धारदर्शनात् ।
संसृष्टेष्वेव सामर्थ्यं पदानामवसीयते[2] ॥ २८ ॥

यद्यपि प्रति(प्र)योगं विशेषान्तरतत्संसर्गयोर्व्यभिचारो दृश्यते, तथापि योग्येतरान्वितस्यार्थस्याव्यभिचारात् प्रथमावगतसंसर्गसामर्थ्यानुसारेण तत्रैव सामर्थ्यं कल्प्यत इत्यभिप्रायः । न च पदार्थज्ञानस्यावापोद्धाराभ्यां संसर्गस्यावापोद्धाराविति युक्तं, तस्य संसर्गात् पूर्वभावितया संसर्गेण तदानीमन्वयव्य-

---

१. 'नात्', २. 'गम्यते' क. पाठः.

तिरेकायोगात्, शब्दस्येव तदानीं पूर्वभावित्वासिद्धेः। नन्वर्थान्तरमात्रान्वितं गोत्वं न गोशब्दसामर्थ्यविषयः, आनयनान्वयस्याशाब्दत्वप्रसङ्गात्। अर्थान्तरमात्रान्वयस्य[1] च स्वरूपमात्राभिधानेऽप्यनुमानादिनैवान्यथासिद्धेर्न तत्र शब्दसामर्थ्यकल्पना युज्यते॥ २८॥

अथानयनविशेषान्वितमेव[2] गोत्वं गोपदाभिधेयं कल्प्येत, तदानयतिपदान्तरवैयर्थ्यप्रसङ्गः। तत्राह—

न सामान्यान्वयं ब्रूमो विशेषान्वयमेव तु।
अर्थेऽपि चोदना तुल्यापेक्षा च सहकारिणी॥ २९॥

यो हि गोत्वादिपदार्था एवाकाङ्क्षासन्निधियोग्यतावशेन परस्परात्मसंसर्गं प्रमिमत इति प्रतिजानीते, तस्यापि पदार्थाः पदार्थान्तरमात्रसंसर्गं न प्रतिपादयन्ति, विशेषसंसर्गनिष्ठत्वात् प्रयोगप्रत्यययोः, अन्यथासिद्धत्वाच्च सामान्यान्वयस्य। अथ पदार्थविशेषसंसृष्टस्वात्मानं पदार्थः प्रतिपादयति, तर्हि पदार्थान्तरावगमाय न पदान्तरोपादानमर्थवद्, एकेनापि पदार्थेन विशिष्टसंसर्गसिद्धेः। अथ संसर्गप्रतिपादनसमर्था अपि पदार्था न परस्परमनपेक्ष्य प्रतिपादयन्ति, शक्तानामपि कार्यजनने सहकारिसव्यपेक्षत्वादिति। शब्देष्वपि तर्हि तुल्योऽयं न्यायः, तेषामपि संसर्गसमर्थानामन्योन्यापेक्षया प्रतिपादकत्वात्। अत एव सत्यपि गोशब्दस्य योग्येतराशेषपदार्थविशेषसंसर्गप्रति-

---

१. 'स्यै', २. 'य स्व' क. पाठः. ३. 'ति' ख. पाठः.

पादनसामर्थ्ये सहकारिकारणसमवधानभेदेन कदाचित् क्वचिदेव कार्यहेतुत्वमर्थपक्ष इव न निरुध्यते । ननु योग्येतराशेषविशेषसंसर्गाभिधानसमर्थे गोशब्दे प्रयुक्ते कथमानयतिना तदपेक्षितो विशेषः समर्प्यते, आनयतेरप्यनेकविशेषसंसर्गसमर्थतया क्वचिदेव नियमाभावात् । स्यादेतत् — प्रथमप्रयुक्त एव शब्दोऽन्विताभिधाने वर्तते, चरमप्रयुक्तास्तु स्वरूपाभिधानेन तदर्थं नियमयन्तीति । तन्न । शब्दानां प्रयोगप्राथम्यानियमात्, सर्वेषामन्विताभिधानसामर्थ्यस्योपगन्तव्यत्वान्नियमासिद्धेः । अथाख्यातपदमेवान्वितमभिधत्ते, पदान्तराणि तु स्वरूपाभिधानेन तदर्थं नियमयन्तीति । तन्न । प्रमाणाभावाद्, आख्यातपदरहितवाक्ये च पदार्थान्वयदर्शनस्यापह्नोतुमशक्यत्वाच्च । तस्मान्न परस्परापेक्षयापि संसर्गनियमसिद्धिरिति ॥ २९ ॥

तत्राह —

रूपमात्रेऽनपेक्षत्वान्नियमो न विरुध्यते ।
अर्थेऽपि साम्याच्चोद्यस्य नातः पर्यायता तयोः ॥३०॥

सत्यपि संसर्गाभिधानसामर्थ्ये गवादिशब्दानां गोत्वादिस्वरूपमात्रे सहकार्यनपेक्षया बुद्धिसामर्थ्यमस्ति । एकैकपदप्रयोगे तथा दर्शनात् । न हि शक्येऽपि सर्वत्र सहकार्यपेक्षैवानपेक्षैव[1] वेति नियन्तुं शक्यते । उच्चालनपठनभोजनादिषु लोके क्वचिदपेक्षा क्वचिदनपेक्षेत्युभयथा दर्शनात् । अतः

---

१. 'र्यनपेक्षैवेति नि' क. पाठः.

परस्परानपेक्षजन्यबुद्धिगोचरानेव पदार्थानितरेतरसंसर्गितयासम्भूय पदानि प्रमिमत इति नानियमप्रसङ्गः । किन्त्वपदार्थेऽपि कृत्स्नविशेषसंसर्गबुद्धिसमर्थे सहकारिपदार्थान्तरमनेकसंसर्गबुद्धिसमर्थं केन विशेषणेन संसर्गं नियमयेत् । अथाभ्यर्हितत्वात् स्वरूपेणैव नियमयेत्, तर्हि पदमपि निरपेक्षबुद्धिगोचरेण पदार्थस्वरूपेण संसर्गं नियम्य प्रमिमत इति न कश्चिद् विरोधः । अत एवानपेक्षबुद्धिगोचरत्वाद् गोत्वादयो गवादिशब्दानां स्वार्था इति विशेषणोच्यन्ते । स्यादेतद् — गामानयेति प्रयोगे पदयोरितरेतरसंसृष्टस्वार्थाभिधानात् पर्यायत्वप्रसङ्ग इति । नैतत् सारम् । एकस्मादेव हि पदात् सहकारिपदान्तरनिरपेक्षाद् यावानर्थः प्रतीयते, तावानेव यदि पदान्तरादपि केवलात् प्रतीयेत, स्यात् तयोः पर्यायत्वं, प्रसिद्धेः । न तथेह समस्ति, परस्परसापेक्षत्वनिमित्तैककार्यमात्रत्वात् । तस्मान्न पदान्तरवैयर्थ्यमनियमो वा ॥ ३० ॥

स्यादेतत्— प्रतिप्रयोगं संसर्गिभेदाद् भिद्यमाने संसर्गे शक्यभेदादेकस्य गोशब्दस्यानन्ताः शक्तयः कल्पयितव्याः प्रसज्येरन्निति । तत्राह—

विचित्रसहकारित्वात् कार्यभेदस्य सिद्धितः ।
शक्तिर्न भिद्यतेऽर्थेषु तथा शब्देषु चाक्षवत् ॥ ३१ ॥

अर्थोऽपि खलु संसर्गं प्रतिपादयन् प्रतिविशेषं संसर्गभेदाद् भिद्यमानशक्तिः स्यात् । अथ सहकारिपदार्थवैचित्र्यादेकयापि शक्त्या कार्यवैचित्र्यं सिध्यति । यथा चक्षुषो नीलपीतादिविषयसहकारिभेदादेवैकयापि रूपप्रकाशनशक्त्या

नीलपीतादिविज्ञानकार्यभेदः । तर्हि शब्देष्वपि सहकारिभेदात् कार्यभेदो न दण्डवारितः ॥ ३१ ॥

ननु प्रतिविशेषमभिधेयभेदानन्त्यात् सम्बन्धग्रहणमशक्यसम्पादनम् । शक्यसम्पादने च शब्दोऽनुवादक एव स्यात् । अर्थपक्षे न सम्बन्धज्ञानापेक्षा, शब्दधर्मत्वादस्येत्यत आह —

उपलक्षणयोगेन धूमाग्न्योरिव सङ्गतेः ।
व्युत्पत्तियोगो नातः स्यात् संसर्गेष्वनुवादता ॥ ३२ ॥

यथेह धूमजातीयानामग्निजातीयैर्व्याप्तिरित्युपलक्षणयोगेन विशेषाणामपि सम्बन्धो गृह्यते, तावतैव विशिष्टदेशे धूमविशेषदर्शनात् तथाविधाग्निविशेषोऽपि गम्यते । न च सावगतिरनुवादः । एवं योग्येतरत्वोपलक्षितविशेषसंसृष्टस्वार्थे सामर्थ्यमित्युपलक्षणोपादानेन कृत्स्नसंसर्गसामर्थ्यप्रतिपत्तावपि न विशिष्टसमभिव्याहाराद् विशिष्टसंसर्गप्रतिपत्तिरनुपपन्ना । नापि सा प्रतिपत्तिरनुवादः, वह्निसामान्यमात्रवदनुमाने पदार्थस्वरूपमात्रं शाब्दे संसर्गेऽनूद्यत एव । उपलक्षणेऽपि स्वरूपमात्रस्य नियमेन प्रमाणान्तरसिद्ध्यपेक्षणात् । अतः संसर्गे नानुवाद इति सिद्धम् ॥ ३२ ॥

स्यादेतद् — यदि पदान्तरेणानभिहितेन संसृष्टं गोत्वं गोशब्देनाभिधीयेत, तदा पदान्तरवैयर्थ्यं स्यात् । अथाभिहितेन, तदेतरेतराश्रयता । आनयनेऽभिहिते तदन्वितं गोत्वं गोशब्दोऽभिधत्ते । गोत्वे चाभिहिते तदन्वितमानयनमानयतिरिति । तत्राह —

क्रमेणावगतानर्थान् युगपत् संहतानथ ।
प्रमिमीरन् पदानीति नान्योन्याश्रयदोषता ॥ ३३ ॥

अन्योन्यानपेक्षमेव पदेभ्यः पदार्थाः क्रमेण प्रतीयन्ते। अन्त्यपदोच्चारणानन्तरं च तानेव पदार्थानितरेतरसंसर्गितया तान्येव प्रतिपादयन्ति पदानीति न दोषः। अथवा नेहान्वयिपदार्थावगतिः पूर्वभाविन्यपेक्ष्यते। किं त्वानुषङ्गिकी सा, अतो युगपत् परामृष्टानि पदानि संसर्गं प्रतिपादयन्तीत्यभिधीयमानेनैवान्वय इति स्थितम्। तस्मात् प्रयोगसमयेऽन्वयव्यतिरेकाभ्यां न स्वरूपमात्रे सामर्थ्यमवधारितं, किन्तु संसर्गे इति स्थितम्। यत्त्वेकैकस्मात् पदात् पदार्थमात्रमेवावसीयते, न संसर्गः, अतस्तत्रैव सामर्थ्यमिति। तदपि न। संसर्गसमर्थस्यैव सहकारिविकलस्य स्वरूपमात्रेऽपि बुद्धिहेतुत्वोपपत्तेः। अन्यथा पदानां पदार्थेषु शक्तयः, पदार्थानां च संसर्गे शक्तय इति शक्तिकल्पनागौरवं च स्यात्। स्यादेतत्। पदपक्षेऽपि पदार्थान्तरविशिष्टस्वार्थे सामर्थ्यमिति शक्तेः सविशेषणत्वं प्रसज्यत इति। तन्न। अर्थशक्तेरप्यर्थान्तरव्यावृत्तस्वात्मविषयत्वेन सविशेषणत्वात्। अतः पदार्थस्वरूपानुवादेन संसर्गबुद्धिः पदेभ्य एवेष्यताम्। अत्राह कश्चिद् — नाभिधानसामर्थ्यजन्योऽनुवादः पदात् पदार्थबुद्धिः। किन्तु स्मृतिप्रमाणसंशयविपर्यासानामन्यतमेन पदात् पदार्थज्ञानेन भवितव्ये परिशेषात् स्मृतिरेवैषा। सा च पूर्वोपलम्भ-

---

१. 'कत्वप' ख. पाठः.

संस्कारनिमित्तौ नाभिधानमपेक्षते। शब्दज्ञानं चार्थसम्बन्धि-शब्दविषयतया संस्कारोद्बोधद्वारेण सम्बन्ध्यन्तरस्मृतिनिमित्तमिति ॥ ३३ ॥

कोऽयं पदस्य पदार्थेन सम्बन्धः। तद्बुद्धेसामर्थ्यलक्षण एव। तत एव तर्हि सामर्थ्याद् बुद्धिरिष्यतां, किं शक्तिसम्बन्धिनि स्मृतिसामर्थ्यान्तरकल्पनया। नैतत् सारं, विशिष्टेऽर्थे समर्थस्य स्वरूपमात्रे शक्त्ययोगात्, तावन्मात्रे बुद्ध्यनुपपत्तेरिति। तत्राह—

स्वरूपमात्रे शक्तं चेत् कथं तत् स्मारकं भवेत्।
शक्त्येकदेशयोगाच्चेच्छक्तिरेवास्तु बोधिका ॥ ३४ ॥

विशिष्टार्थसम्बन्धिनः शब्दादेकदेशस्मृतिरिव तावन्मात्रेऽभिधानकार्यमप्युपपद्यत इत्यर्थः ॥ ३४ ॥

किञ्च,

नियमाच्छब्दतो बुद्धेर्न तथान्वयिदर्शनात्।
अर्थेषु नैव शक्तिः स्यात् संसर्गेऽपि च तत्स्मृतेः ॥ ३५ ॥

न तावत् सम्बन्धिदर्शनात् सम्बन्ध्यन्तरबुद्धिः, नियतानुदर्शनाद्, बहुविधत्वाच्च सम्बन्धिनां वक्रादीनामेकत्र नियमेन स्मृत्ययोगात्। सम्बन्धग्रहणसंस्कारवतश्च शब्दोपलब्धेर्नियमेनार्थबुद्धिर्जायते। संस्कारजन्यायां च स्मृतौ शब्दान्वय-

---

१. 'त्ताभि', २. 'र्शं' ख. पाठः.

व्यतिरेकावुपेक्ष्येयाताम्। न च शब्दस्य स्मृतिहेतुसंस्कारोद्बोधकतयान्यथासिद्धिः, संस्कारोद्बोधस्य स्मृतिव्यतिरिक्तस्यानिरूपणाद्, वक्त्रादिविषयसंस्कारोद्बोधकप्रसङ्गाच्च। तस्मात् सम्बन्धज्ञानसंस्कारविशिष्टमभिधानमेव पदार्थज्ञानेषु पुष्कलकारणमिति नियमेनानुवाद एवैष जायते। पूर्वोपलम्भतद्देशकालादिसम्भेदरहितत्वाच्च न स्मृतिः। किंच संसर्गज्ञानसमयेऽपि पदार्थांशेषु संस्काराणां भावात् स्मृतिमात्रोपपत्तेर्न कदाचिदपि तेष्वभिधानकार्यं सिध्येत्। ततश्च शक्तिसम्बन्धज्ञानान्न सम्बन्धिदर्शनात् सम्बन्ध्यन्तरस्मृतिः। न हि संसर्गज्ञानसमये सत्स्वपि संस्कारेषु अभिधानजनिता पदार्थबुद्धिर्न प्रागिति नियन्तुं शक्यते। तस्मादभिधानजन्योऽयमनुवादः। स एव चैकैकस्मात् पदात् प्रथममुत्पद्यते, पुनस्तेभ्य एवेतरेतरसहकारिभ्यः संसर्गः प्रतीयते शक्तिकल्पनालाघवादिति स्थितम्[2]॥ ३५॥

अपिच प्रमाणान्तरावसितपदार्थेभ्यः संसर्गे प्रमीयमाणे कथं शब्दोपलब्ध्यन्वयव्यतिरेकवतः संसर्गप्रत्ययस्य पदार्थहेतुत्वं कल्प्यते। स्यादेतत्। पदार्थानां संसर्गव्यापारं तच्छक्तिं वा पदान्यभिव्यञ्जयन्ति न प्रमाणान्तरं, ततश्च संसर्गप्रत्ययः। किञ्च सम्बन्धज्ञानात् प्राक् पदानामदृश्यमाने संसर्गहेतुत्वे क्रमवत्पदार्थावगमात् पराचीनः संसर्गप्रत्ययः कथं शब्दनिबन्धनः स्यादिति। तत्राह —

---

१. 'नं न स' ख. ग. पाठः. २. 'तिः॥' क. पाठः.

संसर्गशक्तेर्न व्यक्तिव्यापारस्यापि शब्दतः ।
नाभिधेयद्वयं तद्धि न शब्दः कारणं तयोः ॥ ३६ ॥

न च पदस्याभिधेयविषयं व्यापारान्तरमस्ति, येन पदार्थावगतौ संसर्गशक्तितद्व्यापारौ व्यज्येयाताम् । न च पदेभ्यस्तयोः प्रतिपत्तिः, अनभिधेयत्वात् । न च पदजन्यं विज्ञानं पदार्थातिशयहेतुः, ज्ञानस्य स्वविषयविकाराहेतुत्वात् । न च सम्बन्धग्रहणापेक्षया संसर्गप्रतिपादकेषु पदेष्वानुषङ्गिकपदार्थप्रतिपत्तेः संसर्गहेतुत्वं शक्यते कल्पयितुं, शक्तिकल्पनागौरवाद्, अन्यत्रादृष्टसामर्थ्यत्वाच्च । न च पदार्थेषु पदावगतेषु कश्चिदतिशयो न मानान्तरावगतेष्विति युक्तम् । तस्मात् पदनिबन्धनः संसर्गप्रत्ययः ॥ ३६ ॥

ननु

"पश्यतः श्वेतिमारूपं *(?) हेषाशब्दं च शृण्वतः ।
खुरनिष्पेषशब्दं च श्वेतोऽश्वो धावतीति धीः[२] ॥"

इति पदार्थेभ्योऽपि संसर्गप्रत्ययो दर्शितः, इत्यत आह —

नार्थाधीनस्तु संसर्गबोधो मानान्तरं विना ।
परिशेषानुमानाद्धि श्वेतोऽश्वो धावतीति धीः ॥ ३७ ॥

खुरनिष्पेषशब्दानुमितस्य धावनस्य परिदृष्टस्य श्वैत्यस्य च धर्म्यपेक्षायां द्रव्यान्तरस्यासम्भावनात् परिशेषाद्धेषा-

---

१. 'यं' क. पाठः. २. 'धीः घ' ख. ग. पाठः.

---

* 'श्वेतिमं रूपम्' इति स्यात् । श्वेतिमशब्दाद् अर्शआद्यच् श्वेतिमं श्वैत्ययुक्तमित्यर्थः । रूपमाकृतिम् ।

शब्दानुमिताश्वधर्मिनिष्ठतामनुमिमानः श्वेतोऽश्वो धावतीति प्रतिपद्यते, न पदार्थान्तरमात्रेभ्यः ॥ ३७ ॥

किञ्च —

नान्तर्गमः प्रमाणेषु पदार्थानामसम्भवात्।
अविनाभावरूपादेर्न शाब्दे तद्लक्षणात् ॥ ३८ ॥

न तावच्चक्षुरादिवत् पदार्थाः संसर्गमवगमयन्ति, अनवबुद्धानामहेतुत्वात्। नाप्यनुमानवद्[1], अविनाभावाभावात्। नाप्यर्थापत्त्या, संसर्गमन्तरेणापि पदार्थोपपत्तेः। सादृश्याभावौ[2] च नियतविषयौ। न च शाब्देऽन्तर्भावः, शब्दादर्थबुद्धिरिति[3] लक्षणात्। ननु शब्दावबुद्धपदार्थजन्योऽपि संसर्गबोधः शाब्द एव। न। अर्थानां संसर्गेण सम्बन्धाभावाद् बोधकत्वानुपपत्तेः[4]। नन्वाश्रयाश्रयिलक्षणः सम्बन्धो विद्यते। न। तावन्मात्रस्याबुद्धिनिमित्तत्वात्। न हि शब्दप्रतिपन्नेऽपि घटे तदाश्रयो रसः प्रतीयतेऽविनाभावादिव्यतिरेकेण। ननु शब्दा एव संसर्गं बोधयन्ति[5], किन्तु पदार्थबुद्धिव्यवधानेन। तदुक्तं[6] —

"वाक्यार्थमितये तेषां प्रयुक्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥"

इति। नैतत् सारं, पदानां पदार्थबुद्धिषु पर्यवसानात्। ज्वालानामिव पाकस्य पदार्थानां संसर्गस्यानिमित्तत्वात्। अथ शब्दा एव पदार्थबुद्ध्युपकरणाः संसर्गमवगमयेयुः। किमु-

---

१. 'नम् अवि', २. 'श्य', ३. 'र्थे' क. पाठः. ४. 'बा' ख. पाठः. ५. 'दे', ६. 'न्तीति, कि' क. पाठः,

पकरणैः । गृहीतसम्बन्धानामेव शब्दानामन्वयव्यतिरेकवत्त्वात् । तस्मान्न पदार्थेभ्यः संसर्गप्रत्ययः प्रमाणपक्षपाती ॥३८॥

कथं पुनरन्विताभिधाने लक्षणावृत्तिः, यावता न मुख्यमर्थमर्थान्तरसंसर्गितया प्रतिपादयति । नापि लक्ष्यमाणं, तदभिधायकपदाभावात् । अतो लक्ष्यमाणार्थनिबन्धनस्तत्र संसर्गः । अध्याहारे चाध्याह्रियमाणार्थनिबन्धन एव संसर्गः, तदभिधायकपदाभावादिति । तत्राह —

लक्षणायां च तद्वाचिपदात् संसर्गधीर्भवेत् ।
अध्याहारे च शब्दार्थापत्तिलब्धात् पदाद्धि सा ॥ ३९ ॥

मञ्चशब्दः क्रोशनेन संसृष्टस्वार्थं प्रतिपादयितुं प्रवृत्तस्तत्र विरोधात् क्रोशनसंसर्गितया स्वार्थबुद्धिद्वारेण पुरुषे बुद्धिमुत्पादयति । क्रोशनसंसर्गितया शब्दात् प्रतिपन्नो हि मञ्चपदार्थः पुरुषे क्रोशनसंसर्गिणि बुद्धिहेतुर्न केवल इत्यतः सन्निहितपदाभिधेयार्थसंसर्गिपदार्थप्रतिपादनाय प्रवृत्तं पदं व्यवधानेनाव्यवधानेन वा यत्राकाङ्क्षितार्थप्रतिपत्तिहेतुः तत्संसर्गस्तन्निबन्धन इति नान्विताभिधानपक्षस्वीकारविरोधः । व्यक्तिलक्षणायामपि सामान्यबुद्धेरव्यभिचारेण व्यक्तौ पर्यवसानात् तत्सामान्यसंसर्गाभिधानमेव विशेषसंसर्गेऽपि निमित्तम् । अर्थवादिनां चाभिहितानामसंसर्गादन्वयिनां चानभिधेयत्वात् सद्भावं प्रतिपादकत्वमविशिष्टम् । अध्याहारे च प्रमेयैकदेश-

---

१. 'ने सं' ख. ग. पाठः. २. 'र्थे' क. पाठः. ३. 'व' ख. ग. पाठः.

समर्पणसमर्थप्रमाणैकदेशविषयशब्दार्थापत्तिप्रापितपदोपसंहारेणान्विताभिधानसिद्धिः । अन्यथाध्याह्रियमाणार्थसंसर्गस्यार्थनिबन्धनत्वेनानागमिकत्वप्रसङ्गात् ॥ ३९ ॥

तस्मादुपसंहरति —

अतः पदेभ्यः संसर्गस्तच्छक्तिभ्यः प्रमीयते ।
इति न्यायैर्यथाशक्ति व्युत्पत्तिं प्रत्यपीपदम् ॥ ४० ॥

उक्तमन्विताभिधानात् पदेभ्य एव वर्णात्मकेभ्यः संसर्गबुद्धिरिति ॥ ४० ॥

अपिच —

शाब्दत्वं नान्यथैव स्यात् पदबृन्दस्मृतेर्विना ।
महावाक्येन चेत् तेऽपि निर्विकल्पेतरा हि सा ॥४१॥

इतोऽपि वर्णात्मकानामेव पदानां वाक्यार्थप्रतिपादकत्वमङ्गीकर्तव्यम् । अन्यथा तस्य शाब्दत्वविरहादप्रामाण्यप्रसङ्गात् । ये तु मन्यन्ते — वर्णोपलम्भजनिताः संस्कारा एव स्मारकाः तदतिरेकिणो वा पदार्थबुद्धिसामर्थ्यावच्छिन्नतया पदशब्दभागिनः संसर्गं प्रतिपादयन्तीति, तैरपि संसर्गस्य शाब्दत्वमभिप्रेतमात्मीयेन मतेन निराकृतं भवति । कथं हि शब्दोपलब्धपदार्थजनितसंसर्गबोधमशाब्दं ब्रुवता तदुपलम्भनितसंस्कारजनितसंसर्गबोधस्य शाब्दत्वमिष्यते, न हि चाक्षुषज्ञानसंस्कारजनितं ज्ञानं चाक्षुषं प्रमाणं वा भवति ।

---

१. 'त्वेऽनाग', २. 'प्रतिपत्तिः', ३. 'ब्धि' क. पाठः, ४. 'तबो' ख. ग. पाठः.

अनधिगतार्थविषयताभावादिति चेद्, इतरत्रापि संस्कारजन्यत्वे तथात्वं केन वार्यते । तत्राह[1] — वर्णपक्षेऽन्त्यपदप्रत्ययानन्तरांशेषपदावमर्शिस्मृतिज्ञानं संसर्गनिमित्तं महावाक्येऽशक्यसम्पादनमिति ज्ञानानपेक्षाः संस्कारा एव तद्धेतव इति। नैतत् सारं, महावाक्ये न शाब्दी प्रमितिः । किन्त्ववगतसंसर्गाणामेकप्रयोजनसम्बन्धितयान्वयोऽर्थनिबन्धन एव। यत्र पदैकवाक्यता तत्रैव शाब्दी प्रमितिः। तत्र चाल्पत्वात् पदानां नानुसन्धानानुपपत्तिः । इतरस्यापि संसर्गप्रमितेः सविकल्पकत्वात् तद्वाचकाशेषपदानुषङ्गो न शक्यते निराकर्तुम् । अशेषपदावमर्शसिद्धये[2] च वाक्यं पुनः पुनः पठ्यते । संस्कारपक्षे तेषां सकृदुत्पत्तेर्न पुनः पुनः पठनापेक्षा । क्रमोपलब्धाशेषपदावमर्शिस्मृत्युदये संस्कारप्रचयापेक्षा लोकेऽन्वयव्यतिरेकसमधिगता। अनन्वयिपदाव्यवहितमेकमिदं वाक्यमिति समस्तपदानवमर्शे नोपपद्यते । संसर्गप्रत्ययान्यथानुपपत्त्या वा समस्तपदावमर्शः[3] कल्प्यताम्। सम्बन्धग्रहणे च समस्तपदावमर्शाभावे न संसर्गसामर्थ्यप्रतिपत्तिः। तस्मात् पदबृन्दस्मृतेरेव संसर्गप्रतिपत्तिः। योऽप्यन्त्यपदार्थावगमानन्तरमशेषपदार्थावमर्शी संसर्गहेतुं कल्पयति, तस्यापि सविकल्पकतया पदावमर्शस्य तद्वाचकाशेषपदावमर्शे वक्तव्ये किमुभयानुस्मरणेन कल्पितेन । तस्मात् समस्तपदावमर्शादेव संसर्ग इति स्थितम् ॥

---

१. 'अ' क. पाठः. २. 'ये वा' ख. पाठः. ३. 'दाम' ख. ग. पाठः.

उक्तमन्विताभिधानम् । इदानीं तत्रैव किञ्चिद् विशेषं परामृशति —

किं कार्यान्वयिनं स्वार्थं किं वार्थान्तरसङ्गतम् ।
शब्दोऽभिधत्त इत्येतदधुना संविमृश्यते ॥ ४२ ॥

तत्र कार्यान्वयवादी स्वपक्षं[1] वर्णयति —

प्रतिपत्तुः प्रवृत्त्या हि शब्दविज्ञानबन्धना ।
कार्यसंसर्गधीरेव व्युत्पत्त्याध्यवसीयते ॥ ४३ ॥

प्रतिपत्तुः प्रवृत्तिलिङ्गेन विशिष्टकार्यज्ञानमनुमाय तदन्वयिषु पदार्थेषु पदानां सामर्थ्यमवधारयति ॥ ४३ ॥

ननु बालेन यत् स्वात्मनि प्रवृत्तिनिमित्तमवगतं, तदेव प्रतिपत्तुरप्यनुमीयते, तर्हि[2] हितज्ञानं तत्साधनज्ञानं वा प्रैषादिर्वेङ्गितादिर्वा दर्शितः[3] प्रवृत्तिनिमित्तमित्यत आह —

न प्रवृत्तिर्हितोपायात् तथेष्टादाशयाच्च न ।
व्यभिचारादबाधाच्च कार्यसिद्धेः फलादिषु ॥ ४४ ॥

अवधारिते च फले तत्साधने च नातीतादिरूपे प्रवर्तते । ततो हितादयोऽपि कालत्रयविविक्ततया कार्यबुद्धिगम्याः प्रवृत्तिहेतवः । तत्र व्यभिचाराद्धितादीनामव्यभिचाराच्च कार्यबुद्धेः सैव प्रवृत्तिहेतुरिति ॥ ४४ ॥

ननु तदेव हि कार्यं, यदिष्टसाधनम् । तदुक्तं —

"कर्तुरिष्टाभ्युपाये हि कर्तव्यमिति लोकधीः"

---

१. 'क्षं व्याव' क. पाठः. २. 'च' ख. ग. पाठः. ३. 'तं' ख. पाठः.

इति । अथवा हितसाधनज्ञानाधीनत्वात् कार्यादिबुद्धेस्तदेव कार्यताबुद्धिद्वारेण प्रवृत्तिनिमित्तमिति तत्रैव शब्दसामर्थ्यं कल्प्यत इत्यत आह —

कार्यं नेष्टाभ्युपायत्वं[1] कृतिव्याप्यं हि तत् स्मृतम् ।
तदेवाव्यवधानात् तत्सिद्धत्वेऽपि प्रवर्तकम् ॥ ४५ ॥

प्रसिद्धस्तावत् कार्येष्टसाधनयोर्भेदः । इष्टसाधनज्ञानाधीनमपि कार्यताज्ञानमव्यवधानात् प्रवृत्तिनिमित्तमुच्यते । न ह्यन्वयव्यतिरेकाधीनं हितसाधनमन्वयव्यतिरेकेण[2] प्रवृत्तिनिमित्तम् । तस्मात् कार्यमेव प्रवृत्तिहेतुरिति स्थितम् । तत्र केचिदाहुः — शाब्दव्यवहारे शाब्दभावना प्रवृत्तिहेतुरिति । तत्राभूतप्रादुर्भावफलं करोत्यर्थमात्रं भावना । तत्रार्थव्यापारोऽर्थभावना । शब्दव्यापारस्तु स्वाभिधेयज्ञानजननलक्षणः शब्दभावना । सा च शब्दकर्तृकार्थज्ञानभाव्यनिष्ठा शब्दज्ञानकरणिका सम्बन्धज्ञानसंस्कारेतिकर्तव्यताका सर्वशब्दानामविशेषवती । लिङादिशब्देषु[3] तु भिद्यते । सा[4] लिङादिकर्तृकार्थभावना लक्षणपुरुषप्रवृत्तिभाव्यनिष्ठा स्वज्ञानकरणिका स्तुतिनिन्दार्थवादादिज्ञानेतिकर्तव्यताका च समाश्रीयते । कथम् । पाकं करोतीति पचतीत्याख्यातार्थस्य करोतिना व्याख्यानात् सर्वाख्यातानां तावत् करोत्यर्थोऽभिधेयः[5] । लिङादीनां तु विधिविवक्षया प्रयुज्यमानानां चेतनविषयप्रयोगित्वात् पुरुषप्रयत्नः पुरुषार्थ-

---

१. 'त्वात् कृ', २. 'को न प्र' ख. ग. पाठः. ३. 'ब्देषु तु', ४. 'सा हि लि' क. पाठः. ५. 'ना च न पु' ख. पाठः. ६. 'यं' ग. पाठः.

भाव्यनिष्ठो धात्वर्थकरणः प्रयाजादीतिकर्तव्यताकोऽर्थभावनालक्षणः करोत्यर्थोऽभिधेयः । तत्र स्वाभिधेयार्थभावनाज्ञानजननो[1] लिङादिशब्दव्यापारः स्वाभिधेयार्थभावनामपि भावयतीति विशेषः । कथम् । लिङादि[2]शब्दश्रवणानन्तरं प्रवृत्तिदर्शनाच्छब्दमात्रस्यागृहीतसम्बन्धस्याप्रवर्तकत्वात् प्रवृत्तिहेतुं कञ्चिदर्थमभिधाय शब्दः प्रवर्तयतीति गम्यते । तत्रार्थान्तराभिधानकल्पनायां कल्पनागौरवात् स्वाभिधानव्यापारमभिधेयज्ञानजननलक्षणमभिधाय तद्द्वारेणार्थभावना[3]ं प्रवृत्तिं जनयतीति परिशेषार्थापत्तिभ्यां गम्[4]यते । ततश्चार्थभावनाभाव्यनिष्ठा शब्दभावना । न केवलं तज्ज्ञानभाव्यनिष्ठाभिधानजन्यं शब्दभावनाविषयं विज्ञानं प्रवर्तकज्ञानत्वात् प्रवृत्तिलक्षणभाव्यनिष्पादनद्वारेण शब्दभावनां प्रति कारणतामश्नुते । अंशत्रयसहितार्थभावनाविषयस्तुतिनिन्दार्थवादादिज्ञानमपि प्ररोचनाद्वारेण प्रवृत्तिहेतुत्वाच्छब्दभावनां प्रतीतिकर्तव्यतामनुभवति । तदेवमंशत्रयसहिता शब्दभावना शाब्दव्यवहारे प्रवृत्तिहेतुरिति स्थितम् ॥ ४५ ॥

एतन्निराचष्टे —

प्रवृत्तिहेतुर्दृष्टान्ते न दृष्टा शब्दभावना ।
लोकसिद्धेऽपि शब्दार्थे नार्थापत्तिश्च गौरवात् ॥ ४६ ॥

---

१. 'ने', २. 'दिश्र', ३. 'नां', ४. 'कल्प्यते' क. पाठः. ५. 'क' ख. पाठः.

न तावदियं शब्दभावना बालेन प्रवृत्तिहेतुतया स्वात्मनि समधिगता, येन प्रतिपत्तुरपि शब्दार्थतयानुमीयेत । न च परिशेषार्थापत्तिभ्यां स्वाभिधेयाभिधानमवगम्यते, लोकसिद्धकार्यानुमानेनैवान्यथासिद्धेः । एकस्य शब्दस्य शब्दार्थभावनाभिधेयद्वयकल्पनागौरवं च । अभिधेयज्ञानगम्ये चाभिधानव्यापारे न तत्र शब्दसामर्थ्यकल्पना, अन्यथासिद्धत्वात् तज्ज्ञानस्य । न[1] च युगपदेकस्माच्छब्दादभिधेयद्वयविषयज्ञानद्वयोत्पादः, कर्तृसङ्ख्यार्थभावनयोरिव शब्दार्थभावनयोरेकवाक्यताभावात् । न च क्रमेण, शब्दस्य विरम्यव्यापाराभावात् । तस्मात् स्वरूपानुपपत्तेरप्रवर्तकत्वाच्च तस्याः कार्यमेव प्रवृत्तिहेतुरिति स्थितम् ॥ ४६ ॥

अत्रोच्यते —

अन्वयव्यतिरेकाभ्यामुपदेशादिभूमिषु ।
व्युत्पाद्यन्तेऽन्यसंसृष्टे बालाः कार्यान्विते न तु ॥ ४७ ॥

न च शब्दसमनन्तरजन्यप्रवृत्तिलिङ्गानुमानैकोपायैव शब्दार्थसम्बन्धावगतिः । किन्तूपदेशोपायादपि । तथाहि — बालेभ्यो जनन्यादिभिः प्रायेणोपदिश्यन्ते शब्दार्थसम्बन्धाः । ते च तत्र प्रयोगप्रत्यययोरिवान्वयव्यतिरेकाभ्यां विशेषसम्बन्धमवधारयन्ति । नन्वयं घटोऽयं पट इत्याद्युपदेशोऽपि प्रयोगमूल एव । प्रयोगे च कार्यान्विते सङ्गतिग्रहः, तेनोपदेशोऽपि कार्यनिष्ठ इति । तन्न । प्रयोगस्याप्युपदेशमूलत्वसम्भवान्नेदम्प्रथमता तयोः, परस्परमूलतोपपत्तेः । न च

१. 'न यु' क. पाठः.

प्रयोगे कार्यनिष्ठतेत्युपदेशेऽपि तन्निष्ठतावगमः, व्युत्पत्तुः शब्दसामर्थ्यविषयतया कार्यस्याप्रतीतेरुपदेशेऽप्रतीयमानकार्यकल्पनाद् वरं प्रयोगेऽपि संसृष्टमात्रस्य प्रतीयमानस्याभिधेयत्वकल्पनम् । ननूपदेशे बुद्धिसामर्थ्यं शब्दस्य प्रतिपत्तुं न शक्यते प्रयोग इव बुद्धिकार्यावगमे, मानाभावात् । कथं तर्हि उपदेशानन्तरं प्रयुक्ताच्छब्दादर्थं प्रतिपद्यन्ते बालाः । क्वचित् प्रयोगे शब्दस्य बुद्धिसमर्थतावगमादिहापि तत्सामान्याद् बुद्धिसामर्थ्यप्रतिपत्तिरिति चेत्, तथाप्युपदेशेषु कार्यमन्तरेण बुद्धिसामर्थ्यासिद्धिः । तथाच रागशक्तीच्छाद्वेषादिविषयाः शब्दार्थसम्बन्धाः प्रायेण व्युत्पाद्यन्ते । तेषां प्रयोगसमवायिप्रवृत्तिविषयदर्शनायोगात् । तथा च देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्यादिष्वतीतानागतवर्तमानार्थनिष्ठेष्वपि वाक्येषु प्रसिद्धार्थपदसमभिव्याहारेणाप्रसिद्धार्थस्यापि[1] पदस्य सम्बन्धोऽवगम्यते । तथा निगमनिरुक्तनिघण्टुव्याकरणेभ्योऽपि स्फुटतरा शब्दार्थव्युत्पत्तिः । न चैतेषु कार्यार्थतावगमोऽप्रतीतः । कथं पुनरुपदेशादिषु संसृष्टस्वार्थे सामर्थ्यावगमः । वाक्यरूपत्वादुपदेशादीनां पदान्तराभिधेयपदार्थसंसृष्टस्वार्थस्य सर्वत्राव्यभिचारात्, तथागृहीतसम्बन्धादपि शब्दात् संसृष्टार्थावगमात् । तस्मान्न कार्यसंसृष्टे नियमेन सामर्थ्यसिद्धिः ॥४७॥

किञ्च —

कार्यान्विते च शब्दार्थे प्रत्येकं सङ्गतिग्रहात् ।
शाब्दप्रमाणहानिः स्यान्नादृष्टे सङ्गतिग्रहः ॥ ४८ ॥

---

१. 'था दे' क. पाठः. २. 'र्थस्या' ग. पाठः.

'यजेत स्वर्गकाम' इति श्रौताद् वाक्यान्नापूर्वार्थप्रमितिलाभः । यतो नियोज्यविषयाभिधायिनोः पदयोः सम्बन्धज्ञानकाले कार्यसंसृष्टो नियोज्यो विषयश्च सिद्धः । तत्र विषयनियोज्यव्यावृत्ते[1] नियोगे शब्दोऽनुवादः स्यात् । न हि विषयनियोज्यसम्बन्धः[2] शाब्दः, किन्त्वर्थनिबन्धनः । अन्यान्विते तूपलक्षणोपादानेन धूमादग्निज्ञानवदपूर्वार्थप्रमितिर्युज्यते । स्यादेतत् । अनवगतस्यैव कार्यस्य सम्बन्धज्ञानविषयत्वान्न विषयनियोज्यव्यावृत्ते कार्यशब्दोऽनुवाद इति । नैतत् सारं, यतोऽनवगते कार्ये तत्संसृष्टपदार्थान्तरानवगमादगृहीतसम्बन्धा एव सर्वे[3] शब्दा बोधयेयुरिति प्रसज्येत[4], यतो नानवगतेऽर्थे सम्बन्धज्ञानम् । अथाज्ञादिषूपाधिषु कार्योऽप्यर्थः प्रतिबिम्बितोऽवगम्यत इति, तथापि तत्स्वरूपसंसृष्टेषु[5] सर्वपदार्थेषु सम्बन्धज्ञानाय प्रमाणान्तराधिगतेषु सिद्धं शब्दानामनुवादकत्वम् । अथ प्रवर्तकत्वं प्रमाणान्तरगृहीततया, शब्दार्थप्रवर्तकविशेषस्तु विषयनियोज्यव्यावृत्तो नियोगः प्रमीयत इति, तथापि शाब्दः संसर्गोऽनुवादः । विशेषस्तु परिशेषानुमानगोचर इति नापूर्वार्थप्रमितिलाभः । तस्मादुपलक्षणोपादानेनान्विते सम्बन्धग्रहेऽपूर्वार्थसिद्धिः ॥ ४८ ॥

किञ्च —

संसर्गप्रतियोगित्वं[6] नानुमेयस्य कृत्स्नतः ।
प्रतिपत्त्यन्तरे मा भूदुपायत्वं समं तयोः ॥ ४९ ॥

---

१. 'त्तेर्नि', २. 'ज्यः' क. पाठः. ३. 'र्वे' ख. ग. पाठः. ४. 'त अथा' क. पाठः. ५. 'पं' ख. पाठः. ६. 'त्वान्ना' क. ग. पाठः.

यदि प्रवृत्त्युन्नीयमानप्रत्ययविषयशब्दसामर्थ्यप्रतिपत्तावनुगम्यमानं कार्यमपि सर्वशब्दसामर्थ्यविषयनियामकत्वेन प्रयोजकं कल्प्येत, तर्हि सत्येव प्रमाणान्तरमितत्वादौ प्रयोगप्रत्ययाभ्यां सम्बन्धज्ञानाद्, असति चाज्ञानात्, तस्यापि सर्वशब्दसामर्थ्यविषयनियामकत्वं स्यात्। ननु प्रवृत्त्या प्रवर्तकज्ञानमनुमाय तत्रैव शब्दसामर्थ्यं प्रतिपद्यते, कुतः प्रमाणान्तरमेयत्वादेः प्रयोजकत्वावकाशः। सत्यम्, अस्मिन् प्रयोगे तथास्तु। किन्तु प्रयोगान्तरेषु भिन्नसंसर्गेष्वनुवर्तमानं प्रयोजकं मृग्यते। ननु कार्यं सर्वत्रानुवर्तते। सत्यं, प्रमाणान्तरमेयत्वादेरप्यस्त्वनुवृत्तिः, अन्वयव्यतिरेकनियमात्। ननु प्रमाणान्तरमेयत्वादिः[१] शब्दसामर्थ्यविषयो न भवतीति प्रागेव वर्णितं[२], तर्हि प्रमाणान्तरमितत्वाद्युपलक्षितकार्यसंसृष्टस्वार्थे सामर्थ्यमिति कल्प्यताम्। ननु शब्दसामर्थ्यविषयत्वे सति यदनुवर्तमानं तदेव प्रयोजकम्। तन्न, एवं विशेषणाद् वरमनुवर्तमानं प्रयोजकमिति ग्रहणम्। ननु मानान्तरप्रमितत्वाद्युपलक्षितकार्यान्वित इति ग्रहणाद् वरं कार्यान्वित इति ग्रहणम्। सत्यम्, ततोऽपि लघीयोऽन्विते सामर्थ्यमिति ग्रहणम्। ननु प्रमाणान्तरमितत्वादेरन्वयव्यतिरेकौ तस्य सम्बन्धग्रहणोपायत्वेनान्यथासिद्धौ, अवगम्य विवक्षित्वा प्रयुक्ते शब्दे प्रवृत्त्या चानुमिते वाक्यार्थज्ञाने सम्बन्धावगमादन्यथा चानवगमात्। अतो न तस्य सर्वशब्द-

---

१. 'दि', २. 'तः' क. पाठः.

सामर्थ्यविषयनियामकत्वमन्वयव्यतिरेकौ गमयतः । एवं तर्हि सत्येव कार्यज्ञाने प्रवृत्तिसिद्ध्या वाक्यार्थज्ञानमनुमाय तत्र सामर्थ्यज्ञानादन्यथा चाज्ञानात् तदन्वयव्यतिरेकावन्यथासिद्धौ । न च तस्य सर्वशब्दसामर्थ्यविषयनियामकत्वं गमयतः । तस्मादन्यान्विते[1] सामर्थ्यम् । ननु यदि कार्यतादेरन्वयव्यतिरेकवतोऽपि सर्वशब्दसामर्थ्यविषयनियामकत्वं परित्यज्योपायतयान्यथासिद्धिरुच्यते, उच्यतां तर्हि संसर्गस्यापि शब्दसामर्थ्यविषयतायाभावः । नैतत् सारम् । पदव्यतिरिक्तं वाक्यं पदप्रतिबुद्धपदार्थान् वा संसर्गहेतूनवलम्ब्य तत्प्रत्ययस्यान्यथासिद्धिर्वक्तव्या । तयोश्च[2] पक्षयोः शक्तिकल्पनागौरवात्, पदार्थानां च प्रमाणपक्षसङ्गमाभावादिति वर्णितदोषत्वाच्छब्दनिबन्धन एव संसर्गप्रत्यय इति कल्प्यते ॥ ४९ ॥

किञ्च —

कार्यान्विते च शब्दार्थे कार्यं केनान्वितं[3] भवेत् ।
गुणद्रव्यादिशब्दानां साक्षात् कार्येण नान्वयः ॥ ५० ॥

कार्यपदव्यतिरिक्तानां कार्यान्विते समार्थ्यम् । कार्यस्य तु स्वरूपेऽन्यान्विते वेति द्वैरूप्यपरिहारायान्यान्विते[4] सामर्थ्यमित्येकमेव प्रयोजकमुपादेयं, कार्यस्य कार्यान्तराभावात् । योऽपि कार्यान्वयान्विते सामर्थ्यमिति बकबन्धमिव प्रयोजकमाह, तस्यापि बहुविशेषणं प्रयोजकमिति दोषः । योऽपि

---

१. 'दन्वि' ग. पाठः. २. 'श्च शब्दयोः प', ३. 'कार्यान्वि', ४. 'वै' क. पाठः.

योग्येतरान्विते सामर्थ्यमङ्गीकृत्य कार्यार्थेनैवेतरेषामन्वययोग्यता, कार्यस्य चेतरैरिति योग्यतां नियमयति, तेनापि गुणद्रव्यकारकत्वादीनां परस्परान्वययोग्यता प्रत्यक्षावगता न निराकर्तव्या । सत्यम्, आर्थी सा योग्यता । शाब्दी तु कार्येतरपदार्थानामेवेति चेद्, न, कार्यपदार्थेन गुणद्रव्यकारकत्वादीनां साक्षादन्वयायोग्यत्वात् । भावार्थेन हि कार्यस्यान्वयः । कारकं तु भावार्थस्येति नियमात् । अथ कार्येण सर्वपदार्थानां शेषशेषि(का ? ता)लक्षणोऽन्वयोऽव्यवहितः, क्रियाकारकलक्षणस्तु व्यवहित इति मतम् । केयं शेषशेषिता । न तावद् भृत्यस्वामिता, चेतनविषयत्वात् । तदुपाधिकर्तव्यता तच्छेषतेति चेद्, न, जातिगुणद्रव्याणां कर्तव्यतायोगात्, सिद्धरूपत्वात् । न च गुणगुण्यादिवद् आश्रयाश्रयिभावः शेषशेषिता । अथोपकार्योपकारकभावो[1] भावार्थ एव, तहीतरपदार्थानां शेषी । गर्भदासोऽपि स्वामिनोपक्रियमाणः शेषी । भृत्यत्वेन तु सम्बन्धान्तरेण गुणभूतः । अथ प्राधान्यं शेषिता, किं शब्दतोऽर्थतो वा । शब्दतश्चेद्, दध्न एव प्राधान्यात् तदन्वितहोमकर्तव्यतायां[2] शाब्दसम्बन्धः[3] स्यात् । अर्थतश्चेद्, अचेतनस्योपकार्यतैव प्राधान्यं तच्चाव्यवधानेन भावार्थस्य व्यवधानेन सुखस्य दुःखनिवृत्तेर्वेति न कार्यान्वययोग्यतानियमः । अतो यथाप्रमाणान्तरसिद्धयोग्यतानुसारमेव पदानां योग्यान्विते सामर्थ्यमिति रमणीयम् ॥ ५० ॥

---

१. 'कर्ता भावा' ख. ग. पाठः. २. 'ते', ३. 'ता श', ४. 'न्धात्' क. पाठः.

किञ्च —

भूतार्थबुद्धिर्नामानन्याध्याहारो न चानुमा ।
कल्पनागौरवात् कार्यदृष्ट्या तच्छक्तिरिष्यताम् ॥ ५१ ॥

न तावल्लौकिकी भूतार्थबुद्धिः शब्दनिबन्धना न प्रमाणं, प्रत्यक्षादिव शब्दाद् भूतार्थं प्रतिपद्य प्रमाणान्तरेणोपकारापकारहेतुतां चानुस्मृत्यार्थाविसंवादिव्यवहारात् । अथ तत्रापि कार्यमध्याह्रियते, न तावदर्थसमवायिनः कार्यस्याध्याहारः । प्रतिपत्तुः तत्र प्रवृत्तिनिवृत्त्योरभिप्रायापरिज्ञानात् । नापि ज्ञातव्य इत्यध्याहारः । यतो देवदत्तो निर्गत इति ज्ञातव्य इत्यत्र देवदत्तनिर्गमनपदार्थस्वरूपे तत्संसर्गे वा पदाभ्यामेव ज्ञानोत्पत्तौ निष्पन्नविषयकार्ययोगाद् न योग्यतालक्षणः पदसमन्वयः स्यात् । अनुत्पन्ने तु विहिते च ज्ञाने न देवदत्तनिर्गमनज्ञानोत्पादः, पदयोस्तत्रानुत्पादकत्वात् । विधिपदस्य च देवदत्तनिर्गमनज्ञानकर्तव्यतायां ज्ञानहेतुत्वात् । विधेयस्य च ज्ञानस्य विधिविषयज्ञानस्य च भिन्नत्वात् । तस्माज् ज्ञातव्य इत्यध्याहारे भूतप्रमितिलोपः प्रसज्येत । किञ्च, सम्बन्धज्ञाने कार्यमित्यधिकं प्रयोजकं कल्पयित्वा लोकेऽपि प्रतिवाक्यमप्रतीतस्य पदस्याध्याहारकल्पनाद् वरमन्विते[1] सामर्थ्यकल्पनम् । अथ लौकिकी भूतार्थप्रमितिर्न शाब्दी । किन्त्वनुमाननिबन्धनेति, न, तत्रापि अन्वयव्यतिरेकवच्छब्दपरित्यागे कल्पनागौरवात् । न च कार्यसंसृष्टसमर्थेभ्यः

---

१. 'त्रान्व' ख. पाठः.

शब्देभ्यो भूतार्थसंसर्गानुमानसिद्धिः । न चासौ संसर्गभ्रमः, प्रत्यक्षवद् व्यवहाराविसंवादाद् अबाधात् । अन्यान्विते च शब्दकार्यदर्शनात् तावन्मात्रे सामर्थ्यं कल्प्यते, कार्यगम्यत्वात् सामर्थ्यस्य । ननु तावन्मात्रे शक्तिग्रहणाभावे कथं तत्र कार्यदर्शनम् । नैष दोषः, अन्यान्वितमपि सम्बन्धज्ञानसमये कार्यान्वयान्तर्वर्तितया वर्तते । कार्यदर्शनात् तु तावन्मात्रे सामर्थ्यं नियम्यते । नन्वनवधारिते प्रयोजके कथं कार्योत्पादः, न, प्रयोजकान्तरं कल्पयतोऽपि कार्यवाक्याद् बुद्धिकार्यदर्शनात् । सम्बन्धज्ञानसमये कार्यस्यापि विद्यमानत्वाद् बुद्धिकार्योपपत्तिरन्यान्वितपक्षेऽपि समाना । तस्माद् न कार्यान्विते सामर्थ्यं, किन्त्वन्यान्वित इति सिद्धम् ॥ ५१ ॥

अङ्गीकृत्य लिङादिशब्दानां कार्याभिधायित्वं प्रयोजकोपादानसामर्थ्यादन्यान्विते सामर्थ्यमित्युक्तम् । इदानीं तदेव नास्तीति प्रतिपादयितुमाह —

विशिष्टव्यवहारस्य हेतुर्नान्यो निदर्शने ।
इष्टाभ्युपायात् कार्यत्वं ह्यन्यथासिद्धबोधनम् ॥ ५२ ॥

व्युत्पत्स्यमानेन यत् स्वात्मनि प्रवृत्तिनिमित्तं समधिगतं, तदेव प्रतिपत्तुरपि प्रवृत्तिनिमित्तमनुमीयते । तच्च नेष्टसाधनज्ञानादन्यत् समधिगतम् । ननु फलज्ञानादपि प्रवर्तते । सत्यम्, इच्छालक्षणैव तन्निमित्ता प्रवृत्तिः, न विशिष्टस्वरूपा शरीरादिव्यापारात्मिका । सा हि प्रवर्तकानुमानबीजं परे-

---

१. 'पेयं का' क. पाठ.

षामुपलब्धिगोचरत्वात् । सा चेत्थंभूताभिलषितसाधनज्ञाननिमित्तैव । कदाचित् साधनसामान्यज्ञानात् तद्विशेषजिज्ञासया प्रवर्तमानोऽपि तत एव प्रवर्तते, न फलमात्रज्ञानात् । ननु इष्टसाधनमप्यतीतादिभावेन गम्यमानं न प्रवर्तयति । सत्यम् । तस्य कालसम्बन्धज्ञानं प्रवृत्तिप्रतिबन्धकम् । ननु सिद्धे हेतुत्वे प्रतिबन्धैकत्वकल्पना । सत्यं, कालसम्बन्धज्ञानविकले कर्तुरभिलषितसाधनेऽवगते प्रवृत्तेरनवगते च तस्मिन्नप्रवृत्तेरन्वयव्यतिरेकज्ञानद्वयानुपपत्तिप्रभवयाऽर्थापत्त्याधिगतमेव तस्य प्रवृत्तिहेतुत्वम् । ननु सत्यपि तस्मिन् अशक्तो न प्रवर्तते । सत्यम् । कर्तृसामर्थ्यादिसाधनपौष्कल्ये सति यतो विषयविशेषज्ञानात् प्रवर्तते, तदेव प्रवृत्तिहेतुतया शब्दाभिधेयमिति कार्यवादिनाप्यङ्गीकर्तव्यं, तत्रैव शब्दसापेक्षतानियमात् । नन्वेवमपि कर्तुरभिलषितस्य साधनं कालविविक्तं कृतियोग्यतया कार्यमवगम्यमानं प्रवर्तयतीत्युक्तं भवति । तत्र कार्यतैव प्रवृत्तिहेतुः किं न स्यात् । फले प्रवृत्तिव्यभिचारादिति वदामः । तदपि हि सुखं दुःखनिवृत्तिर्वा साक्षाद् व्यधानेन वा कृतियोग्यतया कार्यमित्यवगम्यते । न तत्र विशिष्टप्रवृत्तिरिच्छालक्षणैवेत्युक्तम् । तर्हि हितसाधनगतं कार्यत्वमेव प्रवृत्तिहेतुः । तन्न । विशेषणायोगात् । ननु हितसाधनमप्यतीतादौ न प्रवर्तयतीति कृतियोग्यताप्यवश्यापेक्षणीया । न । परिनिष्पन्नपदार्थांशज्ञानस्यापि साक्षाद् वा पर-

---

१. 'विशिष्ट' ख. ग. पाठः. २. 'न्धकल्प' ख. ग. पाठः. ३. 'वा' ख. ग. पाठः. ४. 'च' ग. पाठः.

म्परया वाभिलषितसाधनविषयस्य पदार्थांशे प्रवृत्तिहेतुत्वात्। किन्तु[1] कारणसामर्थ्यवद् विषयस्य कृतियोग्यतापि प्रवृत्तावुपसर्जनत्वेनापेक्ष्यते। प्राधान्यं तु हितसाधनस्यैव, सत्यपि कृतियोग्यत्वे हितसाधनताभावे विशिष्टप्रवृत्त्यदर्शनात्[2]। ननु कार्यस्याप्यन्वयव्यतिरेकयोस्तुल्यत्वात् कार्यमेव प्रधानमिति किं न भवेत्। न, कालोपबन्धलक्षणप्रतिबन्धनिरास[3]कत्वेनापि कृतियोग्यताया अन्वयव्यतिरेकयोरन्यथासिद्ध्युपपत्तेः। ननु प्रतिबन्धनिरास[4](क)त्वकल्पनाद्[5] वरं हेतुत्वकल्पनम्। तन्न, सति ह्येकस्मिन् कारणेऽनन्यथासिद्धान्वयव्यतिरेकाभ्यां कारणान्तरं कल्प्यते। तौ चान्यथासिद्धावित्युक्तम्। ननु कालोपबन्धः प्रतिबन्धः[6], किं वा कारणाभावः। प्रतिबन्ध(क?) एव, कृत्सकारणे हितसाधनत्वे तत्रापि विद्यमाने प्रवृत्तिकार्यविरोधित्वादकृत्स्नत्वाच्च कार्यतायाः। नन्वेवं सर्वत्र सहकारिकारण[7]लोपः स्यात्। न स्यात्। यत्र कार्यविरोधिभावान्तर[8]व्युदासेन यस्यान्वयः, तत्र प्रतिबन्धनिरासेनैव तस्यान्वयः। यत्र तु स्वभावमात्रव्युदासेनान्वयव्यतिरेकाभ्यां यस्य कार्यान्वयः, तस्य तत्र कारणत्वेनै[9]वान्वयः। इह तु कालोपबन्धनज्ञानं प्रवृत्तिविरोधि भावान्तरम्। तच्च व्युदस्यते कार्यताज्ञा[10]नेन। न च कुलालादेर्विरोधिपिण्डान्तरनिरासेनैवान्वयः, किन्तु कारणत्वेनैव। क्वचिन्निवृत्तेऽपि तस्मिन् घटा-

१. 'ञ्च' ख. ग. पाठः. २. 'त् (फले ?) न' ख. पाठः. ३. 'सत्वे' ख. ग. पाठः. ४. 'सकल्प क. पाठः. ५. 'द्वारं' ग. पाठः. ६. 'किं का' ख. ग. पाठः. ७. णोपादानलो' क. पाठः. ८. 'स्य' ख. ग. पाठः. ९. 'नान्व', १०. 'ने। न च' क. पाठः.

नुत्पत्तेः । इह तु हितसाधनज्ञानं कालविविक्तं सति कारण-सामर्थ्ये प्रवृत्तिं प्रसूत एव । ननु कार्यतैव प्रवृत्तिहेतुः । तस्याः फलोपरागः प्रवृत्तिप्रतिबन्धकः । तन्निरासोऽभिमतसाधनतेति किं न कल्प्यते । दुःखतत्साधनयोः कृत्या निष्पत्तियोग्ययोरपि हितसाधनताभावे प्रवृत्त्यदर्शनात् । अथ तयोरपि [1]प्रवृत्तिप्रतिबन्धकता । न । उभयशून्येऽपि वस्तुमात्रे निष्पादनयोग्येऽपि प्रवृत्त्यदर्शनात् । अथ तदपि प्रवृत्तिविषयतया किञ्चिद् दुःख[2]करत्वात् [3]प्रवृत्तिप्रतिबन्धकम् । न । तस्मिन्नेवाभिलषितसाधनभावेऽवगते पश्चात् प्रवृत्तेः । अथ सर्वत्र हितसाधनताभावज्ञानं प्रवृत्तिप्रतिबन्धकम् । न । योग्यानुपलब्ध्यभावेऽभावनिश्चयाभावाद् निष्पादनयोग्ये वस्तु[4]मात्रस्वरूपे प्रवृत्तिः स्यात् । अथ न निष्पादनयोग्यता कार्यता, किन्तु बुद्धिपूर्वकारिणः कृत्युपक्षेपयोग्यता । सा च हिते तत्साधने वा । नान्यत्र । अतः फलमेव प्रवृत्तिप्रतिबन्धकम् । तत्साधनतां तु तन्निरास इति । तर्हि बुद्धिपूर्वकारिणः कृत्युपक्षेपयोग्यता विषयसमवायिनी निष्पादनयोग्यतामात्रव्यतिरिक्ताभिलषितता तत्साधनता वा नान्यद्, अनिरूपणात् । प्रवृत्त्यभावविरोधितेति चेद्, न, प्रवृत्तेरेव प्रवर्तकत्वप्रसङ्गात् । प्रवर्तकत्वे सति प्रवृत्त्यभावविरोधितेति चेत् । राग एव तर्हि सा । कर्तव्यता तु विषयसमवायिनीति हितादिरेव वा प्रवृत्त्यभावविरोधी । तत्र हितस्य विशिष्टप्रवृत्तिहेतुत्वाभावाद्धित-

---

१. 'प्रति' क. पाठः. २. 'कारणत्वा', ३. 'प्रति' ख. ग. पाठः. ४. 'स्तुस्व', ५. 'ता त' क. पाठः.

साधनमेव प्रवृत्तिहेतुः शब्दान्तरेणाभिधीयत इति न पक्षान्तरमेतत् । वयं तु हितसाधनस्यैव निष्पादनयोग्यता प्रवृत्तौ प्रतिबन्धनिरासेनोपकरणत्वेन वापेक्ष्यत इत्येतावद् ब्रूमः । ननु साधनसाधनेऽपि तद्विषयज्ञानात् प्रवर्तते। सत्यम्। साधनस्य परम्परया[1] हितत्वमङ्गीकृत्य तत्साधनेऽपि ततः प्रवर्तते। तदेच्छालक्षणैव साक्षात्साधने प्रवृत्तिः । विशिष्टा तु पुनः साधनसाधने। एवंच[2] सति प्रयाजाद्यङ्गविधयः क्रतोरेव हितत्वमङ्गीकृत्य तत्साधनतामेव विदधति । भवतु वा हितसाधनगता कार्यता प्रवृत्तिहेतुः । तथापि न कार्यता शब्दार्थः। तथाहि — प्रतिपत्तुः प्रवृत्तिलिङ्गेनेष्टसाधनगतकार्यतावगमेऽनुमिते निष्पत्तियोग्यतालक्षणकार्यांशबुद्धेः प्रकृत्यर्थक्रियास्वरूपमात्रावगमादेवानुमानेन सिद्धेस्तत्र हितसाधनतांशे लिङादिप्रत्ययस्य सामर्थ्यं कल्प्यते । अन्यथासिद्धस्य शब्दार्थतानुपपत्तेः । न च गवानयनस्य तदानीमन्वयव्यतिरेकाभ्यां हितसाधनतावगमः, फलप्रसवादर्शनात् । नाप्यनुमानमानेन गवानयनस्याभिमतसाधनता, व्यभिचारात् । क्रियास्वरूपस्य कालोपबन्धविकलस्य निष्पादनयोग्यताव्यभिचाराभावाच्च । तस्मात् कर्तुरभिलषितसाधनमेव प्रवृत्तिहेतुतया लिङादिप्रत्ययार्थ इतिस्थितम् ॥ ५२ ॥

अत्र कश्चिदाह — किं गवानयनं स्वरूपेण कर्तुरभिलषितसाधनं किं वाज्ञप्तत्वात् । स्वरूपेण चेद्, गवानयन-

---

१. 'याभिहि', २. 'च प्र' ख. ग. पाठः.

मनुस्मरन् पूर्वसिद्धगवानयनदृष्टहितसाधनतानुमानेन स्वयमेव प्रवर्तेत। आज्ञप्तत्वाच्चेद्, वेदे न प्रकृत्यर्थस्य हितसाधनता-सिद्धिः, आज्ञप्तताभावात्। तदभावश्चापौरुषेयत्वाद् वेदस्येति। तत्राह —

साधनत्वं स्वतः सिद्धं[1] विशेषस्य[2] तु कार्यवत्।
प्रधानाभिमतद्वारं[3] प्रयोक्तापि विवक्ष्यते ॥ ५३ ॥

अत्र भवानपि चोदनीयः — किं गवानयनं स्वरूपेण कार्यं, किं वाज्ञप्ततयेति। स्वरूपेण चेत्, पक्षान्तरवद् गवानयनान्तरसिद्धं कार्यमनुस्मृत्य स्वयमेवानुतिष्ठेत्। कार्यार्थस्य प्रमाणान्तरायोग्यत्वात् ततोऽप्रतिपत्तेर्न शब्दमन्तरेण प्रवृत्तिरिति चेत्, तत्र प्रयोक्तुः प्रयोगश्च न स्यात्। अत एव प्रवृत्तिरपि श्रोतुर्न स्यात्, अप्रयुक्ताच्छब्दादर्थानधिगमात्। आज्ञप्ततया चेद्, वेदे कार्योपरागाभावाद्[4] आज्ञप्ततयैव च कार्यतासिद्धेर्न तत्र शब्दसामर्थ्यकल्पना। नाज्ञोपरागात् कार्यता, अध्येषणादौ वेदे चाभावप्रसङ्गात्। अथ प्रवर्तकमात्रोपरागः कार्योपरागः। स च स्वतो वा प्रेषणाध्येषणाभ्यनुज्ञानिबन्धनो वा। उभयथाप्युक्तो दोषः। अथ बालस्य स्वप्रवृत्तौ गवानयनं न स्वरूपेण कार्यम्। किं तु अभिलषितसमर्थनोपाधावेव प्रयोगाविषयमपि गवानयनमात्मनोऽभिलषितं समर्थयत् कार्यं भवति। तच्चाभिलषितं प्रैषादिकर्तुरभिलषितसमर्थनद्वारेण कर्तुरपि समर्थ्यते। अतो गवानयनविशेष

१. 'द्धं सवि', २. 'स्य का', ३. 'तं' क. पाठः. ४. 'वः, आज्ञ', ५. 'यगवानयनम' क. पाठः.

एव कर्तुरर्थतः कार्येणोपरज्यते । तच्च[1] शब्दादेवावगम्यते । गवानयनमात्रस्य कर्तुरभिलषितसमर्थनस्य व्यभिचारादनुमानेन कार्यतायाः प्रतिपत्तुमशक्यत्वात्, प्रवृत्तिद्वारेण[2] तस्य कार्योपरागज्ञा(ना)योगादिति । तर्हि तस्यैव तथाविधं हितसाधनत्वमुपदेशादेवावगम्यताम् । तस्य च गवानयनविशेषस्य[3] सद्वारं[4] हितसाधनत्वं कार्यत्वमिव कर्तुः स्वरूपप्रयुक्तमेव कल्प्यतां, तथाविधफललक्षिते[5] विशेषिते वा साधने लिङादिशब्दप्रयोग इति । यथा कर्तुः कृतिविशेषिते तदुपलक्षिते वा कार्ये लिङादिप्रयोगः, यथा वा पुरोवर्तित्वविशिष्टे तदुपलक्षिते वा घटादाविदंशब्दप्रयोगः । ननु प्रयोक्ता स्वात्मनोऽभिलषितसाधनं गवानयनं विवक्षति, न[6] तु कर्तुरभिलषितसाधनं, तत्र कथं कर्तुरभिलषितसाधने शब्दप्रयोगः । अप्रयुक्ते च कथं तत्र सम्बन्धज्ञानम् । नैवैतच्चोद्यं[7], कार्येऽपि तुल्यत्वात् । प्रयोक्ता हि स्वात्मनः कर्तव्यं प्रतिपद्य परेण साधयितुं वचः प्रयुङ्क्ते । न[8] प्रयोज्यस्य कर्तव्यं विवक्षित्वा[9] प्रयुङ्क्ते । तत्र कथं नियोज्यस्य कार्ये शब्दसामर्थ्यं, नह्यन्यकार्यादन्यः प्रवर्तते । ननूपदेशे प्रयोज्यकर्तव्यतैव विवक्ष्यते । हितसाधनतापि तथा प्रयोज्यं प्रत्येवोपदेशे विवक्ष्यते । अथ प्रैषादिष्वपि प्रयोक्ता स्वकर्तव्यनिर्वर्तनं प्रयोज्यस्यापि कर्तव्यमिति वि-

---

१. 'च्छब्दा', २. 'त् तद्वारे' ख. ग. पाठः. ३. 'नस्य', ४. 'तद्वा', ५. 'धि' ख. पाठः. ६. 'न क' ख. ग. पाठः. ७. 'न त' क. पाठः ८. 'न च क', ९. 'त्वा । त' ख. ग. पाठः.

वक्षति । तर्हि स्वाभिमतनिर्वर्तनं प्रयोज्यस्याभिमतं निर्वर्तयतीति परम्परया कर्तुरभिलषितसाधनं विवक्ष्यत एव प्रयोक्रा । तस्माद् यथा पराभिमतकार्येऽपि प्रयोज्यप्रवृत्तिदर्शनात् तस्य स्वकर्तव्यताज्ञानमेवानुमाय तत्र सम्बन्धो गृह्यते, स्वकार्यज्ञानादेव प्रवृत्तेः । तथाभिलषितसाधनज्ञानेऽपीति न विशेषं पश्यामः । ननु जातस्य जन्तोराद्या करचरणविन्यासादिप्रवृत्तिर्न हितसाधनज्ञानात् । तस्य फलप्रसवोन्नेयत्वात् । ननु कार्यज्ञानं वा कुतो जायते । न तावत् प्रत्यक्षेणेति वक्ष्यते । सम्बन्धज्ञानाभावाद् नानुमानादिना । अथाबुद्धिपूर्वा सा प्रवृत्तिरिति हेतुर्न मृग्यते । इतरस्यापि तत् तुल्यम् । अथ जन्मान्तरीयकार्यज्ञानसंस्कारात् सा जायते । तथाविधादेवाभिलषितसाधनज्ञानसंस्कारात् सा किं न स्यात् । तस्मात तत एव प्रवृत्तिरिति सिद्धम् ॥ ५३ ॥

ननु किमिदं हितसाधनत्वं नाम, किं वस्तुस्वरूपमात्रं तद्धर्मो वा । न स्वरूपमात्रं, प्रत्यक्षगम्यत्वात् । तस्य साधनतायाश्च तथानवगमात् । न धर्मः । तत्सद्भावे प्रमाणाभावादिति । तत्राह —

अन्वयव्यतिरेकाभ्यां पदार्थातिशये प्रमा ।
जायतेऽन्यप्रयुक्तेषु व्यवहारोऽन्यथा कथम् ॥ ५४ ॥

अविशिष्टेऽपि पदार्थस्वरूपे फलप्रसवान्यथानुपपत्त्या कश्चित् तत्साधनसामर्थ्यातिशयः कल्प्यते । ननु प्रवृत्तिविषयतामापन्नात् फलप्रसवो न स्वभावसिद्धात्, फलप्रसवोन्नीतसाधनाच्च प्रवृत्तिरितीतरेतराश्रयता । न । परप्रवृत्तिविषयी-

कृतपदार्थप्रसूतफलदर्शनादपि तत्साधनतावगमात् । अन्यथा कथमभिलषितफलाय कस्यचिदेवोपादानलक्षणो व्यवहारः । तस्मादस्त्येवांसावतिशयः । ननु प्रैषादिष्वभिप्रायभेदेषु निरूपितसम्बन्धा लिङादयः कथं हितसाधनतामभिदध्युः । न । उपदेशे तदभिधानदर्शनात् । ननु तत्राप्यनुग्रहोऽभिधेयः । न । तदभावेऽप्यदृष्टभयादुपदेशात् तत्र हितसाधनत्वमेव विवक्ष्यते । प्रैषादिष्वपि परम्परया तद्विवक्षा दर्शिता । प्रवृत्तिहेतौ च सम्बन्धज्ञानादाज्ञामात्रादप्रवृत्तेः स एव शाब्दार्थो नाज्ञादिः । तेषु सम्बन्धज्ञानाभावात् । बालस्य दृष्टान्ताभावाद् वक्तृप्रतिपत्त्रोरुत्कर्षापकर्षमुखविकारादिलिङ्गानुमेयतयान्यथासिद्धत्वाच्चाज्ञादीनाम् ॥ ५४ ॥

किञ्च

रागात् प्रवृत्तेरिष्टादेस्तद्धेतुत्वान्न कार्यता ।
प्रवृत्तिहेतू रागश्चेन्न शाब्दः साक्षिसिद्धितः ॥ ५५ ॥

ननु रागस्य कार्यताज्ञानमेव हेतुः । न । सतीष्टादावुत्पत्तेरसति चानुत्पत्तेरिष्टादिरेव तन्निमित्तम् । नन्विष्टादेः कार्यज्ञानं ततो राग इति कारणकारणतया अन्यथासिद्धिरस्ति । तन्न । यदि कृतिविषयीकारयोग्यता कार्यता, सा प्रकृत्यर्थलक्षणक्रियास्वरूपज्ञानादेव कालसम्बन्धज्ञानविकला स्वनिष्पादितपूर्वसिद्धक्रियानिदर्शनानुमानेन सिध्यति, नेष्टसा-

---

१. 'वाति' ख. ग. पाठः,

धनताज्ञानमपेक्षते । यदि वा बुद्धिपूर्वकारिणः कृत्युपक्षेपयोग्यता कार्यता, तदेष्टता तत्साधनता वा सेतीष्टादेरेव राग इत्युक्तं भवति । यदि तृतीयमेव किञ्चित् कार्यबुद्ध्यालम्बनं कल्प्येत, तथापि हितादेरेव रागः कार्यताबुद्धिश्चेत्येककारणजन्यता तयोरिति न रागस्य हितादिः कारणकारणम् । निष्पन्नेऽपि कदलीफलादौ हितसाधने भक्षणविशेषणतया रागविषयीकाराद्, अन्यथा हितादिज्ञानाद् रागः । रागज्ञानाच्च कार्यताज्ञानमिति कल्पनायामप्यविशेषात् । ननु हितसाधनतावगमः कार्यताज्ञानाधीनः किं न स्यात् । कार्यतायां प्रमाणान्तराभावात् । साधनतायां तु फलप्रसवान्यथानुपपत्तिरुक्ता । फले त्वानुकूल्यं प्रत्यक्षसिद्धम् । यत्र च हिततत्साधनतावगमः, तत्रैव कार्यबुद्धिनियमात् तदेव तद्धेतुरिति कल्प्यते । अतः प्रतिपत्तुः प्रवृत्तिलिङ्गेन प्रवर्तकं रागमनुमाय तस्य च स्वसाक्षिकतया शब्दानपेक्षत्वात् तद्धेतौ हितसाधनताज्ञाने शब्दसामर्थ्यं कल्प्यत इति रमणीयम् ॥ ५५ ॥

किञ्चेदं कार्यबुद्धिरवलम्बत इति परीक्ष्यते—

न नियोगं न निष्पाद्यं कृतिरक्तं न कार्यधीः ।
निरुपाधिकसाध्यं वा विविक्तं कालतोऽपि न ॥ ५६ ॥

आलम्बते न चापूर्वं न प्रधानं कृतिं प्रति ।
प्रवर्तकत्वान्नाभावविरोधि व्यभिचारतः ॥ ५७ ॥

व्यभिचारत इति सर्वत्र सम्बध्यते । न तावत् कार्यबुद्धिर्नियोगमवलम्बते । नियोगो हि नाम चेतनस्य प्रधान-

स्याप्रधानं[1] चेतनं प्रति प्रवर्तनालक्षणोऽभिप्रायभेदः प्रसिद्धः। स च बालस्य स्वतन्त्रप्रवृत्तौ। वेदे च कार्यबुद्धिं व्यभिचरति। तथाविधपुरुषसम्बन्धे[2]ज्ञानाभावात्। नापि कृतिविषयीकारयोग्यतामात्रमवलम्बते। तस्याः कार्यबुद्धिगोचरेऽपि दुःखादौ विद्यमानत्वाद् व्यभिचारात्। नापि वर्तमानकृतिसंसृष्टमर्थमवलम्बते। कार्यबुद्ध्यधीनत्वात् कृत्युत्पत्तेः, कार्यबुद्धिसमये कृतिसंसर्ग[3]स्य व्यभिचारात्। न च निरुपाधिकसाध्यं कार्यम्। सुखादेरेव तदभावात्, सोपाधिकसाध्येऽपि साधने कार्यबुद्धिदर्शना[4]च्च। न च सुखदुःखनिवृत्तिव्यतिरेकेण निरुपाधि(क)साध्यं नाम किञ्चिदस्ति। अथ कालविविक्तं कार्यबुद्धिरालम्बते। किं शब्दतोऽर्थतो वा कालविवेकः। शब्दतश्चेद्, घटादिश्रुतयोऽपि न कालसम्बन्धिनमर्थमभिदधतीति तदुत्पन्नबुद्धीनामपि कार्यबुद्धित्वप्रसङ्गः। अर्थतश्चेत्, शशविषाणबुद्धेरपि तत्प्रसङ्गः। तदेव हि तुच्छं यन्नाभूदस्ति भविष्यति। ननु कार्यमित्युक्ते कालसम्बन्धो न प्रतीयते, तथापि न तुच्छतावगतिः। सत्यम्। शब्दतः कालसम्बन्धानवगमो घटादिश्रुतिजन्यप्रतीतावपि तुल्य इत्युक्तम्। अर्थतः कालविवेकः केनावगम्यते। न कार्यबुद्ध्यैव, तस्यास्तावन्मात्रनिष्ठत्वात्। अथ सैव कालशून्यतामपि प्रतिपादयेत्, कस्येति न जानीमः। कार्यस्येति चेद्, न। तस्यैव निरूप्यमाणत्वात्। कालविविक्तोऽर्थः स इति चेत्। तर्हि तादृशोऽर्थः कालस्तुच्छं

---

१. 'न', २. 'न्धाभा' ख. ग. पाठः. ३. 'र्गव्य' क. पाठः. ४. 'त्। न' ख. ग. पाठः. ५. 'संसृष्टम' क. पाठः.

वेति[1] कुतस्तुच्छताविवेकः । कार्यस्य च तुच्छवैलक्षण्यमिच्छता प्रतीतितोऽभावेऽप्यर्थतः कालसम्बन्धो वक्तव्यः । घटादिष्विव कालसम्बन्धानुमानात् । अपूर्वमपि लौकिककार्यबुद्धिव्यभिचाराद् न तदालम्बनम् । न च वेदेऽपि तत्सम्भवः । मानाभावात् । स्वर्गकामिनो यागकर्तव्यतान्यथानुपपत्तिरिति चेत् । सैव हि कर्तव्यता न निर्ज्ञायते । न नियोगादिरिति चोक्तम् । स्वर्गसाधनता चेत् कानुपपत्तिः । अपूर्वमन्तरेण क्षणप्रध्वंसिनो यागस्य कालान्तरवर्तिफलसाधनतानुपपन्ना । न तर्ह्यपूर्वमात्रेण तदुपपत्तिः, विशिष्टशरीरेन्द्रियाभावात् । तदप्यपेक्षितं लोकसिद्धानुमानेन गम्यताम् । तर्हि यागस्य[2] स्वर्गसाधनत्वमपेक्षितार्थोपसंहारेऽपि न विरुध्यते चेत्, श्रुतिस्मृतिशतसन्दृब्धादेवेश्वरात्[3] तदवगतिगोचरान्[4] निर्वृत्तकर्मापेक्षया फलसिद्धेर्नापूर्वकल्पनावकाशः । नापि तस्य शब्दाभिधेयता । शब्दार्थानुपपत्तिगम्यत्वादगृहीतसम्बन्धत्वाच्च । न च तत्रैव सम्बन्धग्रहः । लिङाद्यभिधेयप्रकृत्यर्थकर्तव्यताद्वारेण तत्साधनद्वारेणैव वापूर्वकल्पनादेकस्मिन् प्रयोगे क्रमेणावगम्याभिधेयद्वयकल्पनायोगात्[5] । न च लिङादिस्वरूपमात्रस्य पदान्तराभिधेयार्थस्य चापूर्वमन्तरेणानुपपत्तिः[6] । अभिधेयान्तराभावादनुपपत्त्यभावाच्च । तस्माद् वेदे नापूर्वं तदभिधानं वा कल्पनीयम् । अथ कृतिं प्रति प्रधानं कार्यम् । किं तत् प्राधान्यम् । बुद्धिपूर्वकारिणः कृत्युपक्षेपयोग्यता, तर्हि सुखदुःख-

---

१. 'त्ति', २. 'स्य सा', ३. 'ष्टा', ४. 'रं' ख. ग. पाठः, ५. 'माव', ६. 'वा' क. पाठः.

निवृत्तिस्तत्साधनं वा कार्यमिति नैमित्तिकादौ[1] कर्मणि कार्यबुद्धिव्यभिचारः। न च प्रवर्तकत्वमात्रम्। रागे कार्यबुद्ध्यभावात्। प्रैषादेरिष्टादेश्च वेदे व्यभिचारः प्रसिद्धः। प्रवृत्त्यभाववविरोधी च रागो वा प्रवृत्तिर्वा हितादिर्वा, नान्यदित्युक्तम्। ननु कार्यबुद्धिसामर्थ्यादेवावलम्बनं कल्प्यताम्। सत्यम्। नान्यदेतः[2] कल्प्यते कृतिविषययोग्यतामात्रेऽवयवार्थे[3] सम्भवति। ननु कार्यमित्युक्ते प्रवर्तकरूपमपि किञ्चिदन्तर्गर्भितं[4] प्रतीयते। सत्यम्। विषयस्य कृत्युपक्षेपयोग्यतालक्षणं[5] हितसाधनत्वमेव तत्। ननु कार्यबुद्धौ हितसाधनतां न प्रतीयते। नैवम्। प्रवर्तकबुद्धौ तदप्यन्तर्गर्भितं प्रतीयते। अथवा हितादेः कृतिनिष्पाद्यतायाश्च विलक्षणस्यालम्बनस्यानिरूपणात्, हितसाधनतालम्बनः प्रवर्तकरूपः कार्यमित्यभिनिवेशो राग एव ममेदं भूयादितिवद् न प्रमाणम्। प्रमाणहेत्वभावाच्च[6] ॥५६॥ ५७॥

कथं,

नाक्षमापाततोऽभावान्नातः शब्दानुमे प्रमा।
नार्थापत्तिरतो रागः कार्यमित्येव न प्रमा ॥५८॥

न तावत् परस्य पराश्रये गवानयनादिस्वरूपे घटादौ वा प्रत्यक्षे तत्कार्यतापि प्रत्यक्षेणावसीयते, वर्तमानत्वात्। गवानयनादेस्तत्र कार्यत्वाभावाद् अनध्यक्षतेति चेद्, अवर्तमाने तर्हि गवानयनादौ तद्व्यपाश्रयस्य कार्यार्थस्य सुतरां न प्रत्यक्षता। नापि स्वातन्त्र्येण, अनवगमात्। ननु न गम-

---

१. 'दौ च क', २. 'त् क' ३. 'त्रादेवाव', ४. 'हितं' ख. ग. पाठः. ५. 'ता प्र' क. पाठः. ६. 'च ना', ७. 'ष' ख. ग. पाठः.

नादिक्रिया प्रत्यक्षा । अनुमेया तु । केन लिङ्गेन, व्यवस्थितस्य द्रव्यस्य कादाचित्कसंयोगविभागाभ्याम् । तथाहि — संयोगविभागजन्यं कार्यं कादाचित्कं स्वाश्रयसंयोगविभागलक्षणातिशयपुरस्सरं दृष्टम् । तथा संयोगविभागावपि कादाचित्कौ स्वाश्रयातिशयपुरस्सरौ । योऽसावतिशयः संयोगविभागहेतुः सा क्रियेति । नैतत् सारम् । या सा क्रिया सा स्वाश्रये कादाचि(त्का ? त्की) वा न वा, न चेत्, संयोगविभागनित्यतापत्तेः कादाचित्कत्वादिति हेतोरसिद्धताप्रसङ्गः । कादाचित्की चेत् सापि स्वाश्रयातिशयपुरस्सरा वा न वा । न चेदनैकान्तिकस्तत्र हेतुः । अतिशयपुरस्सरा चेदनवस्थानात् संयोगविभागलक्षणधर्म्यसिद्धिप्रसङ्गः । अनादित्वात् परम्परया नासिद्धिरिति चेद्, न । अद्य जातस्य प्रथमक्रियोत्पत्तेः स्वाश्रयातिशयान्तरायोगात् तत्रानैकान्तिकत्वात् । अत एव न पराश्रया क्रियापि तत्संयोगविभागाभ्यां सिध्यति । किञ्च सतोरपि श्येनस्थाणुसंयोगविभागयोर्न स्थाणुः क्रियावानिति हेतोरनैकान्तिकता । स्वदेशसंयोगविभागौ देशिनः क्रियानुमानहेतुरिति चेत् । न । बलवद्वधृतशरीरेषु मत्स्यादिषु स्रोतसि स्वदेशसंयोगविभागयोः सतोरपि क्रियाज्ञानाभावात् । किञ्च शब्दविद्युतोरिव क्षणिकत्वेऽपि चलतीति वर्तमानप्रत्ययाद् न फलेनातिवृत्तक्रियानुमानमेतदिति युज्यते । तस्मात् प्रत्यक्षैव क्रिया । अतः प्रत्यक्षक्रियाश्रयः स्वतन्त्रो वा न प्रत्यक्षगम्यः कार्यार्थः । अत[1] एव

१. 'त्र स' ग. पाठः.

सम्बन्धज्ञानायोगान्न शब्दानुमानगम्यः । न च प्रवृत्तिविषयतान्यथानुपपत्तिस्तद्गतकार्यार्थाधिगमनी । विषयविशेषप्रवृत्तेः[1] फलप्रसवानुपपत्तिसिद्धाभिलषितसाधनविशेषनिबन्धनत्वसिद्धेरपूर्वपदार्थकल्पनायोगात् । अन्यथा फलानपेक्षायां क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिरिति न स्यात् । सत्यपि साधने फलाभिकाङ्क्षायां नियमाभावात् प्रवृत्त्यप्रवृत्ती युज्येते । ननु कार्यमपीच्छोपसंहारमुखेनैव प्रवर्तयतीति युज्यते[2] नियमः । न । तस्यानवगमे तदुपसंहारमुखेन प्रवर्तकत्वानवगमात् । फलं तु सुखं दुःखनिवृत्तिर्वा प्रत्यक्षमेव । तदाकारेच्छा नियमविकल्पा[3] स्वानुभवसिद्धा । फलप्रसवान्यथानुपपत्त्या च तदनुकूलसाधनातिशयोऽप्यर्थापत्तिगम्यः[4] । हितसाधनज्ञानानन्तरं च तदाकारवतीच्छा स्वानुभवगम्या । तदेवं हितसाधनमिच्छोपसंहारमुखेन प्रवर्तयति । अथ फलसाधनतैव कार्यता, नास्ति विप्रतिपत्तिः । अथ फलेन कार्यमेव साधनतया कल्प्यते । न । प्रत्यक्षसिद्धपदार्थस्यैव साधनतासम्भवे पदार्थान्तरं साधनत्वं च कल्पयतः कल्पनागौरवात् । सिद्धघटादीनामप्यभिलषितक्रियासाधनत्वदर्शनात् । अत एव न कार्यत्वमेव साधनतेति न साधनतापह्नवः शक्यते कर्तुम् । अतो नार्थापत्त्या कार्यपदार्थावगमः । तस्मात् प्रमाणाभावात् प्रमेयाभावाच्च कार्यमितिप्रवर्तकाकारोऽभिनिवेशो राग एवेति सिद्धम् । अतो हितसाधनताभिधानमुखेन वेदेऽपि लिङादयः सन्निहितपदोपात्त-

---

१. 'त्ते', २. 'ते । न', ३. 'ल', ४. 'म्या' ख. ग. पाठः.

स्वर्गसाधनतामेव विशेषेणाभिदध्युः। नैमित्तिकादौ च काम-श्रुतेरभावाद् निमित्तश्रुतेश्च नित्यान्वयात् कल्प्यमाननित्याभिलषितं(प्रत्य)वायनिबर्हणसाधनत्वविशेषमेवाभिदध्युरिति श्लिष्यते॥ ५८॥

अन्यथाकस्मिकार्थाः स्युर्वेदे कार्यार्थनिष्ठतः।
क्रियया न समन्वेति नियोज्यस्य विशेषणम्॥ ५९॥

अप्रकल्प्यमाने शब्दस्य हितसाधनसामर्थ्ये वेदे कार्यार्थत्वमात्रनिष्ठत्वात् फलसाधनतानवगमादाकस्मिकसुखदुःखप्रयोजना एवोत्पत्त्यैव सर्वे प्राणिनः प्रसज्येरन्[1]। ननु नियोगसामर्थ्यादेव धात्वर्थस्य फलसाधनतावगम्यते। न। अनाप्तनियोगे नैमित्तिकादौ च व्यभिचारात्। न चानाप्तवाक्याद् विषयनियोज्यव्यावृत्तनियोगप्रमितौ प्रमाणान्तरविरोधः। साध्यसाधनसम्बन्धविरोधस्तु न शाब्दीं नियोगप्रमितिं निरुणद्धि, अशाब्दत्वात्[2]। आप्तनियोगे फलसाधनता स्यादिति चेत्। न। वेदे तदभावादपौरुषेयत्वात्। ननु कामिनः प्रवृत्त्युपदेशः कामोपायत्वे सति भवति। न। तत्साधनेऽपि फलकामनाया नियोज्यविशेषणत्वदर्शनात्। यथा ग्रा(मा?सा)दिकानेष्वनेकेषु द्वारं प्रत्यासन्नेषु कश्चिद् भोजयिता विज्ञातेनैव विशेषणेन नियोज्यं विशिनष्ट्यन्येषां निवृत्तये ग्रा(म?स)काम! आगच्छेति। न तत्रागमनं ग्रा(म?स)साधनम्। ननु न तत्र ग्रा(म?स)कामना-

---

१. 'तापत्र' क. पाठः. २. 'त्रिति।', ३. 'त्। तस्याप्त' ख. ग. पाठः. ४. 'पाये भ', ५. 'न' क. पाठः.

निबन्धना प्रवृत्तिः, किं तु भोजनकामनानिमित्तेत्यतत्साधनता। सत्यम्। इतरत्रापि तत्तुल्यं, न स्वर्गकामनानिमित्ता प्रवृत्तिः। किं तु नियोगनिमित्ता। अथ काम्येषु कामनिबन्धना भावार्थेषु प्रवृत्तिरिति तस्य कामोपायता सिध्येत्। न। इतरेतराश्रयात्। कामनिमित्तप्रवृत्तिविषयत्वात् कामोपायतासिद्धिः, तदुपायत्वे च सिद्धे तन्निबन्धना तत्र प्रवृत्तिरिति। ननु स्वर्गादेः कामोपबन्धात् साध्यताप्रतीतेः साधनाकाङ्क्षायां धात्वर्थः साधनत्वेन सम्बध्यते। न। गमनादेरपि तत्साधनताप्रसङ्गात्। अविहितत्वान्नेति चेद्, विहितं सम्बध्यत इति कुतः। फलसाधनाकाङ्क्षत्वात्। न। नित्यत्वादौ च व्यभिचारात्। नन्वस्ति तत्रापि प्रत्यवायपरिहारः फलम्। इहापि तर्हि यत्किञ्चित् फलं कल्प्यताम्। ननु साध्यस्वर्गे सन्निहिते कुतः फलान्तरावकाशः। उच्यते। सति ह्यन्यस्मिन् प्रमितिहेतावाकाङ्क्षासन्निधिसंसर्गेतिकर्तव्यतामनुभवतो न स्वयमेव संसर्गं प्रमिमीते। नेह प्रमितिहेतुरस्ति। नियोगो हि स्वसिद्धिमात्रनिष्ठो न विषयफलसम्बन्धमन्तरेणानुपपन्नः। नियोगोऽपि विहितस्य फलमन्तरेणानुपपन्नः, अन्यथा तत्र प्रवृत्त्ययोगादिति चेत्, तर्हि सत्यपि विधावभिलषितसाधनावगमादेव प्रवृत्तेः, स एव शब्दार्थतया विधिरिति किमन्तर्गडुना नियोगेन। पुरुषाभिप्रायभेदत्वाच्च न तस्य वेदे सम्भव इत्युक्तम्। ननु

---

१. 'मिषावि' क. पाठः.

विषयनियोज्ययोरेकनियोगसम्बन्धसामर्थ्यात् परस्परसम्बन्धे सति नियोज्यविशेषणस्यापि स्वर्गस्य धात्वर्थेन सम्बन्धात् सम्बन्धस्य च गुणप्रधानभावमन्तरेणायोगात् स्वर्गः साध्यत्वात् प्राधान्येनावतिष्ठते। कोऽयं नियोज्यो नाम। ममायं नियोग इति प्रतिपत्ता। तर्हि राज्ञोऽपि स्वनियोगे नियोज्यत्वप्रसङ्गः। कश्चायं ममायमिति सम्बन्धः। यदि कर्तृकरणीयता, तर्हि राज्ञोऽपि नियोज्यताप्रसङ्गः। न च स्वस्वामिसम्बन्धनिमित्तं क्रियादिलक्षणमत्र विद्यते। अथ विषयविषयिता सम्बन्धः। नं। अभिप्रायभेदत्वाभावे विषयानपेक्षत्वात्। अथ कार्यार्थप्रतिपत्ता नियोज्यः। न। नियोक्तृ राज्ञोऽपि प्रसङ्गात्। अथोद्देश्यश्चेतनो नियोज्यः। न। उद्देशेन सम्बन्धानिरूपणात्। सत्यपि नियोज्ये स्वर्गकामना न तद्विशेषणं भवति, सम्भवे व्यभिचारे च विशेषणमर्थवत्। उच्यते — न तावद् दर्शपूर्णमासनियोगस्य पुरुषेणायोगो व्यवच्छिद्यते, विशेषणेन यावज्जीवश्रुतेरेव नियोगसिद्धेः। नाप्यन्ययोगव्यवच्छेदः। अस्वर्गकामिनोऽपि प्रदोषकालव्यावृत्तजीवने सत्यनुष्ठेयत्वात्। भवदपीदमुपलक्षणं भवेद्, न विशेषणम्। पुरुषस्यैव नियोज्यत्वात्, स्वर्गकामनाया नियोज्यत्वाभावात्। कार्यसम्बन्धासम्बन्धाभ्यां हि सम्बन्ध्यन्तरनियामकत्वाद् विशेषणोपलक्षणविभागः। अतो विषयनियोज्यसम्बन्धं कुर्वन्नपि नियोगः पुरुषसम्बन्धमेव करोति विषयस्य। नोपलक्षणसम्बन्धम्।

---

१. 'गं', २. 'क्रि' ख. ग. पाठः.

सम्बन्धे वा जीवनादेरपि विषयसम्बन्धः स्यात्। तत्र भावार्थं प्रति गुणत्वेन सम्बन्धे जीवनादेरङ्गत्वापत्तेर्दर्शपूर्णमासविकृतावपि जीवनादेरतिदेशप्रसङ्गः। प्राधान्ये[1] जीवनादेरपि साध्यताप्रसङ्गात्, सर्वाङ्गोपसंहारस्य नित्येऽपि कर्मणि प्रसङ्गः। किञ्च कामस्य नियोज्यविशेषणत्वे सति तस्मिन् नियोगसम्बन्धाद् जीवनादिवन्निमित्तत्वापत्तेः अकरणे प्रत्यवायोऽपि स्यात्। तस्मात् प्रत्ययेन फलसाधनतामात्रेऽवगते तद्विशेषाकाङ्क्षायां स्वर्गकामपदं समाससामर्थ्यात् पुरुषप्रधानमपि स्वर्गस्य कामविषयतया साध्यताप्रतीतेस्तत्परतया फलविशेषसमर्पकत्वेन सम्बध्यते। अर्थात् तत्कामिनस्तत्राधिकार इति रमणीयम्॥ ५९॥

ननु तिङ्कृत्तद्धितसमासैरनभिहित इति विशेषणात् तिङा यागस्य करणतायामभिहितायां ज्योतिष्टोमेनेति तृतीया नोपपद्यत इत्यत आह—

तिङादिभिरनिर्दिष्टे तृतीया न विरुध्यते।
पौनरुक्त्यान्निषेधोक्तेर्भिन्नार्थापाश्रयान्न तत्॥ ६०॥

न तावत् तिङ्कृत्तद्धितसमासैरनभिहित इति निषेधोऽदृष्टार्थः। किन्तु घटं क्रियत इत्युक्ते प्रत्ययाभ्यां घटगतकर्मकारकत्वस्याभिधाने पौनरुक्त्यात् तन्निवारणाय निषेधः। तत्र दीर्घेण दण्डेन शुक्लां गामानयेति द्विरभिधानेऽपि यथा

---

१. 'न्य', २. 'नि' ख. ग. पाठः.

भिन्नप्रकृत्यर्थसम्बन्धिकारकत्वांशभेदाद् न पौनरुक्त्यप्रसङ्गः, तथा यजतिज्योतिष्टोमशब्दाभिधेयसामान्यविशेषप्रकृत्यर्थसम्बन्धिकारकत्वांशभेदात् सुप्तिङ्भ्यामेकैककारकत्वाभिधाने न कश्चिद् दोषः। तिङा च करणताभिधानाभावे प्रतिषेधोऽप्यप्राप्त एव स्यात्। कारकान्तरविषयो वायं प्रतिषेधः ॥ ६० ॥

ननु कामनापदस्य फलसमर्पकत्वे कर्मण्यधिकारः[२] सिध्यति। फलसाधनत्वस्य[३] वाक्यार्थत्वे काम्यनित्यविभागोऽपि[४] न स्यादित्यत आह —

यस्येष्टसाधनं तस्याधिकारश्च प्रसिध्यति।
विभागः काम्यनित्यादेर्विशेषणविभागतः ॥ ६१ ॥

यस्याभिलषितमिदं कर्म साधयति तस्येदं कर्मेति कर्मणा पुरुषस्य स्वस्वामितान्वयो नियोगेनैव सामर्थ्यात् सिध्यति। उपकारकभावेऽवगते तदर्थमुपादानादपि स्वत्वमुपपद्यते। ननु यजेतेत्युक्ते यागो मम कर्तव्य इति प्रतीयते न यागो ममेष्टसाधनमिति। न। नियोगभावनावादिनोरपि यागकार्यताप्रतीतेर्नियोगभावनाप्रतीत्युत्तरकालीनत्वादिहापीष्टसाधनताप्रतीत्यनन्तरभावित्वं न विरुध्यते। अतः प्रथमं कर्मणि स्वाभिलषितसाधने स्वामित्वेनान्वयं प्रतिपद्य पश्चात्

---

१. 'ङामे', २. 'री न सि', ३. 'नवा', ४. 'पि स्या' ख. ग. पाठः.

कर्तृत्वेनान्वेतीत्यधिकारिणः कर्तृत्वमुपपद्यते। यत्र फलेपरमपि पदं पुरुषेण श्रूयमाणेनाध्याह्रियमाणेन वा सम्बन्ध्यसंसर्गे नैराकाङ्क्ष्यं प्रतिपादयति, तत्र काम्यता। यत्र विशेषणान्तरविशिष्टेन नैराकाङ्क्ष्यं, तत्र नित्यता। फलं च नित्यतासामर्थ्यादेव नित्याभिलषितप्रत्यवायपरिहारः। फलभेदसिद्धौ च दर्शपूर्णमासलक्षणे कर्मण्यधिकारवाक्यद्वयोपयोगः। न च पुरुषविशेषणयोः कामनाजीवनयोः कस्यचित् फलपरता कस्यचिन्निमित्तपरतेति द्वैरूप्यं दोषः। नियोज्यविशेषणत्वाँयोगादवश्याभ्युपगन्तव्यत्वात्। न च जीवनमपि नियोज्यविशेषणं सम्भवति। यावज्जीवनस्य साध्यत्वाद् यौगपद्यायोगाज्जीवनमात्रस्यावक्तव्यत्वात्। निमित्तपक्षे तु पौनःपुन्याय यावच्छब्दः। तस्मादिष्टसाधनपक्षे न कश्चिद् दोष इति स्थितम् ॥ ६१ ॥

तस्मात् कार्यान्विते शब्दसामर्थ्यनियमाभावादन्यान्विते सामर्थ्यमित्युपसंहरति —

अतोऽन्यान्वितसामर्थ्यं पदानां परिनिश्चितम्।
न्यायैरुक्तप्रकारेण यथाशक्ति प्रदर्शितैः ॥ ६२ ॥

अत्राकाङ्क्षासन्निधियोग्यतासामर्थ्यात् पदानि संसर्गं प्रतिपादयन्तीति प्रसिद्धम्। केयमाकाङ्क्षा। पदार्थे प्रतिपन्ने प्रतिपत्तुरर्थान्तरविषया जिज्ञासा। किन्निबन्धना सा, कुतो वा निवर्तत इत्यत आह —

---

१. 'लमपि वदन् पु' ख. ग. पाठः. २. 'न वाध्या' क. पाठः. ३. 'वै', ४. 'त्व', ५. 'न जी' ख. ग. पाठः. ६. 'स्य यौ' क. पाठः, ७, 'त' ख. ग. पाठः, ८. 'विनि' क. पाठः.

अभिधानानवसानाज्जिज्ञासार्थाच्च जायते ।
प्रयोजनावसानाच्च पदार्थे सा निवर्तते ॥ ६३ ॥

अन्विताभिधायिनः शब्दादभिधेयैकदेशे सहकार्यभावादनवगतेऽभिधानमेवापर्यवसितमभिधेयैकदेशान्तरे जिज्ञासामुत्पादयति । क्वचिदर्थाच्च विश्वजिदादिषु जिज्ञासा जायते । उभयविधौ च प्रयोजनसमर्थसंसर्गसिद्धौ निवर्तत इति ॥ ६३ ॥

का पुनर्योग्यता । जिज्ञासानिवर्तकत्वेनान्वयसामर्थ्यम् । कः पुनः सन्निधिः । अनन्वयिपदार्थान्तराव्यवधानेन बुद्धौ विपरिवृत्तिः । किमाकाङ्क्षादिसामर्थ्यात् पदानि युगपत् संसर्गबुद्धिमुत्पादयन्ति, किं वा क्रमेणापीत्यत आह —

संसर्गबुद्धिं शब्दाश्च क्रमेणैव वितन्वते ।
साकाङ्क्षक्रमसंसर्गबुद्धिदृष्टेः प्रयुक्तिषु ॥ ६४ ॥

गामित्युक्ते प्रकृतिप्रत्ययौ (अ)गोव्यावृत्तं कर्मकारकं[२] बोधयन्तौ क्रियायां जिज्ञासामुत्पादयतः । आनयतिपदसन्निधानात् तु तत्सहकारिणौ पुनः क्रियया[३] संसर्गं प्रतिपादयतः । क्रमवत्संसर्गपदार्थाकाङ्क्षयोर्दर्शनात् । सकृत्प्रयुक्तस्यापि पदस्य सहकारिसन्निधाने स्मर्यमाणेऽस्य पुनर्बुद्धिहेतुत्वोपपत्तेः । तस्मात् सिद्धं पदानामन्विताभिधानसामर्थ्यात् संसर्गप्रतिपादकत्वम् ॥ ६४ ॥

---

१. 'धा प्र' ख. ग. पाठः. २. 'कत्वं बो' क. पाठः, ३. 'यासं' ख, ग. पाठः.

नन्वेवमभिधानाभिधेयसम्बन्धस्य साङ्केतिकत्वाद् वाक्यस्य च लोकवत् पौरुषेयत्वाद् धर्माधर्मब्रह्मसु च प्रत्ययान्तरायोगाद् न शब्दानां तेषु प्रामाण्यमित्यत आह —

स्वार्थप्रवृत्तमापूर्वजन्यश्चेद् वेद इष्यते।
ईश्वरज्ञानवन्न स्यात् कार्यत्वे सिद्धसाधनम्॥ ६५॥

यदि तावत् स्वार्थप्रवृत्तप्रमाणान्तरजन्यत्वं नाम पौरुषेयत्वं वेदस्य साध्यते, तत्र प्रत्यनुमानं — वेदः स्वार्थप्रवृत्तप्रमाणान्तरजन्यो न भवति, अनीश्वरबुद्धितत्कार्यत्वाभावे सति धर्माधर्मब्रह्मप्रमाणत्वाद्, ईश्वरज्ञानवत्। ईश्वरवादिनां पौरुषेयत्वेन प्रामाण्यवादिनां च प्रत्यनुमानम्। अथ न प्रामाण्यं धर्मादिषु वेदस्येत्यसिद्धो हेतुः। नापीश्वर इत्याश्रयहीनो दृष्टान्त इति। तर्हि किं साध्यते। कार्यतामात्रं[1] चेत्, सिद्धसाधनम्। यदि वर्णाः प्रत्युच्चारणं निष्पाद्यन्ते, तदा त एव क्रमविशेषसमारूढतया वेदशब्दाभिधेया इति प्रत्युच्चारणं वेदो निष्पाद्यते। यदि वा नित्या वर्णाः, तथाप्युपलब्ध्यादिक्रमविशेषसम्भिन्ना एव वेद इति[2] प्रत्युच्चारणं निष्पाद्यते। क्रमविशेषसादृश्यपरम्परयानिदंप्रथमत्वाच्च वेदे[3] नित्यताभिधानम्॥ ६५॥

अथ वेदाध्ययनाभिधानाभिधेयसम्बन्धयोरिदंप्रथमता साध्यते। तत्राह —

---

१. 'र्यमा', २. 'त्युच्चा' ख. ग. पाठः. ३ 'द' क. पाठः.

वेदाध्ययनशब्दार्थव्यवहारो यथाधुना ।
तथैव पूर्वकालेऽपीत्यनुमानं प्रवर्तताम् ॥ ६६ ॥

विवादाध्यासितौ वेदाध्ययनशब्दार्थव्यवहारौ पूर्वपूर्वत[1]थाविधाध्ययनादिनिबन्धनौ, वेदाध्ययनादित्वाद् इदानींतन[2]वेदाध्ययनादिवत् । न च वाक्याध्ययनत्वाद् भारतादिवदिदं-प्रथमतानुमानं, सामान्यतोदृष्टस्य वेदाध्ययनत्वादिति विशेषतोदृष्टविरोधे दुर्बलत्वात् । नचागम[3]विरोधः । सृष्टिश्रुतेर्निष्पाद्यतामात्रविषयत्वात् । ननु सर्वज्ञश्रुतेरीश्वरो धर्माधर्मावुपलभ्य वेदं करिष्यति । न । निरपेक्षप्रामाण्यमन्तरेण सर्वज्ञत्वासिद्धेः । किञ्च ईश्वरः स्वरूपज्ञानेन सर्वज्ञः । न तत्र लोकवद् वागादीनि वाक्यरचनाकारणानि[4] सन्ति, युक्तावस्थायामिव योगिनाम् । अथ विग्रहोपादानेन वागादिभिर्वाक्यं कुर्यात् । न । तत्र चैतन्यस्यावच्छेदादसर्वज्ञत्वाद्, वियुक्तावस्थायामिव योगिनाम् । अथ स्वरूपज्ञानेन सर्वमुपलभ्य विग्रहोपादानेन सर्वमुपलब्धमनुस्मरन् वाक्यं कुर्यात् । न । स्वरूपज्ञानस्य संस्काराभावात् । न च धर्माधर्मब्रह्मसु प्रमाणान्तरमस्ति । अत्र स्वयूथ्यैरिदमुक्तं — मा भूद् धर्माधर्मयोर्मानान्तरयोग्यता । ब्रह्मणस्तु भूतत्वाद् मानान्तरयोग्यत्वात् तद्विषयवेदान्त[5]वाक्यानां पौरुषेयत्वमेव स्यात् । अतस्तत्परिहाराय तेषामपि कार्यनिष्ठता वर्णयितव्येति । तथा[6] "सत्सम्प्रयोगे—"* इति मानान्तरयोग्यत्वमपौरुषेयत्वसिद्धये निरा-

---

१. 'प्रवृत्तत', २. 'नाध्य' क. पाठः. ३. 'मिकवि' ख. ग. पाठः. ४. 'क', ५. 'न्तानां' क. पाठः. ६. 'था च स' ख. ग. पाठः.

---

* जैमि० १. १. ४. ४.

कृतम्। योग्यत्वे तु पौरुषेयता स्यादिति। नैतत् सारम्। अयोग्यविषयस्यापि बुद्धादिवाक्यस्य पौरुषेयत्वदर्शनाद्, योग्यविषयस्यापि 'वायुर्वै क्षेपिष्ठे'त्यादेरपौरुषेयत्वदर्शनाच्च। विधिसंसर्गेऽप्यर्थवादेन न विधिः प्रतिपद्यते। किन्तु प्रशंसादिरेव प्रमाणान्तरयोग्योऽर्थः। तस्मादन्यदेव पौरुषेयत्वादेः कारणम्। अथ मा भूत् पौरुषेयत्वम्। अपौरुषेयत्वं तु कुतः। न। असाध्यत्वात्। प्रामाण्यं तर्हि वेदस्य कथं, तस्मिन् सत्यबाध्यमानप्रमितिजननात्। शाब्दप्रमितेस्तु बाधोऽपेक्ष्यमाणप्रमितिबाधात्। पौरुषेयत्वाभावात् तु प्रमित्यन्तरापेक्षा नास्तीत्युक्तम्। तस्मादबाधः॥ ६६॥

अतः सिद्धं ब्रह्मणि शब्दस्य प्रामाण्यमित्याह —

अतः सत्यादिशब्दास्तु संसृष्टार्थोक्तिशक्तितः।
मानान्तरस्याविषयं भूतार्थं बोधयन्ति नः॥ ६७॥

के पुनः शब्दा ब्रह्मस्वरूपसमर्पकाः, के पुनः सोपाधिकरूपसमर्पका इति तत्राह —

अनुपाधिप्रवृत्तैर्भिज्ञानानन्दसदुक्तिभिः।
स्वसामान्याभिधानेन व्यक्तिरेका समर्प्यते॥ ६८॥

ज्ञानानन्दसच्छब्दाः परापरसामान्यवाचकत्वात् सामानाधिकरण्याच्च स्वसामान्याभिधानमुखेनैकामानन्दव्यक्तिमपरसामान्यव्यञ्जितां ब्रह्मत्वेन लक्षयन्ति, सन्मूर्तं द्रव्यं

---

१. 'पा', २. 'ग्या', ३. 'त्वापौरुषेयत्वादेः' ख. ग. पाठः. ४. 'ता' क. पाठः. ५. 'त्र्याभिज्ञाना' ख. ग. पाठः.

कुड्यमिति च परापरसामान्यानामेकत्र वृत्तिदर्शनात् । तथाच 'यतो वा इमानि भूतानी[1]'ति लक्षणं निर्दिश्य 'आनन्दाद्ध्येव खल्विमानी'ति लक्ष्यं[2] ब्रह्मानन्दं निर्दिशति । तत्रानन्दस्य परप्रकाश्यै[3](क?)तानिवृत्तये ज्ञानशब्दः । स्वभावतः शून्यतानिवृत्तये सच्छब्दः । अथवा ब्रह्मव्यतिरिक्तस्यानन्दस्य ज्ञानस्य सतश्चाभावात् तत्सामान्ययोगाद् ब्रह्मैव सदादिशब्दैरभिधीयते । ननु तर्हि तेषां पर्यायत्वप्रसङ्गः । न । तुच्छजाड्यदुःखविरोध्युपाधिभेदेन प्रवृत्तेः । नन्वेवं सदादिशब्दानां निरुपाधिकवृत्तित्वं न स्यात् । नैष दोषः । सामान्योपाधौ दुःखादिविरोध्युपाधौ वा नियतैकस्मिन् वस्तुनि बुद्धिमुत्पादयन्तीति निरुपाधिकाः । अस्थूलादिशब्दास्तु (अ)नियतवस्तुविषया[4] उपाधितन्त्रा इति । ननु तुच्छादिविरोधित्वमप्रतिपाद्यापि सदादिव्यवहारो दृश्यते । तर्हि मायानिर्मितानामपि ज्ञानानन्दसतां प्रतीतेः सामान्य[5]पक्ष एवाश्रीयताम् । ननु सामान्यानामपि मायात्मकत्वादानन्दादिरूपता ब्रह्मणो न स्यात् । आनन्दादिसामान्याश्रयत्वमात्रत्वादानन्दादिस्वरूपताया न परमार्थसामान्याश्रयत्वमपेक्ष्यते । ननु मिथ्यारजतसम्भिन्ना शुक्तिर्न रजतमिति व्यवह्रियते । सत्यं, रजताभासत्वात् तस्य । इह तु सामान्यान्तराभावात् तेषां न सामान्याभासत्वम् । तस्मादानन्दादिसामान्याश्रयत्वादानन्दादिरूपता ब्रह्मणः सिद्धा । तस्य चानन्दस्य मिथ्यात्वविरोधः सत्यशब्देनोच्यते । अद्वितीया-

---

१. 'नि जायन्ते इति' क. पाठः. २. 'क्ष्यं नि' ख. ग. पाठः. ३. 'शकता', ४. 'या इ' क. पाठः. ५. 'न्यमेवा' ख. ग. पाठः.

न(न्द?न्त)ब्रह्मादिशब्दैर्देशकालवस्तुपरिच्छेदाभावः, अस्थूलादिशब्दैर्निष्प्रपञ्चता, सर्वज्ञत्वादिशब्दैः प्रपञ्चोपाधिधर्मवत्ता कथ्यते । तत्र प्रपञ्चोपाधिकधर्माः सति प्रपञ्चे बाधशून्या इत्येतावत् । स्वरूपेण तु मायात्मकाः । अस्थूलादयश्च निवृत्त्यात्मान इति न परमार्थसदद्वितीयताविरोधः । आनन्दादिशब्दाश्च काल्पनिकसामान्यद्वारेणैकस्यामानन्दव्यक्तौ पर्यवस्यन्ति । धर्मधर्मिविभागप्रतिपादनाभावान्न परमार्थसदद्वितीयताविरोधः । अथवा आकाशशब्दवत् सच्छब्दोऽपि घटादिष्वनुवर्तमानस्यैकस्यैव स्वतन्त्रस्य सतो वाचकः । ज्ञानानन्दशब्दौ तु सामान्यद्वारेण तत्र वर्तिष्येते । एवं[1] च सति गुणगुणिसम्बन्धप्रयुक्ता लक्षितलक्षणापि न स्यात् । तस्मादेकमद्वितीयमानन्दे[2]रूपं ब्रह्म सिद्धम् ॥ ६८ ॥

तथा जीवस्य ब्रह्मात्मता नाध्यासादिलक्षणेत्या[3]ह —

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च यतो जीवस्ततः परः ॥ ६९ ॥

यस्मिन् वाक्ये षड्विधं तात्पर्यलिङ्गं यस्मिन्नर्थे गम्यते, तद् वाक्यं तत्परमित्यध्यवसीयते । तथाचोपक्रमोपसंहारयोरैकरूप्यम् 'अमतं मतमविज्ञातं विज्ञातम्', 'एकमेवाद्वितीयम्', 'ऐतदात्म्यमिदं सर्वं', 'तत् त्वमसी'ति । तथाभ्यासोऽपि 'एकमेवाद्वितीयं', 'तत् त्वमसी'ति पुनः पुनर्वचनात् । तथापूर्वतापि । नहि ब्रह्मात्मैकत्वं केनचिदपि प्रमाणान्तरेण गम्यते ।

---

१. 'च गु' ख. ग. पाठः. २. 'न्दस्वरू' क. पाठः. ३. 'त्यत आ' ख. ग. पाठः.

तथा फलमपि 'आचार्यवान् पुरुषो वेद', 'तस्य तावदेव चिरमि'त्यादि । तथार्थवादोऽपि 'अनेन जीवेनात्मनानुप्रविश्ये'त्यादि । तथा 'तस्मादेनं स्वपितीत्याचक्षते । स्वं ह्यपीतो भवती'त्यादिना, शरीरेन्द्रियाणामन्नमयत्वेनानात्मताप्रतिपादनेन च, तत्परशुग्रहणदृष्टान्तेन चोक्तब्रह्मात्मतासत्याभिसन्धस्य मोक्षकथनेन चास्यैवार्थस्योपपादनं क्रियते । क्वचिच्चावस्थात्रयवैलक्षण्येनासङ्गत्वोपपादनेन । एवं यतो वेदान्तवाक्येषु जीवस्य ब्रह्मात्मतायां वाक्यतात्पर्यलिङ्गानां[1] षण्णां समुच्चयो विकल्पो वा यथायोगं गम्यते, अतः परमात्मैवायं जीवः, शब्दस्य च स्वभावतोऽर्थपरत्वात् प्रत्ययपरत्वायोगात् ॥ ६९ ॥

न च प्रमाणान्तरविरोधः, अविद्योपाधिनिमित्तत्वाद् भेदव्यवहारस्य[2]त्याह —

अविद्या भेदिकोपाधिर्नातिरेको न चापि धीः ।
द्वयापेक्षं[3] तु तुल्यत्वात् सुषुप्तादावदर्शनात् ॥ ७० ॥

'न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ती'त्यस्मिन् मन्त्रेऽन्यद् युष्माकमन्तरं बभूवेत्युक्त्वा किं तदन्तरमिति वीक्षायां नीहारेण प्रावृता इति नीहारस्य तमसो व्यवधायकत्वं गम्यते । तमश्च न बाह्यं, किं त्वान्तरम् । तच्च 'नासदासीन्नो सदासीत् तम आसीदि'त्यादिश्रुतेः सदसद्विलक्षणं,

"अहमज्ञानजं तमः ।

---

१. 'र्यस्य लि' ख. ग. पाठः. २. 'दादिव्य', ३. 'वत्सापेक्षत्वतुल्य'

नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥"

इति स्मृतेर्ज्ञाननिवर्त्य च । तस्मादज्ञानमेव तत् ।

"विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥"

इति स्मृतिरज्ञानमेव व्यवधायकं दर्शयति । नन्वज्ञानं कस्य कस्मिन्निति वीक्षायां जीवस्य ब्रह्मणीति वक्तव्यम् । तत-श्चाज्ञानमन्तरेण जीवब्रह्मविभागायातिरेकः कल्पयितव्यः । तन्न । अतिरेकेऽपि द्वयापेक्षायाः कस्य कस्मादिति तुल्यत्वाद-तिरेकोपलक्षितस्य[1] जीवत्वे तस्य च ज्ञानान्निवर्त्यत्वेऽज्ञानप-क्षान्न विशिष्यते । विशिष्टस्य जीवत्वेऽनिर्मोक्षः । अतो यत्-किञ्चिदेतत् । नापि धीमात्रमेव जीवोपाधिः । तदप्रतीतावपि सुषुप्ते जीवप्रतीतेः । तस्मादविद्यैव भेदिका । सा चापरोक्षज्ञा-नादेव कात्स्न्र्येन निवर्तते ॥ ७० ॥

तच्चापरोक्षज्ञानं शब्दादेवेत्यत आह —

विषयोत्पन्नतः संविदैक्याद्वाज्ञानहानतः ।
स्वतः सिद्धेरतः शब्दादापरोक्ष्यं प्रजायते ॥ ७१ ॥

लोकेऽपि संवेदनस्य विषयोत्पन्नत्वाद् वा विषयस्य संविदैक्याद् वा विषयस्य चेतनप्रकृतिकतया स्वयमेव चेत-नेनाभिन्नस्यावरणध्वंसाद् वा आपरोक्ष्यात् तन्निमित्तं ज्ञानम-परोक्षज्ञानमित्युच्यते । न ज्ञानस्य स्वतोऽपरोक्षतामात्रम्[2] ।

---

१. 'व्य' क. पाठः. २. 'त्रात् । ना' ख. ग. पाठः.

नापि तज्जन्यसंवेदनस्य । एवं ब्रह्मण्यपि शब्दज्ञाननिमित्तं संवेदनं ब्रह्मप्रकृति, ब्रह्माभिन्नसर्वचैतन्यानां ब्रह्मप्रकृतिकत्वाद् वा स्वयंप्रकाशस्यावरणध्वंसाद् वा अपरोक्ष आत्मनि प्रत्ययत्वाद् वा, अहंप्रत्ययवत् । तन्निमित्तं ज्ञानमपरोक्षज्ञानमित्युच्यते । सञ्जातेऽपि शब्दात् तथाविधे ज्ञाने असंभावनादिदोषादविद्यासंस्कारबलाद् वा परोक्षमिव भ्रमादवभासते । तच्च मननिदिध्यासनादिभिर्विमलीकरणात् सूक्ष्मवस्त्वालोचनक्षमेण मनसा शरीरेन्द्रियव्यतिरिक्ते च त्वम्पदार्थे प्रत्यक्षतोऽवभासमाने ब्रह्मात्मज्ञानाकारेण परिणममानेन मनसा स्थिरीभावात् क्षणद्वयवर्तिनाग्निनेव क्षणमात्रेणादाहकेनापि क्षणद्वयवर्तिना दह्यते । ततश्च तत् सिद्धम् ॥ ७१ ॥

आतो निश्रेयसप्राप्तेस्तादर्थ्याच्छाब्दनिर्णयः ।
विशिष्टफलसम्बन्धी श्रोतव्योऽयं बुभुत्सुना ॥ ७२ ॥

विदितसकलवेद्यैर्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं (प्रवृ)त्तः
स्वमतिविमल(तोयैः ? तायै) क्षन्तुमर्हन्ति सन्तः ॥

वन्दे तेमात्मसम्बुद्धस्फुरद्ब्रह्मात्मभावतः ।
अर्थतोऽपि न नाम्नैव योऽनन्यानुभवो गुरुः ॥

प्रकाशात्मयतीन्द्रेण प्रणिपत्य जनार्दनम् ।
प्रतिबोधाय बालानां प्रणीतः शाब्दनिर्णयः ॥

समाप्तोऽयं ग्रन्थः ।

शुभं भूयात् ।

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. Second (Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I, 1 & 2 Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1 & 2 Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III, 4th, 5th & 6th Kândas)	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III 6th, 7th & 8th Sargas)	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pada	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and, Tîkasarvaswa of Vandyaghatiya-Sarvananda (Part II. 2nd Kanda 1-6 Vargas)	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvati. (Part I.)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpala.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part III 2nd Kanda 7–10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda Part (IV 3rd Kanda)	1	8	0
No. 53— शाब्दनिर्णयः (Vedanta) by Prakasatmayatîndra.	0	12	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

TRIVANDRUM SANSKRIT SERIES.

No. LV.

श्रीमहेन्द्रविक्रमवर्मप्रणीतं

मत्तविलासप्रहसनम् ।

THE

MATTAVILÂSAPRAHASANA

OF

SRÎ MAHENDRAVIKRAMAVARMAN

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

LIBRARY OF THE ROYAL ASIATIC SOCIETY

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917

(All Rights Reserved.)

Main
121658

TRIVANDRUM SANSKRIT SERIES.

No. LV.

THE

MATTAVILÂSAPRAHASANA

OF

SRÎ MAHENDRAVIKRAMAVARMAN

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.



PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

D. x. 2m. 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५५.

मत्तविलासप्रहसनं

श्रीमहेन्द्रविक्रमवर्मप्रणीतम् ।

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितम् ।



तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोल्लम्बाब्दाः १०९२, क्रैस्ताब्दाः १९१७.

The drunken revelry of a Kâpâlika with his female companion, his falling out with a hypocritical Sâkyabhikshu believing him to have stolen his Kapâla (alms-bowl) which had been carried away by a dog, his having recourse to a degenerate Pâsupata for the settlement of disputes and finally the recovery of the Kapâla from a madman are in brief the incidents that make up the plot of the Prahasana. The style is simple and beautiful and is suited to the humorous character of the play.

It is evident from the Sthâpanâ of the play that it was written by a King of the Pallava dynasty named Mahendravikrama Varma, son of Simha Vishnu Varma. This Mahendravikrama Varma can be identified with the Mahendra Varman I, mentioned in a number of South Indian Pallava inscriptions as the son and successor of the early Pallava King Simhavishnu (575–600 A. D.) and as having borne a number of titles. For, we know from the Mahendra-Vâdi Inscription that Gunabhara built a cave temple 'Murâri griha',* and from the Vallam Inscription that Gunabhara is known by the name "Mahendra Potarayan". The two cave inscriptions at Trichinopoly‡ disclose that Gunabhara was a Pallava King and had the title Satrumalla. Rao Bahadur Venkayya M. A. in his article "Inscriptions in the Trichinopoly cave" contributed to the Director General's Archæological Survey Annual for 1903–04 (pp. 270 ff.) gives the contents of a damaged inscription which consist of the titles Mahendravikrama, Mattavilâsa and Avanibhâjana which were held by Gunabhara. Of these titles held by one and the same person, Mahendravikrama evidently seems to be his own name, and Gunabhara and others his titles. Mahendra is a shortened form of Mahendravikrama Varma. The title Satrumalla might

* Vide Epigraphia Indica Vol IV. p 152. ‡ See South Indian Inscriptions Vol. I. pp. 29-30

have been obtained by him on account of his valour in vanquishing enemies, which is mentioned in the concluding line of the play 'राजन्वानस्तु शक्तिप्रशमितरिपुणा शत्रुमल्लेन लोकः'। The title Avanibhâjana is referred to in the 4th Pâda of the Mangala Sloka 'स व्याप्तावनिभाजनं दिशतु वो दिव्यः कपाली यशः' and the titles Gunabhara and Mattavilâsa are also found in the words of Natî in the Sthâpanâ 'जोव्वणगुणभरमत्तविळासप्पहसणं'. The title Gunabhara might have been given to him as he was the seat of all the virtues described in the verse 'प्रज्ञादानदयानुभावधृतयः कान्तिः क्षमा कौशलम्'(p. 3.). It is probably on account of the term Avanibhâjana happily employed in the line 'स व्याप्तावनिभाजनं दिशतु वो दिव्यः कपाली यशः' so as to suggest the central incident of the plot namely 'the handing over the vessel', that the author was known by the title Avanibhâjana. Similarly the title Mattavilâsa might have been conferred on him as it was aptly placed in the sentence 'जोव्वणगुणभरमत्तविळास' to suggest the name of the play also.

The author Mahendravikrama Varma flourished in the early part of the 7th century A. D., as he is known to be a contemporary of Chalukya Pulakesin II. who came to the throne on 609 A. D.

My thanks are due to Rao Bahadur H. Krishna Sastri B. A., Officiating Epigraphist for the Government of India, for helping me with references to inscriptions relating to Mahendra Varman I.

The edition of this work is based on two palm-leaf manuscripts in Malayalam characters, about three centuries old. *One of them was obtained by me from the Manalikkara Mathom in South Travancore in the year 1909, and the other manuscript from Mr. Nilakanthan Chakyar of Mangaham in North Travancore in the year 1914.

Trivandrum,
18th May 1917. } T. GANAPATI SÂSTRI.

* A transcript of the manuscript was lent, some six months ago, at his request to Mr. T. A. Gopinatha Rao, M. A. Superintendent of Archeology, Travancore, and he has published an article on the work "Mattavilasa-Prahasana" in the Madras Christian College Magazine.

उपोद्घातः ।

युवतिसमेतस्य कस्यापि कापालिकस्य मधुपानविभ्रमः, कुक्कुरापहृतमात्मीयं कपालभाजनं केनचिन्मिथ्याचारेण शाक्यभिक्षुणा चोरितं मन्यमानस्य तेन सह विवादः, विवादनिर्णयाय पाशुपतापशदाश्रयणम्, उन्मत्तसकाशादन्ते यदृच्छया कपाललाभ इत्येतावद् वस्तु हास्यरसानुगुणं निपुणरमणीयमिह प्रहसने वर्णितम् ।

अस्य प्रणेता पह्लवभूपालकुलजन्मा **सिंहविष्णुवर्मसूनुर्महेन्द्रविक्रमवर्मेति** स्थापनायां प्रतिपादितम् । कोऽसौ **महेन्द्रविक्रमवर्मेति** वीक्षायां, पह्लवेषु भूपतिषु वृद्धतरस्य **सिंहविष्णुवर्मणः** पुत्रो बहुबिरुदशाली यो **महेन्द्रवर्मा** नाम दक्षिणभारतप्राचीनलेखेभ्योऽवगतः स एवायमिति निश्चयः । तथाहि — एपिग्राफियाइन्दिकायां *महेन्द्रवाडिशिलालेखे मुरारिगृहनिर्मापयिता **गुणभरो** नामाभिहितः । तस्यामेव (वलं) शिलालेखे **गुणभर** एव 'महेन्द्रपोतरयन्' इति **महेन्द्रसंज्ञया** निर्दिष्टः । **त्रिशिरःपुर**शिलालेखयोः †द्वयोः एकत्र **गुणभर** एव पह्लवो राजेति, अन्यत्र **गुणभरो** राजा शत्रुमल्ल इति च कीर्तितः । भारतवर्षपुराणवस्तुविचाराध्यक्षस्य १९०३—०४तमवर्षवृत्तनिवेदनायां (pp. 270. ff.) प्रकाशिते **त्रिशिरःपुर**शिलालेखविषये स्वनिबन्धे श्रीवेङ्कय्यमहाशयो(एम्. ए.) **गुणभरस्यैव महेन्द्रविक्रम** इति **मत्तविलास** इति **अवनिभाजनम्** इति चाख्यान्तराणि क्वचन शिलालेखे दृष्टान्याह । एकव्यक्तिनिवेशिनीषु आसु **गुणभराद्याख्यासु** औचित्याद् **महेन्द्रविक्रम** इति सांस्कारिकी संज्ञा, **गुणभर** इत्येवमादीनि तु बिरुदानि; महेन्द्र इति च नामैकदेशग्रहणमिति शक्यमवसातुम्§ । नूनं, बिरुदेष्वेतेषु

* See page 152. Vol. 4. † See South Indian Inscriptions Vol. I. pp. 29–30.

§ अन्यान्यपि तु बिरुदानि अस्यावगतानि पुरुषोत्तम, सत्यसन्ध, ललिताङ्कुर, पक्काप्पिडुगु, चट्टकारि, इत्यादीनि । तत्र चट्टकारीति चैत्यकारीत्यर्थकं शिलोच्चयेषु देवायतननिर्माणस्य दक्षिणभारते महेन्द्रवर्मोपक्रमतां सूचयतीति भारतमण्डलप्राचीनलेखाधिकृतः श्रीकृष्णशास्त्रिमहाशय आह ।

शत्रुमल्ल इत्येतत् शत्रुधर्षणशक्त्यतिशयात् सिद्धम्। तच्चास्मत्प्रहसने "राजन्वानस्तु शक्तिप्रशमितरिपुणा शत्रुमल्लेन लोकः' इति भरतवाक्यश्लोकपादे गृहीतमेव। **अवनिभाजन – गुणभर – मत्तविलास**विरुदानि तु 'स व्याप्तावनिभाजनं दिशतु वो दिव्यः कपाली यशः' इति मङ्गलश्लोके, 'जोव्वणगुणभरमत्तविलासप्पहसणं' इति नटीवाक्ये चोपात्तानि। तत्रापि **गुणभर**विरुदम् उच्चावचसद्गुणातिशययोगान्नूनं निष्पन्नम्। स च सद्गुणातिशययोगः 'प्रज्ञादानदयानुभावधृतयः' (श्लो० ३) इत्यादिना प्रकाशित एव। प्रहसनवस्तुभूतकपालरूपभाजनदानसूचनानुगुण्येन अवनिभाजनशब्दस्य यच्चमत्कारकारि संघटनं, तन्निबन्धनः संघटयितरि कवौ अवनिभाजनपदव्यपदेशो विदग्धैर्मन्ये प्रवर्तितः। एवं मत्तविलासपदव्यपदेशोऽपि तत्पदसंघटननिबन्धनः, अर्थान्तरपरेण तेन पदेन प्रहसननामधेयस्य मुद्रालङ्कारभङ्ग्या संसूचनात्।

महेन्द्रविक्रमवर्मणो जीवितसमयस्तु क्रैस्ताब्दीयस्य षष्ठशतकस्य पूर्वो भागः, यस्मात् स मद्रमण्डलपुराणवस्तुविमर्शकैः ६०९तम क्रैस्ताब्दावासराज्याधिपत्यस्य चालुक्यस्य द्वितीयपुलकेशिनः समकालिको निर्णीतः।

अस्य प्रहसनस्य संशोधनाधारभूतौ केरलग्रन्थलिपी तालपत्रात्मकौ त्रिचतुरशतवर्षवृद्धौ द्वावादर्शौ। तत्रैकः १९०९तमे क्रैस्ताब्दे मणलिक्करमठान्मयोपलब्धः, द्वितीयः १९१४तमे (माज्ञानम्) नीलकण्ठचाक्यार्-महाशयसकाशादासादितः॥

अनन्तशयनम्,
१४–५–१९१७.

त. गणपतिशास्त्री.

॥ श्रीः ॥

मत्तविलासप्रहसनं

श्रीमहेन्द्रविक्रमवर्मप्रणीतम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—

भावावेशवशादनेकरसतां त्रैलोक्ययात्रामयम् ।
भाषावेषवपुःक्रियागुणकृतानाश्रित्य भेदान् गतं
नृत्तं निष्प्रतिबद्धबोधमहिमा यः* प्रेक्षकश्च स्वयं
स व्याप्तावनिभाजनं दिशतु वो दिव्यः कपाली यशः ॥

भोः! समासादितः खलु मया यवीयसीं भार्यामधिकृत्य समुत्पन्नव्यलीकायां ज्येष्ठायां मे कुटुम्बिन्यां युक्ततरः प्रसादनोपायः, यच्चिरस्याद्य वयं प्रेक्षाधिकारे परिषदा नियुक्ताः स्मः । तद् यावदेनामुपसर्पामि । (नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

(प्रविश्य)

नटी— (सरोषम्) (क) अय्य! किं चिरस्स काळस्स जोव्वणगुणभरमत्तविळासप्पहसणं (ओ? दं)सेदुं आअदो सि ।

(क) आर्य! किं चिरस्य कालस्य यौवनगुणभरमत्तविलासप्रहसनं दर्शयितुमागतोऽसि ।

---

* करोतीत्यध्याहर्तव्यम् ।

सूत्रधारः — यथाह भवती ।

नटी — (क) ताए एव दाव दंसेहि, जा तुए रमइदव्वा ।

सूत्रधारः — त्वया सह दर्शयिष्यामीति ।

नटी — (ख) किं ताए एव्व णिउत्तो सि ।

सूत्रधारः — एवमेतत् । अपिच, तत्र गता महान्तमनुग्रहं लप्स्यसे ।

नटी — (ग) तव एव्व खु एदं जुज्जइ ।

सूत्रधारः — भवति! किमिव न युज्यते । त्वत्प्रयोगपरितोषिता परिषदनुग्रहीष्यतीति ।

नटी — (सहर्षम्) (घ) एवं । लद्धो अय्यमिस्साणं पसादो ।

सूत्रधारः — बाढम् । लब्धः ।

नटी — (ङ) जइ एवं, किं दे पिअक्खाणिअं देमि ।

सूत्रधारः — अलं प्रियाख्यानिकपुनरुक्तेन । पश्य,

उद्भिन्नरोमाञ्चकपोलरेख-
मार्विर्मयूखस्मितमञ्चितभ्रु ।

(क) तयैव तावद् दर्शय, या त्वया रमयितव्या ।

(ख) किं तयैव नियुक्तोऽसि ।

(ग) तवैव खल्वेतद् युज्यते ।

(घ) एवम् । लब्ध आर्यमिश्राणां प्रसादः ।

(ङ) यद्येवं, किं ते प्रियाख्यानिकं ददामि ।

लब्ध्वा प्रिये! दुर्लभमाननं ते
भूयोऽपि किं प्रार्थयितव्यमस्ति ॥ २ ॥

नटी — (क) किं दाणि अय्येण पउञ्जिदव्वं ।

सूत्रधारः — ननु त्वयैवाभिहितं, मत्तविलासप्रहसनमिति ।

नटी — (ख) णूणं इमस्सिं पक्खवादी मे कोवो, जेण अभिप्पाआणुरूवं भणाविद म्हि । अय्य! कदमो उण सो कवी, जो इमाए किदीए पआसीअदि ।

सूत्रधारः — भवति! श्रूयताम् । पल्लवकुलधरणिमण्डलकुलपर्वतस्य सर्वनयविजितसमस्तसामन्तमण्डलस्य आखण्डलसमपराक्रमश्रियः श्रीमहिमानुरूपदानविभूतिपरिभूतराजराजस्य श्रीसिंहविष्णुवर्मणः पुत्रः शत्रुषड्वर्गनिग्रहपरः परहितपरतन्त्रतया महाभूतसधर्मा महाराजः श्रीमहेन्द्रविक्रमवर्मा नाम । अपिच,

प्रज्ञादानदयानुभावधृतयः कान्तिः कलाकौशलं
सत्यं शौर्यममायता विनय इत्येवम्प्रकारा गुणाः ।
अप्राप्तस्थितयः समेत्य शरणं याता यमेकं कलौ
कल्पान्ते जगदादिमादिपुरुषं सर्गप्रभेदा इव ॥ ३ ॥

(क) किमिदानीमार्येण प्रयोक्तव्यम् ।

(ख) नूनमस्मिन् पक्षपाती मे कोपः, येनाभिप्रायानुरूपं भाणितास्मि । आर्य! कतमः पुनः स कविः, योऽनया कृत्या प्रकाश्यते ।

---

१. 'गदं भ' ख. पाठः.

किञ्च,

आकरे सूक्तिरत्नानां यस्मिन् गुणगरीयसाम् ।
*अर्घन्ति बहु सूक्तानि सतां सारलघून्यपि ॥ ४ ॥

नटी — (क) किं दाणि अय्येण विलम्बीअदि । णं अपुरुवदाए तुरिअं अणुट्ठिदव्वो अअं पओओ ।

सूत्रधारः — अहं तु,

सम्प्रति सङ्गीतधनः
कविगुणकथयास्मि निग्नतां नीतः ।

(नेपथ्ये)

प्रिये ! देवसोमे !

सूत्रधारः —

युवतिसख एष सुरया
कपालविभवः कपालीव ॥ ५ ॥

(निष्क्रान्तौ ।)

स्थापना ।

(क) किमिदानीमार्येण विलम्ब्यते । नन्वपूर्वतया त्वरितमनुष्ठातव्योऽयं प्रयोगः ।

---

* अर्घेति मूल्यप्राप्त्यर्थको धातुः । बहु इति क्रियाविशेषणम् । बहु अर्घन्ति बहु मूल्यं प्राप्नुवन्ति श्लाघामनल्पां लभन्त इति यावत् । यः स्वयं गुणोत्तरसूक्तिरत्नानिधिः सन् परकीयसूक्तान्यल्पगुणान्यपि नावमन्यते, प्रत्युत श्लाघत एव केवलमिति तात्पर्यम् । यस्मिन्निति वैषयिके सामीपिके वाधिकरणे सप्तमी ।

(ततः प्रविशति सपरिग्रहः कपाली ।)

कपाली — (क्षीबतां रूपयित्वा) प्रिये ! देवसोमे ! सत्यमेवैतत् — तपसा कामरूपता प्राप्यत इति । यत् त्वया परमव्रतस्य विधिवदनुष्ठानेनान्य एव रूपातिशयः क्षणात् प्रतिपन्नः । तव हि,

उद्भिन्नश्रमवारिबिन्दु वदनं सभ्रूलताविभ्रमं
खेलं यातमकारणानि हसितान्यव्यक्तवर्णा गिरः ।
रागाक्रान्तमधीरतारमलसापाङ्गं युगं नेत्रयो-
रंसोपान्तविलम्बिनश्च विगलन्मालागुणा मूर्धजाः ॥ ६ ॥

देवसोमा — (क) भअवं ! मत्तं विअ मत्तं विअ म भणासि ।

कपाली — किमाह भवती ।

देवसोमा — (ख) ण हु किञ्चि भणामि ।

कपाली — किन्नुखलु मत्तोऽस्मि ।

देवसोमा — (ग) भअवं ! परिब्भमइ परिब्भमइ पुहुवी । पुरो वदामि विअ । अवळम्ब दाणि मं ।

कपाली — प्रिये ! तथास्तु । (अवलम्बमानः पतनं रूपयित्वा)

(क) भगवन् ! मत्तामिव मत्तामिव मां भणसि ।

(ख) न खलु किञ्चिद् भणामि ।

(ग) भगवन् ! परिभ्रमति परिभ्रमति पृथिवी । पुरः पतामीव । अवलम्बस्वेदानीं माम् ।

प्रिये! सोमदेवे! किं त्वं कुपितासि, यदवलम्बितुमुपसर्पतो मे दूरीभवसि ।

देवसोमा — (क) अहोणुखु आअदकोवा सोमदेवा, जा तुए सीसेण पणामिअ अणुणीअमाणा वि दूरीहोइ ।

कपाली — ननु त्वमेवासि सोमदेवा । (ध्यात्वा) नहि, देवसोमा ।

देवसोमा — (ख) भअवं! णं तहा वळ्ळहा सोमदेवा, णार्हदि मम णामकेणाभिधादुं ।

कपाली — भवति! सुलभपदस्खलितो मे मदोऽयं तवा-त्रापराद्धः ।

देवसोमा — (ग) दिट्ठिआ ण तुवं ।

कपाली — कथं मद्यदोषो मामेवं सङ्क्रामयति । भवतु भवतु । अद्यप्रभृति मद्यनिषेवणान्निवृत्तोऽस्मि ।

देवसोमा — (घ) भअवं! मा मा मम कारणादो वदभङ्गेण तवो खण्डेदुं । (पादयोः पतति ।)

(क) अहोनुखल्वागतकोपा सोमदेवा, या त्वया शीर्षेण प्रणम्यानुनीयमानापि दूरीभवति ।

(ख) भगवन्! ननु तथा वल्लभा सोमदेवा, नार्हति मम नामकेनाभिधातुम् ।

(ग) दिष्ट्या न त्वम् ।

(घ) भगवन्! मा मा मम कारणाद् व्रतभङ्गेन तपः खण्डयितुम् ।

कपाली — (सहर्षमुत्थाप्यालिङ्ग्य) धृर्ण धृर्ण नमः शिवाय । प्रिये!

पेया सुरा प्रियतमामुखमीक्षितव्यं
ग्राह्यः स्वभावललितो विकृतश्च वेषः ।
येनेदमीदृशमदृश्यत मोक्षवर्त्म
दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥ ७ ॥

देवसोमा — (क) भअवं! णं तहा भणिदव्वं । अघन्ते मोक्खमग्गं अण्णहा वण्णअन्ति ।

कपाली — भद्रे! ते खलु मिथ्यादृष्टयः । कुतः,

कार्यस्य निःसंशयमात्महेतोः
सरूपतां हेतुभिरभ्युपेत्य ।
दुःखस्य कार्यं सुखमामनन्तः
स्वेनैव वाक्येन हता वराकाः ॥ ८ ॥

देवसोमा — (ख) सन्तं सन्तं पावं ।

कपाली — शान्तं शान्तं पापम् । नखलु ते पापा आक्षेपमुखेनाप्यभिधातुमर्हन्ति, ये ब्रह्मचर्य-केशनिर्लोटन-मलधारण-भोजनवेलानियम-मलिनपटपरिधानादिभिः प्राणिनः परिक्लेशयन्ति । तदिदानीं कुतीर्थसङ्कीर्तनोपहतां जिह्वां सुरया प्रक्षालयितुमिच्छामि ।

(क) भगवन्! ननु तथा भणितव्यम् । अर्हन्तो मोक्षमार्गमन्यथा वर्णयन्ति ।

(ख) शान्तं शान्तं पापम् ।

देवसोमा — (क) तेण हि अण्णं दाणिं सुरापणं गच्छामो ।

कपाली — प्रिये ! तथास्तु ।

(उभौ परिक्रामतः ।)

कपाली — अहोतुखलु विमानशिखरविश्रान्तघनरासितसन्दिग्धमृदङ्गशब्दस्य मधुसमयनिर्माणमातृकायमाणमाल्यापणस्य कुसुमशरविजयघोषणायमानवरयुवतिकाञ्चीरवस्य काञ्चीपुरस्य परा विभूतिः । अपिच,

अनतिशयमनन्तं सौख्यमप्रत्यनीकं
समधिगतसतत्त्वा मेनिरे यन्मुनीन्द्राः ।
तदिह निरवशेषं दृष्टमेतत् तु चित्रं
यदुत करणभोग्यं कामभोगात्मकं च ॥ ९ ॥

देवसोमा — (ख) भअवं ! भअवदी वारुणी विअ अणवगीअमहुरा कञ्ची ।

कपाली — प्रिये ! पश्य पश्य । एष सुरापणो यज्ञवाटविभूतिमनुकरोति । अत्र हि ध्वजस्तम्भो यूपः, सुरा सोमः, शौण्डा ऋत्विजः, चषकाश्चमसाः, शूल्यमांसप्रभृतय उपदंशा हविर्विशेषाः, मत्तवचनानि यजूंषि, गीतानि सामानि, उदङ्काः स्रुवाः, तर्षोऽग्निः, सुरापणाधिपतिर्यजमानः ।

(क) तेन ह्यन्यमिदानीं सुरापणं गच्छावः ।

(ख) भगवन् ! भगवती वारुणीवानवगीतमधुरा काञ्ची ।

देवसोमा — (क) अह्माअं पि एत्थ भिक्खा रुद्दभाओ भविस्सदि ।

कपाली — अहो दर्शनीयानि प्रहतमर्दलकरणानुगतानि विविधाङ्गहारवचनभ्रूविकाराणि उच्छ्रितैकहस्तावलम्बितोत्तरीयाणि विगलितवसनप्रतिसमाधानक्षणविषमितलयानि व्याकुलितकण्ठगुणानि मत्तविलासनृत्तानि ।

देवसोमा — (ख) अहो रसिओ खु आअय्यो ।

कपाली — एषा भगवती वारुणी चषकेष्वावर्जिता प्रस्यादेशो मण्डनानाम्, अनुनयः प्रणयकुपितानां, पराक्रमो यौवनस्य, जीवितं विभ्रमाणाम् । किं बहुना,

मिथ्या त्रिलोचनविलोचनपावकेन
भस्मीकृतां मदनमूर्तिमुदाहरन्ति ।
स्नेहात्मिका तदभितापवशाद् विलीना
सेयं प्रिये! मदयति प्रसभं मनांसि ॥ १० ॥

देवसोमा — (ग) भअवं! जुज्जइ एदं । णहि लोओवआरणिरदो लोअणाहो लोअं विणासेदि ।

(उभौ कपोलपटहं कुरुतः ।)

(क) आवयोरप्यत्र भिक्षा रुद्रभागो भविष्यति ।

(ख) अहो रसिकः खल्वाचार्यः ।

(ग) भगवन्! युज्यत एतत् । नहि लोकोपकारनिरतो लोकनाथो लोकं विनाशयति ।

कपाली — भवति ! भिक्षां देहि ।

(नेपथ्ये)

(क) भअवं! एसा भिक्खा । पडिगण्हदु भअवं ।

कपाली — एष प्रतिगृह्णामि । प्रिये ! क्व मे कपालम् ।

देवसोमा — (ख) अहं वि ण पेक्खामि ।

कपाली — (ध्यात्वा) आ, तस्मिन्नेव सुरापणे विस्मृतमिति तर्कयामि । भवतु, प्रतिनिवृत्य द्रक्ष्यावः ।

देवसोमा — (ग) भअवं ! अधम्मो खु एसो आदरो वणीदाए भिक्खाए अप्पडिग्गहो । किं दाणि करम्ह ।

कपाली — आपद्धर्मं प्रमाणीकृत्य गोशृङ्गेण प्रतिगृह्यताम् ।

देवसोमा — (घ) भअवं ! तह । (प्रतिगृह्णाति ।)

(उभौ परिक्रम्यावलोकयतः ।)

कपाली — कथमिहापि न दृश्यते । (विषादं रूपयित्वा) भो भो माहेश्वराः ! माहेश्वराः ! अस्मदीयं भिक्षाभाजनमिह भवद्भिः किं दृष्टम् । किमाहुर्भवन्तः — नखलु वयं

(क) भगवन् ! एषा भिक्षा । प्रतिगृह्णातु भगवान् ।

(ख) अहमपि न पश्यामि ।

(ग) भगवन् ! अधर्मः खल्वेष आदरोपनीताया भिक्षाया अप्रतिग्रहः । किमिदानीं कुर्वः ।

(घ) भगवन् ! तथा ।

पश्याम इति । हा हतोऽस्मि । भ्रष्टं मे तपः । केनाहमिदानीं कपाली भविष्यामि । भोः! कष्टम् ।

येन मम पानभोजन-
शयनेषु नितान्तमुपकृतं शुचिना ।
तस्याद्य मां वियोगः
सन्मित्रस्येव पीडयति ॥ ११ ॥

(पतितः शिरस्ताडनं रूपयित्वा) भवतु । अस्ति लक्षणमात्रम् । न मुक्तोऽस्मि कपालिसंज्ञायाः । (उत्तिष्ठति ।)

देवसोमा — (क) भअवं ! केण खु गहीदं कवालं ।

कपाली — प्रिये ! तर्कयामि शूल्यमांसगर्भत्वाच्छुना वा शाक्यभिक्षुणा वेति ।

देवसोमा — (ख) तेण हि अण्णेसगणिमित्तं सव्वं कच्छीउरं परिब्भमामो ।

कपाली — प्रिये ! तथा ।

(उभौ परिक्रामतः ।)

(ततः प्रविशति शाक्यभिक्षुः पात्रहस्तः ।)

शाक्यभिक्षुः — (ग) अहो उवासअस्स धणदाससेट्ठिणो सव्वावासमहादाणमहिमाणो, जहिं मए अभिमदव-

(क) भगवन्! केन खलु गृहीतं कपालम् ।

(ख) तेन ह्यन्वेषणनिमित्तं सर्वं कच्छीउरं परिभ्रमावः ।

(ग) अहो उपासकस्य धनदासश्रेष्ठिनः सर्वावासमहादानमहिमा, यस्मिन् मयाभिमतवर्णगन्धरसो मत्स्यमांसप्रकारबहुलोऽयं पिण्डपातः प्र-

१. 'इया ।' ख. पाठः. २. 'ध' क. पाठः.

ण्णगन्धरसो मच्छमंसप्पआरबहुळो अअं पिण्डवादो समासादिदो । जाव दाणि राअविहारं एव्व गच्छामि । (परिक्रम्य आत्मगतम्) भोः ! परमकारुणिएण भअवदा तहागएण पासादेसु वासो, सुविहि(अ)सय्येसु पज्जङ्केसु सअणं, पुव्वण्हे भोअणं, अवरण्हे सुरसाणि पाणआणि, पच्चसुग(न्धव्वो ? न्धोव)हिअं तम्बोळळं, सण्हवसणपरिधाणं ति एदेहि उवदेसेहि भिक्खुसङ्घस्स अणुग्गहं करन्तेण किण्णुहु इत्थिआपरिग्गहो सुरावाणविहाणं च ण दिट्ठं । अहव कहं सव्वञ्ञो एदं ण पेक्खदि । अवस्सं एदेहि दुट्ठबुद्धत्थविरेहि णिरुच्छाएहि अह्माणं तरुणजणाणं मच्छरेण पिडअपुत्थएसु इत्थिआसुरावाणविहाणाणि पळामिट्ठाणि त्ति तक्केमि । कहिंणुहु अविणट्ठमूळपाठं समासादएअं । तदो सम्पुण्णं बुद्धवअणं ळोए पआसअन्तो सङ्घोवआरं करिस्सं । (परिक्रामति ।)

मासादितः । यावदिदानीं राजविहारमेव गच्छामि । भोः ! परमकारुणिकेन भगवता तथागतेन प्रासादेषु वासः, सुविहितशय्येषु पर्यङ्केषु शयनं, पूर्वाह्णे भोजनम्, अपराह्णे सुरसानि पानकानि, पञ्चसुगन्धोपाहितं ताम्बूलं, श्लक्ष्णवसनपरिधानमित्येतैरुपदेशैर्भिक्षुसङ्घस्यानुग्रहं कुर्वता किन्नुखलु स्त्रीपरिग्रहः सुरापानविधानं च न दृष्टम् । अथवा कथं सर्वज्ञ एतन्न पश्यति । अदृश्यमेतैर्दुष्टबुद्धस्थविरैर्निरुत्साहैरस्माकं तरुणजनानां मत्सरेण पिटकपुस्तकेषु स्त्रीसुरापानविधानानि परामृष्टानीति तर्कयामि । कुत्रनुखल्वविनष्टमूलपाठं समासादयेयम् । ततः सम्पूर्णं बुद्धवचनं लोकं प्रकाशयन् सङ्घोपकारं करिष्यामि ।

---

१. 'वोविअ' क. पाठः । २. 'वअणा' ख. पाठः ।

देवसोमा — (क) भअवं! पेक्ख पेक्ख। एसो रत्तपडो इमस्सिं विस्सत्थपुरिससम्पादे राअमग्गे सङ्कुइदसव्वङ्गो उभयपक्खसञ्चारिददिट्ठी सङ्किदपदविक्खेवो तुरिअतुरिअं[1] गच्छइ।

कपाली — प्रिये! एवमेतत्। अपिचास्य हस्ते चीवरान्तःप्रच्छादितं किमप्यस्तीव।

देवसोमा — (ख) भअवं! तेण हि ओळम्बिअ[2] आसादिअ जाणीमो।

कपाली — भवति! तथा। (उपगम्य) भो भिक्षो! तिष्ठ।

शाक्यभिक्षुः — (ग) कोणुखु मं एवं भणादि। (निवृत्यावलोक्य) अइ अयं एअंव्ववासी दुट्ठकवाळिओ। भोदु, इमस्स सुराविब्भमस्स ळक्खं ण होमि। (सत्वरं[3] गच्छति।)

कपाली — प्रिये! हन्त लब्धं कपालम्। अस्य हि महर्शनजनितभयात् त्वरैव चौर्यसाक्षित्वं प्रतिपन्ना। (द्रुतमुपगम्याग्रतो रुणद्धि।) आः धूर्त्त! केदानीं गमिष्यसि।

(क) भगवन्! पश्य पश्य। एष रक्तपटोऽस्मिन् विश्वस्तपुरुषसम्पाते राजमार्गे सङ्कुचितसर्वाङ्ग उभयपक्षसञ्चारितदृष्टिः शङ्कितपदविक्षेपस्त्वरितत्वरितं गच्छति।

(ख) भगवन्! तेन हि अवरुम्ब्यासाद्य जानीवः।

(ग) कोनुखलु मामेवं भणति। अयि अयमेकाम्रवासी दुष्टकापालिकः। भवतु, अस्य सुराविभ्रमस्य लक्ष्यं न भवामि।

---

१. 'ओ', २. 'आवळ', ३. 'त्वरिता ग' ख. पाठः.

शाक्यभिक्षुः — (क) कवाळिआउस! मा मा एवं । किं एदं । (आत्मगतम्) अहो ललिअरूवा उवासिआ ।

कपाली — भो भिक्षो! दर्शय तावत् । यावदेतत् ते पाणौ चीवरान्तःप्रच्छादितं द्रष्टुमिच्छामि ।

शाक्यभिक्षुः — (ख) किं एत्थ पेक्खिदव्वं । भिक्खाभाअणं खु एदं ।

कपाली — अत एव द्रष्टुमिच्छामि ।

शाक्यभिक्षुः — (ग) आ, उस! मा मा एवं । पच्छण्णं खु एदं णेदव्वं ।

कपाली — नूनमेवमादिप्रच्छादननिमित्तं बहुचीवरधारणं बुद्धेनोपदिष्टम् ।

शाक्यभिक्षुः — (घ) सच्चं एदं ।

कपाली — इदं तत् संवृतसत्यम् । परमार्थसत्यं श्रोतुमिच्छामि ।

शाक्यभिक्षुः — (ङ) भोदु एत्तओ परिहासो । अदिक्कमादि भिक्खावेळा । साहेमि अहं । (प्रतिष्ठते ।)

(क) कापालिकोपासक! मा मैवम् । किमेतत् । अहो ललितरूपा उपासिका ।

(ख) किमत्र द्रष्टव्यम् । भिक्षाभाजनं खल्वेतत् ।

(ग) आ, उपासक! मा मैवम् । प्रच्छन्नं खल्वेतन्नेतव्यम् ।

(घ) सत्यमेतत् ।

(ङ) भवत्वेतावान् परिहासः । अतिक्रामति भिक्षावेला । साधयाम्यहम् ।

कपाली — आः, धूर्त्त! क्व गमिष्यसि। दीयतां मे कपालम्। (चीवरान्तमालम्बते।)

शाक्यभिक्षुः — (क) णमो बुद्धाअ।

कपाली — नमः खरपटायेति वक्तव्यं, येन चोरशास्त्रं प्रणीतम्। अथवा खरपटादप्यस्मिन्नधिकारे बुद्ध एवाधिकः। कुतः,

वेदान्तेभ्यो गृहीत्वार्थान् यो महाभारतादपि।
विप्राणां मिषतामेव कृतवान् कोशसञ्चयम्॥ १२॥

शाक्यभिक्षुः — (ख) सन्तं पापं सन्तं पापं।

कपाली — एवं सुवृत्तस्य तपस्विनः कथमिव पापं न शाम्यति।

देवसोमा — (ग) भअवं! परिस्सन्तो विअ ळक्खीअसि। ण एदं सुहोवाअसुळहं कवाळं। ता एदिणा गोसिङ्गेण सुरं पिबिअ जादबळो भविअ इमिणा सह विवादं करेहि।

कपाली — तथास्तु।

(देवसोमा कपालिने सुरां प्रयच्छति।)

कपाली — (पीत्वा) प्रिये! त्वयापि श्रमापनोदः कर्तव्यः।

देवसोमा — (घ) भअवं! तह। (पिबति।)

(क) नमो बुद्धाय।

(ख) शान्तं पापं शान्तं पापम्।

(ग) भगवन्! परिश्रान्त इव लक्ष्यसे। नैतत् सुखोपायसुलभं कपालम्। तदेतेन गोशृङ्गेण सुरां पीत्वा जातबलो भूत्वानेन सह विवादं कुरु।

(घ) भगवन्! तथा।

कपाली — अयमस्माकमपकारी । संविभागप्रधानः स्वसिद्धान्तः । शेषमाचार्याय प्रदीयताम् ।

देवसोमा — (क) जं भअवं आणवेदि । गह्णदु भअवं ।

शाक्यभिक्षुः — (आत्मगतम्) (ख) अहो सुहोवणदो अब्भुदओ । एत्तओ दोसो — महाजणो पेक्खिस्सदि । (प्रकाशम्) भोदि ! मा मा एवं । ण वड्ढदि अह्माणं । (सकर्णं लेढि ।)

देवसोमा — (ग) धंस । कुदो दे एत्तिआणि भाअधेआणि ।

कपाली — प्रिये ! इयमस्येच्छाविरोधिनी वाग् मुखप्रसेकेन स्खल(य ?)ति ।

शाक्यभिक्षुः — (घ) इदाणिं वि णत्थि दे करुणा ।

कपाली — यद्यस्ति करुणा, कथं वीतरागो भविष्यामि ।

शाक्यभिक्षुः — (ङ) एवं वीदरागिणा वीदरोसेण वि होदव्वं ।

कपाली — वीतरोषो भविष्यामि, यदि मे स्वकं दास्यति ।

(क) यद् भगवानाज्ञापयति । गृह्णातु भगवान् ।

(ख) अहो सुखोपनतोऽभ्युदयः । एतावान् दोषः — महाजनो द्रक्ष्यति । भवति ! मा मैवम् । न वर्धतेऽस्माकम् ।

(ग) ध्वंसस्व । कुतस्ते एतावन्ति भागधेयानि ।

(घ) इदानीमपि नास्ति ते करुणा ।

(ङ) एवं वीतरागिणा वीतरोषेणापि भवितव्यम् ।

---

१. 'दइ अ' क. पाठः.

शाक्यभिक्षुः — (क) किं दे सअं ।

कपाली — कपालम् ।

शाक्यभिक्षुः — (ख) कहं कवाळं ।

कपाली — कथं कपालमित्याह । अथवा युक्तमेतत् ।

दृष्टानि वस्तूनि महीसमुद्र-
महीधरादीनि महान्ति मोहात् ।
अपह्नुवानस्य सुतः कथं त्व-
मल्पं न निह्नोतुमलं कपालम् ॥ १३ ॥

देवसोमा — (ग) भअवं ! केवळं ळाळीयमाणो ण दइस्सदि । ता एदस्स हत्थादो आच्छिन्दिअ गच्छामो ।

कपाली — प्रिये ! तथा । (आच्छेत्तुं व्याप्रियते ।)

शाक्यभिक्षुः — (घ) धंस दुट्ठकवाळिअ ! । (हस्तेन नुदन् पादेन ताडयति ।)

कपाली — कथं पतितोऽस्मि ।

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC SOCIETY

(क) किं ते स्वकम् ।

(ख) कथं कपालम् ।

(ग) भगवन् ! केवलं लाल्यमानो न दास्यति । तदेतस्य हस्तादाच्छिद्य गच्छावः ।

(घ) ध्वंसस्व दुष्टकापालिक !

देवसोमा — (क) मुदो सि दासीएवुत्त !। (केशापकर्षणं रूपयित्वा निरालम्बना पतिता ।)

शाक्यभिक्षुः — (आत्मगतम्) (ख) अघं बुद्धस्स विण्णाणं, जेण मुण्डणं दिट्ठं । (प्रकाशम्) उट्ठेहि उट्ठेहि उसिए! उट्ठेहि । (इति देवसोमामुत्थापयति ।)

कपाली—पश्यन्तु पश्यन्तु माहेश्वराः अनेन दुष्टभिक्षुनामधारकेण नागसेनेन मम प्रियतमापाणिग्रहणं क्रियमाणम् ।

शाक्यभिक्षुः — (ग) आ वुस! मा मा एवं । धम्मो खु अह्माणं विसमपदिदाणुकम्पा ।

कपाली— किमयमपि सर्वज्ञधर्मः । नन्वहं पूर्वं पतितोऽस्मि । भवतु, किमनेन । इदानीं तव शिरःकपालं मम भिक्षाकपालं भविष्यति ।

(सर्वे कलहं रूपयन्ति ।)

शाक्यभिक्षुः — (घ) दुक्खं दुक्खं ।

कपाली — पश्यन्तु पश्यन्तु माहेश्वराः । एष दुष्टभिक्षुनामधारको मम भिक्षाकपालं मुषित्वा स्वयमेवाक्रन्दति । भवतु, अहमप्याक्रोशयिष्ये । अब्रह्मण्यम् अब्रह्मण्यम् ।

(क) मृतोऽसि दास्याःपुत्र ! ।

(ख) अर्हं (अर्घं वा) बुद्धस्य विज्ञानं, येन मुण्डनं दृष्टम् । उत्तिष्ठोत्तिष्ठ उपासिके उत्तिष्ठ ।

(ग) आ उपासक ! (आयुष्मन् ! वा) मा मैवम् । धर्मः खल्वस्माकं विषम पतितानुकम्पा ।

(घ) दुःखं दुःखम् ।

---

१. 'किदं ।' क. पाठः.

(ततः प्रविशति पाशुपतः ।)

पाशुपतः — सत्यसोम ! किमर्थमाक्रन्दसि ।

कपाली — भो बभ्रुकल्प ! अयं दुष्टभिक्षुनामधारको नागसेनो मम भिक्षाकपालं चोरयित्वा दातुं नेच्छति ।

पाशुपतः — (आत्मगतम्) यदस्माभिरनुष्ठेयं, गन्धर्वैः तदनुष्ठितम् । एष दुरात्मा,

तां क्षौरिकस्य दासीं मम दयितां चीवरान्तदर्शितया ।
आकर्षति काकण्या बहुशो गां ग्रासमुष्टयेव ॥ १४ ॥

तदिदानीं प्रतिहस्तिप्रोत्साहनेन शत्रुपक्षं ध्वंसयामि । (प्रकाशम्) भो नागसेन ! अप्येवमेतद्, यथायमाह ।

शाक्यभिक्षुः — (क) भअवं ! तुवं पि एवं भणासि । अदिण्णादाणा वेरमणं सिक्खापदं । मुधावादा वेरमणं सिक्खापदं । अब्बम्हचय्या[1] वेरमणं सिक्खापदं । पाणादिपादा वेरमणं सिक्खापदं[2] । अकाळभोअणा वेरमणं सिक्खापदं । अह्मा-अं बुद्धधम्मं सरणं गच्छामि ।

पाशुपतः — सत्यसोम ! ईदृश एषां समयः । किमत्र प्रतिवचनम् ।

(क) भगवन् ! त्वमप्येवं भणसि । अदत्तादानाद्विरमणं शिक्षापदम् । मृषावादाद्विरमणं शिक्षापदम् । अब्रह्मचर्याद्विरमणं शिक्षापदम् । प्राणातिपाताद्विरमणं शिक्षापदम् । अकालभोजनाद्विरमणं शिक्षापदम् । अस्माकं बुद्धधर्मं शरणं गच्छामि ।

---

१. 'म्हञ्च', २. 'दं । भोअणकाळत्थेरावे' क. पाठः ।

कपाली — नन्वस्माकमनृतं न वक्तव्यमिति समयः ।

पाशुपतः — उभयमप्युपपन्नम् । कोऽत्र निर्णयोपायः ।

शाक्यभिक्षुः — (क) बुद्धवअणं पमाणीकरअन्तो भिक्खू सुराभाअणं गण्हादि त्ति को एत्थ हेदू ।

पाशुपतः — नहि प्रतिज्ञामात्रेण हेतुवादिनः सिद्धिरस्ति ।

कपाली — प्रत्यक्षे हेतुवचनं निरर्थकम् ।

पाशुपतः — कथं प्रत्यक्षमेव ।

देवसोमा — (ख) भअव ! एदस्स हत्थे चीवरान्तप्पच्छादिदं कवाळं ।

पाशुपतः — श्रुतं भवता ।

शाक्यभिक्षुः — (ग) भो भअवं ! एदं कवाळं ण परकेरअं ।

कपाली — तेन हि दर्शय तावत् ।

शाक्यभिक्षुः — (घ) तह । (दर्शयति ।)

कपाली — पश्यन्तु पश्यन्तु माहेश्वराः कापालिकेन[1] कृतमन्याय्यमस्य भदन्तस्य साधुवृत्ततां च ।

(क) बुद्धवचनं प्रमाणीकुर्वन् भिक्षुः सुराभाजनं गृह्णातीति कोऽत्र हेतुः ।

(ख) भगवन् ! एतस्य हस्ते चीवरान्तःप्रच्छादितं कपालम् ।

(ग) भो भगवन् ! एतत् कपालं न परकीयम् ।

(घ) तथा ।

---

१. 'कपालिने कृ' क. पाठः.

शाक्यभिक्षुः— (क) अदिण्णादाणा वेरमणं सिक्खापदं *(इति पुनस्तदेव पठति ।)

(उभौ नृत्यतः ।)

शाक्यभिक्षुः— (ख) हद्धि । ळज्जिदव्वे काळे णच्चदि ।

कपाली— आः को नृत्यति । (सर्वतो विलोक्य) आ मम नष्टभिक्षाभाजनदर्शनकुतूहलमलयानिलप्रयुक्ताया ध्रुवमस्य नृत्तबुद्धिः प्रीतिलताया विलसितेषु ।

शाक्यभिक्षुः— (ग) भअवं ! केण कारणेण एदं ण ळक्खीअदि । भो ! आचिक्खदु भअवं । इमस्स अअं वण्णो ।

कपाली— किमत्र वक्तव्यम् । ननु मया दृष्टम् । काकादपि कृष्णमिदं कपालम् ।

शाक्यभिक्षुः— (घ) तेण हि एदं ममकेरअं ति सअं एव अब्भुवगदं ।

कपाली— सत्यमभ्युपगतं तव वर्णान्तरकरणे नैपुण्यम् । पश्य,

(क) अदत्तादानाद्विरमणं मुनिशिक्षापदम् ।

(ख) हा धिक् । लज्जितव्ये काले नृत्यति ।

(ग) भगवन् ! केन कारणेनैतन्न लक्ष्यते । भोः ! आचष्टां भगवान् । अस्यायं वर्णः ।

(घ) तेन ह्येतन्मदीयमिति स्वयमेवाभ्युपगतम् ।

---

१. 'भवं' ख. पाठः.

---

* पूर्वोक्तं सर्वं पुनर्लिखितं क. ग्रन्थे, पुनरित्यादि न लिखितं च ।

यदेतदासीत् प्रथमं स्वभावतो
मृणालभङ्गच्छविचोरमम्बरम् ।
ननु त्वया नीतमचिन्त्यकर्मणा
तदेव बालारुणरागताम्रताम् ॥ १५॥

अपिच,

आवृतं बहिरन्तश्च कषायेणानपायिना ।
त्वां प्राप्तं स्यात् कथं नाम कपालमकषायितम्॥ १६॥

देवसोमा — (क) हा हदह्मि मन्दभाआ । सव्वळक्खणसम्पण्णदाए कमळासणसीसकवाळाणुभावस्स पुण्णमासिसोमदंसणस्स णिच्चसुरागन्धिणो एदस्स मळिणपडसंसग्गेण इअ ईदिसी अवत्था संवुत्ता । (इति रोदिति ।)

कपाली — प्रिये! अलमलं सन्तापेन । पुनः शुचिर्भविष्यति । श्रूयन्ते हि महान्ति भूतानि प्रायश्चित्तैरपनीतकल्मषाणि भवन्ति । तथाहि —

आस्थाय प्रयतो महाव्रतमिदं बालेन्दुचूडामणिः
स्वामी नो मुमुचे पितामहशिरश्छेदोद्भवादेनसः ।
नाथोऽपि त्रिदिवौकसां त्रिशिरसं त्वष्टुस्तनूजं पुरा
हत्वा यज्ञशतेन शान्तदुरितो भेजे पुनः पुण्यताम्॥ १७ ॥

भो बभ्रुकल्प! नन्वेवमेतत् ।

(क) हा हतास्मि मन्दभागा। सर्वलक्षणसम्पन्नतया कमलासनशीर्षकपालानुभावस्य पौर्णमासीसोमदर्शनस्य नित्यसुरागन्धिन एतस्य मलिनपटसंसर्गेणेयमीदृश्यवस्था संवृत्ता ।

पाशुपतः — आगमानुगतमभिहितम् ।

शाक्यभिक्षुः — (क) भो ! वण्णो दाव मए किदो । इमस्स सण्ठाणपरिमाणं केण णिम्मिदं ।

कपाली — ननु मायासन्तानसम्भवाः खलु भवन्तः ।

शाक्यभिक्षुः — (ख) केत्तिअं वेळं भवन्तं अक्कोसामि । गण्हदु भअवं ।

कपाली — नूनमेवं बुद्धेनापि दानपारमिता पूरिता ।

शाक्यभिक्षुः — (ग) एवं गदे किं दाणिं मे सरणं ।

कपाली — ननु बुद्धधर्मसङ्घाः ।

पाशुपतः — नायं व्यवहारो मया परिच्छेत्तुं शक्यते । तदधिकरणमेव यास्यामः ।

देवसोमा — (घ) भअवं ! जइ एवं, णमो कवाळस्स ।

पाशुपतः — कोऽभिप्रायः ।

देवसोमा — (ङ) एसो उण अणेअविहारभोअसमधिगदवित्तसञ्चओ जहाकामं अधिकरणकारुणिआणं मुहाणि

(क) भोः ! वर्णस्तावन्मया कृतः । अस्य संस्थानपरिमाणं केन निर्मितम् ।

(ख) कियतीं वेलां भवन्तमाक्रोशामि । गृह्णातु भगवान् ।

(ग) एवं गते किमिदानीं मे शरणम् ।

(घ) भगवन् ! यद्येवं, नमः कपालाय ।

(ङ) एष पुनरनेकविहारभोगसमधिगतवित्तसञ्चयो यथाकाममधिकरणकारुणिकानां मुखानि पूरयितुं पारयति । अस्माकं पुनरहिचर्मभूतिमात्रविभ-

पूरेदुं पारेदि। अह्माअं पुण अहिचम्मभूदिमत्तविभवस्स दरिद्दकवालिअस्स परिआरिआणं को एत्थ विभवो अधिकरणं पविसिदुं।

पाशुपतः — नैतदेवम्।

अजिह्मैः सारगुरुभिः स्थिरैः श्लक्ष्णैः सुजन्मभिः।
तैर्धर्मो धार्यते स्तम्भैः प्रासाद इव साधुभिः ॥१८॥

कपाली — कृतमनेन। कुतश्चिदपि न्याय्यैवृत्तेर्भयं नास्ति।

शाक्यभिक्षुः — (क) भो भअवं! तुमं दाव अग्गदो हो(दु? हि)।

पाशुपतः — बाढेम्[२]।

(सर्वे परिक्रामन्ति।)

(ततः प्रविशत्युन्मत्तकः।)

उन्मत्तकः — (ख) एशे एशे दुट्ठकुक्कुळे। शुळळमंशगब्भं कवाळं गण्हिअ धावशि। दाशीएपुत्त! कहिं गमिश्शशि। एशे दाणिं कवाळं णिक्खिविअ मं खायिदुकामो अहिमुहं आहावइ। (दिशो विलोक्य।) इमिणा पत्थळेण दन्ताणि शे भंजिश्शं। कहं कवाळं उज्झिअ पळाआशि। उम्मत्ते दुट्ठकु-

---

वस्य दरिद्रकापालिकस्य परिचारिकाणां कोऽत्र विभवोऽधिकरणं प्रवेष्टुम्।

(क) भो भगवन्! त्वं तावदग्रतो भव।

(ख) एष एष दुष्टकुक्कुरः। शूल्यमांसगर्भं कपालं गृहीत्वा धावसि। दास्याः-पुत्र! कुत्र गमिष्यसि। एष इदानीं कपालं निक्षिप्य मां खादितुकामोऽभिमुखमाधावति। अनेन प्रस्तरेण दन्तानस्य भङ्क्ष्यामि। कथं कपालमुज्झित्वा पला-

---

१. 'य', २. 'ढम्। प्रथमः कल्पः।' ख पाठः।

क्कुळे ईदिशेण णाम शूळत्तणेण मए शह वि ळोशं कळेशि। गामशूगळं आळुहिअ गगणमुप्पदिदेण शागळेण पडिभञ्जिअ ळावणं बळा गहीदे शक्कशुदे तिमिङ्गळे। अइ एळण्डळुक्ख! किं भणाशि — अळिअं अळिअं त्ति। णं एशे मुशळशमविशाळळम्बहत्थे दद्दळे मे शक्खी। अहव तेळ्ळोक्कविदिअपळक्कमश्श शक्खिणा किं कय्यं। एवं कळिश्शं। कुक्किळखादिअशेशं मंशखण्डं खादिश्शं। (खादन् भ्रान्तः।) हा हा माळिदो म्हि बप्फेण माळिदो म्हि। (रुदित्वा विलोक्य) के एशे मं ताळेशि। (विलोक्य) दुट्ठदाळआ! जश्श वा कश्श वा भाउणेओ खु अहं, भीमशेणश्श घटुक्कओ विअ। अविअ शुणाथ,

गहीदशूळा बहुवेशधाळिणो
शदं पिशाआ उदळे वहन्ति मे।
शदं च वग्घाण णिशग्गभीशणं
मुहेण मुञ्चामि अहं महोळए॥ १९॥

यसे। उन्मत्तो दुष्टकुक्कुर ईदृशेन नाम शूरत्वेन मया सहापि रोषं करोषि। ग्रामसूकरमारुह्य गगनमुत्पतितेन सागरेण प्रभञ्ज्य रावणं बलाद् गृहीतः शक्रसुतस्तिमिङ्गिलः। अयि एरण्डवृक्ष! किं भणसि — अलीकमलीकमिति। नन्वेष मुसलसमविशाललम्बहस्तो दर्दुरो मे साक्षी। अथवा त्रैलोक्यविदितपराक्रमस्य साक्षिणा किं कार्यम्। एवं करिष्यामि। कुक्कुरखादितशेषं मांसखण्डं खादिष्यामि। हा हा मारितोऽस्मि बाष्पेण मारितोऽस्मि। क एष मां ताडयसि। दुष्टदारकाः! यस्य वा कस्य वा भागिनेयः खल्वहं, भीमसेनस्य घटोत्कच इव। अपिच शृणुथ,

गृहीतशूला बहुवेषधारिणः
शतं पिशाचा उदरे वहन्ति मे।
शतं च व्याघ्राणां निसर्गभीषणं
मुखेन मुञ्चाम्यहं महोरगान्॥ १९॥

कहं मं बाहन्ति । पशीदन्तु पशीदन्तु दाळअभट्टा । इमश्श मंशखण्डश्श काळणादो मा मं बाहेह । (अग्रतो विलोक्य) एशे खु अम्हाणं आआळिए शूळनन्दी । जाव णं उवशप्पामि । (इति धावति ।)

पाशुपतः — अये ! अयमुन्मत्तकः इत एवाभिवर्तते । य एषः,

निर्विष्टोज्झितचित्रचीवरधरो रूक्षैर्नितान्ताकुलैः
केशैरुद्धतभस्मपांसुनिचयैर्निर्माल्यमालाकुलैः ।
उच्छिष्टाशनलोलुपैर्बलिभुजामन्वास्यमानो गणै-
र्भूयान् ग्रामकसारसञ्चय इव भ्राम्यन् मनुष्याकृतिः ॥

उन्मत्तकः — (क) जाव णं उवशप्पामि । (उपसृत्य) महाशाहुणो चण्डाळकुक्कुळश्श शआशादो अहिअदं एदं कवाळं पडिगण्हदु भअवं ।

पाशुपतः — (सदृष्टिक्षेपम्) पात्रे प्रतिपाद्यताम् ।

उन्मत्तकः — (ख) महाबम्हण ! कळिअदु पशादो ।

शाक्यभिक्षुः — (ग) एसो महापासुवदो एदस्स जोग्गो ।

कथं मां बाधन्ते । प्रसीदन्तु प्रसीदन्तु दारकभर्तारः । अस्य मांसखण्डस्य कारणाद् मा मां बाधध्वम् । एष खल्वस्माकमाचार्यः शूरनन्दी । यावदेनमुपसर्पामि ।

(क) यावदेनमुपसर्पामि । महासाधोश्चण्डालकुक्कुरस्य सकाशादधिगतमेतत् कपालं प्रतिगृह्णातु भगवान् ।

(ख) महाब्राह्मण ! क्रियतां प्रसादः ।

(ग) एष महापाशुपत एतस्य योग्यः ।

उन्मत्तकः — (कपालिनमुपगम्य कपालं भूमौ निक्षिप्य प्रदक्षिणीकृत्य पादयोः पतित्वा) (क) महादेव! कळीअदु पशादो । एशो दे अञ्जळी ।

कपाली — अस्मदीयं कपालम् ।

देवसोमा — (ख) एवं एदं ।

कपाली — भगवत्प्रसादात् पुनरपि कपाली संवृत्तः । (ग्रहीतुमिच्छति ।)

उन्मत्तकः — (ग) दाशीएपुत्त! विशं खादेहि । (कपालमाच्छिद्य गच्छति ।)

कपाली — (अनुसृत्य) एष यमपुरुषो मे जीवितं हरति । अभ्यवपद्येतां भवन्तौ ।

उभौ — (घ) होदु । अम्हे दे सहाआ होम ।

(सर्वे रुन्धन्ति ।)

कपाली — भोः! तिष्ठ तिष्ठ ।

उन्मत्तकः — (ङ) किश्श मं ळुन्धन्ति ।

कपाली — अस्मदीयं कपालं दत्त्वा गम्यताम् ।

उन्मत्तकः — (च) मूढ! किं ण पेक्खशि, शुवण्णभाअणं खु एदं ।

(क) महादेव! क्रियतां प्रसादः । एष तेऽञ्जलिः ।

(ख) एवमेतत् ।

(ग) दास्याःपुत्र! विषं खाद ।

(घ) भवतु । आवां ते सहायौ भवावः ।

(ङ) कस्मान्मां रुन्धन्ति ।

(च) मूढ! किं न पश्यसि, सुवर्णभाजनं खल्वेतत् ।

कपाली — एवंविधं सुवर्णभाजनं केन कृतम् ।

उन्मत्तकः — (क) एदिणा शुवण्णवण्णपडावुदेण शुवण्णकारावुत्तएण किदं त्ति भवअं ! शुवण्णभाअणं त्ति भणामि ।

शाक्यभिक्षुः — (ख) किं भणासि ।

उन्मत्तकः — (ग) शुवण्णभाअणं त्ति ।

शाक्यभिक्षुः — (घ) किमअं उम्मत्तओ ।

उन्मत्तकः — (ङ) उम्मत्तओ त्ति बहुशो एदं शद्दं शुणोमि । एदं गण्हिअ दळिशेहि उम्मत्तअं । (कपालिने कपालं प्रयच्छति ।)

कपाली — (कपालं गृहीत्वा) अयमिदानीं कुड्येनान्तर्हितः । शीघ्रमनुगम्यताम् ।

उन्मत्तकः — (च) ळद्धप्पशादे ह्मि ।

(निष्क्रान्तो जवेनोन्मत्तकः ।)

शाक्यभिक्षुः — (छ) अहो अच्छरिअं । परवक्खस्स ळाभेण अहं परितुट्ठो ह्मि ।

(क) एतेन सुवर्णवर्णपटावृतेन सुवर्णकारावुत्तेन कृतमिति भगवन्! सुवर्णभाजनमिति भणामि ।

(ख) किं भणसि ।

(ग) सुवर्णभाजनमिति ।

(घ) किमयमुन्मत्तकः ।

(ङ) उन्मत्तक इति बहुश एतं शब्दं शृणोमि । एतद् गृहीत्वा दर्शयोन्मत्तकम् ।

(च) लब्धप्रसादोऽस्मि ।

(छ) अहो आश्चर्यम् । परपक्षस्य लाभेनाहं परितुष्टोऽस्मि ।

कपाली — (कपालं परिष्वज्य)

चिरं मया चरितमखण्डितं तपो
महेश्वरे भगवति भक्तिरस्ति मे ।
तिरोहितः स तु सहसा सुखेन न-
स्त्वमद्य यत् कुशलि कपाल ! दृश्यसे ॥ २१ ॥

देवसोमा — (क) भअवं ! चन्दसमागदं विअ पओसं भअवन्तं पेक्खन्तीए अज्ज आणन्ददी विअ मे दिट्ठी ।

पाशुपतः — दिष्ट्या भवान् वर्धते ।

कपाली — नन्वभ्युदयो भवतामेव ।

पाशुपतः — (आत्मगतम्) सत्यमेतत् — नास्त्यदोषवतां भयमिति, यदयमद्य भिक्षुर्व्याघ्रमुखात् परिभ्रष्टः । (प्रकाशम्) यावदहमिदानीमेव सुहृदभ्युदयकृतमानन्दं पुरोधाय भगवतः पूर्वस्थलीनिवासिनो[1] धूमवेलां प्रतिपालयामि । अयं चाद्यप्रभृति,

विरोधः पूर्वसम्बद्धो युवयोरस्तु शाश्वतः ।
परस्परप्रीतिकरः किरातार्जुनयोरिव ॥ २२ ॥

(निष्क्रान्तः पाशुपतः ।)

कपाली — भो नागसेन ! यन्मयापराधः कृतः, तत् प्रसन्नहृदयं त्वामिच्छामि ।

(क) भगवन्! चन्द्रसमागतमिव प्रदोषं भगवन्तं पश्यन्त्या अद्यानन्दतीव मे दृष्टिः ।

---

१. 'र्वं' क. पाठः,

शाक्यभिक्षुः — (क) किं एदं पि अब्भत्थणीअं । किं दे पिअं करेमि ।

कपाली — यदि मे भगवान् प्रसन्नः, किमतः परमहमिच्छामि ।

शाक्यभिक्षुः — (ख) गच्छामि दाव अहं ।

कपाली — गच्छतु भवान् पुनर्दर्शनाय ।

शाक्यभिक्षुः — (ग) तह होदु । (निष्क्रान्तः ।)

कपाली — प्रिये देवसोमे ! गच्छावस्तावत् ।

(भरतवाक्यम्)

शश्वद् भूत्यै प्रजानां वहतु विधिहुतामाहुतिं जातवेदा
वेदान् विप्रा भजन्तां सुरभिदुहितरो भूरिदोहा भवन्तु ।
उद्युक्तः स्वेषु धर्मेष्वयमपि विगतव्यापदाचन्द्रतारं
राजन्वानस्तु शक्तिप्रशमितरिपुणा शत्रुमल्लेन लोकः ॥ २३ ॥

(निष्क्रान्तौ ।)

मत्तविलासप्रहसनं समाप्तम् ।

शुभं भूयात् ।

(क) किमेतदप्यभ्यर्थनीयम् । किं ते प्रियं करोमि ।

(ख) गच्छामि तावदहम् ।

(ग) तथा भवतु ।

श्लोकानुक्रमणी

श्लोकः.	पृष्ठम्.	श्लोकः.	पृष्ठम्.
अजिह्मैः सार	२४	दृष्टानि वस्तूनि	१७
अनतिशय	८	निर्विष्टोज्झित	२६
आकरे सूक्ति	४	पेया सुरा प्रि	७
आवृतं बहि	२२	प्रज्ञादानद	३
आस्थाय प्र	,,	भाषावेषव	१
उद्भिन्नरोमा	२	मिथ्यात्रिलो	९
उद्भिन्नश्रम	५	यदेतदासीत्	२२
कार्यस्य निस्सं	७	येन मम पान	११
गहीदशूळा	२५	विरोधः पूर्व	२९
चिरं मया च	२९	वेदान्तेभ्यो	१५
तां क्षौरिकस्य	१९	शश्वद्भूत्यै	१०

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	Rs.	As.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I, 1 & 2 Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1 & 2 Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II, 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III, 4th, 5th & 6th Kândas)	1	0	0

	RS.	AS.	P
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III, 6th, 7th & 8th Sargas)	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pada	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and Tîkasarvaswa of Vandyaghatiya-Sarvananda (Part II, 2nd Kanda 1-6 Vargas)	2	8	

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvati. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpala.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part III, 2nd Kanda 7 –10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part IV, 3rd Kanda)	1	8	0
o. 53—शाब्दनिर्णयः (Vedanta) by Prakasatmayatîndra.	0	12	0
). 54—स्फोटसिद्धिन्यायविचारः (Vyakarana)	0	4	0
). 55—मत्तविलासप्रहसनम् (Nataka) by Sri Mahendravikramavarman	0	8	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

TRIVANDRUM SANSKRIT SERIES.
No. XLIX.

9

श्रीपरमेश्वरप्रणीता

गोलदीपिका ।

THE

GOLADÎPIKÂ

BY

SRÎ PARAMESWARA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

Dx - h - 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1916.

(*All Rights Reserved*).

59c.1
121658

58/XBru

TRIVANDRUM SANSKRIT SERIES.

No. XLIX.

THE

GOLADÎPIKÂ

BY

SRÎ PARAMESWARA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

DX.m 5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1916.

(*All Rights Reserved*).

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४९.

गोलदीपिका

श्रीपरमेश्वरप्रणीता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधिता ।

सा च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशिता ।

कोलम्बाब्दाः १०९२, क्रैस्ताब्दाः १९१६.

PREFACE.

The edition of the Goladîpikâ is based on three palm-leaf manuscripts in Malayalam characters obtained from the Raja of Idappalli. The manuscript marked क. in the foot-notes, contains fewer mistakes than the other two manuscripts. Though the work has neither commentary nor illustrations, it is published in the hope that it might be of some use to students of Hindu Astronomy.

The author of this work is Parameśvara. He says in the 69th Śloka of this work that he has written a commentary called Siddhântadîpikâ on the Mahâbhâskarîya Bhâshya. In his Bhâshya on Âryabhatîya, Nîlakaṇṭha observes "अश्वत्थग्रामजो भार्गवः परमेश्वरः सिद्धान्तदीपिकायां ..... प्राह" । *i. e.*, "Parameśvara of the Bhârgava Gotra, born in the Aśvatthagrâma, says in his Siddhântadîpikâ". This Aśvatthagrâma is the same as the present "Âlattur" in the Kerala country. Again the words अत्र निलातटे in the line 'गोकर्णे ग्रहणं भानोर्नात्र दृष्टं निलातटे" । quoted by Nîlakaṇṭha as taken from the Siddhantadîpikâ of Parameśvara, make it evident that Parameśvara must have also been an inhabitant of some place on the banks of the river Nilâ. Nîlakaṇṭha observes in another place in his Bhâshya that Parameśvara has written a work called दृग्गणित from which he (Nîlakaṇṭha) quotes the following verse,

एवं दृग्गणितं शाके त्रीषुविश्वमिते कृतम् ।
परमादीश्वरेणैतत् प्रायो भवति दृक्समम् ॥

It is clear from this verse that the Drigganita was written in Śaka 1353 and that the author must have lived about 1430 A.C.

A commentary called Bhatadîpikâ written by Parameśvara on Âryabhatîya has been published in Leiden. The author is also known to have written commentaries on the Lîlâvatî, the Laghumânasa and the Laghubhâskarîya.

Trivandrum,
11th August 1916. } T. GANAPATI ŚÂSTRÎ

निवेदना ।

केरलीयलिपयस्तालपत्रात्मका **इटप्पल्लिराजदत्तात्रय** आदर्शग्रन्था अस्या **गोलदीपिकाया** मुद्रणाधाराः । तत्र क. संज्ञ इतरावपेक्ष्य शुद्धः । व्याख्यानादिविकलापीयं गोलव्युत्पित्सूनां कमप्युपकारमादधीतेति सम्प्रति यथामातृकं शोधयित्वा प्रकाशिता ।

अस्याः प्रणेता **परमेश्वरः** । एष इहैव ऊनसप्ततितमे श्लोके **महाभास्करीय**भाष्यव्याख्यां **सिद्धान्तदीपिकां** नाम स्वेन प्रणीतामाह । आर्यभटीयभाष्ये गोलपादान्ते **परमेश्वर**पुत्रदामोदरशिष्यो **नीलकण्ठ** आह— "अश्वत्थग्रामजो भार्गवः परमेश्वरः सिद्धान्तदीपिकायां ..... प्राह" इति । तत्र **अश्वत्थग्राम** इति **आलत्तूरग्राम** उच्यते । स च केरलीयः प्रसिद्धः । **नीलकण्ठेन सिद्धान्तदीपिकाया** उद्धृत्योदाहृते

"गोकर्णे ग्रहणं भानोर्नात्र दृष्टं निलातटे"

इति **परमेश्वरीय**श्लोके 'अत्र **निलातटे**' इति **निलातट**सन्निकृष्टत्वोक्त्या **परमेश्वरो निलानदीतट**वासीत्यपि प्रतीयते । अपि च **आर्यभटीयभाष्ये नीलकण्ठः परमेश्वरेण** दृग्गणितं कृतमित्युक्त्वा

"एवं दृग्गणितं शाके त्रीषुविश्वमिते कृतम् ।
परमादीश्वरेणैतत् प्रायो भवति दृक्समम् ॥"

इति दृग्गणितग्रन्थान्तस्थं श्लोकमुदाहृतवान् । तत्र 'त्रीषुविश्वमिते शाके' इति कालनिर्देशात् १३५३तमे शालिवाहनशकाब्दे अस्मद्ग्रन्थकार**परमेश्वरस्य** स्थितिरासीदिति स्पष्टमेव ।

परमेश्वरेण प्रणीता **भटदीपिका** नामार्यभटीयव्याख्या लीडन्नगरे मुद्रितास्ति । लीलावती-लघुमानस-लघुभास्करीयाणामपि व्याख्यानानि अनेन निर्मितानि ।

अनन्तशयनम्
११-८-१९१६

त. गणपतिशास्त्री.

॥ श्रीः ॥

श्रीपरमेश्वरप्रणीता

गोलदीपिका ।

विघ्नेशं वाग्देवीं गुरून् दिनेशादिकान् ग्रहान् नत्वा ।
वक्ष्ये भगोलमस्मै क्षोणीमानादिकं च लघुमतये ॥ १ ॥
अधऊर्ध्वयाम्यसौम्यगमिह वृत्तं दक्षिणोत्तराख्यं स्यात् ।
अधऊर्ध्वाभ्यां घाटिकमक्षाग्रे याम्यसौम्ययोर्लग्नम् ॥ २ ॥
तस्याप्यधऊर्ध्वाभ्यां तद्वत् परमापमेऽपमं लग्नम् ।
घाटिकमध्ये तिर्यग्ग्रहनावृत्तस्य वृत्तमपरं स्यात् ॥ ३ ॥
एतद् विषुवत्सज्ञं घाटिकमपि दक्षिणोत्तरं च तथा ।
अपमण्डलाख्यवृत्ते पूर्वाभिमुखो रविः सदा चरति ॥ ४ ॥
घाटिकमध्यगविषुवद्याम्योत्तरवृत्तयोर्मिथोयोगात् ।
स्वस्तिकयुग्मं यत् स्यात् तत्प्रोतो गोलमध्यगतदण्डः ॥
समवृत्तामपि भूमिं भगोलदण्डस्य मध्यगां कुर्यात् ।
काष्ठेन वा मृदा वा प्राणिनिवासादि कल्पयेत् तस्याम् ॥
प्रवहमरुत्प्रक्षिप्तो भगोल उर्वीं प्रदक्षिणीकृत्य ।
अपराभिमुखं षष्ट्या घटिकाभिर्भ्रमति भूयोऽपि ॥ ७ ॥

---

१. 'मपमण्डलं ल' ग. पाठः. २. 'तं भगोलमु' क. पाठः.

भूपृष्ठादुपरि मरुद् रवियोजनसंमितान्तरे प्रवहः ।
नियतगतिरपरगः स्याद् भूवायुरधश्च तस्य भिन्नगतिः ॥

घाटिकषष्ट्यंशस्य भ्रमणे कालोऽत्र नाडिकेत्युदिता ।
न तु दिवसषष्टिभागो गोलभ्रमणाद् यतोऽधिको दिवसः॥

घाटिकमण्डलपार्श्वे घाटिकवृत्तानुसारि यद् वृत्तम् ।
सूर्यस्य भ्रमणस्थं स्वाहोरात्रार्धवृत्तमुदितं तत् ॥ १० ॥

तानि बहूनि भवन्ति च दिवसे दिवसे यतोऽर्कगतिभेदः।
नक्षत्रगोलैएष हि बाह्येऽस्य च निश्चलैः खगोलैः स्यात्॥

पूर्वापराधऊर्ध्वगमुदितं सममण्डलं खगोलस्थम् ।
याम्योत्तराधऊर्ध्वगमपि तस्मिन् दक्षिणोत्तराख्यं स्यात्॥

पूर्वापरयाम्योदग्गतामिह भूपार्श्वसंस्थितं क्षितिजम् ।
तस्मिन्नुदयास्तमयौ सर्वेषां हि ग्रहाणां स्तः ॥ १३ ॥

याम्येऽधश्चोर्ध्वमुदक् क्षितिजादक्षांशकान्तरे लग्नम् ।
प्रागपरयोश्च लग्नं विद्यादुन्मण्डलं खगोलस्थम् ॥ १४ ॥

उन्मण्डलयाम्योदक्स्वस्तिकयातश्च गोलदण्डोऽयम् ।
उन्मण्डलोर्ध्वभागे भ्रमणं गोलस्य खाग्निनाडीभिः ॥

उन्मण्डलादधःस्थं सौम्ये याम्ये तदूर्ध्वगं क्षितिजम् ।
तस्मात् सौम्यगतेऽर्के दिनमधिकं याम्यगे निशाप्यधिका॥

---

१. 'घाटिकाम' क. ख. पाठः, २. 'लमेतद् बा', ३., ४. 'लं' क. पाठः, ५. 'मस्मिन्नपि द', ६. 'स्तु' ग. पाठः.

कृत्वा वा प्रागपरं घाटिकमन्यच्च तद्वशात् कृत्वा ।
उन्मण्डलयाम्योदक्स्वस्तिकनिष्प्रोतदण्डकं कुर्यात् ॥
अचलानि भानि तेषामधः क्रमान्मन्दजीवकुजदिनपाः ।
भृगुबुधशशिनश्चैते प्राग्गतयो गोलवेगतोऽपरगाः ॥१८॥
योजनसंख्यां तुल्या तेषां दिवसे गतौ कला भिन्नाः ।
कक्ष्या महत्युपरिगा यस्माल्लिप्ताः समाश्च सर्वासु ॥ १९ ॥
मन्दगतिरिन्दुरार्किः शीघ्रगतिस्तारकास्तु शीघ्रतराः ।
गच्छन्त्यपराभिमुखं सर्वेऽप्येवं वदन्ति किल केचित् ॥
एतन्न युक्तमिति हि ब्रुवन्ति गोले कृतश्रमा गणकाः ।
वक्रगविहगस्य यतः स्वपश्चिमाशागतर्क्षसंयोगः ॥ २१ ॥
मण्डलमर्कादीनां गोलाकारं स्मृतं गणकवर्यैः ।
तैजसमर्कस्य तु तच्चन्द्रस्याप्यं स्वतः प्रकाशोनम् ॥ २२ ॥
दर्पणवृत्ताकारं मण्डलमिच्छन्ति ये तु ते मुग्धाः ।
शौक्ल्यस्य क्रमवृद्धिर्घटते यस्माद् विधोर्न तत्पक्षे ॥ २३ ॥
सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो नैशम् ।
क्षपयन्ति दर्पणगता मन्दिरगमिवेति चार्यजनवाक्यम् ॥
गोलाकारा पृथिवी खे तिष्ठति सर्वदा स्वशक्त्यैव ।
स्थलबहुलमूर्ध्वगार्धं जलबहुलमधोऽर्धयोऽत्र च द्वीपाः ॥

---

१. 'ख्या तेषां दिवसे तुल्या ग' क. पाठः,

भूमिरनन्तेन धृतेत्येकेऽन्ये दिग्गजैरिति ब्रुवते ।
आधारस्य च कल्प्योऽत्राधारोऽतोऽनवस्थितिस्तेषाम् ॥

पूर्वाभिमुखं भ्रमति क्षोणी नास्ति भ्रमः खगर्क्षाणाम् ।
इति किल वदन्ति केचिन्नाभिमतं तदपि चार्यभ*टबुधस्य॥

अधउपरिपार्श्वभागेष्वस्या नियतं वसन्ति वसुधायाः।
दितिसुतदेवनराद्याः प्राणिविशेषास्तथा सरिदगाद्याः ॥

भूमध्यगतं चक्रं सर्वेषां प्राणिनामधःस्थानम् ।
भूपृष्ठे सर्वत्र प्राणिजलादेः स्थितिस्ततो घटते ॥ २९ ॥

योजनसङ्ख्या गदिता भूवृत्तस्याङ्करन्ध्रयमलगुणाः ।
आर्यभटेन तथोक्तं योजनमात्रो भवेच्च मेरुरिति ॥

भूमेर्योजनमानं बहुकोटिमितं वदन्ति सुधियोऽन्ये ।
नैतद् गणकाभिमतं यतोऽन्यथा मानसिद्धिरक्षवशात् ॥

समयाम्योदग्देशद्वयपलभागान्तरोद्धृता तु तयोः ।
विवरगभूमिश्चक्रांशताडिता स्याद् भुवः परिधिमानम् ॥

योजनमितपलसङ्ख्या भूपृष्ठे चेदनेकलक्षमिता ।
भूगोलान्तर्योजनपलसङ्ख्या चेदनेककोटिमिता ॥ ३३॥

प्राणिनिवासो ह्यन्तः पातालेष्वपि च भवति मेदिन्याः ।
वाक्याविरोध एवं विचिन्त्य सुधिया सुधीभिरिह नेयः ॥

---

* 'भट्टस्य ।' इति वृत्तानुगुणं 'भटकस्य' इति वा ।

अत्युन्नतिश्च मेरोर्न चिन्त्यते गोलविद्भिरिह गणकैः ।
यस्माद् ध्रुवस्य सौम्ये प्राग्गामिन्यो भवन्ति खे ताराः ॥

केचिद् वदन्ति भूमेरूर्ध्वं चाधः प्रविष्ट इति मेरुः ।
आर्यभटेनात्रोक्तं भूगोलात् तस्य मानमूर्ध्वगतम् ॥

लङ्कायामुपरि गतो गोलान्तेऽर्को[1] ध्रुवः सदा क्षितिजे ।
मेरौ सोऽर्कः क्षितिजे ध्रुव उपरि यतोऽनयोः स्वभूमिरधः ॥

स्थलजलमध्यौ[2] लङ्का भूकक्ष्याया भवेच्चतुर्भागे ।
उज्जयिनी लङ्कायाः पञ्चदशांशे समोत्तरतः ॥ ३८ ॥

स्वर्मेरू स्थलमध्ये नरको वडवामुखश्च जलमध्ये ।
एषा सार्धा त्वार्या भटेन गदितात्र लिख्यतेऽस्माभिः ॥

स्थलमध्यगमेरुस्था देवास्तदधोजलस्थगा दनुजाः ।
शशिमण्डलमध्यस्थाः पितरो मनुजाः कुगोलपार्श्वगताः ॥

उत्तरगोलगमर्कं पश्यन्त्यमराः सदान्यगं दितिजाः ।
मेषादिराशिषट्कं दिनममराणां निशा तदसुराणाम् ॥

प्रोक्तं दिनं पितॄणां कृष्णाष्टम्यर्धकालमारभ्य ।
शुक्लाष्टम्यर्धान्तं पश्यन्ति यतः सदैव ते दिनपम् ॥ ४२ ॥

लङ्कायनक्षदेशे त्रिंशद्घटिका दिनं तथैव निशा ।
अक्षाभावात् स्थलजलसन्धौ स्थानानि चाह भटः ॥

---

१. 'न्तेऽर्काद् ध्रु', २. 'ध्यालङ्का' क. पाठः,

उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे ।
मध्याह्नो यवकोट्यां रोमकविषयेऽर्धरात्रमिति ॥ ४४ ॥

दिनरात्रिकालयोगे षष्टिर्घटिकाः स्युरक्षयुतदेशे ।
तत्रोदग्गोलेऽर्के दिनस्य वृद्धिर्निशाधिका याम्ये ॥ ४५ ॥

परमापमेन तुल्या यस्मिन् देशेऽवलम्बकज्या स्यात् ।
तत्र यमान्तगतेऽर्के नाडीषष्ट्या दिनं तदुक्तं च ॥ ४६ ॥

यत्र तोयनिधिमेखलातले नास्तमेति मिथुनान्तसंस्थितः।
तप्तहाटकनिभो दिवाकरस्तत्र भोऽ*क्षपरिमाणमुच्यताम्

इति तत्र पलज्या स्यात् परमापमकोटिसंमिता तस्मात्।
पञ्चदश स्युश्चरदलघटिकाः षष्टिर्दिनेऽप्यतो घटिकाः ॥

तत्पूर्वापरदिवसास्तस्मान्न्यूनाः क्रमेण तद्देशे ।
चापान्तेऽर्के तु निशा तद्वत् तत्पार्श्वगा निशाश्च तथा ॥

राशिद्वयापमसमा लम्बज्या यत्र तत्र चापमृगौ ।
यातो नोदयमस्तं कर्कियमौ यान्ति हरिजमन्येऽष्टौ ॥

वृषभानन्तरलग्नं सिंहः कोर्प्यूर्ध्वलग्नमपि कुम्भः ।
वीणैणकर्किधनुषां लग्नत्वं तत्र विद्यतेनैव ॥ ५१ ॥

एकक्षापमतुल्या लम्बज्या चेन्न यान्ति वृषभाद्याः ।
चत्वारोऽस्तं वृश्चिकधनुरेणघटास्तथा न यान्त्युदयम् ॥

मीनो मेषः कन्या तुलाधरश्चेति तत्र लग्नानि ।
चत्वार्येवं क्रमशो नान्येषां हरिजसङ्गतिर्यस्मात् ॥ ५३ ॥

---

* अक्षाकारस्य पूर्वरूपं चिन्त्यम् ।

मेषाद्याः षण्नास्तं मेरौ यान्त्युदयमपि च जूकाद्याः ।
दृश्यादृश्यविभागौ कल्प्यौ व्यत्यासतोऽसुरसुराणाम् ॥

द्वादशराशिषु भानोश्चारादिह मानुषं भवेद् वर्षम् ।
दिव्यं तदहोरात्रं दिव्याब्दः खरसवह्निभिः स्वदिनैः ॥

दिव्यैर्वर्षसहस्रैर्द्वादशभिः स्याच्चतुर्युगं त्वेकम् ।
दिव्यं युगमिति कथितं चतुर्युगं चैकमाचार्यैः ॥ ५६ ॥

अहिवेदा रसरामाः कृतदस्रा द्वीन्दवश्च शतनिहताः ।
दिव्याब्दाः सन्ति कृते त्रेतायां द्वापरे कलौ क्रमशः ॥

दिवसे चतुर्युगानां विधेः सहस्रं भवेत् तथा रात्रौ ।
सृष्टिः स्थितिश्च दिवसे लोकस्य विनाश एव चास्य निशि॥

दिनमिदमुदितं कल्पश्चतुर्दश स्युर्दिने विधेर्मनवः ।
मन्वन्तरे युगानां सैका स्यात् सप्ततिः परं सन्ध्या ॥

कल्पस्यादावन्ते मनुविवरेष्वपि च पञ्चदश सन्ध्याः ।
षण्णां चतुर्युगानां पञ्चदशांशः स्मृतोऽत्र सन्ध्येति ॥

मनुविवरे सन्ध्यायाः पूर्वापरकालयोः क्रमात् संज्ञा ।
सन्ध्यांशैः सन्ध्येति च कालविभागः कृतो बुधैः कैश्चित् ॥

पञ्चाशत् स्वा अब्दा विधेर्गता आद्य एव शेषस्य ।
कल्पेऽस्मिन् मनवः षड् गताः परस्यापि भैर्मितयुगानि ॥

अष्टाविंशेऽपि युगे कृतादयोऽस्मिन् गतास्त्रयः पादाः ।
शेषोऽयं कलिपादः प्रवर्तते पूर्वसूरिवचनमिति ॥ ६३ ॥

---

१. 'अस्तुल्येति' ख. ग. पाठः.

अतिदूरगं दिनेशं पश्यति कल्पे सदा कमलयोनिः ।
प्रलये रवेरभावाद् ब्रह्मापि रविं निरीक्षते नैव ॥ ६४ ॥
एकेनैव हि रविणा दैवं पित्र्यं च मानुषं ब्राह्मम् ।
दिनमिति चतुर्विधं स्याद् गोलविदां तानि गोलगम्यानि॥
सूर्योपरीन्दुरिति यैरुक्तं तेषां हि संस्थितिर्मेरौ ।
भानामूर्ध्वं मुनयः सर्वेषां च ध्रुवो यतस्तेषाम् ॥ ६६ ॥
तत्रोदग्विक्षिप्तः शश्युपरि च दृश्यते यमान्तेऽर्कात् ।
तस्मात् तथोक्तिरेषां तत्रान्यद्वास्ति दैवतं सौम्यम् ॥
परमादिनोक्तमेवं संक्षेपादीश्वरेण गोलस्य ।
संस्थानं लघुमतये वक्तव्यं चान्यदस्ति गोलगतम् ॥
युक्तिः प्रदर्शिता प्राङ् मया महाभास्करीयभाष्यस्य ।
सिद्धान्तदीपिकायां विवृतौ वक्ष्ये तथापि शङ्कादेः ॥
घटिकापममण्डलयोर्योगस्थार्कस्य या महाच्छाया ।
दिनमध्ये साक्षज्या लम्बकजीवाथ तस्य शङ्कुः स्यात् ॥
याम्योत्तराख्यवृत्ते घटिकासममण्डलान्तरं ह्यक्षः ।
अवलम्बकस्तु तस्मिन् घटिकाक्षितिजाख्यवृत्तयोर्विवरम्॥
क्षितिजध्रुवयोर्विवरे जाता जीवाथवाक्षजीवा स्यात् ।
व्योम्नो मध्यध्रुवयेर्विवरभवा ज्या तु लम्बकज्या स्यात् ॥
स्फुटदोर्ज्या सप्तनवत्र्येकैर्निहता त्रिराशिगुणविहृता ।
क्रान्तिः स्यात् तद्विज्याकृतिविवरपदं भवेद् द्युदलजीवा ॥
अक्षज्याघ्ना क्रान्तिर्लम्बकजीवोद्धृता क्षितिज्या स्यात् ।
भूज्या त्रिज्यानिघ्ना द्युदलज्याभाजिता चरज्या स्यात् ॥

उन्मण्डलेऽर्कयोगाज्जीवा याम्योत्तरापमज्या स्यात्।
स्वाहोरात्रार्धज्या द्युज्यावृत्तस्य योऽर्धविष्कम्भः ॥ ७५ ॥
क्षितिजोन्मण्डलविवरे द्युमण्डलज्या स्मृता क्षितिज्येति।
त्रिज्याकर्णस्य भुजा क्रान्तिः कोटिर्द्युमण्डलार्धज्या ॥
भ्रमणं द्युमण्डलानां घटिकावृत्तस्य चापि कालसमम्।
घटिकावृत्तज्योक्ता भ्रमितांशे तस्य हीष्टकाले ज्या ॥
भूज्या भ्रमणे या ज्या घटिकावृत्ते भवेच्चरज्या सा।
चापीकृता चरज्या प्राणात्मकमुच्यते चरार्धमिति ॥
यस्मात् प्राणादीनां लिप्तादीनां च संस्थितिर्वृत्ते।
चापस्यैव ततः स्यात् प्राणादित्वं च लिप्तिकादित्वम् ॥
चापीकरणं युक्तं त्रिज्यावृत्ते द्युमण्डलेषु न तु।
पठिताः सर्वा जीवास्त्रिज्यावृत्तोद्भवा भवन्ति यतः ॥ ८० ॥
परमापमो यदि स्यात् त्रिराशिदोर्जीवया तदा तु कियान्।
भवतीष्टदोर्ज्ययेति त्रैराशिकमपमसिद्धये भवति ॥ ८१ ॥
यदि लम्बकाख्यकोट्या पलजीवा जायते तदा कियती।
इष्टापमकोट्येति ज्ञेयं त्रैराशिकं क्षितिज्यायाम् ॥ ८२ ॥
भूज्या द्युमण्डले यदि भवति व्यासार्धमण्डले तु तदा।
कियती जीवा स्यादिति वेद्यं त्रैराशिकं चरज्यायाम् ॥
त्रिज्याहतापमज्या लम्बकजीवा भवेद्दिहार्काप्ता।
सा क्षितिजभानुयोगात् क्षितिजे याम्योत्तरा हि ज्या ॥
क्रान्तिज्योन्मण्डलगा कोटिर्भूज्या भुजा द्युमण्डलजा।
क्षितिजस्थार्काप्ता स्यात् कर्णस्त्र्यश्रं भवेत् त्रिभिश्चैवम् ॥

कोटिभुजाकर्णेषु द्वाभ्यां द्वाभ्यां हि सिद्धिरन्यस्य ।
वर्गैक्यपदं भूज्याक्रान्त्योस्तस्माद् भवेदिनाग्रा वा ॥

त्रिज्यालम्बककोट्याः कर्णश्चेत् को भवेदपमकोट्याः ।
कर्णस्त्रैराशिकमिति सूर्याग्राया अवाप्तये वेद्यम् ॥ ८७ ॥

कृत्वाक्षव्यासार्धं द्युमण्डलं दण्डनाभिहरिजान्ते ।
तन्मध्यगपलम्बौ तथास्य परिधिस्थतच्छ्रुतिश्चोह्या ॥

गोलान्तात् खेटान्तं खेटस्य भुजा धनुर्भुजा तज्ज्या ।
अयनान्ताद् विहगान्तं कोटिधनुः कोटिरचिततज्जीवाः ॥

बाहुः क्रान्तिरभीष्टाभीष्टभुजज्या श्रुतिश्च कोटिस्तु ।
स्वाहोरात्रेऽभीष्टा जीवा त्र्यंशं[1] भवेदमीभिश्च ॥ ९० ॥

परमद्युज्या शशिकृतविधुरामास्तद्धता भुजज्येष्टा ।
त्रिज्या भ(क्तो?क्ते) स्वाहोरात्रे जीवा भवेदभीष्टाख्या ॥

कोटिः परमद्युज्या त्रिज्यायाश्चेदभीष्टदोर्ज्यायाः ।
केतिद्युमण्डलेष्टज्यायास्त्रैराशिकं विचिन्त्यं स्यात् ॥ ९२ ॥

इष्टापमदोर्जीवाकृत्योर्विवरस्य मूलमथवा स्यात् ।
स्वाहोरात्रेष्टज्या राशीनां मानसिद्धये कथिताः ॥ ९३ ॥

स्वाहोरात्रेष्टज्या त्रिज्याघ्ना स्वद्युशिञ्जिनीभक्ता ।
चापीकृतास्युरसवस्तद्दोर्भागोदये हि लङ्कायाम् ॥ ९४ ॥

इयती द्युज्यावृत्ते ज्या चेद् व्यासार्धमण्डले कियती ।
इति घटिकावृत्ते ज्या स्याद् दोर्भागोदये हि लङ्कायाम् ॥

---

१. 'त्र्यंशं भ' ख. ग. पाठः.

एकभमानेनोनं भद्वयमानं द्वितीयभमितिः स्यात् ॥
भद्वयमानेनोनं भत्रयमानं तृतीयराशिमितिः ॥ ९६ ॥
स्वचरदलेनैणादौ हीनाः कर्क्यादि(गे?के) युता एते ।
तत्तद्दोर्भागोदयकालप्राणा भवन्ति देशे स्वे ॥ ९७ ॥
एणाद्या उद्यन्ति क्षिप्रं कर्क्यादिकाः शनैरेव ।
उदगुन्नतं भगोलं यस्माच्चरसंस्कृताविय युक्तिः ॥ ९८ ॥
शशिकृतविधुरामघ्ना वेष्टभुजा स्वद्युशिञ्जिनीभक्ता ।
चापीकृताः स्युरसवो लङ्कायामिष्टबाहुधनुरुदये ॥ ९९ ॥
त्रैराशिकयुगसिद्धा भमितिरिहाद्ये हरास्त्रिराशिज्या ।
अन्यत्र सा गुणोऽतस्तद् द्वयहीनं च कर्मयुक्तमिदम् ॥
सत्ययने सायनयोरिष्टस्याद्यन्तयोः पृथङ्मानम् ।
कुर्यात् तयोस्तु विवरं स्यादिष्टमितिश्चरार्धमिह तद्वत् ॥
इष्टं द्विपदगतं चेत् तस्य तु तत्तत्पदस्य भागमितिम् ।
कुर्यात् पृथक् तदैक्यं स्यादिष्टमितिश्चरं स्वपदविहितम् ॥
अस्तोदयाख्यसूत्रं पूर्वापरगं भवेदिनाग्रान्तात् ।
क्षितिजात् स्वाहोरात्रे चरतोऽर्कस्योन्नतिर्हि शङ्कुः स्यात् ॥
शङ्कोर्मूलास्तोदयसूत्रान्तरमुच्यतेऽत्र शङ्कुग्रम् ।
स्वाहोरात्रेष्टज्या शङ्कुशिरोस्तोदयाख्यविवरगता ॥
कर्णोऽत्रेष्टद्युज्या शङ्कुः कोटिर्भुजा तु शङ्कुग्रम् ।
एवमिहाक्षनिमित्तं क्षेत्रं प्रोक्तं बहूनि तानि स्युः ॥ १०५ ॥
बाह्याद्यैरेकस्मिन् क्षेत्रे जातैरिहानुपातेन ।
क्षेत्रान्तरसिद्धिः स्यात् सर्वेषामाश्रयोऽक्षमेव यतः ॥ १०६ ॥

स्वाहोरात्रेष्टज्या घटिकावृत्तोत्थजीवया साध्या।
गतगन्तव्यासुज्या घटिकावृत्तोद्भवा हि जीवा स्यात्॥
जीवाग्रहणमयुक्तं क्षितिजादुन्मण्डलाद्धि युक्तं तत्।
उन्मण्डलमेव स्याद् भगोलमध्यस्थितं यतो नान्यत्॥
सौम्ये चरहीनानां गोले याम्ये चरार्धयुक्तानाम्।
गतगन्तव्यासूनां जीवा द्युन्मण्डलोर्ध्वगा भवति॥ १०९॥

इष्टद्युवृत्तबाह्ये घटिकावृत्ते प्रकल्पिते ज्ञेया।
युक्तिश्चरसंस्कारे द्युगते चरभूज्ययोः सरूपं वा॥ ११०॥

सोन्मण्डलोर्ध्वगा ज्या स्वाहोरात्राहता त्रिगुणभक्ता।
उन्मण्डलोर्ध्वभागे स्वाहोरात्रेष्टजीवका§ भवति॥ १११॥

इयती घटिकावृत्ते ज्या चेत् कियती तदा द्युमण्डलजा।
त्रैराशिकमिति वेद्यं स्वाहोरात्रेष्ट§जीवकानयने॥ ११२॥

भूज्यारहिता याम्ये सौम्ये भूज्यान्विता च सा द्युज्या।
क्षितिजोर्ध्वभागजाता स्वाहोरात्रेष्टजीवका§ भवति॥
सा ज्या लम्बकनिहता त्रिज्याभक्ता भवेन्महाशङ्कुः।
तत्त्रिज्याकृतिभेदान्मूलं छाया च तस्य शङ्कोः स्यात्॥
यदि लम्बककोटिः स्यात् त्रिज्याकर्णेन का तदा कोटिः।
इष्टद्युजीवया स्याच्छङ्कौ त्रैराशिकं भवेदेवम्॥ ११५॥

रविनिहता सा महती छाया भक्ता च शङ्कना महता।
अर्काङ्गुलशङ्कोः स्याच्छाया त्रैराशिकादियं चाप्ता॥ ११६॥

---

१ 'स्व' ख. ग. पाठः.

§ - 'जीविका' इति स्यात्।

द्युज्यार्कघ्नात् क्षितिजाच्चलकर्णहृताथवा महाशङ्कुः।
द्युज्या सा क्रान्तिघ्ना सूर्याग्रहृताथवा महाशङ्कुः ॥११७॥
सौम्यायतकर्णवशाच्चोर्ध्वायतकोटिसाधनमिहोक्तम्।
तद्युक्तमेव यस्माज्जातं तद् द्वन्द्वमक्षतो भवति ॥११८॥
अक्षज्याघ्नः शङ्कुर्लम्बकभाजिते भवेच्च शङ्कवग्रम्।
यस्माल्लम्बकशङ्कोः शङ्कव्यं पलगुणोऽत्र युक्तिरिति ॥
अथवा शङ्कव्यं स्यात् पलाङ्गुलघ्नोऽर्कभाजितः शङ्कुः।
भूज्याघ्नो वा शङ्कुः क्रान्तिज्याभाजितश्च शङ्कवग्रम् ॥
अक्षज्याल्पाक्रान्तिः सौम्या त्रिज्याहता पलज्याप्ता।
सममण्डलस्थशङ्कुः पूर्वापरसूत्रगे रवौ भवति ॥१२१॥
सममण्डलगे भानौ शङ्कवग्रमिनाग्रया समं हि भवेत्।
स्यात् क्रान्तेश्चार्काग्रा तस्माच्छङ्कवग्रमिह भवेत् क्रान्तेः ॥
क्रान्तेः शङ्कव्यं स्यादनुपाताच्छङ्कुरपि च शङ्कुघ्नात्।
त्रैराशिकयुग्मं स्यात् सममण्डलशङ्कुसिद्धयेऽत्रेति ॥
हर इह लम्बक आद्ये स तूपरिगुणोऽथ नष्टयोस्तु तयोः।
त्रिज्या तु गुणोऽक्षज्या हारः क्रान्तेः फलं तु समशङ्कुः ॥
चारश्चन्द्रादीनां स्वे स्वे विक्षेपमण्डले कथितः।
अपमण्डले तु तेषां चरन्ति पाता विलोमगास्ते स्युः ॥
अपमण्डले स्वपाते तस्य च कैतमे[2] विमण्डलं लग्नम्।
परमक्षेपान्तरितं पादान्तं तस्य सौम्ययाम्यदिशोः ॥

---

१. 'ग' क. पाठः. २. 'कामे' ख. ग. पाठः.

मन्दस्फुटात् स्वपाताः शोध्याः शीघ्रोच्चतस्तु बुधसितयोः।
पातो न भुजा परमक्षेपघ्ना त्रिज्ययोद्धृता क्षेपः ॥ १२७ ॥

स पुनर्व्यासार्धहतो मन्दस्फुटभाजितः स्फुटः कथितः।
सोऽपि व्यासार्धहतो भौमादेः स्यात् स्वशीघ्रकर्णहृतः ॥

वेदा द्वावष्टरसा दिश इति भागा दशाहतास्ते स्युः।
भौमादेः पातांशा बहुतरकालेन भुक्तिरल्पैषाम् ॥

नवतिर्व्योमदिनेशाः षड्भिः खार्काः खनेत्रशिशिरकराः।
परमा विक्षेपकला भूमिजबुधगुरुसितार्कतनयानाम् ॥

परमक्षेपो यदि चेत् त्रिराशिदोर्ज्जीवया तदा तु कियान्।
भवतीष्टदोर्ज्ज्ययेति क्षेपे त्रैराशिकं भवेदिष्टे ॥ १३१ ॥

कर्णे स्वल्पे वृद्धिस्तासां ह्रासो भवेत् तथा महती ।
दूरादूरविशेषैः क्षेत्रस्य हि लिप्तिकाभेदः ॥ १३२ ॥

शैघ्रान्मन्दाच्चोच्चाद् भौमादेः स्यादधोगतिश्चोर्ध्वम् ।
कर्णद्वयेन तस्माद् ग्रहभूम्योरन्तरालमितिसिद्धिः ॥

भौमेड्यमन्दपाताः शोध्याः स्वात्स्वात्स्फुटादितिब्रुवताम्।
शीघ्रज्यासंस्कारो ग्रहवत् पाते निजे भवेत् पक्षे ॥ १३४ ॥

कर्णस्थितिसिद्ध्यर्थं स्फुटसिद्ध्यर्थं च लिख्यतेऽत्रापि ।
कक्ष्यात्रयं झषान्ते प्राची दिग् भवति सर्ववृत्तेषु ॥ १३५ ॥

भूमध्यकेन्द्रमाद्यं भाख्यं वृत्तं तु भवति सर्वेषाम् ।
तन्मध्याच्छीघ्रदिशि स्वान्त्यफलान्ते कुजार्यमन्दानाम् ॥

शैघ्रस्य केन्द्रमुदितं बुधभृग्वोर्मन्ददिशि तु मान्दस्य।
स्वान्त्यफलान्ते केन्द्रद्वितीयमध्यात् कुजादीनाम्॥
मन्ददिशि मान्दकेन्द्रं द्वितीयपरिधिस्थभानुकेन्द्रमथ।
शैघ्रं ज्ञशुक्रयोः स्यादन्त्ये वृत्ते चरन्ति सर्वेऽपि॥ १३८॥
अन्त्ये वृत्ते तेषां चारो मध्याख्यया सदा गत्या।
खगचारजा भचक्रे या गतिरनुमीयते स्फुटाख्या सा॥
अन्त्यं शैघ्रान्त्यफलं व्यासार्धं स्याज्ज्ञशुक्रयोर्वृत्तम्।
त्रिगुणकृतान्यन्यानि क्षेपो वृत्तत्रयस्य युगपत् स्यात्॥
अन्त्यपरिधिस्थखेटात् सूत्रं कुर्यादुपान्तकेन्द्रान्तम्।
तत्कर्णो भौमादेर्मान्दो भवति ज्ञशुक्रयोः शैघ्रः॥ १४१॥
श्रुतिमार्गगेष्टसूत्रं द्वितीयपरिधौ तु यत्र तत्र भवेत्।
मन्दस्फुटः कुजादेस्तत्र तु शीघ्रस्फुटो ज्ञभृगुसून्वोः॥
मन्दस्फुटात् कुजादेर्बुधभृग्वोः शीघ्रजात् स्फुटात् सूत्रम्।
कुर्याद् भचक्रकेन्द्रान्तमेतदुक्ता श्रुतिः कुजादीनाम्॥
शैघ्रान्ययोस्तु मान्दा(?)श्रुतिमार्गगसूत्र भाख्यपरिधियुतौ।
शैघ्रस्फुटः कुजादेस्तत्र तु मन्दस्फुटो ज्ञभृगुसून्वोः॥
द्व्यूचानां स्फुटयुगलं भवति भपरिधौ गतः स्फुटो हि खगः
भेदस्तस्य कदाचित् साक्षात् स्फुटखेचराद् भवेदल्पः॥
मन्दश्रुतिश्च शैघ्रं फलं कुजादेस्तु भेदहेतुः स्यात्।
शीघ्रश्रुतिश्च मान्दं फलं विभेदे सितज्ञयोर्हेतुः॥ १४६॥
जीवाफलार्धसंस्कृतमध्यान्मान्दं फलं ततः क्रियते।
सर्वेषां बुधसितयोः क्रमभेदोऽप्यत्र कल्पितस्तस्मात्॥

अन्त्यपरिधिस्थखेटादिहान्त्यकेन्द्रान्तमपि कृते सूत्रे।
तत्सूत्राद्यपरिध्योर्योगे साक्षात् स्फुटग्रहो भवति॥
मध्यान्तगते कर्णे क्षेपो मध्यान्तवृत्तयोरिष्टः।
यदि चेत् त्रिज्याकर्णे कः स्यादिति मध्यपरिधिगः क्षेपः॥
प्रथमाद्वितीययोश्चेत् कर्णे मध्यान्तगे त्वयं क्षेपः।
त्रिज्याकर्णे कः स्यादिति विक्षेपः स्फुटो भचक्रे स्यात्॥
स्फुटयुगसिद्धस्य यथा दृग्भेदोऽल्पो ग्रहस्य भवति तथा।
कर्णद्वयसिद्धस्य क्षेपस्यापीति कस्यचिच्चिन्ता॥ १५१॥
अर्केन्द्वोर्द्वे वृत्ते भवृत्तकेन्द्रान्निजोच्चदिशि मान्दम्।
वृत्तं स्वान्त्यफलान्ते स्फुटकर्मैकं भवेद् यथा स्वोच्चम्॥
विक्षेपापमधनुषोस्तुल्यदिशोर्भिन्नयोर्युतिर्वियुतिः।
प्रोक्तं स्वक्रान्तिधनुस्तस्य ज्या स्वस्फुटापमज्या स्यात्॥
याम्योत्तरवृत्तेऽपमयोगाद् राशित्रयान्तरे वेधौ।
कार्यौ सर्वक्षणां संपाताद् राशिकूटसंज्ञौ तौ॥ १५४॥
गोलस्य दक्षिणोदक्स्वस्तिकयुग्माद् यथा घटीवलयम्।
चक्रतुरीयांशे स्याद् भकूटयुग्मात् तथापमाख्यं च॥
याम्योदगायता स्यात् खेटस्थकला भकूटयुग्मान्ता।
खेटस्थलिप्तिकायां क्षेपस्तस्यापमात् सदा याति॥
क्षेपस्थोर्ध्वाधोगतिरुन्मण्डलतोऽस्यतो भकूटवशात्।
क्षेपापक्रमधनुषोरतोऽत्र योगाद्ययुक्तमिति केचित्॥
लग्नेऽयनान्तगे स्यादुन्मण्डलगं भकूटयुगलमथ।
गोलान्तेऽधश्चोर्ध्वं कोटिवशात् स्यात् तदुन्नतिरतोऽत्र॥

अयनान्तस्फुटखेचरविवरजलङ्कोदयासुगुणनिहता।
परमक्रान्तिस्त्रिज्याविहृता स्यादुन्नतिर्भकूटस्य ॥ १५९ ॥
सौम्योन्नतिरेणादौ विहगे याम्योन्नतिः कुलीरादौ।
विहगस्योदय एवं व्यस्तं स्यादुन्नतिस्तदस्तमये ॥
लङ्कोदयकालसमं गोलभ्रमणं ततो भकूटस्य।
गोलभ्रमजोन्नतिरपि लङ्कोदयकालजीवया साध्या ॥
खगकोटिर्वान्त्यापमनिहता स्थूलोन्नतिस्त्रिगुणभक्ता।
स्थूलापि नाप्रदर्श्या लघुता यदि कर्मणो भवेत् तत्र।
विक्षेपघ्ना त्रिज्याभक्ता या चोन्नतिर्भकूटस्य।
तत्क्षेपवर्गविवरात् पदं स्फुटक्षेप ईरितः क्रान्त्याम् ॥
तत्क्रान्त्योश्चापैक्यं तुल्यदिशोर्भिन्नयोर्धनुर्भेदः।
अपमधनुः स्यात् स्पष्टं स्पष्टा भूज्यादयोऽपि तज्ज्यातः ॥
ऊर्ध्वाधोगमनात् स्यात् क्षेपस्योन्मण्डलादुदयभेदः।
अपमादपि याम्योदक्स्थित्या दृक्कर्मणि ग्रहेतस्तत् ॥
विक्षेपेणाभिहता त्रिगुणेन हृतोन्नतिर्भकूटस्य।
क्षेपस्योन्नतिरथवा तस्यैवोन्मण्डलादवनतिः स्यात् ॥
क्षेपो यदि राशीनां कूटोन्नतिभागगस्तदा तस्य।
क्षेपस्योन्नतिरुदिता विपरीतादिगाश्रितस्य चावनतिः ॥
क्षेपोन्नतिर्भुजा स्यात् कर्णक्षेपोऽस्य भवति या कोटिः।
सोन्मण्डलगः क्षेपः क्रियते क्रान्तेस्तु धनुषि यच्चापम् ॥

---

१. 'ग्रहे तन्तः' क. ग. पाठः.

क्षेपोन्नतिस्त्रिजीवागुणिता द्युदलोद्धृता च या तस्याः ।
चापं भलिप्तिकाघ्नं खेटगतर्क्षासुभाजितं स्वर्णम् ॥
ऋणमुन्नतावनतौ धनमुदये तद्वदेव वास्तमये ।
उन्नतिरुदयभवा यदि सास्तभवा चेद् धनादि विपरीतम्॥
खेटास्तर्क्षप्राणा हरस्य (चे)दस्तदृक्फलावासौ ।
राशेः कालोऽस्तमये स्वसप्तमर्क्षोदयासुतुलित इति ॥
खाभ्राहीन्दुकला यदि लभ्यन्ते स्वासुभिर्विलग्नस्य ।
स्युर्दृक्फलासुभिः का भवति त्रैराशिकमितीह ॥ १७२ ॥
लङ्कोदयासुहरणं ये त्वत्रेच्छन्ति दृक्फलावाप्त्यै ।
सुधियस्ते गणकाः स्युः किन्त्विह गोलैकदेशवेत्तारः ॥
स्वास्तमये कालस्य स्वसप्तमर्क्षोदयासुतुल्यत्वम् ।
भानां भवति चरस्य व्यस्तत्वादुदयंकालतोऽस्तमये ॥
विक्षेपसंस्कृता या क्रान्तिज्या केवला च यात्र तयोः ।
विवरं विक्षेपभवा क्रान्तिः स्यादक्षदृक् फलं तु ततः ॥
अपमो विक्षेपभवस्त्वक्षहतो लम्बकज्यया विहृतः ।
त्रिज्याघ्नो द्युदलाप्तस्तस्य धनुःक्षेपकृतचरांशः स्यात् ॥
क्षेपचरं भकलाघ्नं खेटस्थर्क्षासुभाजितं शोध्यम् ।
उदये क्षेपे सौम्ये देयं याम्येऽन्यथा खगस्यास्ते ॥१७७॥
दृक्कर्मद्वयमेतत् प्रोक्तं खेटोदयास्तलग्नाप्त्यै ।
न तु तत्स्फुटाङ्गमेतद् द्वितयं वैकेन कर्मणा सिध्येत् ॥

---

१. 'धं' क. ग. पाठः.

अपमस्यार्धं ह्युदितं सर्वत्रार्धं तथा सदास्तगतम्।
उदितांशस्य तु मध्ये दृक्क्षेपाख्यं सदा स्थितं लग्नम्॥
उदितांशस्य च मध्यं लग्नास्तविलग्नयोर्हि मध्ये स्यात्।
दृक्क्षेपलग्नमुदितं प्राग्लग्नं भत्रयेण हीनमतः॥ १८०॥
याम्योत्तरवृत्तेऽपमभागो मध्याख्यलग्नमिति कथितम्।
तद्भयर्को मध्याह्ने नतिलङ्कामितिवशाच्च साध्यं तत्॥
दृक्क्षेपज्या चोक्ता खमध्यदृक्क्षेपलग्नविवरज्या।
दृक्क्षेपलग्नगेऽर्के दृक्क्षेपज्या स्मृता महाच्छाया॥ १८२॥
उदयविपरीतमस्ते राशेश्चरसंस्कृतिर्यतस्तस्मात्।
न स्यात् खमध्यगे सा लङ्कामितिरेव मध्यमानमतः॥
मध्यविलग्नक्रान्त्याः परजीवायाश्च चापयोः समयोः।
योगाद् विदिशोर्विवराज्जाता जीवा च मध्यजीवोक्ता॥
घाटिकखमध्यघटिका द्युवृत्तविवरे पलात्मिका हि स्तः।
ताभ्यां द्युमण्डलनभोमध्यान्तरजीवका ततः साध्या॥
त्रिज्यामध्यज्याकृतिविवरपदं मध्यशङ्कुरिति कथितः।
मध्यविलग्नोनोदयलग्नभुजज्या तु मध्यशङ्कुभुजा॥
मध्याख्यशङ्कुनिहतं व्यासार्धं मध्यशङ्कुभुजयातम्।
दृक्क्षेपशङ्कुरुक्तो दृक्क्षेपज्या स्फुटा च तच्छाया॥
मध्यविलग्नक्षितिजान्तरज्यया मध्यशङ्कुरिह चेत् स्यात्।
दृक्क्षेपहरिजविवरे त्रिजीवया कोऽत्र शङ्कुरिति युक्तिः॥
दृक्क्षेपज्या तुलिता भानां कूटोन्नतिस्तदन्यादिशि।
क्षितिजात्तु गोलपादे खमध्यमपमाद्यतो भकूटमपि॥

क्षितिजस्थे त्विष्टखगे दृक्क्षेपज्याहतास्त्रिगुणभक्तः।
विक्षेपः क्षितिजात् स्यात् क्षेपस्य प्रोन्नतिस्त्ववनतिर्वा ॥
दृक्क्षेपेतरदिक्स्थे विक्षेपे प्रोन्नतिर्भवेत् तस्य।
दृक्क्षेपज्यादिक्स्थे विक्षेपे त्ववनतिर्भवेत् तस्य ॥१९॥
क्षेपस्योन्नतिरथवावनतिस्त्रिज्याहतावलम्बहृता।
त्रिज्याघ्ना द्युदलासा या तच्चापं हि दृक्फलप्राणाः ॥
खखधृतिनिहता लग्नप्राणासा दृक्फलादिहोन्नतिजात्।
लिप्ताः शोध्या उदये क्षेप्याश्चास्तेऽन्यथावनतिजाच्चेत् ॥
पलगुणमध्यविलग्नक्रान्त्योरक्षस्य[2] या तु दिक् सैव।
मध्यज्यादृक्क्षेपज्ययोर्भवेत् सकलदृक्फलमिहोक्तम् ॥
समरेखायां मध्यमभानोरुन्मण्डलोदये हि बुधैः।
उदिता विहगास्तस्मात् संस्कारास्तेषु देशजाद्याः स्युः ॥
समरेखानिजभूम्योरन्तरजैर्योजनैर्हता भुक्तिः।
निजभूवृत्तहृता स्वं रेखायाः पश्चिमे त्वृणं प्राच्याम् ॥
समरेखायाः प्राच्यां प्रागुदयः पश्चिमे रवेः पश्चात्।
देशगतिरतः प्राच्यां विशोध्यते दीयते तथा पश्चात् ॥
निजभूवृत्तभ्रमणे दिनभुक्तिर्यादि भवेत् तदा कियती।
समरेखानिजभूम्योर्विवरभ्रमणेऽत्र युक्तिरिति चिन्त्या ॥
पूर्वाभिमुखं गच्छन् निजभूवृत्ते सदा नरो गच्छेत्।
दर्शनमर्कस्य यतो निजभूवृत्तानुसारि दिक् चार्कात् ॥

---

१. 'विक्षे' क. ग. पाठः. २. 'धिकस्य' ख. पाठः.

पलयोः साम्यं च ययोः पूर्वापरसंज्ञितौ हि देशौ तौ।
निजभूवृत्ते ह्येव च तत् साम्यं हारकोऽत इह तत् स्यात्॥

त्रिज्यालम्बोनक्षे भूवृत्तं रन्ध्रगोश्विगुणतुलितम्।
स्याच्चेदभीष्टलम्बे किं स्यान्निजभूमिवृत्तलाब्धिरिति॥

रविदोःफलं हि भानोः स्फुटमध्यमयोः कलात्मकं विवरम्।
तन्निहता ग्रहभुक्तिश्चक्रकलाप्तं ग्रहे धनर्णं स्यात्॥

रविदोःफलवत् तस्मिन्नृणे यतो मध्यमोदयात् प्राक्
स्यात्।
स्फुटतीक्ष्णांशोरुदयो धनेऽन्यथास्फुटरविर्व्रजेद्ध्युदयम्॥

गोलभ्रमणे स्याच्चेद् दिनभुक्तिः का भुजापलभ्रमणे।
इति युक्तिं ब्रुवतेऽन्ये दोःफलकालो भवेदिहेच्छेति॥

रविचरदलासुनिहता दिनासुभक्ता गतिस्त्वृणं सौम्ये।
गोले भानोरुदये याम्ये देया खगेऽन्यथास्तमये॥२०५॥

उन्मण्डलोदयात् प्राक् सौम्ये गोले यतो रवेरुदयः।
पश्चाद् याम्येऽस्तमयो व्यस्तं तस्मादृणादिविधिरेवम्॥

यदि भवति दिवसभुक्तिर्दिनासुभिः का तदा चरार्धभवैः।
प्राणैस्त्रैराशिकमिति खेटे च चरार्धसंस्कृतौ वेद्यम्॥

हारोऽत्र चरदलादौ रविगतिलिप्ताधिका दिनप्राणाः।
इत्यन्ये सार्कगतेर्भ्रमणाद् गोलस्य भवति दिवस इति॥

अथ समच्छायया दिग्द्वलच्छायया च स्फुटार्का-
नयनमुच्यते। तत्र समच्छायायामुद्देशकः —

छाया रवौ नरसमा सममण्डलस्थे
हीना ततोऽपरदिने यदि तत्र कोऽर्कः ।
यद्वाधिकापरदिने यदि तत्र को वा
विद्वन्! वद स्वरकृताङ्गमिता पलज्या ॥ २०९॥

इति ॥

अत्र करणसूत्रमार्याद्वयं —

छायासाध्यः शङ्कुः शङ्कोः शङ्कग्रमिह हि तदिनाग्रा ।
अर्काग्रातः क्रान्तिः क्रान्तेर्दोर्ज्या च तद्धनुर्रिनः स्यात् ॥
यद्यधिकापरदिनजाच्छाया दोश्चापहीनमत्र भवेत् ।
चक्रस्यार्धं सायनभानुर्यस्मादिहायनं याम्यम् ॥ २११ ॥

अर्धच्छायायामुद्देशकः —

शङ्कोरर्धमिता प्रभा दिनकरे याम्यां शलाकां गते
तत्राष्टांशमिताथवाथ दिनपे सौम्यां शलाकां गते ।
सप्तांशेन मिता च सापरदिने सर्वा महत्योऽथवा
हीना ब्रूहि कवे! रवीनग(?)चतुष्षड्भिः पलज्या समा॥

इति ॥

अत्र करणसूत्रमार्यापञ्चकं —

दिवसदले महती याच्छाया सा प्रोच्यते नतज्येति।
नतपलधनुषोर्विवरं क्रान्तिधनुर्याम्यगे रवौ मध्यात् ॥

---

१. 'थ समच्छा' क. ग. पाठः.

सौम्येऽर्के नतपलयोरैक्यं क्रान्तिस्तदा तु गोलमुदक्।
पूर्वत्र नते त्वधिके याम्यं गोलं पलेऽधिके सौम्यम् ॥
याम्ये खमध्यतोऽर्के छायावृद्धौ तु याम्यमयनं स्यात्।
तद्धान्यामुदगयनं व्यस्तं सौम्ये खमध्यतोऽर्के स्यात् ॥
क्रान्तेर्दोर्ज्या साध्या चापं तस्या रविर्भवेद् गोले।
सौम्येऽयने च सौम्ये याम्ये त्वयने तदूनचक्रदलम् ॥
भानुः सषड्भचापं याम्ये गोलेऽयनं च यदि याम्यम्।
.....चापोनं सायनो रविर्भवति ॥ २१७ ॥
क्रान्तिनतचापयोः स्याद् विवरं समयोर्युतिस्तु भिन्नदिशोः।
पलधनुरन्तरमयनं छायागणितात्तयोस्तु रव्योः स्यात् ॥
एकस्मिन् स्थिरशङ्कुच्छायाग्रं कालयोर्ययोर्बिन्दौ।
पतति तयोर्मध्यस्थे कालेऽर्कः सायनोऽयनान्ते स्यात् ॥
इष्टाशास्थे भानौ छाया साध्या विशेषविधिनात्र।
आशावृत्ते कल्प्या छाया सूत्रेण वृत्तमिह कार्यम् ॥ २२० ॥
समयोः शङ्कुग्रार्काग्रयोर्युतिर्भिन्नयोस्तयोर्विवरम्।
छायाकर्णक्षेत्रे दिग्बाहुर्भवति याम्यसौम्यशिराः ॥ २२१ ॥
सार्धर्क्षस्य हि जीवा दिग्जीवा कोणगे रवौ भवति।
तद्दलजीवामध्ये सुरपाग्न्योरूह्यमेवमपरमपि ॥ २२२ ॥
दिग्ज्येष्टा छायाघ्ना त्रिज्याप्ता साध्यबाहुरिति कथितः।
दिग्बाहुसाध्यबाहू तुल्यौ चेदिष्टदिशि गतोऽर्कः स्यात् ॥
दिग्बाहुसाध्यबाह्वोः समयोर्विवराद् विदिक्क्ययोरैक्यात्।
गुणनिहताद्धारातं छायायामृणमतः स्वमिष्टायाम् ॥ २२४ ॥

दिग्बाहौ साध्याख्याद्याम्यगते स्वं विशोध्यमथ सौम्ये ।
व्यस्तं सौम्यनतौ स्याच्छायाद्वन्द्वे कृतं तथा कार्यम् ॥
महति पले सौम्यनते यद्यधिका दिग्गुणादिनाग्रा स्यात् ।
एकस्यामेव दिशिच्छाये द्वे स्तो यतो गतिर्वृत्ते ॥ २२६ ॥
दिग्बाहावल्पे स्वच्छायायां फलमिहाधिके शोध्यम् ।
प्रथमप्रभार्थमेवं कार्यं व्यस्तं द्वितीयभावाप्त्यै ॥ २२७ ॥
नतदिश्युदये हारस्त्रिज्यासूर्याग्रयोर्भवेद् विवरम् ।
योगोऽन्यथा विशेषे त्रिज्या मध्याह्नभान्तरन्तु गुणः ॥
अत्रोक्तौ गुणहारौ दिग्भिर्भक्तौ शतेन वेष्टेन ।
तौ वा गुणहारौ स्तो न ह्यविशेषेऽल्पभेदतो दोषः ॥ २२९ ॥
छायातः शङ्कुः स्याच्छङ्कुघ्नमतो भुजाद्वयं च तयोः ।
विवरात् प्रभा च भूयोऽप्येवं बाह्वोस्तु साम्यमिह यावत् ॥

अत्रोदाहरणं —

कोर्प्यान्तगेऽर्के दहनस्य दिक्स्थिते
वृषान्तगेने शिवदिक्स्थिते प्रभे ।
के ब्रूहि शङ्कोस्तुलितस्य भास्करै-
र्विद्वन्! पलज्या नगवेदषण्मिता ॥ २३१ ॥
वह्नेराशां मेषमध्यस्थितेऽर्के
याते वीणामध्यगे चेन्द्रशम्भ्वोः ।
आशामध्यं नः पृथग् ब्रूहि विद्व-
ञ्छायां प्राग्वच्छङ्कुरक्षोऽपि चात्र ॥ २३२ ॥

---

१. 'भन्तु' ख. पाठः.

स्वार्धादियुतं ग्राह्यं फलमपि शेषे शनैर्यदासक्तिः।
ऊर्ध्वाधोगमनं चेच्छैघ्याद्युक्त्या दलाद्यूनम् ॥ २३३ ॥
अन्तरमथवा बाह्वोः केवलमथवा द्विगुणमपि दलिता(?)।
छायायां स्वर्णं स्यादवशिष्टफलं प्रसाध्यमिह यस्मात्॥
कोणगतेऽर्के छायाकर्णस्य समे स्मृते भुजाकोटी।
छायावर्गार्धपदं तस्मान्मानं तदा भुजाकोट्योः ॥
पूर्वापरायता स्यात् कोटिर्याम्योदगायतात्र भुजा।
छाया कोटिसमा स्यात् पूर्वापरगा द्विवृत्तकोटिरपि ॥
खार्कान्तरकालज्या पूर्वापरगा भवेद् घटीवृत्ते।
नतसंज्ञितनाडीनां जीवेति च कथ्यते तदा सैव-॥ २३७॥
नतजीवया यदि स्याद् द्युवृत्तकोटिस्तदा भवेत् कियती।
त्रिभजीवयेति भवति द्युज्यावृत्तस्य चात्र विष्कम्भः ॥
स्वाहोरात्रार्धादिह साध्या क्रान्तिर्भुजा धनुःक्रान्तेः।
तद्धनुरिह भानुः स्यात् तद्रहितं मण्डलार्धमथवार्कः ॥
अथ याम्ये गोले स्याच्चक्रार्धं तद्धनुर्युतं भानुः।
तद्धनुरूनं चक्रं वार्को दिवसद्वयप्रभा मानात्॥ २४० ॥
अविशेषकर्मणाक्षज्यात्र च साध्या प्रभा भुजादिवशात्।
क्रान्तिः केनापि युता सूर्याग्रेत्यत्र कल्प्यते प्रथमम्[1] ॥
समविदिशोः सूर्याग्रच्छायाबाह्वोः क्रमाद् वियोगयुती।
शङ्कघ्नं तच्छङ्कोर्वर्गैक्यं (च) द्युमण्डलज्येष्टा ॥ २४२ ॥

---

१. 'क्का' क. ग. पाठः. २. 'मः।' ख. पाठः.

त्रिज्या शङ्कुग्रहता भक्तेष्टद्युज्यया पलज्या स्यात्।
पलतो लम्बज्या स्याल्लम्बापमतो भवेत् स्फुटार्काग्रा॥
पुनरपि कुर्याच्छाया बाहुदिनेशाग्रयोर्वियोगादि[1]।
शङ्कुग्रेष्टद्युज्ये पलजीवालम्बजीवकैऽर्काग्रा[2]॥ २४४॥
अविशेषान्तामिहैवं स्फुटा विशिष्टा भवेत् पलज्यात्र।
अत्रोदाहरणं—

छायाद्यङ्गरसैकसंमितनरस्योक्ता नवैकाब्धिभि-
स्तुल्या रुद्रदिशं गते दिनपतौ व्योमार्कयोश्चान्तरे।
प्राणा भूधरवेदबाणनयनैरब्ध्यंशकैः संमिता
वाच्योऽर्कश्च पलं त्वया गणितविद्! गोले कृतश्चेच्छ्रमः॥

अथ याम्यगोले उदाहरणं—

शङ्कोरेकदशांशकं रसवियच्चन्द्रांशकं च त्यजे-
च्छङ्कोः शेष इह प्रभा दिनपतौ याते कृशानोर्दिशम्।
प्राणाश्चार्कनतोद्भवा रसधरा रन्ध्रक्षमाभिः समा
ब्रूहि प्राज्ञ! दिवाकरं पलमपि त्वं गोलवित् स्या(द्य? य)दि॥

इष्टदिक्स्थे सवितर्यप्यनेन न्यायेन सकलं साध्यम्।
वृत्ते कुमध्यकेन्द्रे निजकक्ष्यासंमिते भ्रमन्ति खगाः।
द्रष्टा कुपृष्ठगः स्यात् कुपृष्ठमध्यं ततोऽस्य दृग्वृत्तम्॥
क्षितिजाद् भूमध्यगताद् भूव्यासार्धान्तरे भवेदूर्ध्वम्।
द्रष्टुः स्वीयं क्षितिजं यस्मात् तत्रोदयोऽस्य चास्तमयः॥

---

१. 'दिम्।' ख. पाठः. २. 'को' क. ग. पाठः.

भूमध्यात् क्षितिजस्थो विहगो द्रष्टुर्भवेदधः क्षितिजात् ।
भूव्यासार्धमिताधो गतिश्च सा तस्य लम्बनमिहोक्तम् ॥
भूमध्यस्योर्ध्वगतं विहगं द्रष्टा च पश्यति स्वोर्ध्वम् ।
तस्मात् खमध्यसंस्थे विहगे न तु लम्बनं भवेत् तस्य ॥
न स्यान्नभसो मध्ये क्षितिजे स्याल्लम्बनं परं यस्मात् ।
दृग्ज्यातः साध्यं स्यादनुपातालम्बनं खगस्य ततः ॥
त्रिज्यान्तरे खमध्याद् भूव्यासार्धं यदि स्वकक्ष्यायाम् ।
दृग्ज्यान्तरे तदा किं स्यादिति तत् काललम्बनं भवति ॥
लम्बनयोजनमाने तुल्येऽप्यत्रैकलिप्तिकास्थानात् ।
लम्बनलिप्ता भिन्नाः कक्ष्याभेदाद् भवन्ति विहगानाम् ॥
लम्बनयोजनमानं निजकक्ष्यायामियत् खगस्य यदि ।
त्रिज्यावृत्ते स्यात् कियदिति लम्बनलिप्तिकामितिर्भवति ॥
त्रिज्यामण्डलमुदितं लिप्तासमयोजनं ततोऽत्राप्तम् ।
योजनफलमपि लिप्ताफलं भवेन्नामभेद एव यतः ॥
एककलास्थान् विहगान् पश्यति तस्मात् कुदृष्टगो द्रष्टा ।
भिन्नस्थानाच्छीघ्रस्तत्राधःस्थोऽल्पभुक्तिरूर्ध्वगतः ॥
निजलम्बनान्तरसमं ग्रहयोर्विवरं तदाधऊर्ध्वगतम् ।
द्रष्टा पश्यति यस्मादुभयोरपि लम्बनं निजं भवति ॥
निजनिजलम्बनलिप्तात्स्वात्स्वाच्छङ्कोर्विशोध्य शिष्टं तु ।
भूपृष्ठे स्फुटशङ्कुः स्वीयः स्यादिति च सिद्धमत्र भवेत् ॥
छेद्यकदृश्यमिदं स्याद् विलिखेद् वृत्तं भुवोऽथ तन्मध्यम् ।
केन्द्रं कृत्वा स्वं स्वं कक्ष्यासूत्रं लिखेत् सदिक्सूत्रम् ॥

केन्द्रं कृत्वा याम्योदक्सूत्रकपरिधियोगमथ विलिखेत्।
वृत्तं त्रिज्यासूत्रेणैतद् दृङ्मण्डलं सदिक्सूत्रम् ॥
भागैरङ्कितमथवा घटिकाभिः सर्ववृत्तामिह कार्यम्।
याम्योदक्सूत्रमिह प्रकल्प्यमधऊर्ध्वयातसूत्रमिति ॥
कक्ष्यावृत्ते स्वीये यतमे भागे ग्रहस्तदा चरति।
दृङ्मण्डलेऽपि ततमे भागे कुर्यात् खगर्क्षबिन्दुमिह ॥
कक्ष्यापरिधिगखेचरदृङ्मण्डलकेन्द्रगस्य सूत्रस्य।
दृङ्मण्डलपरिधियुतौ बिन्दुं ग्रहसंज्ञितं पुनः कुर्यात् ॥
अनयोः खगर्क्षखेचरसंज्ञितबिन्दोर्यदन्तरालं स्यात्।
लम्बनलिप्तामानं तद् भवति हि खेचरस्य तदा॥२६५॥
कक्ष्याव्याससमे द्वे सूत्रे दिग्वृत्तमध्यतो नेये।
बिन्दुद्वयगे च तयोः शिरोन्तरं लम्बयोजनस्य मितम्॥
दृङ्मण्डल एव स्याद् विहगाभिमुखे विलम्बनं सततम्।
लम्बनमिति दृग्भेदो दृष्टिर्द्रष्टुः खगानुगा च यतः ॥२६७॥
कर्णात्मकमुक्तमतो लम्बनमपमानुगा तु तस्य नतिः।
बाहुस्तदितरगा स्यात् कोटिग्रहणे विलम्बननती ते ॥
लम्बनमित्यपमगतिग्रहणे विहगस्य कल्प्यते गणकैः।
नतिरिति च स्वाद्यपमाद् विक्षेपस्ते ततो भुजाको(टि?टी)।
दृक्क्षेपगुणात् साध्या कोटिर्बाहुस्तु दृग्गतिज्यातः।
दृग्ज्यादृक्क्षेपज्याकृतिविवरपदं हि दृग्गतिज्योक्ता ॥

---

१. 'टिः।' क. ग. पाठः.

शून्ये सति दृक्क्षेपे लम्बनमपमण्डले स्थितं सर्वम् ।
अपमण्डलमेव तदा यस्माद् दृङ्मण्डलं ग्रहाभिमुखम् ॥
त्रिगुणसमे दृक्क्षेपे लम्बनमपमस्य पार्श्वगं निखिलम् ।
दृङ्मण्डलस्य मध्ये यस्माद् रज्ज्वावदपमवृत्तमिह ॥
दृक्क्षेपाभिधकोट्या वृद्धिवशात् स्यादतोऽत्र नतिवृद्धिः ।
++दृग्गतिबाहोर्वृद्धिवशाल्लम्बनस्य वृद्धिरपि ॥ २७३ ॥
भूमिव्यासार्धहताद् दृक्क्षेपाद् दृग्गतेश्च ये लब्धे ।
त्रिज्याभिधकर्णेन क्रमशो नतिलम्बयोजनमिती ते ॥
योजनकर्णे योजनमेतावच्चेत् कियत् त्रिगुणकर्णे ।
इति नतिलम्बनयोरिह साध्या लिप्तात्मिका मितिश्चापि ॥
दृग्गतिदृक्क्षेपज्ये दृग्ज्याकर्णस्य बाहुकोटी चेत् ।
लम्बनकर्णस्य तु के इति वा ग्रहणोक्तलम्बननती स्तः ॥
योजनकर्णे भानोः पञ्चाहीष्वङ्कबाणजलधिसमः ।
इन्दोर्योजनकर्णः पर्वतनगरामवेददहनसमः ॥ २७७ ॥
अविशेषकर्णनिहतौ[1] त्रिज्याभक्ताविमौ स्फुटौ भवतः ।
नीचोच्चभागगोऽस्मादध उपरि चरेद् यतो ग्रहः स्थानात् ॥
व्योमेन्दूदधिवेदैस्तुलितो भानोर्विधोस्तिथिज्वलनैः ।
खेषुखविधुभिर्भूमेर्व्यासो बिम्बस्य योजनैः प्रोक्तः ॥
बिम्बव्यासावुदितौ रविशशिनोस्त्रिगुणतापि तौ च तयोः ।
स्फुटयोजनकर्णाभ्यां विहृतौ लिप्तात्मकौ स्फुटौ भवतः ॥

---

१. 'नीतौ' क. ग. पाठः.

स्वाधःस्थितेन शशिना छादनमुदितं रवेर्निजं ग्रहणम्।
कक्ष्याभेदादनयोः प्रतिदेशं छादनं रवेर्भिन्नम्॥
निजमार्गगभूच्छायाप्रवेश इन्दोर्निजं ग्रहणमुक्तम्।
तमसि प्रविष्ट इन्दुः सर्वत्रैकप्रकार एव भवेत्॥ २८२॥
तमसा बाध्यश्चन्द्रः कथमिति चेदुच्यते तमोहन्ता।
भानोः करा हि शशिनः करास्ततस्तमसि ते कथं स्युरिति॥
तेजःसूत्रं यस्मिन् पतति स्थानं हि तत् प्रकाशयुतम्।
तेजस्सूत्रविहीनं स्थानं तमसावृतं भवेन्निखिलम्॥
यत्र रविर्भूच्छन्नस्तत्रस्थतमो भवेत् क्षितिच्छाया।
तस्या मानं साध्यं छायायुक्त्या प्रदर्श्यते चात्र॥ २८५॥
शङ्कुरिनाङ्गुलतुल्यस्तद्विगुणसमोन्नतिः प्रदीपस्य।
शङ्कुप्रदीपविवरे भूः शङ्कुमितात्र चिन्त्यते छाया॥ २८६॥
दीपात् प्रवृत्तसूत्रं शङ्कुशिरस्स्पृक् पतेत् क्षितौ यत्र।
छायाग्रं तत्र भवेच्छङ्कोः सूत्रं च कर्णसंज्ञं तत्॥ २८७॥
छायाग्रकर्णमूलान्तरभूर्बाहुस्तु शङ्कुकोट्या स्यात्।
छायाग्रदीपमूलान्तरभूर्बाहुः प्रदीपकोट्याश्च॥ २८८॥
शङ्कुनदीपकोट्या बाहुः शङ्कुग्रदीपविवरगतः।
कर्णस्तु बाहुकोट्योरग्रद्वयविवरगं भवेत् सूत्रम्॥ २८९॥
शङ्वादीपकोट्या बाहुश्चेच्छङ्कुदीपविवरभुवा।
तुल्यस्तोऽत्र शङ्कुकोट्योः को बाहुरिति प्रभा भवेच्छङ्कोः॥

---

१. 'ब्योः' ख. पाठः.

रविबिम्बव्यासार्धं दीपो भूव्यासदलमिह तु शङ्कुः।
स्फुटयोजनकर्णः स्याद् भानोः शङ्कुप्रदीपविवरजभूः॥

अत्रोदितस्य शङ्कोर्या छाया सा भवेत् क्षितिच्छाया।
वृत्ता सा भूमिसमा मूलेऽल्पा शिरसि पुच्छवत् साग्रे॥

रविपरिधिनिर्गतानां सूत्राणां यत्र भूपरिधिगानाम्।
संयोगो व्योम्नि भवेद् भूच्छायाया भवेच्छि तत्राग्रम्॥

स्फुटयोजनकर्णोऽतो भानोर्भूव्यासताडितोऽर्कभुवोः।
व्यासान्तरेण भक्तो भूच्छायादैर्घ्ययोजनमितिः स्यात्॥

इच्छाराशेरत्र द्वैगुण्याज्जायते न फलभेदः।
यस्माद् द्वाभ्यां निघ्नः प्रमाणराशिश्च परिगृहीतोऽत्र॥

स्फुटयोजनकर्णोनादिन्दोर्भूव्यासताडिताल्लब्धम्।
छायादैर्घ्यं छायादैर्घ्येण व्यासमानमिह तमसः॥ २९६॥

तमसो व्यासस्त्रिज्यानिहतश्चन्द्रस्य योजनश्रुत्या।
विहृतस्तमसो बिम्बं कलात्मकं भवति शिशिरकरमार्गे॥

छायादैर्घ्यं शशिनः स्फुटयोजनकर्णविवररहितं यत्।
शशिमार्गादूर्ध्वगतच्छायाभागस्य दैर्घ्यमानं तत्॥२९८॥

छायाग्रात् तद्दैर्घ्यान्तरे कुतुल्यो हि भवति तद्व्यासः।
शशिमार्गोर्ध्वगताशान्तरे तदा स्यात् क इति तमोव्यासः॥

यदि शशिकक्ष्यायां स्यादेतावान् कस्तदा त्रिगुणवृत्ते।
इति तमसो बिम्बं स्यात् कलात्मकं शिशिरदीधितेर्मार्गे॥

छाद्यच्छादकविवरक्षेत्रं तद्बिम्बदलयुतेरूनम्।
यावत् तावद् ग्रहणं ततोऽधिके दृश्यते ग्रहः सकलः॥
इत्युदिता संक्षेपादस्माभिर्गोलदीपिका य इमाम्।
पुरुषः पठेत् स लोके गोलविदां गण्यते नृणां मध्ये॥३०२॥

इति गोलदीपिका समाप्ता।

शुभं भूयात्।

Ready for sale.

	Rs.	As.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa.	0	4	0
No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita.	2	0	0
No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary.	2	12	0
No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva.	2	0	0
No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî.	2	4	0
No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10 — मातङ्गलीला-(Gajalakshaṇa) by Nîlakaṇṭha.	0	8	0
No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

No. 14 — नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya. 3 8 0

No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second edition) 1 8 0

No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa. 1 8 0

No. 17—पञ्चरात्रम् (Do.) Do. 1 0 0

No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya. 4 0 0

No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita. 1 4 0

No. 20—अविमारकम् (Nâtaka) by Bhâsa. 1 8 0

No. 21—बालचरितम् (Do.) Do. 1 0 0

No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa 1 8 0

No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1 & 2 Kâṇḍas) 1 12 0

No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. 1 0 0

No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri 0 12 0

No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa 0 12 0

No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1 & 2 Sargas) 1 12 0

No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas 0 8 0

No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda) 2 4 0

No. 30—वास्तुविद्या (Silpa) 0 12 0

No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kâṇḍas) 1 0 0

No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivaraṇa of Nârâyaṇa Paṇdita (Part II. 3rd, 4th & 5th Sargas) 2 8 0

No. 33—वाररुचसंग्रहः (Vyâkaraṇa) with the commentary Dîpaprabhâ of Nârâyaṇa 0 8 0

No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin 1 4 0

No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha 1 8 0

No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivaraṇa of Nârâyaṇa Panditah (Part III. 6th, 7th & 8th sargas) 3 0 0

No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary 0 4 0

No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda) 2 0 0

No. 39—चारुदत्तम् (Nâtaka) by Bhâsa 0 12 0

No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Srî Mankhuka and its commentary by Samudrabandha 2 8 0

No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivaraṇa of Srî Sankara Bhagavat Pada 0 4 0

No. 42—प्रतिमानाटकम् (Nataka) by Bhâsa 1 8 0

No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and Tikasarvaswa of Vandyaghatiya-Sarvananda (Part II. 2nd Kanda 1—6 Vargas) 2 8 0

No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakaṇtha Dîkshita	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishṇânanda Sarasvatî. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara	0	4	0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

TRIVANDRUM SANSKRIT SERIES

No. LIV.

10

स्फोटसिद्धिन्यायविचारः ।

THE

SPHOTASIDDHI NYÂYA VICHÂRA.

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.



2x-m-5

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917.

(*All Rights Reserved.*)

TRIVANDRUM SANSKRIT SERIES

No. LIV.

THE

SPHOTASIDDHI NYÂYA VICHÂRA.

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVAN_____
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917.

(*All Rights Reserved.*)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५४.

स्फोटसिद्धिन्यायविचारः ।

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधितः ।

स च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराज
राजकीयमुद्रणयन्त्रालये तदध्यक्ष
मुद्रयित्वा प्रकाशितः ।

कोल्लम्वाब्दः १०९२,

PREFACE.

Sphotasiddhinyâyavichâra is a treatise on Vyâkarana. It deals with the doctrine of Sphota recognised by grammarians, on the method adopted by Mandanamisra and Bharatamisra in their works known as Sphotasiddhi.

The work was edited with the help of a palm-leaf manuscript in Malayalam character belonging to Mr. Panthalam Raja, which does not reveal the name of the author.

Trivandrum,
9th April 1917.

T. GANAPATI SÂSTRÎ.

निवेदना ।

अयं स्फोटसिद्धिन्यायविचारो नाम व्याकरणग्रन्थः । वैयाकरणै-रभ्युपगतं स्फोटाख्यं शब्दतत्त्वं श्रीमण्डनमिश्रभरतमिश्रप्रणीतस्फोटसिद्धि-ग्रन्थोपदर्शितया दिशात्र स्थाप्यते । ग्रन्थकर्तुस्तु नामधेयं न दृष्टम् ।

पन्तलराजसंबन्धिनं केरलीयलिपिं तालपत्रग्रन्थमाश्रित्यायं संशो-धितः ॥

अनन्तशयनम् ।
९–४–१९१७. ।

न. गणपतिशास्त्री.

॥ श्रीः ॥

स्फोटसिद्धिन्यायविचारः ।

प्रणिपत्य गणाधीशं गिरां देवीं गुरूनपि ।
मण्डनं भरतं चापि मुनित्रयममुं हरिम् ॥ १ ॥

अथ प्रत्यक्षतोऽर्थापत्त्यागमाभ्यामपि स्फुटम् ।
वर्णेभ्यो व्यतिरेकेण शब्दतत्त्वं प्रसाध्यते ॥ २ ॥

अस्ति तावद् गकारादिवर्णबुद्धिविलक्षणम् ।
गौरित्यादिषु विज्ञानमेकं पदमिति स्फुटम् ॥ ३ ॥

न चास्य विषयो वर्णास्तेषु नैकत्वधीर्भवेत् ।
न च तत्समुदायोऽपि क्रमिकत्वादसम्भवात् ॥ ४ ॥

न चैकस्मृत्युपारोहात् समुदायस्य सम्भवः ।
वर्णेषु क्रमबुद्धेषु युगपत् स्मृत्यसम्भवात् ॥ ५ ॥

सम्भवेऽपि च तेष्वेव विपरीतक्रमेष्वपि ।
गकारादिषु विज्ञानं गौरित्येकं प्रसज्यते ॥ ६ ॥

G. P. T. 2301. 500. 23-7-1092. B

वर्णस्वरूपसाम्भिन्नं पदज्ञानमितीयता ।
तदालम्बनतैवास्येत्येतदप्यसमञ्जसम् ॥ ७ ॥

यथा ह्यवयविज्ञानं नैवावयवगोचरम् ।
तत्स्वरूपानुविद्धत्वेऽप्येवं गौरिति धीरपि ॥ ८ ॥

अथ तत्रावयव्येकः प्रतीतिमधिरोहति ।
इहाप्यनुभवारूढं कथमेतदपोद्यते ॥ ९ ॥

तदेवम्भूतविज्ञानप्रामाण्यादस्ति तत् पदम् ।
व्यतिरेकेण वर्णेभ्य इति तावन्निरूपितम् ॥ १० ॥

किञ्चाभिधेयधीहेतुभावोऽपि खलु युज्यते ।
तस्यैव न तु वर्णानां तद्बुद्ध्यनुदयात् ततः ॥ ११ ॥

तत्र तावद् गकारादेरेकैकस्मान्न वाच्यधीः ।
उदेति यदि चेदस्ति प्रथमेनैव गादिना ॥ १२ ॥

वर्णेनोच्चरितेनेह गवाद्यर्थाभिधानतः ।
उच्चारणं द्वितीयादिवर्णानां स्यान्निरर्थकम् ॥ १३ ॥

तदुच्चारणसामर्थ्यं नैकैकस्मात् ततोऽर्थधीः ।
समुदायोऽपि वर्णेषु क्रमज्ञातेष्वसम्भवी ॥ १४ ॥

नानावक्तृप्रयुक्तेभ्यो न च सा दृश्यतेऽर्थधीः ।
यौगपद्येऽपि वर्णेभ्यो नापि क्रमविपर्यये ॥ १५ ॥

तस्मादसम्भविन्येभ्यो वर्णेभ्यो वाच्यधीः कथम् ।
स्वनिमित्ततया तेभ्यः कल्पयत्यपरं पदम् ॥ १६ ॥

ननु दृष्टं परित्यज्य सर्वथादृष्टमार्गणम् ।
कुर्वन् मृगयसे नूनं पिपासुर्मृगतृष्णिकाम् ॥ १७ ॥

तस्मात् सर्वजनीनेषु वर्णेष्वेवार्थसङ्गतिः ।
मृग्यतां निजराद्धान्तरागानाकुलया धिया ॥ १८ ॥

वर्णेभ्यो यदवस्थेभ्यो दृश्यते नाभिधेयधीः ।
तदवस्थास्तु मा भूवन् काममर्थस्य बोधकाः ॥ १९ ॥

यद्विशेषविशिष्टेभ्यस्तेभ्यः सैषोपजायते ।
तद्विशेषजुषां तेषां बोधकत्वमुपेयताम् ॥ २० ॥

अदृष्टं परिकल्प्यालं दृष्टात् कार्यस्य सङ्गतेः ।
सत्यमायुष्मता दृष्टो विशेषोऽत्र मनाग् यदि ॥ २१ ॥

उपाकरिष्यद् वर्णेभ्योऽप्युदपत्स्यत वाच्यधीः ।
इदं तावद् भवानद्य प्रष्टव्यो मतिमत्तमः ॥ २२ ॥

एकत्वेऽप्यन्त्यवर्णस्य गौरित्यादाविहार्थधीः ।
भिद्यते स तु भेदोऽत्र कस्मादित्यथ मन्यसे ॥ २३ ॥

सहायभेदाद् भेदः स्यादिति नेह सहायता ।
कार्ये व्याप्रियमाणस्य सहायत्वं हि दृश्यते ॥ २४ ॥

असतां पूर्ववर्णानां तदानीं व्यापृतिः कथम् ।
असतामपि साहाय्यं वर्णानां यदि विद्यते ॥ २५ ॥

केवलान्त्यप्रयोगेऽपि भवेदेवाभिधेयधीः ।
केवलान्त्यप्रयोगे तु तदन्येषामजन्मतः ॥ २६ ॥

उदेति नार्थधीः सर्वप्रयोगे तूदयं व्रजेत् ।
जनित्वोपरमात् पूर्ववर्णानामित्यसङ्गतम् ॥ २७ ॥

अजातानन्वयध्वस्तवस्तुनोर्न भिदा यतः ।
तस्माद् दृष्टेषु वर्णेषु वाच्यधीगत्यसम्भवात् ॥ २८ ॥

न तेषामभिधातृत्वमिति निश्चिनुमो वयम् ।
नन्वेवमपि ये केचिदभिदध्युर्विपश्चितः ॥ २९ ॥

वर्णानामभिधातृत्वमवष्टभ्य विधान्तरम् ।
यथा कर्माणि दर्शादीन्यपूर्वपरिकल्पनात् ॥ ३० ॥

क्रमवत्त्वेऽपि सम्भूय जनयन्ति फलं तथा ।
प्राचीनवर्णानुभवसंस्कारसहितोऽन्तिमः ॥ ३१ ॥

वर्णोऽभिधेयधीहेतुरित्येतत् किं न युज्यते ।
वर्णानुभूतिसम्भूतसंस्कारान्नाभिधेयधीः ॥ ३२ ॥

इति पर्यनुयोगोऽपि नावकाशं न वाञ्छति ।
स्मृतिहेतोस्तु संस्कारात् संस्कारोऽयं विलक्षणः ॥३३॥

इहाभिधेयधीहेतुभावमस्याभिदध्महे ।
सामर्थ्यमेव संस्कारशब्देनेह विवक्षितम् ॥ ३४ ॥

वर्णानामभिधेयावबोधोत्पादनलक्षणम् ।
स्वरूपस्यैव वर्णानामुपलब्धेरनन्तरम् ॥ ३५ ॥

तद्विरुद्धस्वरूपेतरानुभूतिवशात् क्षतिः ।
सामर्थ्यं त्वविरुद्धान्यसामर्थ्योपहितोदयम् ॥ ३६ ॥

स्थितमेवार्थबोधैकस्वफलप्रसवावधि ।
तस्मात् प्रत्यक्षतः सिद्धा वर्णा ये च परस्परम्॥३७॥

स्वसामर्थ्यवशाद् युक्ता बोधयन्त्यर्थमञ्जसा ।
एतदप्याभिधातव्यं न परीक्षकसंसदि ॥ ३८ ॥

अविचारितचारुत्वादिति मन्यामहे वयम् ।
सामर्थ्यं नाम कार्यैककल्प्या शक्तिरिहाश्रिता ॥ ३९ ॥

कार्यस्यादर्शने सैषा कथं कल्पनमर्हति ।
इहाभिधेयधीः कार्यमन्त्यवर्णादनन्तरम् ॥ ४० ॥

दृश्यते तेन तस्यैव सामर्थ्यं परिकल्प्यते ।
सन्निधावेव पूर्वेषामन्त्यवर्णादिहार्थधीः ॥ ४१ ॥

इति तच्छक्तिजनकं सामर्थ्यमितरेष्वपि ।
इति चेत् सन्निधिः कोऽयमेषामायुष्मतो मतः॥४२॥

अद्याप्यस्मत्प्रयत्नोऽयं यदभावान्न हीयते ।
तत्र त्वकालविच्छिन्नं पौर्वापर्यं हि सन्निधिः॥ ४३॥

आकालिकानां वर्णानामिति यद्यभ्युपेयते ।
पौर्वापर्यं हि तत् पूर्वापरकालनिविष्टता ॥ ४४ ॥

वर्णानां नियतस्तत्र कालविच्छेदसम्भवः ।
उपकार्योपकारित्वं तेषामेवोपपद्यते ॥ ४५॥

अन्योन्यशक्तिसंवादात् समकालभुवो हि ये ।
परस्परानुसन्धानरहितास्ते पृथक् पृथक् ॥ ४६ ॥

ज्ञाता वर्णाः कथं तेषामुपकार्योपकारिता ।
अधिष्ठाय समर्थं हि सामर्थ्यं कार्यसाधकम् ॥ ४७ ॥

अर्थवुद्ध्युपकारित्वं केवलस्य ततः कथम् ।
दर्शादिषु त्वपूर्वस्य कल्पनं युज्यते विधेः ॥ ४८ ॥

शब्दैरर्थाभिधानं तु न वैधमिति सम्मतम् ।
यस्त्वात्मनिष्ठः संस्कारो वासनाख्यः स्मृतिप्रदः॥४९॥

प्रागेवोपेक्षितस्तस्य नार्थधीहेतुतेत्ययम् ।
वर्णानुभवजस्यास्य वाच्यधीहेतुता यदि ॥ ५० ॥

तदानुभूय संस्कारसनाथचरमश्रुतेः ।
स्मृतिप्रत्यक्षरूपैका धीरुदेतीत्यसङ्गतम् ॥ ५१ ॥

युगपद्धि द्वयोत्पत्तेरसङ्गतिरिति स्थितिः।
उपान्त्यस्मरणान्त्यानुभवयोरेककालता ॥ ५२ ॥

न चोपपद्यते तस्माद् वर्णेभ्यो नार्थधीगतिः।
अथेदृग्दोषसंस्पर्शशङ्कावैधुर्यबन्धुरः ॥ ५३ ॥

वर्णानां वाचकत्वेऽन्यः प्रकारोऽन्यैर्निरूप्यते।
प्रत्येकमभिधातृत्वं वर्णानां नाभ्युपेयते ॥ ५४ ॥

किन्तु तत्समुदायस्य नापाद्यस्तदसम्भवः।
यद्यप्युच्चारणाधीनवर्णानुभवभाविताः ॥ ५५ ॥

भावना भावयन्त्येकं विज्ञानं स्मृतिलक्षणम्।
तत्र प्रकाशमानानां वर्णानामुपपद्यते ॥ ५६ ॥

संघीभावस्ततस्तेषामभिधातृत्वनिश्चयः।
परस्परानपेक्षत्वाद् वर्णानुभवभावनाः ॥ ५७ ॥

जनयन्ति न सम्भूय स्मृतिरूपैकसंविदम्।
इति पर्यनुयोगोऽयं नावतारमिहार्हति ॥ ५८ ॥

उच्चारणपराधीना वर्णानामनुभूतयः।
युगपत् सकलान् वर्णान् प्रकाशयितुमक्षमाः ॥ ५९ ॥

युगपद् बुद्धसकलवर्णसाध्येऽर्थधीफले।
उपायतामगच्छन्त्यः प्रेरयन्ति स्वभावनाः ॥ ६० ॥

तदुपायत्वसिद्ध्यर्थमेकस्मरणसाधने ।
ननूद्बोधकसापेक्षा भावनाः स्मृतिहेतवः ॥ ६१ ॥

न चेह भावनोद्बोधहेतुः कश्चन विद्यते ।
मैवं यत्रानुभूतीनां फलेन चरितार्थता ॥ ६२ ॥

तत्रानुषङ्गसिद्धत्वाद् भावनाः स्मरणं प्रति ।
उद्बोधकमपेक्ष्यैव समर्थाः सहकारिणम् ॥ ६३ ॥

अत्र स्यादनुभूतीनां न साक्षात् फलयोगिता ।
इति तत्प्रेरितास्त्वन्यनिरपेक्षाः स्वभावनाः ॥ ६४ ॥

स्फुटं तत्फलसम्पत्तिसमर्थं स्मृतिलक्षणम् ।
जनयन्त्येकविज्ञानमित्येकस्मृतिसम्भवः ॥ ६५ ॥

तत्र सम्भूय संक्रान्ता वर्णा एवार्थबोधकाः ।
मिथ्यैतत् क्रमबुद्धेषु स्मृतिः क्रमवतीति यत् ॥६६॥

शतं विंशतिरित्यादौ युगपत् स्मृतिदर्शनात् ।
अस्त्येवाबालवनितावृद्धमेषानुभूतितः ॥ ६७ ॥

एकैकवर्णानुभवसमनन्तरभाविनी ।
प्रख्यैका धृतनिश्शेषवर्णदर्पणतानिता ॥ ६८ ॥

तत्पूर्वं क्रमबुद्धेषु वर्णेषु यदनन्तरम् ।
यौगपद्येन विज्ञानं तदर्थज्ञानकारणम् ॥ ६९ ॥

इत्यास्थेयमनिच्छद्भिरपि स्वानुभवात् परैः ।
अतस्तेषां प्रयत्नोऽयमजाकण्ठस्तनायते ॥ ७० ॥

ततोऽभिधेयावबोधहेतुभावोपपत्तये
मृग्य वर्णातिरेकेण न वाक्तत्त्वमिहेत्यलम् ॥ ७१ ॥

एतत् सर्वं स्वराद्धान्तरागाकुलितचेतसाम् ।
महामोहविलासानामुपर्युपरि जृम्भितम् ॥ ७२ ॥

यदभ्यधायि विज्ञानमेकं स्मरणलक्षणम् ।
अनेकवर्णविषयं नैव सम्बोभवीति तत् ॥ ७३ ॥

न ज्ञेयगतमेकत्वं विना ज्ञानैक्यसम्भवः ।
ज्ञानस्य खलु सर्वत्र ज्ञेयाकारानुपातिता ॥ ७४ ॥

यत्र ज्ञेयस्य भिन्नत्वेऽप्येकविज्ञानदर्शनम् ।
एकजात्यादिसम्बन्धात् तत्र सङ्घाघटीति तत् ॥७५॥

न च वर्णेषु शब्दत्वं विनैका जातिरिष्यते ।
एकबुद्धिनिमित्तत्वं तस्य यद्यभ्युपेयते ॥ ७६ ॥

अतिप्रसङ्गो दुर्वारस्तस्य सर्वत्र सङ्गतेः ।
न दरीदृश्यते वर्णेष्वेकः साधारणो गुणः ॥ ७७ ॥

गकारादिषु भिन्नेषु येनैकज्ञानसम्भवः ।
एकार्थबोधकत्वात् स्यादेकविज्ञानवेद्यता ॥ ७८ ॥

वर्णानामप्यनेकेषामिति यद्यभ्युपेयते ।
एकार्थबोधहेतुत्वसिद्ध्यर्थं हि निरूप्यते ॥ ७९ ॥

एक वर्णेषु विज्ञानमित्यन्योन्याश्रयं भवेत् ।
अतः कथञ्चिदप्येकं विज्ञानं वर्णगोचरम् ॥ ८० ॥

नार्हतीह समाधानमुपपत्तिपरिक्षयात् ।
अङ्गीकृत्य तथाप्येतद् दूषणान्तरमुच्यते ॥ ८१ ॥

यदैकस्मृत्युपारोहो वर्णानामभ्युपेयते ।
तत्रत्ययौगपद्यं स्यात् तदार्थज्ञानकारणम् ॥ ८२ ॥

तुल्यत्वाद् यौगपद्यस्य तदा नार्थधियो भिदा ।
सरोरसनदीर्दीनजराराजादिषु स्फुरेत् ॥ ८३ ॥

क्रमस्याप्युपकारित्वात् तद्भेदाद् यदि सा स्फुरेत् ।
नोपकार्योपकारित्वं दृष्टं क्वापि विरुद्धयोः ॥ ८४ ॥

किञ्च कोऽयं क्रमो नाम स्वतन्त्रोऽसौ न दृश्यते ।
परतन्त्रोऽपि कालस्य वस्तूनामुत तद्गताम् ॥ ८५ ॥

नाद्यः स्वाभाविकस्तस्य क्रमो नैकस्य युज्यते ।
औपाधिकोऽयमिति चेदिदं तर्ह्युपवर्ण्यताम् ॥ ८६ ॥

उपाधयोऽक्रमाः किं स्युरथवा सक्रमा इति ।
न तावदक्रमास्तेषां स्यात् क्रमोपाधिता कथम् ॥

सक्रमत्वे ह्युपाधीनां स्वतो वायं क्रमो भवेत् ।
कालाद्वा न स्वतस्तत्र व्यर्था स्यात् कालकल्पना ॥

कालात् तु यद्युपाधीनां सक्रमत्वमुपेयते ।
तत्र कालादुपाधीनां कालस्योपाधितः क्रमः ॥ ८९ ॥

इत्यन्योन्याश्रयापत्तिरतः कालस्य न क्रमः ।
अथवायुष्मता कालाः कल्प्यन्ते बहवो यदि ॥ ९० ॥

मुहूर्तदिनमासर्तुवत्सरादिविभेदतः ।
ते चापि किमनित्याः स्युर्नित्या वेति निरूप्यताम् ॥

नित्याश्चेत् सर्वकालानां सदा सर्वत्र सन्निधेः ।
सर्वर्तुलिङ्गसाङ्कर्यमक्रमत्वं च जायते ॥ ९२ ॥

अनित्या यदि तेषां किं कालान्तरकृतः क्रमः ।
स्वतो वा तत्र कालान्तराधीनत्वं न युक्तिमत् ।

तत्क्रमस्यापि कालान्तराधीनत्वेऽनवस्थितेः ।
स्वतश्चेदस्तु वस्तूनां परं (वा? स्वा)भाविकः क्रमः ॥

न वृथा कल्प्यतां कालस्तत्क्रमो वा तपस्विभिः ।
एवं तावत् क्रमो नैव कालस्येति प्रतीयते ॥ ९५ ॥

तद्वतामपि वस्तूनां तथैवासङ्गतः क्रमः ।
नित्यत्वं यदि वा तेषामनित्यत्वमुतेष्यते ॥ ९६ ॥

नित्यत्वे न क्रमस्तेषां नित्यत्वादेव युज्यते ।
अनित्यत्वेऽपि वस्तूनां सहकालभुवां पुनः ॥ ९७ ॥

यौगपद्यविरोधेन नान्योन्यापेक्षया क्रमः ।
अतीतानागतापेक्षस्तत्रासहभुवामपि ॥ ९८ ॥

अपेक्ष्यमाणस्याभावात् सम्बोभोति कथं क्रमः ।
अस्तु वायं क्रमो नाम काममन्येषु वस्तुषु ॥ ९९ ॥

तथाप्ययुक्त एवायमभीष्टो वर्णसंश्रितः ।
नित्याश्च विभवो वर्णास्तेषां योयुज्यते ? क्रमः ॥१००॥

न काला नित्यताहेतोर्न देशा विभुतावशात् ।
अनित्यत्वेऽपि वर्णानामुच्चारणविनाशिनाम् ॥ १०१ ॥

अतीतानागतोदन्तविज्ञानविमुखात्मनाम् ।
कथं परस्परापेक्षः क्रमः सञ्जगमीत्ययम् ॥ १०२ ॥

नित्यत्वेऽपि क्रमस्तेषां यदि स्याद् बुद्ध्युपाधिकः ।
मैवं पूर्वधियस्तत्र क्रमिकास्तदुपाधयः ॥ १०३ ॥

तन्नाशादेव नष्टः सन् क्रमोऽसाविह साम्प्रतम् ।
एकस्मृतिसमारूढानास्पदीकुरुते कथम् ॥ १०४ ॥

ऐक्यादलभमानेयं धीरेका स्मृतिलक्षणा ।
स्वयमेव क्रमं तेषु स्वगतेषु कथं नयेत् ॥ १०५ ॥

अथ प्राचीनबुद्ध्युत्थः क्रमो नष्टोऽपि साम्प्रतम् ।
वर्णस्वरूपवत् स्मर्यमाणः सन्नेकधीगतान्॥ १०६ ॥

विषयीकुरुते वर्णानित्येतदसमञ्जसम् ।
प्राक् क्रमानुभवाभावात् पश्चात् तत्स्मृत्यसङ्गतेः ॥

अनुभूतेषु वर्णेषु स्मृतिरूपापि तत्क्रमे ।
अनुभूत्यात्मिकेयं धीरित्येतद् दुर्वचं वचः ॥ १०८ ॥

अतीतत्वात् तथा लिङ्गराहित्यादप्ययं क्रमः ।
प्रत्यक्षादनुमानाद्वा यतो नैवानुभूयते ॥ १०९ ॥

किञ्चायमुपलब्ध्युत्थः क्रमस्तु विषयान्तरे ।
न भेदकतया दृष्टः पटबुद्धिक्रमो यथा ॥ ११० ॥

(दे?द)शान्तादन्यतो वापि समारभ्यावगन्तृभिः ।
गम्यमाने पटे बुद्धिक्रमभेदे स्फुटे सति ॥ १११ ॥

भिन्नोऽयं पट इत्येवं न कदाचिदुदेति धीः ।
तस्माद् बुद्धिक्रमोऽत्रापि नैव भेदकतामियात् ॥

एवं सति न वर्णेषु कथञ्चिदपि सङ्गतः ।
क्रम सरोरसाद्येषु ततोऽसौ वाच्यभेदधीः ॥ ११३ ॥

क्रमभेदेन दुस्साधैवायुष्मद्भिरतोऽर्थधीः ।
नैकस्मृतिसमारूढवर्णमूलेत्यवस्थितम् ॥ ११४ ॥

ततो नाबाध्यमानैकविज्ञानोदयहेतवः ।
वर्णा नैवाभिधेयावबोधकारणमप्यमी ॥ ११५ ॥

अतः सिद्धमिदं प्रत्यक्षार्थापत्तिप्रमाणकम् ।
व्यतिरेकेण वर्णेभ्यः शब्द(त्व ? त)त्त्वमिति स्थितम् ॥

इत्थं (त्व ? तु)नाभिधातृत्वं लोकसिद्धमपह्नुतम् ।
वर्णानां लौकिकी सिद्धिर्लोकादेवावधार्यते ॥ ११७ ॥

शब्दादर्थं वीजानीम इत्येषा लौकिकी हि वाक् ।
शब्दशब्दो न वर्णेषु व्यवस्थापनमर्हति ॥ ११८ ॥

क्रमेण यौगपद्याद्वा तेभ्यो यस्मान्न वाच्यधीः ।
अतोऽत्रार्थं विजानीम इति वाक्यसमन्वयात् ॥

वर्णातिरिक्तस्फोटात्मन्यसौ वर्तितुमर्हति ।
इति लोकापलापोऽपि केवलं वर्णवादिनाम् ॥ १२० ॥

तत् सिद्धं लौकि(को ? के)ऽपीदमिति सर्वमनाकुलम् ।
अत्राक्षिप्तस्वराद्धान्तयुक्तिभिः पूर्वपक्षिभिः ॥ १२१ ॥

परपक्षसमाक्षेपे प्रयासः क्रियतेऽधुना ।
ननु वर्णातिरेकेण पदं नामाभ्युपेयते ॥ १२२ ॥

अनुभूतिबलात् तत्र कथं तदनुभूयते ।
न तावदेभ्यो वर्णेभ्यः पृथगेतत् प्रतीयते ॥ १२३ ॥

अङ्गुलीभ्यो यथाङ्गुष्ठस्तथाभ्युपगमे सति ।
नानर्थक्यं द्वितीयादिवर्णानामेव केवलम् ॥ १२४॥

सर्वेषामपि वर्णानामुच्चारणमनर्थकम् ।
अथ तैस्तस्य सम्बन्धः कश्चिदभ्युपगम्यते ॥ १२५ ॥

संयोगः समवायो वा तत्राद्यो नापृथक्त्वतः ।
समवायोऽपि नारम्भकृतो वर्णेषु सम्भवी ॥ १२६ ॥

तन्तुष्विव पटस्यात्र नोपलम्भकृतोऽपि सः ।
तथा व्यक्तिषु गोत्वादेरुपलब्धेरसम्भवात् ॥ १२७ ॥

तत् पृथक्त्वापृथक्त्वाभ्यां वर्णेभ्य इह कस्यचित् ।
उपलब्धुमशक्यत्वात् पदं नाम किमास्थितम् ॥ १२८॥

ननु प्रागेवोदघोषि वर्णबुद्धिविलक्षणम् ।
एकं पदमिति ज्ञानमिति यद्यभिधित्ससि ॥ १२९ ॥

नैतद् वास्तवविज्ञानं पदमेकमितीदृशम् ।
व्यपदेशानुवादित्वाद् दारा इति बहुत्ववत् ॥ १३० ॥

पदबुद्धिरियं (नाना)वर्णरूपनिवेशिनी ।
तद्वर्णव्यतिरेकेण पदमेतन्न सिध्यति ॥ १३१ ॥

अत्र सम्प्रति साधीयःसमाधिमभिदध्महे ।
शब्दस्वरूपमेवैकं पदमित्यवभासते ॥ १३२ ॥

अनुभूत्यनुसन्धानादेकः शब्द इतीदृशात् ।
तत्र वर्णावभासोऽयं नान्तरीयक इष्यते ॥ १३३ ॥

गोत्वावगमवेलायां तद्व्यक्तिप्रतिभानवत् ।
ननु तत् तत्र युक्तं स्याद् *व्यङ्ग्यव्यञ्जकता यतः॥१३४॥

तदभावेन तत्साम्यं कस्मादत्र निगद्यते ।
मैवं व्यञ्जकतास्त्येव वर्णानां तत्पदं प्रति ॥ १३५ ॥

व्यक्तिरूपैरनेकैस्तैर्ध्वनिभिर्वर्णसंज्ञितैः ।
गोशब्दत्वादिसामान्यं व्य(ञ्ज ? ज्य)ते यत् पदं हि तत्

उत्क्षेपणक्षणैर्भिन्नैः क्रमिकैर्व्य(ञ्ज ? ज्य)ते यथा ।
उत्क्षेपणत्वसामान्यमेकं तद्वादिदं पदम् ॥ १३७ ॥

नैकैकस्माद् गकारादेर्गोशब्दत्वादि गृह्यते ।
अतो नास्त्येव सामान्यमिति चेत् सममेव तत् ॥ १३८॥

एकक्षणे प्रतीतेऽपि नोत्क्षेपत्वादि गृह्यते ।
इति त(त्रापि तन्न)स्यादिति नैकोऽत्र चोद्यते ॥१३९॥

प्रथमेन स्वतो व्यक्तमपि नैव प्रकाशते ।
भेदेनाकुञ्चनत्वादेरावृत्तौ तु प्रतीयते ॥ १४० ॥

इति चेत् पूर्ववर्णेन गोशब्दत्वं स्वरूपतः ।
व्यक्तं गगनशब्दत्वान्न भेदेनावभासते ॥ १४१ ॥

---

* 'व्यक्तिव्यञ्जकता' इति स्यादिति भाति ।

मध्यमोत्तमवर्णाभ्यां व्यक्त्यावृत्तौ प्रकाशते ।
तस्मादुत्क्षेपणत्वादिजातिर्येनाभ्युपेयते ॥ १४२ ॥

तेनेदमपि गोशब्दत्वादिसामान्यमिष्यताम् ।
युक्तितस्तादिह स्फोटः स शब्दो नोऽर्थवाचकः ॥१४३॥

इत्थं चोत्क्षेपणत्वादिप्रतिबन्ध्या समर्थितः ।
जातिस्फोटस्ततः स्पष्टं व्यक्तिस्फोटः समर्थ्यते ॥

असत्यपदवर्णादिभेदं निर्गुणमक्रमम् ।
नादाभिव्यङ्ग्यमपरे शब्दतत्त्वं प्रचक्षते ॥ १४५ ॥

तत्र यत् क्रमिकानेकवर्णाकारावभासनम् ।
व्यञ्जकध्वनिधर्मानुविधानात् तन्न वास्तवम् ॥१४६॥

निरंशेष्वपि वर्णेषु यथा सन्ध्यक्षरादिषु ।
अकारादिभ्रमस्तद्वद् गकारादिभ्रमः पदे ॥ १४७ ॥

अतोऽत्र वर्णेऽवयवाः पदे वर्णाः पदान्यपि ।
वाक्ये तानि महावाक्ये नैव सन्ति स्वरूपतः ॥ १४८ ॥

वर्णेऽवयवधीर्वाक्ये पदधीर्वर्णधीः पदे ।
सङ्कीर्णाकारशक्तित्वाद् व्यञ्जकानामयं भ्रमः ॥१४९॥

जनयन्तो विपर्यासं व्यञ्जयन्त्यखिलं पदम् ।
ध्वनयः स्थानसाम्यादेः सदृशं तत् परस्परम् ॥१५०॥

प्राकृता वैकृताश्चेति ध्वनयो द्विविधा मताः ।
प्राकृता नाम ते तत्र स्फोटात्मा यैः प्रतीयते ॥१५१॥

प्रतीतस्य तु तस्यैव चिरकालमवस्थितिः ।
यैरेते वैकृता नादास्तत्कालाद्वृत्तयो मताः ॥ १५२ ॥

प्राकृतध्वनिकालोऽयं स्फोटात्मन्युपचर्यते ।
मात्राकालादिरूपेण नेतरस्तूपचर्यते ॥ १५३ ॥

तत्र केचन नादानां स्फोटाभिन्नत्वमूचिरे ।
असंवेद्यत्वमितरे स्वातन्त्र्यं मेनिरे परे ॥ १५४ ॥

इन्द्रियस्यैव संस्कारो नादैरिति परे जगुः ।
विषयस्येति कतिचिदपरे तूभयोरिति ॥ १५५ ॥

ननु भ्रमनिमित्तत्वं नादानां नोपपद्यते ।
तेषां तत्त्वपरिच्छेदनिमित्तत्वादसम्भवात् ॥ १५६ ॥

न चास्ति नियतिर्भ्रान्तेर्नैकरूप्यं च दृश्यते ।
न विपर्ययराहित्यं न क्रमस्तद्भ्रमः कथम् ॥ १५७ ॥

उच्यते सम्भवत्येव नादानां भ्रमहेतुता ।
शब्दतत्त्वपरिच्छेदहेतुत्वे सत्यपि स्फुटम् ॥ १५८ ॥

यथा दूरे हि दृश्यन्ते तरवः करिरूपिणः ।
(पूर्वं पश्चाच्च)तत्रस्थैस्त एव तरुरूपिणः ॥ १५९ ॥

दर्शनाहितसंस्कारक्रमादेवामिहापि ते ।
नादास्तत्त्वपरिच्छेदे विपर्यासेऽपि कारिणः (?) ॥ १६० ॥

स्थानादिसाम्यसम्पन्नसादृश्या ये परस्परम् ।
नादास्तेषामभिव्यक्तिहेतुत्वेऽङ्गीकृते सति ॥ १६१ ॥

व्यञ्जकान्तरसादृश्यनियमाद् व्यञ्जकस्य हि ।
सर्वत्र सर्वदा भ्रान्तिरपि युक्तिमती भवेत् ॥ १६२ ॥

नियतक्रमयोगित्वं विपर्यासस्य युज्यते ।
यतस्तद्धेतुभूतानां नियतक्रमयोगिता ॥ १६३ ॥

सर्वेषां प्रतिवक्तृणामेकरूपतया भ्रमः ।
ऐकरूप्येण तद्धेतुभूतानामिह युज्यते ॥ १६४ ॥

यद्विपर्ययराहित्याद् भ्रमो नायमितीरितम् ।
तन्न युक्तं यतोऽस्त्येव युक्तितोऽत्र विपर्ययः ॥ १६५ ॥

अनेकवर्णग्रहणसमनन्तरभाविनी ।
यस्मादुदेति सर्वेषामेकं पदमितीह धीः ॥ १६६ ॥

अतोऽस्ति बाधकज्ञानमिति नानात्वधीभ्रमः ।
स्यादेतदिह नानात्वविरोधित्वं न युज्यते ॥ १६७ ॥

एकत्वबुद्धेर्यस्मात् सा भेदरक्ता भवेत् स्वयम् ।
अविरोधे तु नास्त्येव बाध्यबाधकता तयोः ॥ १६८ ॥

तस्माद् भेदं निराकर्तुं न क्षमैकत्वधीरिति ।
असदेतद्यथा लोके वदनं दर्पणादिषु ॥ १६९ ॥

अनेकभेदसम्भिन्नं गम्यमानमपि स्फुटम् ।
एकत्वाद्वस्तुतस्तस्य स्वतो भेदविरोधतः ॥ १७० ॥

निरस्तनिखिलानेकभेदमेकं प्रतीयते ।
दीपादिभेदानुगमेऽप्ययमेकः प्रतीयते ॥ १७१ ॥

यथा च त्वन्मते वर्णः प्रत्यभिज्ञाबलात् स्फुटम् ।
तथेदमपि वाक्तत्त्वं भेदरक्तमपि स्फुटम् ॥ १७२ ॥

स्वप्रत्ययावगम्यैकमभिन्नमवसीयते ।
इत्येवं गलिताशेषभेदोऽनवयवः स्फुटम् ॥ १७३ ॥

अनेकध्वन्यभिव्यङ्ग्यो व्यक्तिस्फोटः समर्थितः ।
ननु नादैरभिव्यक्तिः स्फोटस्येति न युज्यते ॥ १७४ ॥

वर्णैरिहाभिधेयस्य क्रमिकत्वादिसाम्यतः ।
मैवं नादैरभिव्यक्तिस्तस्य प्रत्येकमिष्यते ॥ १७५ ॥

स्फोटस्याविकलं तेन न दोषः क्रमवत्तया ।
पूर्वध्वनिकृता व्यक्तपरिच्छेदपरम्परा ॥ १७६ ॥

उत्तरव्यक्ततद्व्यक्तिजन्मानुगुणभावनाः ।
भावयत्यन्तिमः पूर्वभावनासहितो ध्वनिः ॥ १७७ ॥

अभिव्यक्ततरं स्फोटं प्रतिपत्तुः प्रकाशयेत् ।
यथा परीक्षमाणानां रत्नतत्त्वं प्रयत्नतः ॥ १७८ ॥

अस्पष्टप्रत्ययाधेयसंस्कारसहितेऽन्तिमे ।
प्रत्यये प्रतिभाति प्रागप्रकाशितमेव तत् ॥ १७९ ॥

तथैवान्तिमबुद्धौ स्यात् स्फोटव्यक्तिरपि स्फुटा।
इतरध्वनिवैयर्थ्यमेवं सति निराकृतम् ॥ १८० ॥

संस्कारोऽप्यत्र नापूर्वः कल्पितादन्यः समाश्रितः ।
ननु ध्वनिभिरव्यक्तव्यक्तिरत्र कथं भवेत् ॥ १८१ ॥

यतोऽनवयवः स्फोटो भवद्भिः परिकल्पितः ।
यद्धि सावयवं वस्तु तदव्यक्तं प्रतीयते ॥ १८२ ॥

स्थूलसूक्ष्मांशभेदेन निरंशं न तथा पदम् ।
मैवमव्यक्तता नाम ज्ञाताज्ञातत्वलक्षणा ॥ १८३ ॥

तस्याः सावयवत्वेन नोपयोगो मनागपि ।
ज्ञातावयवभागेन ज्ञातत्वं वस्तुनो भवेत् ॥ १८४ ॥

अज्ञातावयवद्वारमज्ञातत्वं च युज्यते ।
इत्येवमुपयोगः स्यादिति चेत् तन्न सुन्दरम् ॥ १८५ ॥

ज्ञातावयवभागस्य ज्ञातत्वमिह केवलम् ।
अज्ञातावयवांशस्याप्यज्ञातत्वं परं भवेत् ॥ १८६ ॥

अव्यक्तत्वमतो नास्ति वस्तुतोऽवयवेष्वपि ।
अतोऽवयविनः कस्मात् तद्द्वारा तत् समर्थ्यते ॥

सत्यमव्यक्तता तेषां प्रत्येकं न निरूप्यते ।
किन्तु सा सम्भवत्येव सहितानामतो भवेत् ॥

सैषा सावयवस्यापि तद्द्वारा वस्तुनः स्फुटम् ।
इति यत् कैश्चिदुदितं विकल्पं सहते न तत् ॥ १८९ ॥

भवत्ववयवेष्वेवमव्यक्तत्वं कथञ्चन ।
तथाप्यत्रावयविनस्तद्द्वारा तन्न युज्यते ॥ १९० ॥

तद्द्वारता तदुत्पत्त्या तदध्यासेन वा भवेत् ।
तत्र पूर्वस्तदुत्पत्तिपक्षो नैवोपपद्यते ॥ १९१ ॥

ज्ञातेभ्योऽविदितेभ्योऽपि तेभ्यश्चोत्पत्त्यसम्भवात् ।
विदितावयवद्वारा ज्ञाततोत्पत्तिरस्तु वा ॥ १९२ ॥

तथाप्यज्ञाततोत्पत्तिरज्ञातेभ्यो न युज्यते ।
अज्ञातता हि ज्ञानस्य प्रागभावात्मिका मता॥१९३॥

प्रागभावस्य नोत्पत्तिः क्वचिदप्युपपद्यते ।
किञ्च स्वबाधके ज्ञाने जातेऽप्यज्ञातता कथम्॥१९४॥

क्षमा तेन सह स्थातुमसावौत्सर्गिकी सती ।
ज्ञातांशहेतुके ज्ञाने जातेऽप्यन्यांशहेतुकम् ॥ १९५॥

ज्ञानं च जायते तस्मात् तयोर्युक्ता सहस्थितिः ।
इति चेत् तर्हि सर्वत्र धारावाहिकसंविदाम् ॥१९६॥

आद्यया वस्तुषु ज्ञातेष्वन्याभिस्तदवेदनात् ।
अस्फुटत्वं प्रसज्येत ज्ञाताज्ञातत्वलक्षणम् ॥ १९७ ॥

एवं यस्मात् तदुत्पत्तिर्नाव्यक्तत्वस्य सिध्यति ।
ततस्तस्य तदुत्पत्त्या तद्द्वारत्वं निराकृतम् ॥ १९८ ॥

एवमध्यासपक्षेऽपि तद्द्वारत्वं न सिध्यति ।
आरोप्यारोपविषयज्ञानेनाध्यास इष्यते ॥ १९९ ॥

तथाच ज्ञाततताध्यासो ज्ञानाभावान्न सम्भवी ।
यत एवं तदुत्पत्तिस्तदध्यासोऽप्यसङ्गतः ॥ २०० ॥

अतोऽत्रावयवित्वेन नोपयोग इति स्थितम् ।
अतोऽनवयवस्यापि वस्तुनो व्यक्तता भवेत् ॥२०१॥

तेन ध्वनिभिरव्यक्तपरिच्छेदस्य सम्भवात् ।
निरंशनिर्गुणाध्येतस्फोटव्यक्तिः समर्थिता ॥ २०२ ॥

नन्वेवं वर्णजन्याभिरस्पष्टव्यक्तिभिः क्रमात् ।
अस्त्वर्थधीरिति प्राप्ते समाधिरभिधीयते ॥ २०३ ॥

इन्द्रियाधीनबुद्धेरेवास्पष्टस्पष्टरूपता ।
लिङ्गशब्दाद्यधीनाया न बुद्धेर्निश्चितैव सा ॥ २०४ ॥

स्फोटधीरिन्द्रियाधीना शब्दाधीनाभिधेयधीः ।
अस्फुटा स्फोटधीरेव नार्थधीरिति तत् स्थितम् ॥

अथ बुद्ध्यनुसंहारमन्तस्तत्त्वं प्रचक्षते ।
भागैः प्रकाशितं शब्दमपरे तत्त्वदर्शिनः ॥ २०६ ॥

नन्वत्र जातिव्यक्त्यन्तस्तत्त्वदर्शनभेदतः ।
अनेकधा कल्पितत्वाद् दर्शनस्यानवस्थितिः ॥ २०७ ॥

मैवं त्रयाणामेतेषां दर्शनानामुपक्रमे ।
भेदेऽपि नोपसंहारे भेदलेशोऽपि दृश्यते ॥ २०८ ॥

श्रोतॄणां रुचिवैचित्र्याद् भेदेनैव क्रमः कृतः ।
अन्ततस्त्वेकमेवेदं दर्शनं वस्तुतः स्थितम् ॥ २०९ ॥

अपिचोतत्व इत्यादेरागमादपि गम्यते ।
वर्णातिरिक्तमेवेदं शब्दतत्त्वमिति स्फुटम् ॥ २१० ॥

उतत्व इति मन्त्रस्य ह्ययमर्थः प्रतीयते ।
स्वविवर्तमहीशैलसमुद्राद्यात्मना स्थिताम् ॥ २११ ॥

पश्यन्नपि पुमान् वाचं कश्चिन्नैव ददर्श ताम् ।
इयं मही अयं शैलः समुद्रोऽयमिति भ्रमन् ॥ २१२ ॥

अहं पश्यामि वाक्तत्त्वमित्येवं नावगच्छति ।
किन्त्वन्यदेव पश्यामीत्येवमेवाभिमन्यते ॥ २१३ ॥

तेनात्र वाग्विवर्तत्वात् सर्वस्यैव हि वस्तुनः ।
तत् पश्यन् वाचमेवासौ स्वतः पश्यति यद्यपि ॥

तथापि तत्तयाज्ञानात् फलतो न ददर्श ताम् ।
तथा रज्जुं पुमान् कश्चित् सर्पाकारतया स्थिताम् ॥

पश्यन्नप्यन्यथाख्यातिविप्रलब्धतया तदा ।
अयं सर्पः पुरो मेऽत्र वसतीति परिभ्रमन् ॥ २१६ ॥

रज्जुं रज्जुतयाजानन् फलतो नैव पश्यति ।
तद्वद् वाचमपीत्येवमाद्यस्यार्थः प्रदर्शितः ॥ २१७ ॥

तथा कश्चित् पुमान् वाचं ब्रुवाणामर्थमञ्जसा ।
पूर्वध्वनिकृताव्यक्तज्ञानसंस्कारसङ्गतैः ॥ २१८ ॥

उत्तरध्वनिभिस्तैस्तैः क्रमेण स्फुटतामिताम् ।
पदमेकं वाक्यमेकं महावाक्यमिदं तथा ॥ २१९ ॥

इत्येवमादिरूपेण शृण्वन्नप्यन्यथा भ्रमन् ।
व्यञ्जकारोपितैर्भेदक्रमच्छेदैः प्रतारितः ॥ २२० ॥

व्यवहारोपयोगित्वाद् वाचं वर्णादिरूपिणीम् ।
ब्रुवाणस्योपवर्षस्याप्यजानन्नञ्जसा मतम् ॥ २२१ ॥

तामेनामवजानीते फलतो न शृणोति तत् ।
इति द्वितीयपादार्थस्तृतीयार्थोऽथ वर्ण्यते ॥ २२२ ॥

ननु वर्णस्वरूपस्य देशे काले नरेषु वा ।
बाधाभावात् क्वचिच्चापि वाचं वर्णस्वरूपिणीम् ॥

शृण्वन् नैव शृणोतीति वादितुं शक्यते कथम् ।
इत्याशङ्क्य क्वचिद् बाधामाह तस्य नरान्तरे ॥२२४ ॥

उतो इत्यादिना (त?)स्याङ्घ्रेस्तृतीयस्येति सङ्गतिः ।
अप्यन्यस्मै तथा वाणी पुरुषाय महात्मने ॥ २२५ ॥

शब्दशास्त्रपरिज्ञानजातसंस्कारशालिने ।
योगाभ्यासविशुद्धान्तःकरणायात्मवेदिने ॥ २२६ ॥

वर्णादिभ्रमसंछन्नां तद्भ्रमापनयेन ताम् ।
तात्त्विकीं तनुमात्मीयां स्फुटं विवृणुते स्वयम् ॥

इत्थं तृतीयपादार्थस्तुरीयार्थोऽथ कथ्यते ।
अर्थस्याभिहितस्याह जायेवेत्यादिनोपमाम् ॥ २२८ ॥

इति सङ्गतिरस्यार्थः कथ्यते तदनु स्फुटम् ।
यथा खल्वङ्गना काचिदृतुस्नाता रजोहतम् ॥ २२९ ॥

अपास्य प्राक्तनं वासः परिधाय मनोहरम् ।
वासोऽन्यत् प्रणयोत्कर्षक्रमादपगतत्रपा ॥ २०३ ॥

शनैः शनैः स्रंसमाने तस्मिन्नपि च वाससि ।
भृशं कामयमाना सा कन्दर्पशरपीडिता ॥ २३१ ॥

रिरंसुरखिला स्वीयां तनुं विवृणुते स्फुटम्।
पत्ये तद्वदियं वाणी शाब्दिकाय महात्मने ॥२३२॥

शब्दशास्त्रमहातीर्थस्नानपूता शुभा सती।
अपनीतापशब्दाख्यदुष्टाच्छादनबन्धुरा ॥ २३३ ॥

प्रयोगादृतसद्वर्णशोभनाच्छादनान्विता।
योगाभ्यासमयप्रेमश्लथदान्ध्यमयत्रपा ॥ २३४ ॥

वर्णाकारविपर्यासवसनेऽपि शनैःशनैः।
स्रंसमाने परामेकां तनुं विवृणुते निजाम् ॥ २३५ ॥

इत्येवं तुर्यपादार्थो मन्त्रस्यास्य निरूपितः।
पश्यन्निति पदेनात्र चक्षुर्ग्राह्यत्वमीरितम् ॥ २३६ ॥

वाचस्तद्वाग्विवर्तत्वं विना नैवोपपद्यते।
वस्तुनो दृश्यमानस्य तेन मन्यामहे वयम् ॥ २३७ ॥

प्रपञ्चो वाग्विवर्तोऽयं दृश्यमान इति स्फुटम्।
शृण्वन् न च शृणोतीति श्रवणाश्रवणे श्रुते ॥२३८॥

वाचस्ते सविपर्यासनिर्विपर्यासरूपताम्।
विना नैवोपपद्येते कल्पयामस्ततो वयम् ॥ २३९ ॥

वर्णाकारविपर्यासरूषिता वागिति स्फुटम्।
तनुं विवृणुतेऽन्यस्मायित्येतदपि यद्वचः ॥ २४० ॥

तदप्यावेदयत्येव वाचं वर्णातिरेकिणीम् ।
वर्णरूपा तनुर्येषां वाचः सा विवृता स्फुटम् ॥२४१॥

सर्वेभ्यः प्रतिवक्तृभ्य इति नैषा तनुर्मता ।
तन्वं विसस्र इत्यत्र वाचं तां निर्णयामहे ॥ २४२ ॥

वर्णातिरेकिणी वाणीत्यनवद्यं ततोऽखिलम् ॥२४२½॥

इति विगलितदोषः स्फोटवादः स्थितोऽसा-
विह खलु परगीतो वर्णवादः परास्तः ।
अभिमतपरबुद्धेश्चार्थबुद्धेरयोगा-
च्छ्रुतिवचनविरोधात् तच्चयानुग्रहाच्च ॥ २४३ ॥

स्फोटसिद्ध्युदितन्यायदिगेषा दर्शिता मया ।
पद्यबन्धेन बालानामवबोधाय केवलम् ॥ २४४ ॥

निशाचरतमोलीनजगदुन्मेषहेतवे ।
जानकीजानये तस्मै तेजसां निधये नमः ॥२४५½॥

इति स्फोटसिद्धिन्यायविचारः समाप्तः ।

शुभं भूयात् ।

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Śrî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalilâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalilâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna.	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nilakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvati	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nilakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mimâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I, 1 & 2 Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I, 1 & 2 Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II, 3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III, 4th, 5th & 6th Kândas)	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries. Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dipaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopinâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III, 6th, 7th & 8th Sargas)	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with the commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatiya Sarvânanda (Part I, 1st Kânda)	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Sri Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Sri Sankara Bhagavat Pada	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and Tikasarvaswa of Vandyaghatiya-Sarvananda (Part II, 2nd Kanda 1-6 Vargas)	2	8	0

	Rs.	As.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Sri Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya)	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nilakantha Dikshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvati. (Part I)	1	12	0
No. 48— Do. Do. (Part II)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpala.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tikâsarvaswa of Vandyaghatiya Sarvananda (Part III, 2nd Kanda 7–10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikâsarvaswa of Vandyaghatiya Sarvananda (Part IV, 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedanta) by Prakasatmayatindra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyakarana)	0	4	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

00141658

Due Date
25 OCT 1973

(HK)

Digitized with financial assistance from

Hemendra Kothari

on 06 November, 2019